कक्षा
12

# व्याकरणशास्त्रम्

(द्वितीयो भागः)

## वरिष्ठोपाध्यायः

कक्षा 12
व्याकरणशास्त्रम् (द्वितीयो भागः)

# अथ हलन्तपुँल्लिङ्गप्रकरणम्

**३२४. हो ढः ८/२/३१।।**

हस्य ढः स्याज्झलि पदान्ते च।

**'हल्ङ्याप्-' ( सू.२५२ )** इति सुलोपः, पदान्तत्वाद्हस्य ढः, जश्त्वचर्त्वे- लिट्, लिड्। लिहौ। लिहः। लिहम्। लिहौ। लिहः। लिहा। लिड्भ्यामित्यादि लिट्त्सु, लिट्सु।

**सरलार्थः**- हकारस्य स्थाने ढकारः भवति झलि परे तथा च पदान्ते। झलि इत्यस्य उदाहरणानि सोढा वोढा इत्यादीनि।

**उदाहरणानि** - लिट्-लिड्, लिहौ, लिहः। लिहम् लिहौ लिहः। लिहा लिड्भ्याम् इत्यादीनि।

## लिह् ( आस्वादने ) शब्दस्य रूपाणि

| | | | |
|---|---|---|---|
| प्रथमा | लिट्-लिड् | लिहौ | लिहः |
| द्वितीया | लिहम् | लिहौ | लिहः |
| तृतीया | लिहा | लिड्भ्याम् | लिड्भि. |
| चतुर्थी | लिहे | लिड्भ्याम् | लिड्भ्यः |
| पञ्चमी | लिहः | लिड्भ्याम् | लिड्भ्यः |
| षष्ठी | लिहः | लिहोः | लिहाम् |
| सप्तमी | लिहि | लिहोः | लिट्त्सु-लिट्सु |
| **सम्बोधनम्** - | हे लिट्-लिड्! | हे लिहौ! | हे लिहः! |

**रूपलेखनप्रकारः- लिट्-लिड्** = ''लिह आस्वादने'' क्विप् प्रत्यये। क्विप्प्रत्ययस्य सर्वापहारिलोपे ('हलऽन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञा भवति, 'लशक्वतद्धिते' इति सूत्रेण ककारस्य इत्संज्ञा भवति, ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण इकारस्य इत्संज्ञा भवति, ''तस्य लोपः'' इति सूत्रेण पकारस्य, ककारस्य इकारस्य च लोपे, ''अपृक्त एकाल्प्रत्ययः'' इति सूत्रेण वकारस्य अपृक्तसंज्ञा भवति, ''वेरपृक्तस्य'' इति सूत्रेण वकारस्य लोपे) लिह् इत्यस्य ''कृत्तद्धितसमासाश्च'' इत्यनेन प्रातिपदिकसंज्ञायाम्, प्रथमाया एकवचने सु विभक्तौ अनुबन्धलोपे ''हल्ङयाब्भ्यो दीर्घात्सुतिस्याऽपृक्तं हल्'' इत्यनेन सलोपे, ''होढः'' इति हस्य ढत्वे, ''झलां जशोऽन्ते'' इति जश्त्वे डकारे, ''वाऽवसाने'' इति विकल्पेन चर्त्वे, 'लिट्' इति सिद्धम्। चर्त्वाभावे लिड् इति।

लिहम्, लिहौ, लिहः- द्वितीयाविभक्तौ रूपाणि भवन्ति। लिहा, लिड्भ्याम्, लिड्भिः तृतीयाविभक्तौ रूपाणि भवन्ति।

| | | |
|---|---|---|
| चतुर्थीविभक्तौ | = | लिह् + ङे = लिहे। |
| | | लिह् + भ्याम् = लिड्भ्याम्। |
| | | लिह् + भ्यस् = लिड्भ्यः। |
| पञ्चमीविभक्तौ | = | लिह् + ङसि = लिहः। |
| | | लिह् + भ्याम् = लिड्भ्याम्। |
| | | लिह् + भ्यम् = लिड्भ्यः। |
| षष्ठीविभक्तौ | = | लिह् + ङस् = लिहः। |
| | | लिह् + ओस् = लिहोः। |
| | | लिह् + आम् = लिहाम्। |
| सप्तमीविभक्तौ | = | लिह् + ङि = लिहि। |

लिह् + ओस् = लिहो:।
लिह् + सुप् = लिट्त्सु-लिट्सु।

सम्बोधनविभक्तौ = लिह् + सु = हे लिट्-लिड्!
लिह् + औ = हे लिहौ!
लिह् + जस् - हे लिह:!

**रूपलेखनप्रकार:- लिट्त्सु - लिट्सु** = क्विप्प्रत्ययत्वात् लिह्शब्दात् प्रातिपदिकसंज्ञायाम्, सप्तमीबहुवचने सुप्प्रत्यये, 'लिह् + सुप्' इत्यवस्थायाम्, ''होढ:'' इति सूत्रेण हकारस्य स्थाने ढकारे, ''झलां जशोऽन्ते'' इति सूत्रेण जश्त्वे, 'ड: सि धुट्'' इति सूत्रेण विकल्पेन धुडागमेऽनुबन्धलोपे, ''लिड् + ध् + सु'' इति स्थितौ, ''खरि च'' इति सूत्रेण धकारस्य स्थाने तकारे, डकारस्य च स्थाने टकारे, वर्ण सम्मेलने च ''लिट्त्सु'' इति प्रथमं रूपं सिद्धं भवति। पक्षे- धुडागमाभावे ''लिट्सु'' इति द्वितीयं रूपं सिद्धं भवति।

### ३२५. दादेर्धातोर्घः ८/२/३२।।

उपदेशे दादेर्धातोर्हस्य घ: स्याज्झलि पदान्ते च। उपदेशे किम्? अधोग् इत्यत्र यथा स्यात्, दामलिहमामन इच्छति दामलिह्यति, तत: क्विपि दामलिट्। अत्र मा भूत्।

दादेर्धातोर्घ: - विधिसूत्रम्। **पदच्छेद:** दादे:, धातो:, घ:।

**अनुवृत्ति: -** ''होढ:'' इत्यतो ह, ''झलो झलि'' इत्यतो झलि इत्यनुवर्तते 'पदस्य' इति सूत्रस्याधिकार:।

**सूत्रार्थ: -** झलि परे तथा च पदान्ते उपदेशे यो दकारादि: धातु: तस्य हकारस्य स्थाने घकारादेश: स्यात्। उपदेशे किम्? अधोक् इत्यत्र यथा स्यात्। दामलिहमात्मान इच्छति दामलिह्यति, तत: क्विपि दामलिट्, अत्र मा भूत्।

अत्र दीक्षितमहोदयस्य प्रयोजनद्वयमस्ति यत् 'अधोक्' इत्यत्र घत्वप्रवृत्ति: तथा च ''दामलिट्'' इत्यत्र धत्वनिवृत्ति:। अधोक् इति दुहप्रपूरणे धातो: लङ्लकारस्य रूपम्। अत: लङ्लकारे अडागमत्वात् अजादि: भवति परञ्च उपदेशे दकारादित्वात् घत्वप्रवृत्ति:। ''दामलिट्'' इत्यत्र दामन्पूर्वकं लिह आस्वादने धातुत्वात् 'दामलिह्यति' इति रूपं भवति तत्पश्चात् ''दामलिह्'' प्रातिपदिकत्वात् धातो: दकारादि: भवति परञ्च उपदेशे अदकारादित्वात् घत्वनिवृत्ति: भवति।

### ३२६. एकाचो बशो भष् झषन्तस्य स्ध्वो: ८/२/३७।।

धातोरवयवो य एकाज् झषन्तस्तदवयवस्य बश: स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च। एकाचो धातो:- इति सामानाधिकरण्येनान्वये त्विह न स्याद्गर्दभमाचष्टे गर्दभयति, तत: क्विप्, णिलोप:, गर्धप्। झलीति निवृत्तम्, स्ध्वोर्ग्रहणसामर्थ्यात्। तेनेह न- दुग्धम्। दोग्धा। व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भाव:, जश्त्वचर्त्वे, धुक्, धुग्। दुहौ। दुह:। षत्वचर्त्वे धुक्षु।

एकाचो बशो भष् झषन्तस्य स्ध्वो:। विधिसूत्रम्।

**पदच्छेद:** - एकाच:, बश:, भष्, झषन्तस्य, स्ध्वो:।

**अनुवृत्ति: -** ''दादेर्धातोर्घ:'' इत्यतो धातो: तथा च ''स्को: संयोगाद्योरन्ते च'' इत्यत: अन्ते इत्यनुवर्तते। 'पदस्य' इति सूत्रस्याधिकार:।

**सूत्रार्थ: -** सकारे ध्वशब्दे पदान्ते च परे धातो: अवयवो एकाज् झषन्तस्तदवयवस्य बश् स्थाने भष् स्यात्। एकाचो धातो: - इति सामानाधिकरण्येनान्वये त्विह न स्याद्- गर्दभमाचष्टे गर्दभयति, तत: क्विप्, णिलोप: गर्धप्।

**व्याख्या -** ''एकाचो बशो भष् झषन्तस्य स्ध्वो: अस्मिन् सूत्रे एकाच् झषन्तो यो धातु: तदवयवस्य बश: यष् इति सामानाधिकरण्यान्वयात् ''गर्दभम् आचष्टे'' इति विग्रहे णिचि, क्विपि, णिलोपे, तथा च क्विप: सर्वापहारिलोपत्वात्, सुलोपे, ''एकाचो-बशो....'' इत्यादिना सूत्रेण धस्य भत्वात् जश्त्वात् चर्त्वाच्च। गर्धप्, इति सिद्धं भवति परञ्च एतत्र

भविष्यति? यतोहि ''एकाचो झषन्तस्य धातोः' इति सामानाधिकरण्येनान्वये 'गदर्भ्' इति सुब्धातुः एकाच् नास्ति, अनेकाच् अस्ति अतः भष्भावो न। अतः वैयधिकरण्येनान्वयात् गर्धप्, इति रूपं भविष्यति।

झलीति निवृत्तम्, स्ध्वोर्ग्रहणसामर्थ्यात्। तेनेह न दुग्धम्। दोग्धा।

प्राचीनाचार्याणां मते झलि इति पदस्यानुवृतिः स्वीक्रियते परञ्च भट्टोजिदीक्षितमतानुसारं स्ध्वोर्ग्रहणसामर्थ्यात् 'झलि' इति पदस्य निवृत्तिः। ''दुह+क्त' इत्यत्र ''दादेर्धातोर्घः'' इत्यनेन धकारे, ''झषस्तथोर्धोऽधः'' इति सूत्रेण प्रत्ययस्थतकारस्य स्थाने धकारत्वात् 'दुघ्+ध' इत्यवस्थायाम्, 'झलि' इति पदस्य निवृत्तित्वात् भष्भावो न।

तथा च ''दुघ्'' इत्यत्र व्यपदेशिवद्भावेन घात्ववयवत्वाद् भष्भावः भवति। व्यपदेशः इत्युक्ते विशिष्टः अपदेशः मुख्यव्यवहारः।

**हकारान्त पुँल्लिङ्गे दुह् शब्दस्य रूपाणि**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्रथमा | धुक्-धुग् | दुहौ | दुहः |
| द्वितीया | दुहम् | दुहौ | दुहः |
| तृतीया | दुहा | धुग्भ्याम् | धुग्भिः |
| चतुर्थी | दुहे | धुग्भ्याम् | धुग्भ्यः |
| पञ्चमी | दुहः | धुग्भ्याम् | धुग्भ्यः |
| षष्ठी | दुहः | दुहोः | दुहाम् |
| सप्तमी | दुहि | दुहोः | धुक्षु |
| सम्बोधनं | हे धुक्-ग्! | हे दुहौ! | हे दुहः! |

**रूपलेखनप्रकारः- धुक्-धुग्**

''दुह प्रपूरणे धातोः क्विप्प्रत्यये, तस्य सर्वापहारि लोपे, दुह् प्रातिपदिकत्वात् प्रथमायाः एकवचने सुप्रत्यये, ''हल्ङ्याब्भ्योदीर्घात्सुतिस्याऽपृक्तं हल्'' इत्यनेन सुलोपे ''दादेर्धातोर्घः'' इति सूत्रेण हस्य घकारे, ''एकाचो बशो भष् झषन्तस्य स्ध्वोः'' इति सूत्रेण दकारस्य धकारे, ''झलां जशोऽन्ते'' इति सूत्रेण धकारस्य गकारे, 'धुग्' इत्यवस्थायाम्, ''वाऽवसाने'' इति सूत्रेण विकल्पेन चर्त्वे ककारे, ''धुक्'' इति रूपम्। चर्त्वाऽभावे ''धुग्'' इति सिद्धम्।

**३२७. वा द्रुहमुहष्णुहष्णिहाम् ८/२/३३।।**

एषां हस्य वा घः स्याज्झलि पदान्ते च। पक्षे ढः। ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्याम्-ध्रुड्भ्याम्। ध्रुक्षु, ध्रुट्त्सु ध्रुट्सु एवं मुहष्णुहष्णिहाम्।

वा द्रुहमुहष्णुहष्णिहाम् - विधिसूत्रम्।

**पदच्छेदः -** वा द्रुहमुहष्णुहष्णिहाम्।

**अनुवृत्तिः -** 'हो ढः'' इत्यतो हः, ''दादेर्धातोर्घः'' इत्यतो घः ''झलो झलि'' इति झलि तथा च ''स्कोः संयोगाद्योरन्ते च'' इति अन्ते इत्यनुवर्तन्ते। 'पदस्य' इति सूत्रस्याधिकारः।

**सूत्रार्थः -** द्रुहादीनां चतुर्णां हकारस्य विकल्पेन घादेशो भवति झलि परे तथा च पदान्ते। द्रुह्, मुह्, ष्णुह्, ष्णिह् एते चत्वारः धातवः सन्ति।

**रूपलेखनप्रकारः- ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड्**

द्रुह् धातोः क्विपि, तस्य सर्वापहारिलोपे, द्रुह् इत्यस्मात् प्रातिपदिकात् सुविभक्तौ, तस्य हल्ङ्यादिलोपे ''होढः'' इत्यनेन ढत्वं प्रबाध्य, नित्यघत्वमपि प्रबाध्य, ''वा द्रुहमुहष्णुहष्णिहाम्'' इत्यनेन विकल्पेन घकारे भष्भावेन दकारस्य धकारे, जश्त्वे, विकल्पेन चर्त्वे, ध्रुक्-ध्रुग् इति। घकाराभावपक्षे ढकारे ध्रुट्-ध्रुड्।

**रूपलेखनप्रकारः– ध्रुक्षु, ध्रुट्त्सु–ध्रुट्सु**

द्रुह्धातोः क्विपि, तस्य सर्वापहारिलोपे, द्रुह् इत्यस्मात् प्रातिपदिकात् सुप्विभक्तौ, अनुबन्धलोपे, ''वा द्रुहमुहष्णुहष्णिहाम्'' इत्यनेन विकल्पेन घकारे, ''एकाचो बशो भष झषन्तस्य स्ध्वोः'' इत्यनेन दस्य धत्वे, ''ध्रुघ् + सु'' इत्यवस्थायाम्, जश्त्वे, चर्त्वे, ''आदेश प्रत्यययोः'' इति षत्वे, ''कृष्संयोगे क्षः'' इति नियमात् क्षकारे, 'ध्रुक्षु' इति सिद्धम्। पक्षे–घकाराभावे वैकल्पिकधुडागमत्वात् ''ध्रुट्त्सु–ध्रुट्सु'' इति।

**विशेषः** – ष्णुह उद्गिरणे, ष्णिह प्रीतौ इत्यत्र ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति नियमस्य प्रवृत्तिः यदा निमित्तस्य नाशः तदा नैमित्तिकस्यापि नाशः भवति। ष्णुह, ष्णिह् अत्र षकारवर्णं निमित्तं स्वीकृत्य ''रषाभ्यां नो णः समानपदे'' इति णत्वादेशः भवति परञ्च ''धात्वादेः षः सः'' इति सूत्रेण यदा षस्य सत्त्वः भवति तदा निमित्तषकारस्य नाशत्वात् णकारस्यापि नाशो जायते। अर्थात् णकारस्य स्थाने स्वयमेव नकारः भवति।

### द्रुह्शब्दस्य रूपाणि

| | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ध्रुक्–ध्रुग्, ध्रुट्–ध्रुड् | द्रुहौ | द्रुहः |
| द्वितीया | द्रुहम् | द्रुहौ | द्रुहः |
| तृतीया | द्रुहा | ध्रुग्भ्याम्–ध्रुड्भ्याम् | ध्रुग्भिः, ध्रुड्भिः |
| चतुर्थी | द्रुहे | ध्रुग्भ्याम्–ध्रुड्भ्याम् | ध्रुग्भ्यः–ध्रुड्भ्यः |
| पञ्चमी | द्रुहः | ध्रुग्भ्याम्–ध्रुड्भ्याम् | ध्रुग्भ्यः–ध्रुड्भ्यः |
| षष्ठी | द्रुहः | द्रुहोः | द्रुहाम् |
| सप्तमी | द्रुहि | द्रुहोः | ध्रुक्षु, ध्रुट्त्सु–ध्रुट्सु |
| सम्बोधनं | हे ध्रुक्–ध्रुग्! हे ध्रुट्–ध्रुड्! | हे द्रुहौ! | हे द्रुहः। |

### ३२८. इग्यणः सम्प्रसारणम् १/१/४५।।

यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसञ्ज्ञः स्यात्।

इग्यणः सम्प्रसारणम्–**संज्ञासूत्रम्**

**पदच्छेदः** – इक्, यणः, सम्प्रसारणम्। यणः इति षष्ठी इक् इति प्रथमा। सम्प्रसारणम् इति सञ्ज्ञा।

**सूत्रार्थः** – यणः स्थाने य इक् विधीयते तस्य सम्प्रसारणसंज्ञा भवति। संम्प्रसारणसंज्ञा अन्वर्थसंज्ञा विद्यते। सम्प्रसारणम् इत्युक्ते विस्तारकरणम्। अत्र अर्धमात्रिकयण्प्रत्याहारवर्णेषु एकमात्रिक इक् वर्णानां विस्तारः भवति। अतः विस्तारणम् एव सम्प्रसारणम् इति नाम्ना विधीयते।

विश्ववाह्शब्दस्य निरूपणम्–वह प्रापणे धातोः 'विश्वं वहति' इत्यर्थे 'विश्व + अम्, वह्' इत्यवस्थायाम् 'वहश्च' इत्यनेन ण्विप्रत्यये, अनुबन्धलोपे, अपृक्तसंज्ञायां' वेरपृक्तस्य इत्यनेन वलोपे, ''अत उपधायाः'' इत्यनेन वृद्धौ, 'विश्वस्य वाह्' इत्यर्थे समासादिकार्यकारणात् 'विश्ववाह्' इति सिद्धम्।

### ३२९. वाह ऊठ् ६/४/१३२।।

भस्य वाहः सम्प्रसारणमूठ् स्यात्।

वाह ऊठ् – विधिसूत्रम्।

**पदच्छेदः** – वाहः, ऊठ्। वाहः षष्ठयन्तम्, ऊठ् प्रथमान्तम्।

**अनुवृत्तिः** – ''वसोः सम्प्रसारणम्'' इत्यनेन सम्प्रसारणम् इत्यनुवर्तते। 'भस्य' इत्यधिकारः।

**सूत्रार्थः** – भसञ्ज्ञकस्य 'वाह्' इति वस्य स्थाने ऊठ् सम्प्रसारणं भवेत्।

### ३३०. सम्प्रसारणाच्च ६/१/१०८।।

सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात्। '**एत्येधत्यूठ्सु**' ( **सू. ७३** )। विश्वौहः। विश्वौहेत्यादि। '**छन्दस्येव ण्विः**' इति पक्षे णिजन्ताद्विच्।

सम्प्रसारणाच्च-विधिसूत्रम्।

**पदच्छेदः**- सम्प्रसारणाात् च। सम्प्रसारणात् पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - 'इको यणचि' इत्यतो 'अचि' तथा च 'अमि पूर्वः' इत्यतः 'पूर्वः' इत्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यस्याधिकारः।

**सूत्रार्थः** - सम्प्रसारणादचि परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशः स्यात्। अत्र स्थानी द्विवर्णात्मकः विद्यते तथा च आदेशः एकवर्णात्मकः विद्यते अतः ''एकः पूर्वपरयोः'' इत्यनेन एकादेशः भवति।

**रूपलेखनप्रकारः**- **विश्वौहः**- विश्वं वाहयति इति विग्रहात् णिजन्ताद् वाहि धातोः विचि तस्य सर्वापहारिलोपे, णिलोपे विश्ववाह्शब्दस्य प्रातिपदिकसंज्ञायाम्, शसि, अनुबन्धलोपे, भसञ्ज्ञायां 'इग्यणः सम्प्रसारणम्' इत्यनेन सम्प्रसारण सञ्ज्ञायाम्, 'वाह ऊठ्' इति वकारस्य सम्प्रसारणमूठि, 'सम्प्रसारणाच्च' इति पूर्वरूपमेकादेशे, 'एत्येधत्यूठ्सु' इति वृद्धौ, सस्य रुत्वे विसर्गे च कृते, 'विश्वौहः' इति सिद्धम्।

#### ह शब्दस्य रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | विश्ववाट्-विश्ववाड् | विश्ववाहौ | विश्ववाहः |
| द्वितीया | विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| तृतीया | विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| चतुर्थी | विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| पञ्चमी | विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| षष्ठी | विश्वौहः | विश्वौहोः | विश्वौहाम् |
| सप्तमी | विश्वौहि | विश्वौहोः | विश्ववाट्सु-विश्ववाट्त्सु |
| सम्बोधन | हे विश्ववाट्! हे विश्ववाड्! | हे विश्ववाहौ! | हे विश्ववाहः |

**विशेषः** - 'छन्दस्येव ण्विः' इति पक्षे णिजन्ताद्विच्। विश्ववाहशब्दविषये शङ्का भवति यत् ण्विप्रत्ययस्य प्रयोगस्तु छन्दसि भवति तर्हि लौकिकप्रयोगे कः प्रत्ययः भवति? अस्याः शङ्कायाः समाधानमेतत् वर्तते यत् लौकिकप्रयोगे णिच्प्रत्ययः भवति। तत्पश्चात् विच्प्रत्ययः। विश्वं वाहयति इति विश्ववाह्। 'विश्व, वह् + णिच् + विच्' इत्यवस्थायाम्, उपधा वृद्धौ णेर्लोपे, विच्प्रत्ययस्य सर्वापहारिलोपत्वात्, 'विश्ववाह्' इति रूपस्य व्युत्पत्तिः ज्ञायते।

### ३३१. चतुरनडुहोरामुदात्तः ७/१/९८।।

अनयोराम् स्यात् सर्वनामस्थाने परे, स चोदात्तः।

चतुरनडुहोरामुदातः विधिसूत्रम् ।

**पदच्छेदः**- चतुरनडुहोः, आम्, उदात्तः।

**अनुवृत्तिः** - ''इतोऽत्सर्वनामस्थाने'' इत्यतः 'सर्वनामस्थाने' इत्यनुवर्तते।

**सूत्रार्थः** - सर्वनामस्थाने परे चतुर् शब्दस्य अनडुह् शब्दस्य च आमागमः स्यात्, स आगमः उदात्तश्च भवति। सर्वनामस्थानविभक्तयः सु, औ, जस्, अम्, औट् च भवन्ति।

### ३३२. सावनडुहः ७/१/८२।।

अस्य नुम् स्यात् सौ परे। 'आत्' इत्यधिकारादवर्णात्परोऽयं नुम्। अतो विशेषविहितेनापि नुमा आम् न बाध्यते। अमा च नुम् न बाध्यते। सोर्लोपः। नुम्विधिसामर्थ्याद् **'वसुस्रंसु-' (सू. ३३४)** इति दत्वं न। संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। अनड्वान्।

सावनडुहः - विधिसूत्रम्।

**पदच्छेदः-** सौ, अनडुहः। सौ सप्तम्यन्तम्, अनडुहः षष्ठ्यन्तम्।

**अनुवृत्तिः -** ''आच्छीनद्योर्नुम्'' इत्यतः आत्, नुम् चेत्यनुवर्तते।

**सूत्रार्थः -** अनडुह्शब्दस्य नुमागमो भवति सु प्रत्यये परे।

**रूपलेखनप्रकारः - अनड्वान्।**

अनडुह्शब्दात् प्रातिपदिकात् सौ, सर्वनामस्थानसंज्ञायाम्, ''चतुरनडहोरामुदात्तः'' इति सूत्रेण ''मिदचोऽन्त्यात्परः'' इति परिभाषासूत्रसहकारेण आमागमे, अनुबन्धलोपे, ''अनडु + आ +ह् + स्'' इत्यवस्थायाम्, ''सावनडुहः'' इत्यनेन नुमि, अनुबन्धलोपे, यणि, सलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन संयोगान्तहकारलोपे, ''अनड्वान्'' इति सिद्धम्।

**व्याख्या -** अनडुह् इत्यत्र आमागमस्य नुमागमस्य च युगपत्प्राप्तिः भवति परञ्च ''आच्छीनद्योर्नुम्'' इत्यनेन आकारस्य अनुवृत्तिकारणात् अनडुह्शब्दात् आमागमस्य पश्चादेव नुमागमः भवति। तथा च नुमागमेन आमागमस्य बाधोऽपि न भवति अर्थात् बाध्यबाधकभावः नास्ति। इत्थमेव अमागमोऽपि नुमागमस्य बाधकः न भवति।

नुम्विधिसामर्थ्याद् 'वसुस्रंसु-' इति दत्वं न। ''अनड्वान् + ह् + स्'' इत्यत्र सलोपानन्तरं 'वसुस्रंसु-' इत्यनेन हस्य दकारप्राप्ते, परञ्च नुम्विधिसामर्थ्याद् न दत्वम्।

संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। ''पूर्वत्रासिद्धम्'' इत्यनेन संयोगान्तलोपस्य असिद्धत्वात् पदान्ते नकारो न दृश्यते अतः ''न लोपः प्रातिपदिकान्तस्य'' इत्यनेन नलोपो न भवति।

### ३३३. अम् सम्बुद्धौ ७/१/९९॥

चतुरनडुहोरम् स्यात् सम्बुद्धौ।

आमोऽपवादः। हे अनड्वन्!। अनड्वाहौ। अनड्वाहः। अनडुहः। अनडुहा।

अम् सम्बुद्धौ-विधिसूत्रम्

**पदच्छेदः -** अम्, सम्बुद्धौ। अम् प्रथमान्तं, सम्बुद्धौ सप्तम्यन्तम्।

**अनुवृत्तिः -** ''चतुरनडुहोरामुदात्तः इत्यतः 'चतुरनडुहोः' इति पदस्य अनुवृत्तिः।

**सूत्रार्थः -** सम्बोधनस्य एकवचने परे अनडुह्शब्दस्य अमागमो भवति। एतत् सूत्रम् आमोऽपवादः।

हे अनड्वन्! अनडुह्शब्दात् प्रातिपदिकात् सम्बाधने सु प्रत्यये, ''चतुरनडुहोरामुदात्तः'' इति आमं प्रवाध्य ''अम् सम्बुद्धौ'' इत्यनेन ''मिदचोऽन्त्यात्परः'' इति सहकारेण अमागमे, यणि, नुमागमे, हल्ङ्यादिलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन संयोगान्तहलोपे, 'हे अनड्वन्' इति सिद्धम्।

### ३३४. वसुस्रंसुध्वंस्वनडुहां दः ८/२/७२॥

सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्यामित्यादि सान्त इति किम्? विद्वान्। पदान्त इति किम्? स्रस्तम्। ध्वस्तम्।

वसुस्रंसुध्वंस्वनडुहां दः - विधिसूत्रम्।

**पदच्छेदः -** वसुस्रंसुध्वंस्वनडुहां, दः। वसुश्च स्रंसुश्च ध्वंसुश्च अनडुह् च तेषामितरेतरयोगद्वन्द्वो। वसुस्रंसुध्वंस्वनडुहां षष्ठ्यन्तं, दः प्रथमान्तम्।

**अनुवृत्तिः -** ''ससजुषो रुः'' इत्यतः 'सः' ''स्कोः संयोगाद्योरन्ते च'' इत्यतः 'अन्ते' इति पदस्य अनुवृत्तिः।

**सूत्रार्थः** – सान्तवसुप्रत्ययान्तस्य स्रंसुशब्दस्य ध्वंसुशब्दस्य तथा च अनडुह्शब्दस्य दकारः स्यात् पदान्ते। ''अलोऽन्त्यस्य'' इति अन्त्यस्य स्थाने एव भवति।

**रूपलेखनप्रकारः**– **अनडुद्भ्याम्** – अनडुह्शब्दात् प्रातिपदिकात् भ्यामि ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम्, ''वसुस्रंसुध्वंस्वनडुहां दः'' इत्यनेन हस्य दकारे, 'अनडुद्भ्याम्' इति सिद्धम्।

सान्त इति किम्? विद्वान्।

'विद्वान्' इत्यत्र वसुप्रत्ययान्तत्वात् सान्त एव। परञ्च सु विभक्तौ 'विद्वान्' इति रूपं भवति तदा तु असान्तः शब्दः अतः सान्तकथनत्वात् दकारादेशः न भवति।

पदान्ते किम्? स्रस्तम्। ध्वस्तम् अपदान्ते मा भूत्। ''स्रस् + तम्'' ध्वस् + तम् इत्यत्र सकारः पदान्ते नास्ति अतः दकारादेशः न।

### ३३५. सहेः साडः सः ८/३/५६।।

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्। तुराषाट्, तुराषाड्। तुरासाहौ, तुरासाहः। तुराषाड्भ्यामित्यादि। तुरं सहते इत्यर्थे **'छन्दसि सहः'** **( सू. ३४०९ )** इति सूत्रेण ण्विः। लोके तु साहयतेः क्विप्। **'अन्येषामपि-' ( सू. ३५३९ )** पूर्वपदस्य दीर्घः। **इति हान्ताः।**

सहे साडः सः – विधिसूत्रम्।

**पदच्छेदः** – सहेः, साडः, सः। सहेः षष्ठ्यन्तं, साडः षष्ठ्यन्तं, सः प्रथमान्तम्।

**अनुवृत्तिः** – 'अपदान्तस्य मूर्धन्यः' इत्यतः 'मूर्धन्यः' इति पदस्यानुवृत्तिः।

**सूत्रार्थः** – साड्रूपप्राप्तस्य सह्धातोः सकारस्य स्थाने षकारः मूर्धन्यादेशो भवति।

तुराषाट् – तुराषाड्

तुरासाह् शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, ''होढः'' इत्यनेन ढकारे, जश्त्वे डकारे, ''सहेः साडः सः'' इत्यनेन सस्य षत्वे, विकल्पेन चर्त्वे, ''तुराषाट् तुराषाड्'' इति रूपद्वयं सिद्धम्।

**विशेषः** – तुरं सहते इत्यर्थे 'छन्दसि सहः' इति सूत्रेण ण्विः। लोके तु साहयतेः क्विप्। अन्येषामपि–पूर्वपदस्य दीर्घः।

वैदिकप्रयोगे ''तुरं सहते'' इति विग्रहात् सिध्यति। तुरपूर्वकात् षह मर्षणे धातोः ''धात्वादेः षः सः'' इत्यनेन सत्वे, ''छन्दसि सह'' इत्यनेन ण्विप्रत्यये, तस्य सर्वापहारिलोपे, णित्वात् ''अत उपधायाः'' इति उपधावृद्धौ, उपपदसमासादिकार्यत्वात् ''अन्येषामपि दृश्यते'' इत्यनेन पूर्वपदस्य दीर्घे, ''तुरासाह्'' इति सिध्यति।

लौकिकप्रयोगे तु सह्धातोः ''हेतुमति च'' इति णिच्प्रत्यये, तुरं साहयति इति विग्रहात् ''तुर + अम् साहि'' इत्यवस्थायां ''क्विप् च'' इत्यनेन क्विपि तस्य सर्वापहारिलोपे, ''णेरनिटि'' इत्यनेन णिलोपे, 'तुर + साह्' इत्यवस्थायां ''अन्येषामपि दृश्यते'' इत्यनेन पूर्वपदस्य दीर्घत्वात् ''तुरासाह्'' इति रूपं निष्पन्नम्।

### ३३६. दिव औत् ७/१/८४।।

दिविति प्रातिपदिकस्य औत् स्यात् सौ परे। अल्विधित्वेन स्थानिवत्त्वाभावाद् **'हल्ङ्याप्-' ( सू.२५२ )** इति सुलोपो न। सुद्यौः। सुदिवौ। सुदिवः। सुदिवम्। सुदिवौ।

दिव औत्– विधिसूत्रम्।

**पदच्छेदः** – दिवः, औत्। दिवः षष्ठ्यन्तम्, औत् प्रथमान्तम्।

**अनुवृत्तिः** – ''सावनडुहः'' इत्यतः सौ इत्यनुवर्तते।

**सूत्रार्थः** – दिव् इति प्रातिपदिकस्य स्थाने औकारादेशः भवति सुपरे। ''अलोऽन्त्यस्य'' इत्यनेन अन्त्यवकारस्य स्थाने भवति।

**रूपलेखनप्रकारः** – **सुद्यौः** – सुदिव्शब्दात् प्रातिपदिकात् सौप्रत्यये, ''दिव औत्'' इति ''अलोऽन्त्यस्य'' इति

सहकारेण वस्य स्थाने औ, यणि, सस्य रुत्वे विसर्गे च "सुद्यौः" इति सिद्धम्।

**व्याख्या –** अल्विधित्वेन स्थानिवत्त्वाभावाद् 'हल्ङ्याप्–' इति सुलोपो न। "सुदिव् + स्" इत्यत्र "दिव औत्" इति औकारादेशे, यणि, "सुद्यौ + स्" इत्यवस्थायाम्, औकाकादेशस्य स्थनिवद्भावत्वात् "हल्ङ्याब्भ्योदीर्घात् सुतिस्याऽपृक्तं हल्" इत्यनेन सलोपभवितुं नार्हति यतोहि हल्ङ्यादिलोपविधिः अलाश्रितविधिः विद्यते परञ्च अल्विधौ स्थानिवद्भावस्य निषेधः भवति।

## ३३७. दिव उत् ६/१/१३१।।

दिवोऽन्तादेश उकारः स्यात्पदान्ते। सुद्युभ्याम्। सुद्युभिः–इत्यादि। इति वान्ताः।

चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। चतुर्भ्यः।

दिव उत् – विधिसूत्रम्।

**पदच्छेदः –** दिवः, उत्। दिवः षष्ठ्यन्तं, उत् प्रथमान्तम्।

**अनुवृत्तिः –** "एङः पदान्तादति" इत्यतः पदान्ते इत्यनुवर्तते।

**सूत्रार्थः –** दिवः वकारस्य स्थाने उकारादेशो भवति पदान्ते।

सुद्युभ्याम् – सुदिव्शब्दात् प्रातिपदिकात् भ्यामि, पदसंज्ञायां "दिव उत्" इत्यनेन वकारस्य उकारे, यणि "सुद्युभ्याम्" इति सिद्धम्।

चत्वारः–चतुर्शब्दात् जसि, आमागमे, तथा च पूर्ववत्।

## ३३८. षट्चतुर्भ्यश्च ७/१/५५।।

षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्। णत्वम्, द्वित्वम्, चतुर्ण्णाम्।

षट् चतुर्भ्यश्च–विधिसूत्रम्।

**पदच्छेदः–** षट् चतुर्भ्यः, च। षट् च चत्वारश्च, षट्चत्वारस्तेषामितरेतरद्वन्द्वः। षट्चतुर्भ्यः पञ्चम्यन्तं, च अव्ययपदम्।

**अनुवृत्तिः –** "आमि सर्वनाम्नः सुट्" इत्यतः आमि तथा च "ह्रस्वनद्यापो नुट्" इत्यतः 'नुट्' इत्यस्य अनुवृत्तिः।

**सूत्रार्थः –** षट्संज्ञकेभ्यः तथा च चतुर्शब्दात् परो यः आम्प्रत्ययः तस्य नुडागमो भवति। नुटि टकार इत्, उकारः उच्चारणार्थः। "आद्यन्तौ टकितौ" इत्यनेन टित्वादादौ भवति।

चतुर्ण्णाम् – चतुर्णाम्

चतुर्शब्दात् प्रातिपदिकात् आमि "षट् चतुर्भ्यश्च" इति "आद्यन्तौ टकितौ" इति सहकारेण नुडागमे अनुबन्धलोपे, "रषाभ्यां नो णः समानपदे" इत्यनेन नस्य णत्वे, "अचो रहाभ्यां द्वे" इति विकल्पेन णस्य द्वित्वे, "चतुर्ण्णाम्–चतुर्णाम्" इति रूपद्वयं सिद्धम्।

**विशेषः –** "चतुर्णाम्" इत्यत्र नस्य णत्वादेशः, नकारस्य द्वित्वादेशः द्वयोः कार्ययोः युगपत् प्राप्तिः भवति, तदा किं कार्यं पूर्वं भवितव्यम्? अस्य प्रश्नस्य समाधानमेतत् यत् "रषाभ्यां नो णः समानपदे ८/४/१" इति सूत्रं पूर्वत्रिपादीसूत्रमस्ति। तथा च "अचो रहाभ्यां द्वे" ८/४/४६ इति सूत्रं परत्रिपादीसूत्रमस्ति, अतः "पूर्वत्रासिद्धम्" इत्यनेन परशास्त्रासिद्धत्वात् पूर्वं णत्वविधानं तथा च द्वित्वविधानं परकार्यं भविष्यति।

## ३३९. रोः सुपि ८/३/१६।।

सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य। षत्वम्। षत्य द्वित्वे प्राप्ते।

रोः सुपि – नियमसूत्रम्।

**पदच्छेदः –** रोः, सुपि। रोः षष्ठ्यन्तम्, सुपि सप्तम्यन्तम्।

**अनुवृत्तिः –** "खरवसानयोर्विसर्जनीयः" इत्यतः विसर्जनीयः इत्यनुवर्तते।

**सूत्रार्थः –** सप्तमीबहुवचने सुपि परे रोः रेफस्य एव विसर्गः अन्यरेफस्य स्थाने विसर्गो न भवति।

## ३४०. शरोऽचि ८/४/४९।।

अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः! प्रियचत्वारौ। प्रियचत्वारः। गौणत्वे तु नुट् नेष्यते–प्रियचतुराम्। प्राधान्ये तु स्यादेव। परमचतुर्णाम्। **इति रेफान्ताः।**

कमलं कमलां वा आचक्षाणः कमल्, कमलौ, कमलः। षत्वम्। कमल्षु। **इति लान्ताः।**

शरोऽचि–विधि (निषेध) सूत्रम्।

**पदच्छेदः –** शरः, अचि। शरः षष्ठ्यन्तम्, अचि सप्तम्यन्तम्।

**अनुवृत्तिः –** ''नादिन्याक्रोशे पुत्रस्य'' इत्यतः न तथा च अचो रहाभ्यां द्वे इत्यतः द्वे इत्यनुवर्तते।

**सूत्रार्थः –** अचि परे शरो द्वित्वं न भवति। यथा– चतुर्षु इति षस्य न द्वित्वम्। चतुर्शब्दो नित्यं बहुवचनान्तः।

चतुर्षु – चतुर्शब्दात् सप्तम्याः बहुवचने सुपि, अनुबन्धलोपे, ''खरवसानयोर्विसर्जनीयः'' इत्यनेन रस्य विसर्गप्राप्ते, परञ्च ''रोः सुपि'' इत्यनेन निषेधे, ''आदेश प्रत्यययोः'' इत्यनेन सस्य षत्वे, ''अचो रहाभ्यां द्वे'' इति षस्यद्वित्वप्राप्ते परञ्च शरोऽचि इत्यनेन निषेधे, ''चतुर्षु'' इति सिद्धम्।

**व्याख्या –** 'प्रियाः सन्ति चत्वारो यस्य' अस्मिन्नर्थे ''अनेकमन्यपदार्थे'' इत्यनेन बहुव्रीहिसमासे, प्रातिपदिकसंज्ञायाम्, सुपो लुकि, 'प्रियचतुर्' इति सिध्यति। ''पदाङ्गाधिकारे तस्य च तदन्तस्य च'' इति परिभाषया प्रियचतुर्शब्दात् ''चतुरनडुहोरामुदातः'' इति आमागमे, यणि, सुलोपे, रस्य विसर्गे, ''प्रियचत्वाः'' इति सिद्धम्। प्रियचतुर्शब्दो नित्यं त्रिवचनान्तः।

गौणत्वे तु नुट् नेष्यते। प्रियचतुराम्।

बहुव्रीहिसमासे चतुर्शब्दस्य गौणताकारणात् ''षट्चतुर्भ्यश्च'' इत्यनेन नुडागमस्य अप्रवृत्तिः। नुडागमस्य प्रवृत्तिस्तु प्राधान्यादेव भवति। प्राधान्ये तु स्यादेव। परमचतुर्णाम्। कर्मधारयसमासे चतुर्शब्दस्य प्राधान्ये नुडागमस्य प्रवृत्तिः भवति। तदा ''षट् चतुर्भ्यश्च'' इत्यनेन नुडागमे, णत्वे, विकल्पेन चर्त्वे ''परमचतुर्ण्णाम्' 'परमचतुर्णाम्' इति रूपद्वयं सिध्यति।

**रूपलेखनप्रकारः –** कमलं कमलां वा आचक्षाणः कमल्, कमलौ, कमलः। कमल्षु। कमलमाचष्टे, कमलामाचष्टे, अस्मिन्नर्थे 'कमल + अम्, कमला + अम्'' तत्करोति तदाचष्टे गणसूत्रेण णिच्प्रत्यये, धातुसंज्ञायाम्, सुपो लुकि, ''प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च'' वार्तिकेन इष्टवद्भावे, टिलोपे, क्विप्रत्यये, तस्य सर्वापहारिलोपे, स्वादिकार्ये, कमल् इति सिध्यति।

## ३४१. मो नो धातोः ८/२/६४।।

मान्तस्य धातोर्नः स्यात् पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न। प्रशाम्यतीति प्रशान्। प्रशामौ। प्रशामः। प्रशान्भ्यामित्यादि।

मोनो धातोः–विधिसूत्रम्।

**पदच्छेदः –** मः, नः। धातोः। मः षष्ठ्यन्तं, नः प्रथमान्तं धातोः षष्ठ्यन्तम्।

**अनुवृत्तिः –** ''स्कोः संयोगाद्योरन्ते च'' इत्यतः अन्ते इत्यनुवर्तते।

**सूत्रार्थः –** मान्तस्य धातोः नकारादेशः स्यात् पदान्ते। प्रशाम्यतीति–प्रशान्, प्रशामौ, प्रशाम्ः, प्रशान्भ्याम्।

**रूपलेखनप्रकारः – प्रशान् –** प्रशाम्यति इति विग्रहात् क्विपि, तस्य सर्वापहारिलोपे, उपधादीर्घे, प्रशाम् शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, ''मो नो धातोः'' इत्यनेन मकारस्य नकारे, 'प्रशान्' इति सिद्धम्।

**व्याख्या –** नत्वस्यासिद्धत्वान्नलोपो न। ''प्रशाम् + सु'' इत्यत्र ''मोनो धातोः'' ८/२/६४ इत्यनेन मस्य नकारे, तथा 'न लोपः प्रातिपदिकान्तस्य'' ८/२/७ इत्यनेन नलोपप्राप्ते परञ्च ''पूर्वत्रासिद्धम्'' इत्यनेन परत्रिपादीकारणात् मकारस्य स्थाने नकारस्य असिद्धत्वात् नलोपो न भवति।

### ३४२. किमः कः ७/२/१०३।।

किमः कः स्याद्विभक्तौ। अकच्सहितस्याप्ययमादेशः।

कः। कौ। के। कम्। कौ। कान् इत्यादि सर्ववत्।

किमः कः–विधिसूत्रम्।

**पदच्छेदः** – किमः कः। किमः षष्ठ्यन्तम्, कः प्रथमान्तम्।

**अनुवृत्तिः** – ''अष्टन आ विभक्तौ'' इत्यतो विभक्तौ इत्यनुवर्तते।

**सूत्रार्थः** – किम् शब्दस्य स्थाने कादेशो भवति विभक्तौ। अनेकाल्त्वात् सर्वादेशः।

**रूपलेखनप्रकारः** – **कः** – किम् शब्दात् प्रातिपदिकात् सौ, ''किमः कः'' इत्यनेन ''अनेकाल्शित्सर्वस्य'' इति परिभाषासूत्रसहकारेण कादेशे, सस्य रूत्वे विसर्गे च 'कः' इति सिद्धम्।

**व्याख्या** – अकच्सहितस्याप्ययमादेशः। किम् शब्दस्य स्थाने कादेशो तु भवत्येव तथापि किम्शब्दो अकच्प्रत्ययः सहितोऽपि स्यात् तदपि कादेशो भवति। यथा – 'क् + अकच् + इम्' इत्यत्र ककिम् सिध्यति तदपि 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति नियमेन ककिम् स्थाने कादेशो भवति। तदपि ''कः कौ के'' इत्यादीनि रूपाणि सिध्यन्ति। किम्शब्दे अकच्प्रत्ययो अव्ययसर्वनाम्नामकच् प्राक्टेः इत्यनेन टेः पूर्वं भवति।

### किम् ( पुल्लिङ्गे ) शब्दस्य रूपाणि

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात्-द् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

किम् शब्दस्य रूपाणि सर्ववत् चलन्ति। सर्ववत् त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् एतेषु शब्देषु सम्बोधनं न भवति।

### ३४३. इदमो मः ७/२/१०८।।

इदमो मस्य मः स्यात् सौ परे। त्यदाद्यत्वापवादः।

इदमो मः – विधिसूत्रम्।

**पदच्छेदः** – इदमः, मः। इदमः षष्ठ्यन्तम्, मः प्रथमान्तम्।

**अनुवृत्तिः** – 'तदोः सः सावनन्त्ययोः' इत्यतः सौ इत्यनुवर्तते।

**सूत्रार्थः** – इदम् शब्दस्य मकारस्य स्थाने म् स्यात् सुपरे। इदं सूत्रं ''त्यदादीनामः'' इत्यस्यापवादः।

### ३४४. इदोऽय् पुंसि ७/२/१११।।

इदम इदोऽय स्यात्सौ पुंसि। सोर्लोपः। अयम्। त्यदाद्यत्वं पररूपत्वं च।

इदोऽय् पुंसि- विधिसूत्रम्।

**पदच्छेदः** – इदः, अय्, पुंसि। 'इदः' षष्ठ्यन्तम्, अय् प्रथमान्तम्, पुंसि सप्तम्यन्तम्।

**अनुवृत्तिः** – 'इदमो मः' इत्यतः 'इदमः' तथा च ''यः सौ'' इत्यनेन 'सौ' इत्यनुवर्तते। 'अङ्गस्य' इति सूत्रस्याधिकारः।

**सूत्रार्थः** – इदम् शब्दस्य अवयवो य इद् तस्य स्थाने अय् आदेशः स्यात् पुल्लिङ्गे सुपरे। अनेकाल्त्वात् सर्वादेशः।

**रूपलेखनप्रकारः – अयम्** – इदम् शब्दात् प्रातिपदिकात् सौ, अनुबन्धलोपे, ''त्यदादीनामः'' इत्यनेन मस्य अत्वप्राप्ते, तत् प्रबाध्य ''इदमो मः'' इति मस्य मकारे, ''इदोऽय् पुंसि'' इति इद्भागस्य अयोदेशे, सुलोपे, 'अयम्' इति सिद्धम्।

**३४५. दश्च ७/२/१०१॥**

इदमो दस्य मः स्याद्विभक्तौ इमौ। इमे। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः।

दश्च– विधिसूत्रम्।

**पदच्छेदः** – दः, च। दः षष्ठ्यन्तम्, च अव्ययपदम्।

**अनुवृत्तिः** – ''अष्टन आ विभक्तौ'' इत्यतः 'विभक्तौ', तथा च ''इदमो मः'' इत्यतः 'मः' इत्यनुवर्तते।

**सूत्रार्थः** – इदम् शब्दस्य दकारस्य स्थाने मादेशो भवति विभक्तौ परे। त्यदादिसर्वनामशब्देषु सम्बोधनस्य प्रयोगो न भवति।

**रूपलेखनप्रकारः – इमौ** – इदम्शब्दात् प्रातिपदिकात् औ विभक्तौ, ''त्यदादीनामः'' इत्यनेन मस्य अत्वे, ''इद अ + औ'' इत्यवस्थायाम्, ''अतो गुणे'' इति पररूपमेकादेशे, ''दश्च'' इत्यनेन दस्य मकारे ''प्रथमयोः पूर्वसवर्णः'' इति पूर्वसवर्णदीर्घप्राप्ते तत् प्रबाध्य ''वृद्धिरेचि'' इति वृद्धौ, ''इमौ'' इति सिद्धम्।

**३४६. अनाप्यकः ७/२/११२॥**

अककारस्येदम इदोऽन् स्यादापि विभक्तौ।

आप्–इति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन।

अनाप्यकः– विधिसूत्रम्।

**पदच्छेदः** – अन्, आपि, अकः। नास्ति क् यस्मिन् स अक्, तस्य अकः, बहुव्रीहिः। अन् प्रथमान्तम्, आपि सप्तम्यन्तं अकः षष्ठ्यन्तम्।

**अनुवृत्तिः** – 'इदमो मः' इत्यतः 'इदमः' ''इदोऽय् पुंसि'' इत्यतः 'इदः' तथा च 'अष्टन आ विभक्तौ' इत्यतः विभक्तौ इत्यनुवर्तते। आप् इत्यनेन टादिविभक्तिः।

**सूत्रार्थः** – ककाररहितस्य इदम् शब्दस्य इद्भागस्य स्थाने अनादेशः स्याद् टादिविभक्तौ परतः। इदम्शब्दात् ''अव्ययसर्वनाम्नामकच्प्राक्टेः'' इत्यनेन अकच् न भवति चेदेव अनादेशो भवति यतोहि अकच्योगेन तु शब्दो ककारसहितः 'इदकम्' इति सिद्धति।

**रूपलेखनप्रकारः – अनेन** – इदम्शब्दात् प्रातिपदिकात् टाविभक्तौ, अनुबन्धलोपे, अत्वे पररूपे च, ''अनाप्यकः'' इत्यनेन ''अनेकाल्शित्सर्वस्य'' इति सूत्रसहकारेण इद्भागस्य अनादेशे, ''टाङसिङसामिनात्स्याः'' इत्यनेन टास्थाने इनादेशे, गुणे, 'अनेन' इति सिद्धम्।

**३४७. हलिलोपः ७/२/११३॥**

अककारस्येदम इदो लोपः स्यादापि हलादौ। नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे (वा. ४९०)।

हलि लोपः–विधिसूत्रम्।

**पदच्छेदः** – हलि, लोपः। हलि सप्तम्यन्तम् लोपः प्रथमान्तम्।

**अनुवृत्तिः** – ''अनाप्यकः'' इत्यतः 'अकः' 'आपि' 'इदमो मः' इत्यतः इदमः 'इदोऽय् पुंसि' इत्यतः 'इदः' तथा च 'अष्टन आ विभक्तौ' इत्यतः 'विभक्तौ' इत्यनुवर्तते।

**सूत्रार्थः** – ककाररहितस्य इदमः इद् भागस्य लोपो तृतीयादौ हलादौ विभक्तौ परतः।

**व्याख्या** – ''नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे (वा.) अनर्थके'' अलोऽन्त्यस्य इति परिभाषायाः प्रवृत्तिः न, अभ्यासविकारं परित्यज्य इत्युक्ते अभ्यासविकारस्तु यद्यपि अनर्थकः तथापि ''अलोऽन्त्यस्य'' इति परिभाषायाः

प्रवृत्तिः भवति अन्यत्र अनर्थके प्रवृत्तिः न भवति।

तर्हि कोऽर्थवान् कश्च निरर्थकः इति कथं ज्ञातुं शक्यते? अस्य समाधानमेतत् वर्तते यत् ''समुदायो ह्यर्थवान्, तस्यैकदेशोऽनर्थकः'' इति। समुदायः अर्थवान् भवति, समुदायस्य एकदेशस्तु, अनर्थको भवति। अतः 'इदम्' अर्थवान् तथा च 'इद्' 'अम्' अनर्थकौ।

अभ्यासस्तु पारिभाषिकशब्दोऽस्ति। द्वित्वकारणात् पूर्वभागो अभ्यासः कथ्यते। ''पूर्वोऽभ्यासः'' इत्यनेन अभ्याससंज्ञा भवति। अभ्यासाद् भिन्नः अनभ्यासः।

## ३४८. आद्यन्तवदेकस्मिन् १/१/२१।।

एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव च स्यात्। आभ्याम्।

आद्यन्तवदेकस्मिन्- अतिदेशसूत्रम्।

**पदच्छेदः** – आद्यन्तवद्, एकस्मिन्। आदिश्च अन्तश्च तयोरितरेतरद्वन्द्वः। आद्यन्तवत् अव्ययपदम्, एकस्मिन् सप्तम्यन्तम्।

**अनुवृत्तिः** – अस्मिन् सूत्रे एकशब्दः असहायवाची।

**सूत्रार्थः** – तदादितदन्तयोः विधीयमानं कार्यं तदादौ तदन्त इव असहायेऽपि भवति।

**व्याख्या** – आद्यन्तशब्दौ सापेक्षौ। कथमिति चेत् यस्मात् पूर्वं नास्ति परमस्ति स आदिः, यस्मात् पूर्वमस्ति परं च नास्ति सोऽन्तः। एतत् सूत्रं लोकन्यायाश्रिते वर्तते। महाभाष्ये तस्यापरं नाम 'व्यपदेशिवद्भावः' विद्यते। यथा लोके – देवदत्तस्य एक एव पुत्रः, स एव ज्येष्ठः स एव मध्यमः, स एव कनिष्ठः। तथैव शास्त्रे ''सुपि च'' इत्यनेन अदन्ताङ्गं दीर्घप्राप्ते, तत् कथम्? तत् इत्थं यत् 'अकारस्तु आदिवर्णः तथा च अकारस्तु एव अन्तवर्णः अतः ''सुपि च'' इत्यनेन दीर्घः भवति।

**आभ्याम्** – इदम् शब्दात् प्रातिपदिकात् भ्यामि, ''अनाप्यकः'' इति अनादेशप्राप्ते, तत् प्रबाध्य, ''हलि लोपः'' इत्यनेन इद्भागस्य लोपप्राप्ते, किन्तु ''अलोऽन्त्यस्य'' इतिपरिभाषया केवलं दकारस्य लोपप्राप्ते तदा ''नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे'' इति परिभाषया ''अलोऽन्त्यस्य'' इति परिभाषायाः प्रवृत्तिः न भवति, तर्हि ''हलि लोपः'' इत्यनेन इद्भागस्य लोपे, ''सुपि च'' इत्यनेन ''आद्यन्तवदेकस्मिन्'' इति सूत्रसहकारेण दीर्घे, ''आभ्याम्'' इति सिद्धम्।

## ३४९. नेदमदसोरकोः ७/१/११।।

अककारयोरिदमदसोर्भिस ऐस् न स्यात्।

एत्वम्- एभिः। अत्त्वम्, नित्यत्वाद् ङेः स्मै, पश्चाद्धलि लोपः- अस्मै। आभ्याम्। एभ्यः। अस्मात्। आभ्याम्। एभ्यः। अस्य। अनयोः। एषाम्। अस्मिन्। अनयोः। एषु। ककारयोगे तु अयकम्। इमकौ। इमके। इमकम्। इमकौ। इमकान्। इमकेन। इमकाभ्याम् इत्यादि।

नेदमदसोरकोः-विधि (निषेध) सूत्रम्।

**पदच्छेदः** – 'न, इदमदसोः, अकोः। न अव्ययपदम्, इदमदसोः षष्ठ्यन्तम्, अकोः षष्ठ्यन्तम्।

**अनुवृत्तिः** – ''अतो भिस ऐस्'' इत्यतः भिस्, ऐस् इत्यनुवर्तते।

**सूत्रार्थः** – ककाररहितात् इदं शब्दात् अदस्शब्दाच्च परे भिसः स्थाने ऐसादेशो न स्यात्।

**व्याख्या** – ककाररहितात् इदम् शब्दात् ''अतो भिस ऐस्'' इत्यनेन भिस्स्थाने ऐसादेशप्राप्ते परञ्च ''नेदमदसोरकोः'' इत्यनेन निषेधे, इदम् शब्दात् अकच्प्रत्ययं विधाय 'इदकम्' तथा च अदस्शब्दात् अकच् प्रत्ययं विधाय 'अदकस्' सिध्यति। अत्र ककारसहितरूपाणि अतः ऐसादेशस्य निषेधः न भवति। 'इमकैः' इति सिद्धति।

**रूपलेखनप्रकारः** – **एभिः** – इदम्शब्दात् प्रातिपदिकात् भिसि, अत्वे, पररूपे, 'हलि लोपः' इत्यनेन इद्भागस्य

लोपे, ''अ + भिस्' इत्यवस्थायाम् भिस् स्थाने ऐसादेशप्राप्ते, परञ्च ''नेदमदसोरकोः'' इति निषेधे, ''बहुवचने झल्येत्'' इति अस्य एत्वे, सस्य रुत्वे विसर्गे च ''एभिः'' इति सिद्धम्।

**व्याख्या –** अत्त्वम्, नित्यत्वाद् स्मै, पश्चाद्हलि लोपः। ''इदम् + ङे'' इत्यत्र अत्वे, पररूपे, अनुबन्धलोपे, ''इद + ए'' इत्यवस्थायाम्, ''अनाप्यकः'' इति अनादेशस्य ''सर्वनाम्नः स्मै'' इत्यनेन स्मै आदेशस्य युगपत्प्राप्तिः भवति तदा ''विप्रतिषेधे परं कार्यम्'' इति नियमेन अनादेशस्य प्राप्तिः परञ्च ''परनित्याऽन्तरङ्गापवादानामुत्तरोत्तरं बलीयः'' इति परिभाषया नित्यकार्यत्वात् ''कृताकृतप्रसङ्गी नित्यः'' इति नियमात् ''सर्वनाम्नः स्मै'' इत्यनेन एकारस्य स्मै आदेशे, ''हलि लोपः'' इत्यनेन इद्भागस्य लोपे, ''अस्मै'' इति सिद्धम्।

ककारयोगे तु अयकम्, इमकौ, इमके। इमकम्, इमकौ, इमकान्। इमकेन, इमकाभ्याम् इत्यादि। इदम्शब्दात् ''अव्ययसर्वनाम्नामकच् प्राक्टेः'' इत्यनेन अकच्प्रत्यये, 'इदकम्' इति रूपम्। तन्मध्यपतितस्तद् ग्रहणेन गृह्यते इति नियमात् यानि कार्याणि इदम्शब्दे तानि कार्याणि इदकम्शब्देऽपि भवन्ति।

## ३५०. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २/४/३२।।

अन्वादेशविषयस्येदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ। अश्वचनं साकच्कार्थम्।

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ–विधिसूत्रम्।

**पदच्छेदः–** इदमः अन्वादेशे, अश्, अनुदात्तः, तृतीयादौ। इदमः षष्ठ्यन्तम्, अन्वादेशे सप्तम्यन्तम्, अश् प्रथमान्तम्, अनुदात्तः प्रथमान्तम्, तृतीयादौ सप्तम्यन्तम्।

**सूत्रार्थः –** अन्वादेशविषये इदम्शब्दस्य स्थाने अनुदात्त–अशादेशः भवति तृतीयादौ विभक्तौ परे।

**व्याख्या –** सामान्यतः कथनमादेशः तथा च अनुकथनमन्वादेशः। यस्य एकवारं ग्रहणं क्रियते तस्यैव अज्ञातकार्यार्थं पुनः ग्रहणकरणमेव अन्वादेशः। यथा – ''आभ्यां छात्राभ्यां रात्रिरधीता'' एतत् सामान्यकथनम्। ''आभ्यां अहरप्यधीतम्'' इति अनुकथनमन्वादेशः। यौ छात्रौ रात्रौ पठितवन्तौ, तौ एव दिवसे अपि पठितवन्तौ, अतः अनुकथनत्वात् ''आभ्यां अहरप्यधीत्'' इति वाक्ये अन्वादेशः।

अन्वादेशे इदम्शब्दस्य स्थाने अशादेशः भवति। शकारस्य इत्संज्ञाकारणात् शित् शित्त्वात् ''अनेकाल्शित्सर्वस्य'' इत्यनेन समग्र इद् भागस्य स्थाने अकारादेशो भवति। अस्य अशादेशस्य विधानं अकच्सहितं इदकम् शब्दस्य स्थानेऽपि भवति।

## ३५१. द्वितीयाटौस्स्वेनः २/४/३४।।

द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे।

किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथा 'अनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय' इति। 'अनयोः पवित्रं कुलम् एनयोः प्रभूतं स्वम्' इति। एनम्। एनौ। एनान्। एनेन। एनयोः। **इति मान्ताः।** गणयतेर्विच्। सुगण्। सुगणौ। सुगणः। सुगण्ठ्सु, सुगण्ट्सु, सुगण्सु। क्विप्। **'अनुनासिकस्य क्विझलोः–' ( सू. २६६६ )** इति दीर्घः। सुगाण्। सुगाणौ। सुगाणः। सुगाण्ठ्सु, सुगाण्ट्सु, सुगाण्सु। **इति णान्ताः।** परत्वादुपधादीर्घः, हल्ङ्याब्भ्यादिलोपः। ततो नलोपः, राजा।

द्वितीयाटौस्स्वेनः – विधिसूत्रम्।

**पदच्छेदः –** द्वितीयाटौस्सु, एनः। द्वितीयाटौस्सु सप्तम्यन्तम्, एनः प्रथमान्तम्।

**अनुवृत्तिः –** ''इदमोऽन्वादेशेऽशनुदातस्तृतीयादौ'' इत्यतः इदमः, अनुदात्तः, अन्वादेशे तथा च ''एतदस्त्रतसोस्त्रतसौ चानुदात्तौ'' इत्यतः एतदः इत्यनुवर्तते।

**सूत्रार्थः –** द्वितीयाविभक्तौ परे टा परे ओसि च परे इदम् शब्दस्य तथा च एतद् शब्दस्य स्थाने एन आदेशो भवति अन्वादेशे।

**व्याख्या** – किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथा – 'अनेन व्याकरणमधीतम् एनं छन्दोध्यापय' इति। 'अनयोः पवित्रं कुलम् एनयोः प्रभूतं स्वम्' इति।

प्रथमोदाहरणे व्याकरणमध्ययनरूपं कार्यं विद्यते तस्य विधातुं 'इदम्' (अनेन) शब्दो गृहीतः। पुनः छन्दः अध्ययनरूपं कार्यान्तरं विधातुम् अपि इदम् (एनम्) शब्दः कथितः। अतः पुनः कथनमेवान्वादेशः। इत्थमेव द्वितीयोदाहरणे ज्ञातव्यम्।

एषः अन्वादेशः द्वितीयाविभक्तौ टा-ओस् विभक्तौ च भवति। अतः अन्वादेशे एनम्, एनौ, एनान्। एनेन, एनयोः इति रूपाणि भवन्ति।

**रूपलेखनप्रकारः** – **सुगण्** – गणयतेर्विच् सुपूर्वकात् गणसंख्यानेधातोः विच्प्रत्यये, तस्य सर्वापहारिलोपे, ''अतो लोपः'' इत्यनेन अलोपे, 'सुगण्' इति सिद्धम्।

सुगण्ठ्सु-सुगण्ट्सु-सुगण्सु = सुगण्शब्दात् प्रातिपदिकात् सुपि, ''ङ्णोः कुक्टुक् शरि'' इत्यनेन विकल्पेन टुगागमेऽनुबन्धलोपे, ''चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्'' इति वार्तिकेन टस्य ठकारे, 'सुगण्ठ्सु-सुगण्ट्सु-सुगण्सु' इति सिद्धानि।

**सुगाण्** – सुपूर्वकात् गणधातोः ''क्विप् च'' इत्यनेन क्विपि तस्य सर्वापहारिलोपत्वात् अलोपे, ''अनुनासिकस्य क्विझलोः क्ङिति'' इत्यनेनोपधादीर्घे, 'सुगाण्' इति सिद्धम्

### ३५२. न ङिसम्बुद्ध्योः ८/२/८।।

नस्य लोपो न स्याद् ङौ सम्बुद्धौ च। हे राजन्! ङौ तु छन्दस्युदाहरणम्, '**सुपां सुलुक्-**' (**सू. ३५६१**) इति ङेर्लुक्। निषेधसामर्थ्यात् प्रत्ययलक्षणम्, 'परमे व्योमन्'। '**ङावुत्तरपदे प्रतिषेधो वक्तव्यः**' (**वा. ४७८५**)। ङौ विषये उत्तरपदे परे 'न ङिसम्बुद्ध्योः' इत्यस्य निषेधो वाच्य इत्यर्थः। चर्मणि तिला अस्य चर्मतिलः, ब्रह्मनिष्ठः। राजानौ। राजानः। राजानम्। राजानौ। '**अल्लोपोऽनः**' (**सू. २३४**)। श्चुत्वम्। न चाल्लोपः स्थानिवत्, पूर्वत्रासिद्धे तन्निषेधात्, नापि बहिरङ्गतया असिद्धः, यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतयान्तरङ्गाभावे परिभाषाया अप्रवृत्तेः। जञोर्ज्ञः, राज्ञः। राज्ञा।

न ङिसम्बुद्धयोः – विधि (निषेधसूत्रम्)

**पदच्छेदः** – न, ङिसम्बुद्धयोः। न अव्ययपदं, ङिसम्बुद्धयोः सप्तम्यन्तम्।

**अनुवृत्तिः** – ''न लोपः प्रातिपदिकान्तस्य'' इत्यतः न इत्यनुवर्तते।

**सूत्रार्थः** – नकारस्य लोपो न भवति ङिपरे सम्बुद्धिपरे च।

**व्याख्या** – ङौ तु छन्दस्युदाहरणम्। ङिपरक-उदाहरणन्तु वैदिकप्रयोगानि एव सन्ति, लौकिकानि न सन्ति। सुपां सुलुक् इति ङेर्लुक्। निषेधसामर्थ्यात्प्रत्ययलक्षणम्। परमे व्योमन्। परमशब्दः व्योमन् शब्दस्य विशेषणमस्ति। ''परम + ङि, व्योमन् + ङि'' इत्यत्र प्रथमपदे गुणे तथा च ''सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'' इत्यनेन ङिलुकि, ''न लोपः प्रातिपदिकान्तस्य'' इत्यनेन नलोपप्राप्ते परञ्च ''न ङिसम्बुद्ध्योः'' इत्यनेन निषेधे। व्योमन्पदे सम्बोधनस्य शङ्कानिवारणार्थे 'परमे' इति पदस्य प्रयोगं कृतं वर्तते। ''ङावुत्तरपदे प्रतिषेधो वक्तव्यः'' (वार्तिकः ४८९५)

**वार्तिकार्थः** – उत्तरपदपरके ङि परे तु नलोपनिषेधस्यापि प्रतिषेधो भवति अर्थात् नलोपो भवति एव।

**अनुवृत्तिः** – न लोपः प्रातिपदिकान्तस्य इत्यतः 'नलोपः' तथा च न ङिसम्बुद्ध्योः इत्यनेन 'न' इत्यनुवर्तते।

**व्याख्या** – निषेधस्य निषेधः विधिः भवति यथा लोके शत्रोः शत्रुः मित्रं भवति इत्युक्ते नलोपो भवति एव। पूर्वपदस्य तथा चोत्तरपदस्य व्यवस्था समासे भवति, अतः एषः समस्त-पदस्य विषयोऽस्ति।

चर्मतिलः- चर्मणि तिला अस्य ''अस्मिन्नर्थे'' चर्मन् + ङि 'तिल + जस्' इति अलौकिकविग्रहात् बहुव्रीहिसमासे, प्रातिपदिकसंज्ञायाम्, सुपो लुकि, 'चर्मन् + तिल' इत्यवस्थायाम्, 'न लोपः प्रातिपदिकान्तस्य'

इत्यनेन नलोपप्राप्ते ''न ङिसम्बुद्ध्योः'' इत्यनेन नलोपस्य निषेधप्राप्ते परञ्च 'ङावुत्तरपदे प्रतिषेधो वक्तव्यः' इति वार्तिकेन पुनः नलोपे, स्वादिकार्ये च ''चर्मतिलः'' इति सिद्धम्। इत्थमेव 'ब्रह्मनिष्ठः' इति सिद्धं भवति।

न चाल्लोपः स्थानिवत्, पूर्वत्रासिद्धे तन्निषेधात्। ''अत्र राजन्शब्दे अलोपे कृते सति'' अचः परस्मिन् पूर्वविधौ इत्यनेन स्थानिवद्भावो भविष्यति, येन जकार-नकारयोर्मध्ये अकारबुद्धिकारणात् 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वं न भविष्यति इति शङ्का न करणीया यतोहि ''पूर्वत्रासिद्धे न स्थानिवत्'' इत्यनेन स्थानिवद्भावस्य निषेधो भवति अतः श्चुत्वं भवति एव।

नापि बहिरङ्गतयासिद्धः, यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतयान्तरङ्गाभावे परिभाषाया अप्रवृत्तेः - ''राज्+न्'' इत्यत्र अन्तरंग-श्चुत्वं प्रति बहिरङ्गकार्यम् अल्लोपः असिद्धो भवति, इत्यपि कथयितुं न शक्यते। ''अल्लोपोऽनः'' इति सूत्रे भस्यपदस्य विद्यमानत्वात् अन्तरङ्गो विद्यते अतः ''असिद्धं बहिरङ्गमन्तरङ्गे'' इत्यनेन श्चुत्वस्य कर्तव्यतायां बहिरङ्ग अल्लोपस्य-असिद्धत्वकारणात् अकारव्यवधानात् श्चुत्वं न भवति, इत्यपि कथयितुं न शक्यते यतोहि ''यथोद्देशं सञ्ज्ञापरिभाषम्'' इत्यस्य पक्षे ''वाह ऊठ्'' इति सूत्रे ज्ञापितं षाष्ठीपरिभाषायाः दृष्टौ श्चुत्वशास्त्रस्य त्रिपादीकारणात् अन्तरङ्गत्वादपि असिद्धमेव ज्ञायते। अतः श्चुत्वकरणे नास्ति शङ्का।

एवञ्च ''पूर्वत्रासिद्धम्'' इति प्रत्यक्षसिद्धमस्ति तथा च ''असिद्धं बहिमन्तरङ्गे'' इति परिभाषा ''वाह ऊठ्'' इति सूत्राद् ज्ञापितत्वाद् आनुमानिकं विद्यते। अतः प्रत्यक्षापेक्षया आनुमानिकं गौणत्वात् श्चुत्वकरणे नास्ति बाधा।

**रूपलेखनप्रकारः - राज्ञः** - राजन्शब्दात् प्रातिपदिकात् शसि, अनुबन्धलोपे, भसंज्ञायाम्, ''अल्लोपोऽनः'' इति अकारलोपे, श्चुत्वे, ''जञोर्ज्ञः'' इति नियमेन 'ज्ञकारे' सस्य रुत्वे विसर्गे च ''राज्ञः'' इति सिद्धम्।

**३५३. नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति ८/२/२।।**

सुब्विधौ स्वरविधौ सञ्ज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धः, नान्यत्र 'राजाश्वः' इत्यादौ। इत्यसिद्धत्वादात्त्वमेत्तवमैस्त्वं च न। राजभ्याम्। राजभिः। राज्ञे। राजभ्यः। राज्ञः। राज्ञोः। राज्ञाम्। राज्ञि, राजनि। प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। अस्य भविषयेऽल्लोपे कृते-

नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति- नियमसूत्रम्।

**पदच्छेदः** - नलोपः, सुप्स्वरसंज्ञातुग्विधिषु, कृति। नलोपः प्रथमान्तम्, सुप्स्वरसंज्ञातुग्विधिषु सप्तम्यन्तम्, कृति सप्तम्यन्तम्।

**अनुवृत्तिः** - ''पूर्वत्रासिद्धम्'' इत्यतः असिद्धः इत्यनुवर्तते।

**सूत्रार्थः** - सुब्विधौ, स्वरविधौ, सञ्ज्ञाविधौ, तथा च कृति तुग्विधौ नलोपः असिद्धः, अन्यत्र तु न भवति।

**व्याख्या** - उक्तविधयः सपादसप्ताध्यायाः विद्यन्ते तथा च ''न लोपः प्रातिपदिकान्तस्य'' इति त्रैपादिकं सूत्रं विद्यते अतः ''पूर्वत्रासिद्धम्'' इत्यनेन विधीन् प्रति नकारलोपः स्वतः असिद्धो भवति, तर्हि सूत्रस्य एतस्य का आवश्यकता? समाधानं प्राप्यतेऽस्माभिः यत् सपादसप्ताध्यायीस्थानि सर्वाणि सूत्राणि प्रति नकारलोपोऽसिद्धत्वात् उक्तविधीन् प्रति नलोपोऽसिद्धः भवति नान्यत्र ''राजाश्वः'' इत्यादौ। ''राज्ञः अश्वः'' विग्रहात् समासात्, सुपो लुकि, ''राज+अश्वः'' इत्यवस्थायाम्, नलोपे, अत्र ''नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'' इत्यनेन नलोपो नासिद्धे, ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णदीर्घे, ''राजाश्वः'' इति सिध्यति।

इत्यसिद्धत्वादात्वमेत्त्वमैस्त्वं च न। राजभ्याम्, राजभिः, राज्ञे, राजभ्यः। ''राजन् + भ्याम्, ''राजन् + भिस्'' ''राजन् + भ्यस्'' इत्यत्र हलादिविभक्तिषु ''स्वादिष्वसर्वनामस्थाने'' इत्यनेन पदसंज्ञायाम्, ''न लोपः प्रातिपदिकान्तस्य'' इत्यनेन नलोपे, परञ्च नलोप असिद्धत्वात् - सुपि च ७.३.१०२ इति दीर्घो न भवति। ''अतो भिस् ऐस्'' ७.२.१ इत्यनेन ऐसादेशो न भवति। ''बहुवचने झल्येत्'' ७.३.१०३ इत्यनेन अस्य एत्वो न भवति।

सुब्विधौ नकारलोपासिद्धत्वस्य उदाहरणं ''राजभ्याम्,'' राजभिः इत्यादीनि सन्ति। स्वरविधौ नकारलोपासिद्धत्वस्योदाहरणं राजवती वर्तते। सञ्ज्ञाविधौ उदाहरणानि दण्डिदत्तौ, दत्तदण्डिनौ सन्ति तथा च कृति परे

तुग्विधौ वृत्रहभ्याम् विद्यते।

प्रतिदिवा – प्रतिदीव्यतीति। प्रतिपूर्वकात् दिवुक्रीडादिषु धातोः ''कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः'' इत्यनेन कनिन्प्रत्ययेऽनुबन्धलोपे, प्रतिदिवन् शब्दात् प्रातिपदिकात् सौ, उपधादीर्घे, विभक्तिलोपे, नलोपे च ''प्रतिदिवा'' इति सिद्धम्। अस्य भविषयेऽल्लोपे कृते। यत्र ''यचि भम्'' इत्यनेन भसंज्ञा भवति तत्र ''अल्लोपोऽनः'' इत्यनेन अलोपे।

## ३५४. हलि च ८/२/७७।।

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। न चाल्लोपस्य स्थानिवत्त्वम्, दीर्घविधौ तन्निषेधात्। बहिरङ्गपरिभाषा तूक्तन्यायेन न प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्ना इत्यादि। यज्वा यज्वानौ। यज्वानः।

हलि च– विधिसूत्रम्।

**पदच्छेदः –** हलि च। हलि सप्तम्यन्तम्, च अव्ययपदम्।

**अनुवृत्तिः –** ''सिपि धातोः रुर्वा'' इत्यतः धातोः तथा च ''र्वोरुपधाया दीर्घ इकः'' इत्यतः पूर्णसूत्रस्यैवानुवृत्तिः इत्यनुवर्तते।

**सूत्रार्थः –** हलि परे रेफान्तधातोः वकारान्तधातोः चोपधायाः इक् स्थाने दीर्घो भवति।

**रूपलेखनप्रकारः – प्रतिदीव्नः** – प्रतिदिवन् शब्दात् प्रातिपदिकात् शसि, भसंज्ञायाम् ''अल्लोपोऽनः'' इत्यनेन अलोपे, वकारान्तधातुत्वात् ''हलि च'' इत्यनेन दीर्घे सस्य रुत्वे विसर्गे च ''प्रतिदीव्नः'' इति सिद्धम्।

**विशेषः –** न चाल्लोपस्य स्थानिवत्त्वम्, दीर्घविधौ तन्निषेधात्। ''प्रतिदीव्नः'' इत्यत्र अजादिविभक्तौ ''अल्लोपोऽनः'' इत्यनेन अलोपे ''अचः परस्मिन् पूर्वविधौ'' इत्यनेन अलोपस्य स्थनिवद्भावत्वात् ''हलि च'' इत्यनेन कथं दीर्घो भवितुमर्हति? समाधानमेतत् यत् अत्र दीर्घविधित्वात् ''न पदान्त.'' इत्यनेन स्थानिवद् भावस्य निषेधो भवति, अतः दीर्घो भवति।

बहिरङ्गपरिभाषा तूक्तन्यायेन न प्रवर्तते प्रतिदीव्नः। प्रतिदीव्ना इत्यादि। ''असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनेन अन्तरङ्गकार्यदीर्घकरणे बहिरङ्गकार्यं अलोपकरणस्य शङ्कायाः निवारणं ''यथोद्देश'' पक्षे षष्ठाध्यायस्य ''वाह ऊठ्'' सूत्रे ज्ञापितम् असिद्धपरिभाषां प्रति दीर्घविधानम् अन्तरङ्गत्वादपि त्रैपादिक–असिद्धत्वात् भवति एव।

## ३५५. न संयोगाद्वमन्तात् ६/४/१३७।।

वकारमकारान्तसंयोगात् परस्याऽनोऽकारस्य लोपो न स्यात् यज्वनः। यज्वना। यज्वभ्याम् इत्यादि। ब्रह्मणः। ब्रह्मणा। ब्रह्मभ्याम् इत्यादि।

न संयोगाद्वमन्तात् विधि (निषेध) सूत्रम्।

**पदच्छेदः –** न संयोगात्, वमन्तात् न अव्ययपदम्। संयोगात् पञ्चम्यन्तम्, वमन्तात् पञ्चम्यन्तम्।

**अनुवृत्तिः –** ''अल्लोपोऽनः'' इत्यतः अनः इत्यनुवर्तते।

**सूत्रार्थः –** वकारान्तसंयोगात् तथा च मकारान्तसंयोगात् परस्य अनः यः अकारः तस्य लोपो न भवति।

**रूपलेखनप्रकारः – यज्वनः**– यज्वन्शब्दात् प्रातिपदिकात् शसि, अनुबन्धलोपे, भसंज्ञायाम्, ''अल्लोपोऽनः'' इत्यनेन अलोपप्राप्ते परञ्च ''न संयोगाद्वमन्तात्'' इत्यनेन अलोपनिषेधे, सस्य रुत्वे विसर्गे च, ''यज्वनः'' इति। मकारान्तसंयोगस्योदाहरणं ब्रह्मणः, अपि इत्थमेव सिध्यति।

## ३५६ इन्हन्पूषार्यम्णां शौ ६/४/१२।।

एषां शावेवोपधाया दीर्घः, नान्यत्र। इति निषेधे प्राप्ते–

इन्हपूषार्यम्णां शौ– नियमसूत्रम्।

**पदच्छेदः –** इन् च हन् च पूषा च अर्यमा च तेषामितरेतरद्वन्द्वः इन्हन्पूषार्यम्णां षष्ठ्यन्तम्, शौ सप्तम्यन्तम्।

**अनुवृत्तिः** – ''नोपधायाः'' इत्यतः उपधायाः तथा च ''ढ्रलोपे पूर्वस्य दीर्घोऽणः'' इत्यतः दीर्घः इत्यनुवर्तते।
**सूत्रार्थः** – इन् हन् पूषन् अर्यमन् इत्यन्तानाम् उपधाया दीर्घो भवति शि परे एव।
**विशेषः** – उपर्युक्तनकारान्तशब्देषु ''सर्वनामस्थाने चासम्बुद्धौ'' इत्यनेन स्वतः दीर्घप्राप्तिः भवति परञ्च अस्मिन्सूत्रे इन्, हन् पूषन् तथा अर्यमन्शब्देषु केवलं शिपरे (जस्-शस्परे) एव दीर्घविधानं भवति।

### ३५७. सौ च ६/४/१३।।

इन्नादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्। **'एकाजुत्तरपदे-' (सू. ३०७)** इति णत्वम्, वृत्रहणौ, वृत्रहणः। वृत्रहणम्, वृत्रहणौ।

सौ च – विधिसूत्रम्।

**पदच्छेदः** – सौ सप्तम्यन्तम्, च अव्ययपदम्।
**अनुवृत्तिः** – ''इन्हन्पूषार्यम्णां शौ'' इत्यतः इन्हन्पूषार्यम्णाम्'' ''नोपधायाः'' इत्यतः उपधायाः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'' इत्यतः दीर्घः तथा च ''सर्वनामस्थाने चासम्बुद्धौ'' इत्यनेन असम्बुद्धौ इत्यनुवर्तते।
**सूत्रार्थः** – सम्बुद्धिभिन्ने सुपरे इन्हनाद्यन्तानाम् उपधाया दीर्घो भवति। 'इन्हन्.' इत्यस्य अपवादोऽस्ति सूत्रमिदम्।
**रूपलेखनप्रकारः** – **वृत्रहा** – 'वृत्रं हतवान्' इति विग्रहे क्विपि, क्विब्प्रत्ययस्य सर्वापहारिलोपे, समासकार्ये वृत्रहन्शब्दात् प्रातिपदिकसंज्ञायां सौ, अनुबन्धलोपे, ''इन्हन्पूषार्यम्णां शौ'' इत्यनेन निषेधात् ''सौ च'' इति उपधादीर्घे, सुलोपे, नलोपे च कृते ''वृत्रहा'' इति सिद्धम्।

वृत्रहणौ – इत्यत्र ''एकाजुत्तरपदे णः'' इत्यनेन णत्वविधानात् ''वृत्रहणौ'' इति सिद्धम्।

### ३५८. हो हन्तेर्ञ्णिन्नेषु ७/३/५४।।

ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं स्यात्।

हो हन्तेर्ञ्णिन्नेषु– विधिसूत्रम्।

**पदच्छेदः** – हः, हन्तेः, ञ्णिन्नेषु। ञ्णितौ च नश्च तेषामितरेतरद्वन्द्वो ञ्णिन्नाः, तेषु ञ्णिन्नेषु।
**अनुवृत्तिः** – ''चजोः कु घिण्ण्यतोः'' इत्यतः कु इत्यनुवर्तते 'अङ्गस्य' इत्यस्याधिकारः वर्तते।
**सूत्रार्थः** – सूत्रार्थस्तु स्पष्ट एव।
**व्याख्या** – ''वृत्रघ्नः'' इत्यत्र समासत्वात् ''अट्कुप्वाङ्'' इत्यनेन तु णत्वप्राप्तिः न भवति परञ्च ''एकाजुत्तरपदे णः'' इत्यनेन णत्वप्राप्तिः भवितुमर्हति, तत् कथमिति चेत् ''अल्लोपोऽनः'' इति अकारलोपत्वादपि ''अचः परस्मिन् पूर्वविधौ'' इत्यनेन अकारस्य स्थानिवद्भावत्वात् उत्तरपदे तु अकारस्थितत्वात् णत्वप्राप्तिः भवति अतः अस्य णत्वप्राप्तेः वारणार्थं ''हन्तेरत्पूर्वस्य'' इत्यस्य भाष्यसम्मतं योगविभागस्य व्याख्या क्रियते।

### ३५९ (क). हन्तेः ८/४/२२।।

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्।

हन्तेः–विधिसूत्रम्। षष्ठ्यन्तमेकपदं सूत्रम्।

**अनुवृत्तिः** – ''रषाभ्यां नो णः समानपदे'' इत्यतः रषाभ्यां, नः, णः ''अट्कुप्वाङ-'' इत्यतः सकलसूत्रस्य तथा च ''उपसर्गादसमासेऽपि णोपदेशस्य'' इत्यतः उपसर्गात् इत्यनुवर्तते।
**सूत्रार्थः** – उपसर्गात् निमित्तात् रेफषकाराभ्यां परे हन्तेः नस्य णत्वं स्यात्।
**रूपलेखनप्रकारः** – **प्रहण्यात्** – प्र-उपसर्गपूर्वात् हन्यात् इत्यत्र ''हन्तेः'' इत्यनेन णत्वे, 'प्रहण्यात्' इति सिद्धम्।

### ३५९ (ख). अत्पूर्वस्य ८/४/२२।।

हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यात् **'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (प. ६२) इति न्यायं** बाधित्वा **'एकाजुत्तरपदे-' (सू. ३०७)** इति णत्वमपि निवर्तते। नकारे परे

कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्, वृत्रघ्नः। वृत्रघ्ना इत्यादि। यत्तु 'वृत्रघ्नः' इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं, तद् भाष्यवार्तिकविरुद्धम्। एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन्। यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि '**इन्हन्-**' **( सू. ३५६ )** इत्यत्र ग्रहणं भवत्येव, '**अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति**' **( प. १७ )** इति वचनात्। अर्यम्णि, अर्यमणि। पूष्णि, पूषणि।

अत्पूर्वस्य नियमसूत्रम्।

**अनुवृत्तिः –** ''रषाभ्यां नो णः समानपदे'' इत्यतः रषाभ्यां, नः णः ''हन्तेः'' इत्यस्य तथा च ''उपसर्गादसमासेऽपि णोपदेशस्य'' इत्यतः उपसर्गात् इत्यनुवर्तते।

**सूत्रार्थः –** उपसर्गात् निमित्तात् रेफषकाराभ्यां परे उत्तरपदस्थे हन्धातोः नस्य णत्वं स्यात् अत्पूर्वकनकारस्य एव, नान्यस्य।

**रूपलेखनप्रकारः – प्रघ्नन्ति** – प्रपूर्वात् हन्धातोः झिप्रत्यये, अन्तादेशे, शपो लुकि, 'गमहन-' इत्यनेनोपधालोपे, ''होहन्तेर्ञ्णिन्नेषु'' इत्यनेन कुत्वे, ''प्र + घ्न् + अन्ति'' इत्यवस्थायाम्, अत्रस्थनकारस्तु अवर्णपूर्वकं नास्ति, अतः ''अत्पूर्वस्य'' इत्यनेन न णत्वे ''प्रघ्नन्ति'' इति सिद्धम्।

**व्याख्या –** योगविभागसामर्थ्यात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' (प. ६२) इति न्यायं बाधित्वा एकाजुत्तरपदे (सू. ३०७) इति णत्वमपि निवर्तते। नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्, वृत्रघ्नः। वृत्रघ्ना इत्यादि।

''हन्तेरत्पूर्वस्य'' इति सूत्रस्य योगविभागसामर्थ्यात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति परिभाषां प्रबाध्य केवलं ''हन्तेः'' इति सूत्रेण प्राप्तणत्वस्य एव न परञ्च तस्य पूर्वस्थं ''एकाजुत्तरपदे णः'' इत्यनेन प्राप्तणत्वस्यापि ''अत्पूर्वस्य'' इत्यनेन निवृत्तिः भवति। तथा च नकारपरत्वात् कुत्वविधिसामर्थ्यात् अकारलोपस्य स्थानिवद्भावः न भवति। अतः हस्य घत्वादेशः भवति। तथा च योगविभागस्य विषये ''पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् अस्याः परिभाषायाः प्रवृत्तिः न।

यत्तु वृत्रघ्नः इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं, तद्भाष्यवार्तिकविरूद्धम्। ''वृत्रघ्नः'' इत्यत्र माधवमतेवैकल्पिकणत्वं भवति, तत्तु भाष्यवार्तिकविरूद्धं विद्यते। तेषां मते नस्य णत्वकरणे एकाल्निमित्तं विद्यते, अनल्विधौ तु न स्थानिवद् भावे। अतः ''प्रातिपदिकान्तस्य नुम्विभक्तिषु च'' इत्यनेन वैकल्पिकणत्वे, परञ्च दीक्षितमते तु ''अत्पूर्वस्य'' इत्यस्य योगविभागसामर्थ्यात् ''प्रातिपदिकान्तनुम्विभक्तिषु च'' इति सूत्रस्यापि निवर्तको विद्यते। सम्बन्धेऽस्मिन् भाष्यकारः वार्तिककारश्च प्रमाणयतः। एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन्। यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि। इन्हन् इत्यत्र ग्रहणं भवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति इति वचनात्। अर्यम्णि-अर्यमणि। पूष्णि-पूषणि।

''यशोऽस्यास्ति अस्मिन्नर्थे'' अस्मायामेधास्रजो विनिः इत्यनेन विनिप्रत्यये, इत्यत्र समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः इति नियमात् विन्प्रत्ययस्य इन्-अनर्थकत्वात् ''अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'' इति परिभाषासहकारेण ''इन्हन्पूषार्यम्णां शौ'' सूत्रे इन्-अनकर्थस्य ग्रहणं न भवितव्यम्, परञ्च अनिनस्मन्ग्रगहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति इति परिभाषा वचनात् इन्-इत्यस्यग्रहणसामर्थ्यादुपधादीर्घे, 'यशस्वी' इति सिध्यति।

अर्यम्णि-अर्यमणि – अर्यमन्शब्दात् प्रातिपदिकात् ङिप्रत्यये, ''विभाषा ङिश्योः'' इत्यनेन वैकल्पिकाकारलोपे, ''अर्यम्णि-अर्यमणि'' इति सिद्धं। इत्थमेव पूषन्शब्दादपि ''पूष्णि-पूषणि'' इति।

**विशेषः** – अग्रिमसूत्रे 'बहुलं' इति पदस्य प्रयोगोऽस्ति। तस्य चतुरर्थाः भवन्ति। बहुलविषये वैयाकरणजगति एकप्रसिद्धः श्लोकोऽस्ति-

**क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**

**शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतद् बहुलग्रहे तु।।**

**३६०. मघवा बहुलम् ६/४/१२८।।**

मघवन्-शब्दस्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्।

मघवा बहुलम् - विधिसूत्रम्।

**पदच्छेदः -** मघव, बहुलम्। मघवा षष्ठ्यर्थे प्रथमान्तम्, बहुलं प्रथमान्तम्।

**अनुवृत्तिः -** 'अर्वणस्त्रसावनञः' इत्यतः तृ इत्यनुवर्तते।

**सूत्रार्थः -** मघवन् शब्दस्य स्थाने विकल्पेन तृ इत्यन्तादेशः। ऋकारस्य इत्संज्ञायाम् अनेकाल्त्वाभावात् सर्वादेशत्वं न भवति।

**व्याख्या -** तृ इत्यत्र अल्द्वयम्। तथा च ''अनेकाल्शित्सर्वस्य'' इत्यनेन सर्वादेशस्यप्राप्तिः परञ्च तृ अनेकाल्वं न विद्यते यतोहि ''नानुबन्धकृतमनेकाल्त्वम्'' इत्यनेन अभिप्रायः स्वीक्रियते यत् अनुबन्धं स्वीकृत्य अनेकालव्यवस्था न भवति। 'तृ' इति तु सानुबन्धम् अनेकाल्त्वं परञ्च अनुबन्धरहितं तु एकाल्त्वम्। अतः ''अलोऽन्त्यस्य'' इत्यनेन सहकारेण मघवन्शब्दस्य नकारस्य स्थाने णत्वप्राप्तिः भवति।

**३६१. उगिदचां सर्वनामस्थानेऽधातोः ७/१/७०।।**

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे।

उपधादीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात्। तथा च '**श्वन्नुक्षन्-**' **(उ. सू. १६५)** इति निपातनात् मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे। 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति भट्टिः। मघवन्तौ। मघवन्तः। हे मघवन्! मघवन्तम्। मघवन्तौ। मघवतः। मघवता। मघवद्भ्याम् इत्यादि। तृत्वाभावे मघवा। 'छन्दसीवनिपौ च' इति वनिबन्तं मध्योदात्तं छन्दस्येव। अन्तोदात्तं तु लोकेऽपीति विशेषः। मघवानौ। मघवानः। सुटि राजवत्।

उगिदचां सर्वनामस्थानेऽधातोः- विधिसूत्रम्।

**पदच्छेदः -** उगिदचां, सर्वनामस्थाने, अधातोः। उगिदचां षष्ठ्यन्तम्, सर्वनामस्थाने सप्तम्यन्तम्, अधातोः षष्ठ्यन्तम्।

**अनुवृत्तिः -** ''इदितो नुम् धातोः'' इत्यतः नुम् इत्यनुवर्तते।

सूत्रार्थः- धातुभिन्नस्य उगितः अञ्च् धातोश्च नुमागमो भवति सर्वनामस्थाने परे। नुमागमस्य मित्कारणात् ''मिदचोऽन्त्यात्परः'' इति परिभाषया भवति। तथा च परिभाषा ''अनियमे नियमकारिणी' भवति।

**विशेष-** इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात्।

''मघवन्त् इत्यत्र'' संयोगान्तस्य लोपः ८/२/२३ इति सूत्रेण तकारस्य संयोगान्तलोपः भवति तथा च दीर्घकरणे संयोगान्तलोपस्य असिद्धत्वं कथन्न भवति?

समाधानमस्य विद्यते 'बहुलग्रहणात्'।

''मघवा बहुलम्'' सूत्रेऽस्मिन् 'बहुलम्' ग्रहणं कृतं विद्यते न तु 'वा' इति पदस्य। 'वा' इत्यस्यार्थः विकल्पेन। परञ्च बहुलमित्यस्यार्थः बहून् अर्थान् लाति 'बहुलम' इत्यस्य चत्वारः अर्थाः भवन्ति, तेषु एतत् सूत्रं क्वचिद् 'अन्यदेव' इत्यस्यार्थस्य उदाहरणं विद्यते।

तथा च। श्वन्नुक्षन्- इति निपातनात् मघ शब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे। आचार्यकैयटस्य मतानुसारेण ''मघवा बहुलम्'' इति सूत्रं विनापि ''मघवान्'' तथा च ''मघवा'' रूपाणां सिद्धिः भवति। मघमस्यास्तीति मघवा। भाष्ये मतुपि तु मघवत् शब्दः।'' ''मघवा बहुलम्'' इत्येतन्न कर्तव्यम्। श्वन्नुक्षन्निति निपातनात् मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वात्' इति। ''केशाद्वोऽन्यतरस्याम्'' इति सूत्रे कैयटः।

हविर्जक्षति नि: शङ्को मखेषु मघवानसौ। इति भट्टि:। मघवन्शब्दे दीर्घ: भवति। अस्य प्रमाणम् आचार्यभट्टे: श्लोक: एष: तथा च अस्मिन् प्रयोगे 'मघवान् असौ।

**व्याख्या** – 'छन्दसीवनिपौ च' इति वनिबन्तं मध्योदात्तं छान्दस्येव अन्तोदात्तं तु लोकेऽपीति विशेष:।

''केशाद्वोऽन्यतरस्याम्'' इति सूत्रे पठित: ''छन्दसि ईवनिपौ च वक्तव्यौ'' इति वार्तिकेन मघशब्दात् वनिप्प्रत्यये 'मघवन्' इति निष्पद्यते। तथा च मघवानमीमहे इत्युदाहरणमपि दत्तं विद्यते। वनिप्प्रत्ययान्त: मघवन्शब्द: मध्योदात्तम्। धनवाची 'मघ' शब्दस्तु अन्तोदात्तम्। वनिप्प्रत्ययकारणात् पित्कारणात् 'व' अनुदात्तम् द्वयो: शब्दयो: योगत्वात् उदात्तपर-अनुदात्तं वकार: स्वरितं भवति। लोकप्रयुक्तं मघवन्शब्द: अव्युत्पन्नकारणात् अन्तोदात्तं विद्यते। एतत् लोके वेदे चोभयत्र प्रयोक्तुं शक्यते।

### ३६२. श्वयुवमघोनामतद्धिते ६/४/१३३।।

अन्नन्तानां भसञ्ज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात्।

**'सम्प्रसारणाच्च' ( सू. ३३० )।'आद् गुण: ( सू. ६९ )।** मघोन:। अन्नन्तानाम् किम्? मघवत:। मघवता। स्त्रियां मघवती। अतद्धिते किम्? माघवनम्। मघोना। मघवभ्याम् इत्यादि। शुन:। शुना। श्वभ्यामित्यादि। युवन्-शब्दे वस्योत्वे कृते-

श्वयुवमघोनामतद्धिते – विधिसूत्रम्।

**पदच्छेद:** – श्वयुवमघोनाम्, अतद्धिते। श्वा च युवा च मघवा च तेषमितरेतरद्वन्द्व:। श्वयुवमघोनां षष्ठ्यन्तम्, अतद्धिते सप्तम्यन्तम्।

**अनुवृत्ति:** – ''अल्लोपोऽन:'' इत्यत: अनाम् इत्यपकृष्यते। वसो: सम्प्रसारणम् इत्यत: सम्प्रसारणम् इत्यनुवर्तते। 'भस्य' इत्यस्याधिकार:।

**सूत्रार्थ:** – श्वशब्दे युवशब्दे तथा च मघवत्शब्दे वकारस्य उकार: सम्प्रसारणं भवति भसंज्ञायाम् अतद्धिते प्रत्यये।

**रूपलेखनप्रकार: – मघोन:** – मघवन्शब्दात् तृत्वाभावे, शसि, अनुबन्धलोपे, भसंज्ञायाम्, ''श्वयुवमघोनामतद्धिते'' इत्यनेन वस्य सम्प्रसारणमुकारे, ''मघ उ अन् + अस्'' इत्यवस्थायाम्, ''सम्प्रसारणाच्च'' इत्यनेन पररूपमेकादेशे, गुणे सस्य रुत्वे विसर्गे च ''मघोन:'' इति सिद्धम्।

(१) प्रत्युदाहरणम् अन्नन्तानां किम्? मघवत:, मघवता। ''श्वयुवमघोनामतद्धिते'' इत्यनेन अन्नन्ताशब्देषु एव सम्प्रसारणं भवति, अन्यत्र न। अत्र माभूत्। यत्र मघवन्शब्दस्य ''मघवा बहुलम्'' इत्यनेन तृ-आदेश: भवति तत्र अन्नन्तशब्दस्याऽभावे सम्प्रसारणं न भवति

(२) स्त्रियां मघवती-इत्यत्र मघवत्शब्द: उगित् वर्तते अत: स्त्रीत्वविवक्षायां ''उगितश्च'' इत्यनेन ङीप्प्रत्ययेऽनुबन्धलोपे 'मघवती इति सिध्यति। अत्र 'अन्नन्तानाम्' इति पदस्याभावे अत्रापि सम्प्रसारणस्य प्राप्ति: भवितुमर्हति, अत: सा माभूत्, अत: 'अन्नन्तानां' इति कथितं वर्तते।

(३) अतद्धिते किम्? माघवनम्। मघोना। मघवभ्याम् इत्यादि तद्धितप्रत्यये परे सम्प्रसारणं माभूत्, अत: अतद्धिते इति कथितम्। यथा – माघवनम्। मघवा देवता अस्य ''अस्मिन्नर्थे मघवन्शब्दात् ''सास्य देवता'' इत्यनेनाणि, ''मघवन् + अण्'' इत्यवस्थायाम्, ''अतद्धिते इति पदप्रयोगत्वात्'' श्वयुवमघोनामतद्धिते इत्यनेन सम्प्रसारणं न भवति।

### मघवन् शब्दस्य तृत्वाभावपक्षे रूपाणि

| | एकवचनम् | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मघवा | मघवानौ | मघवान: |
| द्वितीया | मघवानम् | मघवानौ | मघोन: |

| | | | |
|---|---|---|---|
| तृतीया | मघोना | मघवभ्याम् | मघवभिः |
| चतुर्थी | मघोने | मघवभ्याम् | मघवभ्यः |
| पञ्चमी | मघोनः | मघवभ्याम् | मघवभ्यः |
| षष्ठी | मघोनः | मघोनोः | मघोनाम् |
| सप्तमी | मघोनि | मघोनोः | मघवसु |
| सम्बोधनं | हे मघवन्! | हे मघवानौ! | हे मघवानः! |

**विशेषः** – "श्वयुवमघोनामतद्धित" इति सूत्रस्यप्रसङ्गे एकं सुभाषितं प्रसिद्धं वर्तते –

**कांच मणि काञ्चनमेकसूत्रे ग्रथ्नासि बाले किमिदं विचित्रम्।**
**विचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह।।**

### ३६३. न सम्प्रसारणे सम्प्रसारणम् ६/१/३७।।

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्।

इति यकारस्य नेत्त्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं संप्रसारणम्।

यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्!

न सम्प्रसारणे सम्प्रसारणम्– विधि (निषेध) सूत्रम्।

**पदच्छेदः** – न, सम्प्रसारणे, सम्प्रसारणम्। न अव्ययपदं, सम्प्रसारणे सप्तम्यन्तं, सम्प्रसारणं प्रथमान्तम्।

**सूत्रार्थः** – सम्प्रसारणे परे पूर्वस्य यणः स्थाने सम्प्रसारणं न भवति। अस्मात् निषेधात् एव युवन् शब्दस्य यकारस्य न सम्प्रसारणम् इकारः। अस्मात् ज्ञापकसामर्थ्यात् यणद्वये सति परस्य यणः स्थाने एव पूर्वं सम्प्रसारणं भवति।

**व्याख्या** – इति यकारस्य नेत्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम्। यूनः। यूना। युवभ्यामित्यादि। "युवन्" इत्यत्र परयण्वर्णस्यवकारस्य स्थाने सम्प्रसारणाात् पूर्वयण्वर्णस्य यकारस्य स्थाने सम्प्रसारणं नाभवत्।

तथा च यत्र यण्द्वयं स्यात् तत्र परस्य यणः स्थाने एव पूर्वं सम्प्रसारणं भवति। अग्रे यदा पूर्वयणः स्थाने सम्प्रसारणप्राप्तिः भविष्यति तदा "न सम्प्रसारणे सम्प्रसारणम्" इत्यनेन निषेधः भविष्यति।

**रूपलेखनप्रकारः**:– **यूनः** – युवन्शब्दस्य प्रातिपदिकसंज्ञायां, शसि, भसञ्ज्ञायाम्, "इग्यणः सम्प्रसारणम्" इत्यनेन सम्प्रसारणसंज्ञायाम्, "श्वयुवमघोनामतद्धिते" इत्यनेन वकारस्य सम्प्रसारणे उकारे, यु उ अन् + अस् इत्यवस्थायाम्, "सम्प्रसारणाच्च" इति पूर्वरूपमेकादेशे, यकारस्य स्थाने पुनः सम्प्रसारणप्राप्ते परञ्च "न सम्प्रसारणे सम्प्रसारणम्" इत्यनेन निषेधे, सस्य रुत्वे विसर्गे न यूनः इति सिद्धम्।

### ३६४. अर्वणस्त्रसावनञः ६/४/१२७।।

नञा रहितस्यार्वन्नित्यस्याङ्गस्य तृ इत्यन्तादेशः स्यात्, न तु सौ।

उगित्त्वान्नुम्। अर्वन्तौ। अर्वन्तः। अर्वन्तम्। अवन्तौ। अर्वतः। अर्वता। अर्वद्भ्याम् इत्यादि। अनञः किम्? अनर्वा। यज्ववत्।

अवर्णस्रसावनञः – विधिसूत्रम्

**पदच्छेदः** – अर्वणः तृ, असौ, अनञः। न विद्यते नञ् यस्य स अनञ., तस्य अनञः। अर्वणः षष्ठ्यन्तम्, तृ लुप्तप्रथमाकम्, असौ सप्तम्यन्तम्, अनञः षष्ठ्यन्तम्। अङ्गस्याधिकारः।

**सूत्रार्थः** – सुभिन्ने प्रत्यये परे अर्वन्शब्दस्य तृ अन्तादेशः भवति, नञ्युक्तस्य अनर्वन् इत्यस्य तु न भवति।

**व्याख्या** – उगित्वान्नुम्। तृ इत्यत्र ऋकारस्य इत्संज्ञाकारणात् 'अर्वत्शब्दः उगित् वर्तते अतः' उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमागमः भवति।

**रूपलेखनप्रकारः** – **अर्वन्तौ** – अर्वन् शब्दात् प्रातिपदिकात् औविभक्तौ "अर्वणस्त्रसावनञः" इत्यनेन नकारस्य तृ–

आदेशे, अनुबन्धलोपे ''उगिदचां सर्वनामस्थानेऽधातोः'' इत्यनेन नुमि, अनुबन्धलोपे, अनुस्वारे, परसवर्णे, 'अर्वन्तौ' इति सिद्धम्।

प्रत्युदाहरणम् - अनञः किम्? अनर्वा। यज्ववत्। ''अर्वणस्त्रसावनञः'' सूत्रेऽस्मिन् 'अनञः' इति पदस्य प्रयोजनं विद्यते यत् नञ्रहितं अर्वन्शब्दस्य तृ-आदेशः भवति, न तु नञ्सहितं अर्वन्शब्दस्य स्थाने। ''न अर्वा'' विग्रहेऽस्मिन् नञ्समासत्वात् अनर्वन्शब्दे तृ-आदेशो न भवति, अतः शब्दरूपं यज्वन्वत् चलति।

### ३६५. पथिमथ्यृभुक्षामात् ७/१/८५।।

एषामाकारोऽन्तादेशः स्यात्सौ परे।

आ आत् इति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः।

पथिमथ्यृभुक्षामात्-विधिसूत्रम्।

**पदच्छेदः -** पथिमथ्यृभुक्षाम्, आत्। पन्थाश्च मन्थाश्च ऋभुक्षाश्च तेषामितरेतरद्वन्द्वः। पथिमथ्यृभुक्षां षष्ठ्यन्तम् आत् प्रथमान्तम्।

**अनुवृत्तिः -** ''सावनडुहः'' इत्यतः सौ इत्यनुवर्तते।

**सूत्रार्थः -** पथिन्शब्दस्य मथिन्शब्दस्य ऋभक्षिन् शब्दस्य आकार अन्तादेशो भवति अर्थात् उक्तानां त्रयाणां शब्दानां नकारस्य आ आदेशो भवति।

**व्याख्या -** आ आत् इति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः। अत्र एषा शङ्का भवति यत् स्थानीनकारः सानुनासिकः अतः अस्य स्थाने सानुनासिकः आदेश एव भवितव्यः किन्तु तथा न। भट्टोजिदीक्षितस्यानुसारं आत्शब्दे 'आ + आत्' इति प्रश्लेषोऽस्ति। ''भाव्यमानेन सवर्णानां ग्रहणं न'' परिभाषया सानुनासिक-आकारे आत् पदे प्रश्लेषो व्यर्थम्। अतः अनुनासिकस्य ग्रहणं व्यर्थम्।

### ३६६. इतोऽत् सर्वनामस्थाने ७/१/८६।।

पथ्यादेरिकारस्याकारः स्यात् सर्वनामस्थाने परे।

इतोइत्सर्वनामस्थाने विधिसूत्रम्।

**पदच्छेदः -** इतः, अत्, सर्वनामस्थाने। इतः षष्ठ्यन्तम् अत् प्रथमान्तम्, सर्वनामस्थाने सप्तम्यन्तम्।

**अनुवृत्तिः -** ''पथिमथ्यृभुक्षामत्'' इत्यतः पथिमथ्यृभुक्षाम् इत्यनुवर्तते।

**सूत्रार्थः -** पथिन् शब्दस्य मथिन्शब्दस्य ऋभुक्षिन् शब्दस्य च यः इकारः तस्य स्थाने अकारदेशो भवति सर्वनामस्थाने परे।

### ३६७. थो न्थः ७/१/८७।।

पथिमथोस्थस्य न्थादेशः स्यात् सर्वनामस्थाने परे।

पन्थाः। पन्थानौ। पन्थानः। पन्थानम्। पन्थानौ।

थोन्थः-विधिसूत्रम्।

**पदच्छेदः -** थः षष्ठ्यन्तम्, न्थः प्रथमान्तम्।

**अनुवृत्तिः -** ''पथिमथ्यृभुक्षामात्'' इत्यतः पथिमथ्यृभुक्षां तथा च इतोऽत्सर्वनामस्थाने इत्यतः सर्वनाम स्थाने इत्युनवर्तते।

**सूत्रार्थः -** पथिन्शब्दस्य मथिन्शब्दस्य यः थकारः तस्य स्थाने न्थ आदेशो भवति।

**रूपलेखनप्रकारः - पन्थाः** - पथिन्शब्दात् प्रातिपदिकात् सौ, पथिमथ्यृभुक्षामात् इत्यनेन नस्य आत्वे ''इतोऽत्सर्वनामस्थाने'' इति इकारस्य अत्वे ''थोन्थः'' इत्यनेन थस्य न्थादेशे, सवर्णदीर्घे, सस्य रुत्वे विसर्गे च 'पन्थाः' इति सिद्धम्। इत्वमेव सर्वनामस्थाने रूपं चलति।

### ३६८. भस्य टेर्लोपः ७/१/८८।।

भसञ्ज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्।

पथः। पथा। पथिभ्यामित्यादि। एवं मन्थाः, ऋभुक्षाः। स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः। सुपथी, सुमथी नगरी। अनृभुक्षी सेना। आत्त्वं नंपुसके न भवति '**न लुमता-**' (**सू. २६३**) इति प्रत्ययलक्षणनिषेधात्। सुपथि वनम्।

'**सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः**' (**वा. ४७८६**)। हे सुपथिन्!, हे सुपथि!। '**नलोपः सुप्स्वर-**' (**सू. ३५३**) इति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न। द्विवचने भत्वाट्टिलोपः। सुपथी। शौ सर्वनामस्थानत्वात् सुपन्थानि। पुनरपि सुपथि, सुपथी, सुपन्थानि। सुपथा। सुपथे। सुपथिभ्यामित्यादि।

भस्य टेर्लोपः-विधिसूत्रम्।

**पदच्छेदः -** भस्य, टेः, लोपः। भस्य षष्ठ्यन्तम्, टेः षष्ठ्यन्तम् लोपः प्रथमान्तपदम्।

**अनुवृत्तिः -** ''पथिमथ्यृभुक्षामात्'' इत्यतः पथिमथ्यृभुक्षाम् इत्यनुवर्तते।

**सूत्रार्थः -** भसंज्ञकस्य पथिन्शब्दस्य मथिन्शब्दस्य ऋभुक्षिन्शब्दस्य च टिलोपो भवति।

**रूपलेखनप्रकारः - पथः** - पथिन् शब्दात् शसि, अनुबन्धलोपे, 'यचि भम्' इत्यनेन भसंज्ञायाम् ''अचोऽन्त्यादि टि'' इत्यनेन इन्भागस्य टिसंज्ञायाम्, 'भस्य टेर्लोपः'' इति सूत्रेण इनो लोपे, सस्य रुत्वे विसर्गे च ''पथः'' इति सिद्धम्।

**व्याख्या -** (क) स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः। सुपथी, सुमथी नगरी। अनृभुक्षी सेना।

''सु शोभनः पन्थाः अस्याः, शोभनः मन्थाः यस्याः इति विग्रहात् बहुव्रीहिसमासत्वात्, स्त्रीलिङ्गे सुपथिन्, सुमथिन् शब्दात् नान्तलक्षणत्वात्, ऋन्नेभ्यो ङीप् इत्यनेन ङीपि, अनुबन्धलोपे, भसंज्ञायाम्, भस्य टेर्लोपः इत्यनेन टेर्लोपे, ''सुपथी (नगरी), सुमथी नगरी इति सिद्धम्।

अविद्यमान ऋभुक्षाः (स्वामी) यस्याः सा इत्यर्थे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः इति वार्तिकेन समासत्वात्, पूर्ववत् ङीपि, टेर्लोपे, अनृभुक्षी इति सिध्यति।

(ख) आत्वं नपुंसके न भवति 'न लुमताङ्गस्य' इति प्रत्यय लक्षणनिषेधात्। सुपथि वनम्। ''शोभनः पन्था अस्य वनस्य'' विग्रहेऽस्मिन् बहुव्रीहिसमासत्वात्। सुपथिन्शब्दात् 'सौ' स्वमोर्नपुसंकात् इत्यनेन सुलुकि, ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति सहकारेण ''पथिमथ्यृभुक्षामात्'' इत्यनेन आत्वप्राप्ते किन्तु ''न लुमताङ्गस्य'' इत्यनेन प्रत्ययलक्षणस्य निषेधात् न आत्वे न लोपे, ''सुपथि (वनम्) इति सिद्धम्। इत्थमेव सुमथि सिध्यति।

**वार्तिकः-** सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः (वा. ४७८६) हे सुपथिन् हे सुपथि।

**वार्तिकार्थः -** सम्बुद्धिपरे नपुंसकशब्दानां नकारस्य लोपो विकल्पेन वक्तव्यम् इत्यर्थः।

हे सुपथिन् हे सुपथि

सुपथिन् शब्दात् सम्बुद्धौ सौ, ''स्वमोर्नपुंसकात्'' इत्यनेन सुलुकि, 'सम्बुद्धौ नपंसुकानां नलोपो वा वाच्यः' इत्यनेन विकल्पेन नलोपे, हे सुपथि नलोपाभावे ''सुपथिन्'' इति सिध्यति। नलोपासिद्धत्वकारणात् ''ह्रस्वस्य गुणः'' इत्यनेन इकारस्य स्थाने गुणादेशः न भवति।

(ग) 'नलोपः सुप्स्वरः-' नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न। द्विवचने भत्वाट्टिलोपः। सुपथी। इत्यत्र 'न लुमताङ्गस्य' इत्यनेन अनित्यतापक्षे प्रत्ययलक्षणत्वात् सम्बुद्धि परे वर्तते, अतः नकारलोपत्वात् ''ह्रस्वस्य गुणः'' इत्यनेन गुणादेशस्य प्राप्तिः भवति तदा न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति इत्यनेन नकारलोपस्य असिद्धत्वात् गुणादेशो न भवति।

द्विवचने 'सुपथिन् + औ' इत्यत्र नपुंसकाच्च इत्यनेन शी-आदेशे, भसंज्ञायाम्, टेर्लोपे, सुपथी इति सिद्धम्।

(घ) शौ सर्वनामस्थानकारणात् सुपन्थानि। पुनरपि सुपथि, सुपथी, सुपन्थानि। सुपथा सुपथे, सुपथिभ्याम् इत्यादि।

**रूपलेखनप्रकारः -** ''सुपथिन्+जस्'' इत्यत्र ''जश्शसोःशि'' इत्यनेन शि आदेशे ''शि सर्वनामस्थानम्'' इत्यनेन

सर्वनामस्थानसंज्ञायां अतः भसंज्ञाया-अभावे इतोऽत्सर्वनामस्थाने इत्यनेन अकारादेशे, न्थादेशे, ''सर्वनामस्थाने चासम्बुद्धौ इति उपधादीर्घे, सुपन्थानि इति सिद्धम्।

## ३६९. ष्णान्ता षट् १/१/२४।।

षान्ता नान्ता च सङ्ख्या षट्सञ्ज्ञा स्यात्।

**'षड्भ्यो लुक्' ( सू. २६१ )**। पञ्च संख्या किम्? विप्रुषः, पामानः। शतानि, सहस्त्राणि इत्यत्र सन्निपातपरिभाषया न लुक्, सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात्। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः **'षट्चतुर्भ्यश्च' ( सू. ३३८ )** इति नुट्।

ष्णान्ता षट्-संज्ञासूत्रम्-

**पदच्छेदः-** ष्णान्ता, षट्। ष् च ण् च ष्णौ, ष्णौ अन्तौ यस्याः सा ष्णान्ता। ष्णान्ता प्रथमान्तम्, षट् प्रथमान्तम्।

**अनुवृत्तिः-** बहुगुणवतुडति सङ्ख्या इत्यतः सङ्ख्या इत्यनुवर्तते।

**सूत्रार्थः -** षकारान्ता तथा च नकारान्ता संख्या षट्सञ्ज्ञा भवति। पञ्चन्शब्दो नित्यं बहुवचनान्तः।

**पञ्च-** पञ्चन्शब्दात् प्रातिपदिकात् जसि, ''ष्णान्ता षट्'' इत्यनेन षट्सञ्ज्ञायाम्, 'षड्भ्यो लुक्'' इत्यनेन जश्लोपे, ''न लोपः प्रातिपदिकान्तस्य'' इत्यनेन नलोपे ''पञ्च'' इति सिद्धम्।

प्रत्युदाहरणम् - संख्या का? विप्रुषः, पामानः। षकारान्त-नकारान्तशब्दाः संख्यावाचिनः भवितव्याः, केवलं षान्तनान्तशब्देभ्यः जश्शसोः न लुकि यथा 'विप्रुष्+जस्', पामन्+जस् इत्यत्र षान्त नान्तशब्दत्वात् जश्शसोः लोपप्राप्ते परञ्च संख्यावाचकस्य अभावात् ''षड्भ्यो लुक्'' इत्यनेन न लुकि।

**व्याख्या -** शतानि सहस्राणि इत्यत्र सन्निपातपरिभाषया न लुक्। सर्वनामस्थानसन्निपातेन कृतस्य नुम्स्तदविघातकत्वात् पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। 'षट्चतुर्भ्यश्च (सू. ३३८) इति नुट्।

''शत+जस्'' तथा च ''सहस्र+जस्'' इत्यत्र षट्संज्ञायाम् ''जश्शसोः शि'' इत्यनेन शि-आदेशे ''शि सर्वनामस्थानम्'' इत्यनेन सर्वनामस्थानसंज्ञायाम्, ''नपुंसकस्य झलचः'' इत्यनेन नुमागमे, ''सर्वनामस्थाने चासम्बुद्धौ इत्यनेन उपधादीर्घे शतानि, सहस्राणि इति सिध्यतः। अत्र 'शिप्रत्ययं निमित्तं स्वीकृत्य नुमागमः भवति अतः नुम् सन्निपातविधिः विद्यते। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य परिभाषया जश्शसोः लोपस्य निषेधे, अर्थात् नुमागमः शित् कारणात् भवति अतः नुमागमः शिलोपस्यकार्ये निमित्तं न भवति अतः ''षड्भ्यो लुक्'' इति सूत्रस्य अप्रवृत्तिः।

## ३७०. नोपधायाः ६/४/७।।

नान्तस्योपधाया दीर्घः स्यान्नामि परे।

नलोपः, पञ्चानाम्। पञ्चसु। परमपञ्च। परमपञ्चानाम्। गौणत्वे तु न लुङ्नुटौ, प्रियपञ्चा। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियपञ्चाम्। एवं सप्तन् नवन् दशन्।

नोपधायाः - विधिसूत्रम्।

**पदच्छेदः -** न, उपधायाः। न अव्ययपदम्, उपधायाः षष्ठ्यन्तम्।

**अनुवृत्तिः -** ''ढ्रलोपे पूर्वस्य दीर्घोऽणः'' इत्यतः दीर्घः तथा च ''नामि'' इत्यतः अनुवृत्तिः समागच्छति। अङ्गस्याधिकारः।

**सूत्रार्थः -** नान्तस्योपधायाः दीर्घो भवति नामि परे।

**रूपलेखनप्रकारः - पञ्चानाम् -** पञ्चन्शब्दात् प्रातिपदिकात् आमि, षट्संज्ञायां ''षट् चतुर्भ्यश्च'' इत्यनेन ''आद्यन्तौ टकितौ'' इति सहकारेण नुडागमेऽनुबन्धलोपे, ''नोपधायाः'' इत्यनेन उपधादीर्घे, न लोपः प्रातिपदिकान्तस्य इत्यनेन नलोपे ''पञ्चानाम्'' इति सिद्धम्।

**परमपञ्च**– ''परमाश्च ते पञ्च'' इत्यर्थे कर्मधारयसमासत्वात् जसि, शसि, ''परमपञ्चन् + जस्'' इत्यवस्थायाम् षट्संज्ञायां ''षड्भ्यो लुक्'' इत्यनेन जश्शसोः लुकि परमपञ्च इति सिद्धम्। इत्थमेव परमपञ्चानाम् इति सिध्यति।

गौणत्वे तु लुङ्नुटौ। प्रियपञ्चा, प्रियपञ्चानौ, प्रियपञ्चानः। प्रियपञ्च्ञाम्। एवं सप्तन् नवन् दशन्

''प्रियाः पञ्च यस्य'' इत्यर्थे बहुव्रीहिसमासत्वात् प्रियपञ्चन्शब्दे पञ्चन्शब्दस्य गौणत्वात्। अतः जश्शसोः लुक् तथा च ''षट् चतुर्भ्यश्च' इत्यनेन नुडागमः न भवतः।

प्रियपञ्चा–प्रियाः पञ्च यस्येति बहुव्रीहौ प्रियपञ्चन् शब्दात् अन्यपदार्थे वर्तमानत्वात् सौ, उपधादीर्घे, सुलोपे, नलोपे च ''प्रियपञ्चा'' इति सिद्धम्।

## पञ्चन्-सप्तन्-नवन्-दशन् शब्दानां रूपाणि

**( बहुवचनमात्रे )**

| | | | | |
|---|---|---|---|---|
| प्रथमा | पञ्च | सप्त | नव | दश |
| द्वितीया | पञ्च | सप्त | नव | दश |
| तृतीया | पञ्चभिः | सप्तभिः | नवभिः | दशभिः |
| चतुर्थी | पञ्चभ्यः | सप्तभ्यः | नवभ्यः | दशभ्यः |
| पञ्चमी | पञ्चभ्यः | सप्तभ्यः | नवभ्यः | दशभ्यः |
| षष्ठी | पञ्चानाम् | सप्तानां | नवानाम् | दशानाम् |
| सप्तमी | पञ्चसु | सप्तसु | नवसु | दशसु |
| सम्बोधनं | पञ्च | सप्त | नव | दश |

## ३७१. अष्टन आ विभक्तौ ७/२/८४।।

अष्टन आत्वं स्याद्धलादौ विभक्तौ।

अष्टन आ विभक्तौ – विधिसूत्रम्।

**पदच्छेदः** – अष्टनः, आ, विभक्तौ। अष्टनः षष्ठ्यन्तम्, आः प्रथमान्तम्, विभक्तौ सप्तम्यन्तम्

**अनुवृत्तिः** – ''रायो हलि'' इत्यतः हलि इत्यपकृष्यते।

**सूत्रार्थः** – अष्टन आत्वं वा स्याद् हलादौ विभक्तौ।

## ३७२. अष्टाभ्य औश् ७/१/२१ ।।

कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्।

'**अष्टभ्यः**' इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदमष्टन आत्वम्, '**अष्टनो दीर्घात्**' **( सू. ३७१८ )** इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। अष्टौ। अष्टौ। परमाष्टौ। अष्टाभिः। अष्टाभ्यः। अष्टाभ्यः। अष्टानाम्। अष्टासु। आत्वाभावे अष्ट। अष्ट इत्यादि पञ्चवत्। गौणत्वे त्वात्वाभावे राजवत्। शसि प्रियाष्ट्नः। इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावान्न ष्टुत्वम्। कार्यकालपक्षे बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वा। प्रियाष्ट्ना इत्यादि। जश्शसोरनुमीयमानमात्वं प्राधान्य एव, न तु गौणतायाम्। तेन प्रियाष्ट्नो हलादावेव वैकल्पिकमात्वम्। प्रियाष्टाः। प्रियाष्टाभ्याम्। प्रियाष्टाभिः। प्रियाष्टाभ्यः। प्रियाष्टभ्यः। प्रियाष्टासु। '**प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि।' इति नान्ताः।** भष्भावः, जश्त्वचर्त्वे, भुत्, भुद्। बुधौ। बुधः। बुधा। भुद्भ्याम्। भुत्सु। **इति धान्ताः।**

अष्टाभ्य औश् – विधिसूत्रम्।

**पदच्छेदः** – अष्टाभ्यः, औश्। अष्टाभ्यः पञ्चम्यन्तम्, औश् प्रथमान्तम्।

**अनुवृत्तिः** – ''जश्शसोः शिः'' इत्यतः जश्शसोः इत्यनुवर्तते।

**सूत्रार्थः** – नकारस्य आत्वे कृते सति यः अष्टन्शब्दः तस्मात् परयोः जश्शसोः स्थाने औश् आदेशः भवति।

**व्याख्या** (क) ''अष्टभ्य:'' इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति।

अष्टन्शब्दात् भिस्प्रत्यये अष्टाभि:-अष्टभि: तथा च भ्यस्प्रत्यये अष्टाभ्य:-अष्टभ्य: रूपद्वयं सिध्यति अत: ''अष्टाभ्य औश्'' इति सूत्रस्य स्थानेऽपि ''अष्टभ्य औश्'' इति पाठो भवितव्य: तेन मात्राया अपि लाघवमासीत् परञ्च तथापि आकारस्य पाठ:। अत: आत्वयुक्त-अष्टन्शब्दात् औकारादेश: भवति। अत: ''अष्टन आ विभक्तौ'' इति सूत्रेण ज्ञायते यत् जस्-शस्-विभक्तौ परे आत्वं भवति। मूलकारेण वृत्तौ लिखितं यत् कृताकारादष्टन: इति।

(ख) वैकल्पिकं चेदमष्टन आत्वम्, 'अष्टनो दीर्घात्' इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। अष्टौ। अष्टौ। परमाष्टौ। अष्टाभि:। अष्टाभ्य:-अष्टाभ्य:। अष्टानाम्। अष्टासु। आत्वाभावे अष्ट। अष्ट इत्यादि पञ्चवत्। प्रकृतसूत्रे विकल्पबोधकशब्देन विनापि आत्वं वैकल्पिकं मन्यते यतोहि अष्टन्शब्दात् नित्य-आत्वं भवति चेत् ''अष्टनो दीर्घात्'' इति सूत्रे दीर्घग्रहणस्य आवश्यकता एव नासीत्।

**रूपलेखनप्रकार: - अष्टौ** - अष्टन् शब्दात् प्रातिपदिकात् जसि, ''अष्टन आ विभक्तौ'' इत्यनेन नस्य आत्वे, सवर्णदीर्घे, ''अष्टा + अस्'' इत्यवस्थायाम्, ''अष्टाभ्य औश्'' इत्यनेन जश्शसो: स्थाने औशि, शित्त्वात् सर्वादेशे, वृद्धौ, ''अष्टौ'' इति सिद्धम्। आत्वाभावे तु अष्ट इति पञ्चवद्रूपम्।

**नित्यबहुवचनान्त अष्टन्शब्दस्य रूपाणि**

| | **आत्वपक्षे** | **आत्वाभावपक्षे** |
|---|---|---|
| प्रथमा | अष्टौ | अष्ट |
| द्वितीया | अष्टौ | अष्ट |
| तृतीया | अष्टाभि: | अष्टभि: |
| चतुर्थी | अष्टाभ्य: | अष्टभ्य: |
| पञ्चमी | अष्टाभ्य: | अष्टभ्य: |
| षष्ठी | अष्टानाम् | अष्टानाम् |
| सप्तमी | अष्टासु | अष्टसु |

**परमाष्टौ** - ''परमाश्च ते अष्ट इति विग्रहात् समासत्वात् परमाष्टन् इति। परमाष्टन् शब्दात् जसि ''अष्टन आ विभक्तौ'' इत्यनेन नस्य आत्वे, सवर्णदीर्घे, ''अष्टाभ्य औश्'' इति औशि, शित्त्वात् सर्वादेशे, वृद्धौ, परमाष्टौ इति सिद्धम्। आत्वाभावे तु परमाष्ट इति।

**व्याख्या** - (क) गौणत्वे त्वात्वाभावे राजवत्। शसि प्रियाष्ट्न: बहुव्रीहिसमासे यदाष्टन्शब्द: गौणरूपे भवति तदा आत्वादीनि कार्याणि न भवन्ति। यथा ''प्रिया: अष्टौ येषां ते'' इति विग्रहात् अत्र अष्टन् शब्दस्य गौणत्वात् राजन्वत् अष्टन्शब्दस्य रूपाणि चलिष्यन्ति। प्रियाष्टा। प्रियाष्टानौ। प्रियाष्टान:। शसि ''अल्लोपोऽन:'' इत्यनेन अकारलोपत्वात् ''प्रियाष्ट्न:'' इति।

(ख) इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद् भावान्न ष्टुत्वम्। कार्यकालपक्षे बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वा। प्रियाष्ट्ना इत्यादि।''प्रियाष्ट्न् + अस्'' इत्यत्र अच: परस्मिन् पूर्वविधौ इत्यनेन अल्लोपस्य स्थानिवद्भावेन अकारबुद्धित्वात् ''ष्टुना ष्टु:'' इति सूत्रेण ष्टुत्वं न भवति। अत: ''प्रियाष्ट्न:'' इति सिध्यति।

अल्लोप: अङ्गसञ्ज्ञापेक्ष: भसञ्ज्ञापेक्ष: वर्तते तथा च प्रकृतिप्रत्ययसमुदायस्य अपेक्षाकारणात् बहिरङ्गं वर्तते। अल्पापेक्षाकारणात् ष्टुत्वमन्तरङ्गं वर्तते। अत: अन्तरङ्गकार्यकर्त्तव्यतायां बहिरङ्गाल्लोपस्य असिद्धत्वात् ष्टुत्वं न भवति।

कार्यकालपक्षे षष्ठाध्यायस्थं ''वाह ऊठ्'' सूत्रे ज्ञापितं षाष्ठीपरिभाषाया: प्रवृत्ति: त्रिपादीसूत्रेष्वपि भवति। अत: ''प्रियाष्ट्न:'' एव सिध्यति।

(ग) जश्शसोरनुमीयमानमात्वं प्राधान्य एव, न तु गौणतायाम्। ''अष्टन आ विभक्तौ'' इत्यनेन जश्शसो:

नकारस्य स्थाने आत्वम् अष्टन्शब्दार्थस्य प्राधान्य एव भवति, गौणतायां तु न भवति। अत्रस्तु बहुव्रीहिसमासत्वात् अष्टन्शब्दस्य गौणत्वादात्वं न भवति।

(घ) तेन प्रियाष्ट्नो हलादावेव वैकल्पिकमात्वम्। अतः अष्टन् शब्दार्थस्य गौणतायां जश्शसोः आत्वं न भवति तथा च हलादिविभक्तौ परे विकल्पेन आत्वं भवति।

**प्रियाष्टाः** - प्रियाष्टन् शब्दात् प्रातिपदिकात् सौ, ''अष्टन आ विभक्तौ'' इत्यनेन नस्य आत्वे, सवर्णदीर्घे, सस्य रुत्वे विसर्गे च ''प्रियाष्टाः'' इति सिद्धम्। गौणतायां ''षड्भ्यो लुक्'' तथा च ''षड् चतुर्भ्यश्च'' सूत्राणां प्रवृत्तिः न भवति। प्रियाष्टन्शब्दस्य रूपाणि राजन्वत् प्रचलन्ति तथा च हल्परे हाहाशब्दवत् चलन्ति। इति नान्ताः।

भष्भावः, जश्त्वचर्त्वे, भुत्-भुद्। बुधौ। बुधः।

बुधा। भुद्भ्याम्। भुत्सु। इति धान्ताः।

**भुत्-भुद्**- ज्ञानार्थक बुध अवगमने धातोः कर्तरि क्विप्प्रत्यये, सर्वापहारिलोपे, बुध्शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, ''एकाचो बशो भष् झषन्तस्य स्ध्वोः'' इत्यनेन बस्य भकारे, ''झलां जशोऽन्ते'' इति सूत्रेण जश्त्वे, ''वाऽवसाने'' इत्यनेन विकल्पेन चर्त्वे, ''भुत्-भुद्'' इति सिद्धम्।

### ३७३. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३/२/५९।।

एभ्यः क्विन् स्यात्। अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते।

निरुपपदाद्युजेः क्विन्। कनावितौ।

ऋत्विग्धृक्स्रग्दिगुष्णिगञ्चुयुजिकुञ्चां च- विधिसूत्रम्।

**पदच्छेदः** - ऋत्विक् च, दधृक् च, स्रक् च, दिक् च, उष्णिक् च अञ्चुश्च युजिश्च क्रुङ् च तेषामितरेतरद्वन्द्वः। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिकुञ्चाम् अति पञ्चम्यर्थे षष्ठी, च अव्ययपदम्।

**अनुवृत्तिः** - ''स्पृशोऽनुदके क्विन्'' इत्यतः क्विन् इत्यनुवर्तते। ''धातोः'' इत्यस्याधिकारः।

**सूत्रार्थः** - ऋतौ उपपदे यज्धातोः, धृष्धातोः, सृज्धातोः, दिश्धातोः, उत्पूर्वकात् ष्णिह्धातोः अञ्चुधातोः केवलात् युज्धातोः तथा च क्रुञ्चधातोः क्विन्प्रत्ययः भवति।

**व्याख्या** - अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते। अन्यैः सूत्रैः विधानं विनैव कानिचित् कार्याणि निपातनात् सिध्यन्ति। सूत्रेऽस्मिन् ऋत्विग्दधृक्स्रग्दिगुष्णि इत्यत्र प्रकृतिप्रत्ययस्य निर्देशं विनैव साक्षात्शब्दानां पाठोऽस्ति एतत् ''निपातनम्'' इति नाम्नोच्यते। किं नाम निपातनं तर्हि ''लक्षणं विनैव निपतति = लक्ष्येषु प्रवर्त्तते इति निपातनम्। तथा च कैयटेन प्रदत्तं निपातनस्य लक्षणम्।

**धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च।**
**अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्।।**

निरूपपदाद्युजेः क्विन् = उपपदं विना युज्धातोः क्विन्प्रत्ययः भवति। अत्र केवलं युज्धातोः विषयोऽस्ति।

### ३७४. कृदतिङ् ३/१/९३।।

सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्सञ्ज्ञः स्यात्।

कृदतिङ्- संज्ञासूत्रम्।

**पदच्छेदः** - कृत् अतिङ्। कृत् प्रथमान्तं, अतिङ् प्रथमान्तम्।

**अनुवृत्तिः** - ''तत्रोपपदं सप्तमीस्थम्'' इत्यतः तत्र इत्यनुवर्तते। ''धातोः'' इत्यस्याधिकारः।

**सूत्रार्थः** - धातोः इत्यधिकारे तिङ्भिन्नप्रत्ययस्य कृत्सञ्ज्ञा भवति। अतः क्विन्प्रत्ययस्यापि कृत्सञ्ज्ञा।

**व्याख्या** - कृत्संज्ञायाः फलमेतत् यत् ''कृत्तद्धितसमासाश्च'' इत्यनेन प्रातिपदिकसंज्ञा भवति। अत्र क्विन्प्रत्ययेऽवशिष्ट-वकारस्य कृत्संज्ञा भवति।

## ३७५. वेरपृक्तस्य ६/१/६७।।

अपृक्तस्य वस्य लोपः स्यात्। '**कृत्तद्धित-**' (**सू. १७९**) इति प्रातिपदिकत्वात् स्वादयः।

वेरपृक्तस्य- विधिसूत्रम्।

**पदच्छेदः -** वेः, अपृक्तस्य। वेः षष्ठ्यन्तम्, अपृक्तस्य षष्ठ्यन्तम्।

**अनुवृत्तिः-** ''लोपो व्योर्वलि'' इत्यतः लोपः इत्यनुवर्तते।

**सूत्रार्थः -** अपृक्तसञ्ज्ञकस्य वकारस्य लोपः स्यात्।

## ३७६. युजेरसमासे

युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः, संयोगान्तलोपः।

युजेरसमासे-विधिसूत्रम्।

**पदच्छेदः -** युजेः, असमासे। न समासः, असमासः, तस्मिन् असमासे। युजेः षष्ठ्यन्तम्, असमासे सप्तम्यन्तम्।

**अनुवृत्तिः-** ''उगिदचां सर्वनामस्थानेऽधातोः इत्यतः सर्वनामस्थाने तथा च ''इदितो नुम् धातोः'' इत्यतः नुम् इत्यनुवर्तते।

**सूत्रार्थः -** युजेः सर्वनामस्थाने परे नुम् भवति समासभिन्नस्थाने।

## ३७७. क्विन्प्रत्ययस्य कुः ८/२/६२।।

क्विन्प्रत्ययो यस्मात् तस्य कवर्गोऽन्तादेशः स्यात् पदान्ते।

नस्य कुत्वेनानुनासिको ङकारः। युङ्।'**नश्चापदान्तस्य-**'(**सू. १२३**) इति नुमोऽनुस्वारः, परसवर्णः, तस्यासिद्धत्वात्। '**चोः कुः**'(**सू. ३७८**) इति कुत्वं न। युञ्जौ। युञ्जः। युञ्जम्। युञ्जौ। युजः। युजा, युग्भ्यामित्यादि। 'असमासे' किम्?

क्विन्प्रत्ययस्य कुः-विधिसूत्रम्।

**पदच्छेदः -** क्विन्प्रत्ययस्य कुः। क्विन्प्रत्ययो यस्मात् स क्विन्प्रत्ययः, तस्य क्विन्प्रत्ययस्य।

**अनुवृत्तिः-** ''स्कोः संयोगाद्योरन्ते च'' इत्यतः अन्ते इत्यस्य अनुवर्तनमस्ति। 'पदस्य' इत्यस्याधिकारः।

**सूत्रार्थः -** क्विन्प्रत्ययो यस्मात् तस्य कवर्गोऽन्तादेशः भवति पदान्ते। नकारस्य कुत्वेनानुनासिको ङकारः। युङ्।

**विशेषः -** क्विन्प्रत्ययस्य सर्वापहारिलोपः कथमिति चेत्? तदित्थम्- ''हलऽन्त्यम्'' इति सूत्रेण नकारस्येत्संज्ञायाम् ''लशक्वतद्धिते'' इत्यनेन कस्येत्संज्ञायाम्, ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण इकारस्येत्संज्ञायाम्, ''तस्य लोपः'' इति सूत्रेणेत्संज्ञकवर्णानां लोपे, ''अपृक्त एकाल्प्रत्ययः'' इत्यनेन अपृक्तसंज्ञायाम्, ''वेरपृक्तस्य'' इत्यनेन वलोपे इत्थं क्विन्प्रत्ययस्य सर्वापहारिलोपः।

**रूपलेखनप्रकारः -ऋत्विक्-ऋत्विग्** ''ऋतौ यजति'' इति विग्रहे ऋतुपूर्वात् यज्धातोः ''ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'' इति सूत्रेण क्विनि, तस्य सर्वापहारिलोपे, ''ऋतु+ङि, यज्'' इत्यवस्थायां ''वचिस्वपियजादीनां किति'' इत्यनेन यकारस्य सम्प्रसारणेकारे, ''सम्प्रसारणाच्च'' इत्यनेन पूर्वरूपमेकादेशे, उपपदसमासे, विभक्तिलोपे, यणि, ऋत्विज् इत्यस्य प्रातिपदिकसञ्ज्ञायाम्, सौ, हल्ङ्यादिलोपे, ''क्विन्प्रत्ययस्य कुः'' इति सूत्रेण कुत्वेन जकारस्य गकारे, विकल्पेन चर्त्वे, ''ऋत्विक्-ऋत्विग्'' इति सिद्धम्।

**युङ्**-युज्धातोः ''ऋत्विग्दधृक्स्रग्दि'' इत्यादिना सूत्रेण क्विनि, तस्य सर्वापहारिलोपे, युज् इत्यस्य प्रातिपदिकसंज्ञायां सौ, ''युजेरसमासे'' इत्यनेन ''मिदचोऽन्त्यात्परः'' इति सहकारेण नुमि, ''युन्ज्स्'' इत्यवस्थायाम्, हल्ङ्यादिलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन जस्य लोपे, ''क्विन्प्रत्ययस्य कुः'' इत्यनेन नकारस्य कुत्वेन ङकारे, ''युङ्'' इति सिद्धम्।

**व्याख्या -** नश्चापदान्तस्य झलि इति नुमोऽनुस्वारः। परसवर्णः। तस्यासिद्धत्वात् 'चोः कुः इति कुत्वं न। युञ्जौ, युञ्जः। युञ्जम्, युञ्जौ, युजः। युजा। युग्भ्यामित्यादि।''युज्+औ'' इत्यत्र युजेरसमासे इति सूत्रेण नुमागमेऽनुबन्धलोपे, ''युन्ज्+औ''

इत्यवस्थायाम्, ''नश्चापदान्तस्य झलि'' इत्यनेन नस्यानुस्वारे, ''अनुस्वारस्य ययि परसवर्णः इत्यनेन परसवर्णे, परसवर्णस्यसिद्धत्वात् चोः कुः'' इत्यनेन कुत्वं न भवति, ''युञ्जौ'' इति सिद्धम्।

**प्रत्युदाहरणम्**- समासे किम्? ''युजेरसमासे'' इत्यनेन समासभिन्नस्थाने नुमागमो भवति अतः सुष्ठु युनक्ति उपपदसमासत्वात् सुयुज् इत्यत्र नुमागमः न भवति।

**३७८. चोः कुः ८/२/३०॥**

चवर्गस्य कवर्गः स्याद् झलि पदान्ते च। इति कुत्वम्, '**क्विन्प्रत्ययस्य-**' (**सू. ३७७**) इति कुत्वस्यासिद्धत्वात्, सुयुक्, सुयुग्। सुयुजौ। सुयुजः। '**युजेः**' इति धातुपाठपठितेकारविशिष्टस्यानुकरणम्, न त्विका निर्देशः। तेनेह न- युज्यते समाधत्ते इति युक्। '**युज् समाधौ**' दैवादिक आत्मनेपदी। संयोगान्तलोपः, खन्। खञ्जौ। खञ्ज इत्यादि। '**व्रश्च-**' (**सू. २९४**) इति षत्वम्, जश्त्वचर्त्वे, राट्, राड्। राजौ। राजः। राट्त्सु, राट्सु। एवं विभ्राट्। देवेट्। देवेजौ। देवेजः। विश्वसृट्, विश्वसृड्। विश्वसृजौ। विश्वसृजः। इह सृजियुज्योः कुत्वं नेति क्लीबे वक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्यात् '**टुभ्राजृ दीप्तौ**' इति फणादिरेव गृह्यते। यस्तु '**एजृ, भ्रेजृ, भ्राजृ दीप्तौ**' इति, तस्य कुत्वमेव। विभ्राक्, विभ्राग्। विभ्राग्भ्यामित्यादि।

'**परौ व्रजेः षः पदान्ते**' (**उ.सू. ११७**)। परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्तविषये षत्वं च। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। परिव्राजः।

चोः कुः - विधिसूत्रम् -

**पदच्छेदः -** चोः षष्ठ्यन्तम्, कुः प्रथमान्तम्।

**अनुवृत्तिः -** ''झलो झलि'' इत्यतः झलि तथा च ''स्कोः संयोगाद्योरन्ते च'' इत्यतः अन्ते इत्यनुवर्तते। पदस्य इत्यस्याधिकारः।

**सूत्रार्थः -** झल्परे तथा च पदान्ते चवर्गस्य स्थाने कवर्गादेशो भवति।

**व्याख्या -** (क) इति कुत्वम्, क्विन्प्रत्ययस्य कुः (सू. ३७७) इति कुत्वस्यासिद्धत्वात् सुयुक्, सुयुग्। ''सुपूर्वक युज्धातोः क्विनि, तस्य सर्वापहारिलोपे, सौ, हलङ्यादिलोपे, ''सुयुज्'' इत्यवस्थायाम्, ''क्विन्प्रत्ययस्य कुः'' इत्यनेन कुत्वप्राप्ते तथा च ''चोः कु :'' इत्यनेनापि कुत्वप्राप्ते, तदा ''पूर्वत्रासिद्धम्'' इति सूत्रेण ''क्विन्प्रत्ययस्य कुः'' इत्यस्य परत्रिपादीकारणात् कुत्वाऽसिद्धत्वकारणात् ''चोः कुः'' इत्यनेन कुत्वं भवति।

**विशेषः -** ''सुयुज्'' इत्यत्र ''चोः कुः'' इत्यनेनैव कुत्वं भवति। क्विन्प्रत्ययस्तु केवलं युज्धातोः भवति, अतः सुयुज् इत्यत्र तु क्विप्प्रत्ययः भवति।

**सुयुक्-सुयुग्**=सुपूर्वात् युज्धातोः क्विपि, तस्य सर्वापहारिलोपे, सौ, हल्ङ्यादिलोपे, ''चोः कुः'' इत्यनेन कुत्वे वैकल्पिकचर्त्वे, ''सुयुक्-सुयुग्'' इति सिद्धम्।

(ख) 'युजेः' इति धातुपाठपठितेकारविशिष्टस्यानुकरणम् न त्विका निर्देशः। तेनेह न। युज्यते समाधत्ते इति युक् 'युज् समाधौ' दैवादिक आत्मनेपदी। ''युजेरसमासे'' सूत्रे युजि एतत् धातुपाठे पठितेकारविशिष्टस्यानुकरणं विद्यते, इक्प्रत्ययस्य निर्देशो नास्ति। अतः युजिर् योगे बाले युज्धातोः नुमागमः तथा च युज्यते, समाधत्ते इत्यर्थे प्रयुक्तं युज समाधौ दैवादिक आत्मनेपदीधातोः क्विन्प्रत्ययत्वात् नुमागमः न भवति। केवलं ''क्विन्प्रत्ययस्य कुः'' इत्यनेन कुत्वे, ''युक्'' इति रूपं सिध्यति।

**रूपलेखनप्रकारः - खन्** - 'खजि गतिवैकल्ये 'धातोः' इदितो नुम् धातोः इति सूत्रेण नुमागमे, अनुबन्धलोपे, नस्यानुस्वारे-परसवर्णे, क्विपि, तस्य सर्वापहारिलोपे, खञ्ज्शब्दात् प्रातिपदिकात्, सौ, हल्ङ्यादिलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन संयोगान्तजस्य लोपे, ''निमित्तापाये नैमितिकस्याप्यपायः'' इति परिभाषया जलोपत्वादनुस्वार-परसवर्ण निवृत्तौ, ''खन्'' इति सिद्धम्।

**राट्-राड्**-''राजृ दीप्तौ'' धातोः क्विपि, तस्य सर्वापहारिलोपे, राज्शब्दात् ''कृत्तद्धितसमासाश्च'' इत्यनेन प्रातिपदिकात्, सौ, हल्ङ्यादिलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'' इत्यनेन जकारस्य स्थाने षकारे, ''झलां जशोऽन्ते'' इति सूत्रेण जश्त्वे डकारे, ''वाऽवसाने'' इत्यनेन वैकल्पिकचर्त्वे, ''राट्-राड्'' इति सिद्धम्। इत्थमेव विभ्राज्शब्दस्य रूपाणि।

**देवेट्-देवेड्** - 'देवान् यजते' इत्यर्थे देवपूर्वकयज्धातोः क्विपि, तस्य सर्वापहारिलोपे, ''वचिस्वपियजादीनां किति'' इत्यनेन यकारस्य सम्प्रसारणेकारे, ''सम्प्रसारणाच्च'' इति सूत्रेण पूर्वरूपमेकादेशे, उपपदसमासे, सुपो लुकि, गुणे, देवेज्शब्दात् प्रातिपदिकात्, सौ, शेषं राज्वत्।

**विश्वसृट्-विश्वसृड्**-'विश्वं सृजति' इत्यर्थे देवपूर्वात् 'सृज विसर्गे' धातोः क्विपि, सर्वापहारिलोपे, विश्वसृज्शब्दात् शेषं राज्वत्।

**व्याख्या** - इह सृजियुज्योः कुत्वं नेति क्लीबे वक्ष्यते। देवेज्शब्दात् तथा च विश्वसृज्शब्दात् कुत्वं कथन्न? तदित्थं यत् ''सृजिदृशोर्झल्यमकिति'' तथा च ''काम्यच्च'' सूत्रयोः भाष्यकारेण प्रदत्तेषु उदाहरणेषु ''रज्जुसृड्भ्याम् उपयट् काम्यति'' कुत्वस्याभावो हि उदाहरणमस्य।

परिमृट्-परिपूर्वकमृज्धातोः क्विपि तस्य सर्वापहारिलोपे, परिमृज्शब्दात् प्रातिपदिकात् सौ, शेषं पूर्ववत्।

**व्याख्या** - षत्वविधौ राजिसाहचर्यात् 'टुभ्राजृ दीप्तौ' इति फणादिरेव गृह्यते। यस्तु 'एजृ भ्रेजृ भ्राजृदीप्तौ' इति, तस्य कुत्वमेव। विभ्राक्-विभ्राग्। विभ्राग्भ्याम् इत्यादि।

''व्रश्चभ्रस्ज.'' सूत्रेऽस्मिन् षत्वार्थगृहीतभ्राज्धातोः फणादिगणपठितं ''टुभ्राजृदीप्तौ'' धातुरेव ग्रहणं भवति। भ्राजृदीप्तौ इत्यस्माद्धातोः न। अतः भ्वादिगणपठितं ''एजृ-भ्रेजृ-भ्राजृदीप्तौ धातूनां जकारस्य कुत्वमेव भवति, षत्वं न।

**रूपलेखनप्रकारः** - **विभ्राक्-विभ्राग्**- विपूर्वात् भ्राजृधातोः क्विपि, सर्वापहारिलोपे, विभ्राज्शब्दात् सौ, हल्ङ्यादिलोपे, ''चोः कुः'' इति कुत्वे, शेषं पूर्ववत्।

**व्याख्या** - 'परौ व्रजेः षः पदान्ते' (उ.सू. २१७) परावुपपदे व्रजेः क्विप् स्याददीर्घश्च पदान्तविषये षत्वं च। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। परिव्राजः। ''परौ व्रजेः षः पदान्ते'' इति सूत्रम् उणादिसूत्रं वर्तते। अस्यार्थः यत् परिपूर्वक्-व्रज्धातोः क्विप्, धातोः अकारः दीर्घः पदान्ते च षत्वं भवति। एतत् उणादिसूत्रं ''चोः कुः'' इत्यस्य सूत्रस्यापवादो विद्यते।

**रूपलेखनप्रकारः** - **परिव्राट्-परिव्राड्** = ''परित्यज्य सर्वं व्रजतीति परिव्राट् इत्यर्थे परिपूर्वक व्रज्धातोः परो व्रजेः षः पदान्ते इत्यनेन क्विपि, निपातनादुपधादीर्घे, जस्य षकारे, परिव्राष्शब्दात् जश्त्वे, वैकल्पिकचर्त्वे ''परिव्राट्-परिव्राड्'' इति सिद्धम्।

### ३७९. विश्वस्य वसुराटोः ६/३/१२८।।

विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे।

विश्वं वसु यस्य स विश्वावसुः। राडिति पदान्तोपलक्षणार्थम्। चर्त्वमविवक्षितम्।

विश्वाराट्, विश्वाराड्। विश्वराजौ, विश्वराजः। विश्वाराड्भ्याम् इत्यादि।

विश्वस्य वसुराटोः - विधिसूत्रम्।

**पदच्छेदः** - विश्वस्य, वसुराटोः। वसुश्च राट् च तयोरितरेतरद्वन्द्वः। विश्वस्य षष्ठ्यन्तम्, वसुराटोः सप्तम्यन्तम्।

**अनुवृत्तिः** - ''ढ्रलोपे पूर्वस्य दीर्घोऽणः'' इत्यतः दीर्घः इत्यनुवर्तते।

**व्याख्या** - राडिति पदान्तोपलक्षणार्थम्। चर्त्वमविवक्षितम्। राट् इति पदान्तस्य संकेतः। अतः 'राट्-राड्' इत्यस्य अनन्तरमेव सूत्रस्य प्रवृत्तिः भवति अन्यत्र न। फलतः अजादिविभक्तौ परे दीर्घो न भवति। अत्र चर्त्वस्य तु अविवक्षा विद्यते।

**विश्वावसुः** – ''विश्वं वसु यस्य स विश्वावसुः'' विग्रहेऽस्मिन् बहुव्रीहिसमासत्वात्, विश्ववसुशब्दात् प्रातिपदिकात् सौ, ''विश्वस्य वसुराटोः'' इति सूत्रेण दीर्घे, सस्य रुत्वे विसर्गे च ''विश्वावसुः'' इति सिद्धम्।

**विश्वाराट्-विश्वाराड्**-विश्वपूर्वात् राज्धातोः क्विपि, लोपे, विश्वराज्शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, ''व्रश्चभ्रस्जसृज-'' इत्यनेन जकारस्य षकारे, जश्त्वे, ''विश्वस्य वसुराटोः'' इति सूत्रेण दीर्घे, वैकल्पिकचर्त्वे, ''विश्वाराट्-विश्वाराड्'' इति सिद्धम्।

### ३८०. स्कोः संयोगाद्योरन्ते च ८/२/२९।।

पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्।

भृट् भृड्। सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः, भृज्जौ। भृज्जः। '**ऋत्विग्-**' ( **सू. ३७३** ) इत्यादिना ऋतावुपपदे यजेः क्विन्, क्विन्नन्तत्वात् कुत्वम्, ऋत्विक्, ऋत्विग्। ऋत्विजौ। ऋत्विजः। '**रात्सस्य**' ( **सू. २८०** ) इति नियमान्न संयोगान्तलोपः- ऊर्क्, ऊर्ग्। ऊर्जौ। ऊर्जः। **इति जान्ताः।** त्यदाद्यत्वं पररूपत्वं च।

स्कोः संयोगाद्योरन्ते च- विधिसूत्रम्।

**पदच्छेदः** – ''स्कोः, संयोगाद्योः, अन्ते, च। स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः। संयोग इति लुप्तषष्ठीकं पदम्। तयोराद्योः षष्ठ्यन्तम् अन्ते सप्तम्यन्तम्, चाव्ययपदम्।

**अनुवृत्तिः** – ''संयोगान्तस्य लोपः'' इति सूत्रात् लोप तथा च ''झलो झलि'' इत्यस्मात् झलि इत्यनुवर्तते।

**सूत्रार्थः** – पदान्ते झलि च परे यः संयोगः तत्र आदौ स्थितयोः सकारककारयोः लोपो भवति।

**रूपलेखनप्रकारः** –**भृट्-भृड्**-भृस्ज्शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे ''स्कोः संयोगाद्योरन्ते च'' इति सूत्रेण सस्य लोपे, ''व्रश्चभ्रस्ज-'' इत्यादिना जस्य षकारे, जश्त्वे, वैकल्पिकचर्त्वे, ''भृट्-भृड्'' इति सिद्धम्।

**भृज्जौ**-भृस्ज्शब्दात् प्रातिपदिकात् औ, ''स्तोः श्चुना श्चुः'' इति सूत्रेण सस्य शकारे, ''झलां जश् झशि'' इत्यनेन शस्य जकारे, ''भृज्जौ'' इति सिद्धम्।

**व्याख्या** – 'ऋत्विग्-' इत्यादिना ऋतावुपपदे यजेः क्विन्, क्विन्नन्तत्वात् कुत्वम्। ऋत्विक्-ऋत्विग्।

ऋतुपूर्वकयज्धातोः ''ऋत्विग्दधृक्--' इत्यादिना सूत्रेण क्विन्प्रत्यये, तस्य सर्वापहारिलोपे, शेषं पूर्वमुक्तं विद्यते।

### ऋत्विज् शब्दस्य रूपाणि

| | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | ऋत्विक्-ग् | ऋत्विजौ | ऋत्विजः |
| द्वितीया | ऋत्विजम् | ऋत्विजौ | ऋत्विजः |
| तृतीया | ऋत्विजा | ऋत्विग्भ्याम् | ऋत्विग्भिः |
| चतुर्थी | ऋत्विजे | ऋत्विग्भ्याम् | ऋत्विग्भ्यः |
| पञ्चमी | ऋत्विजः | ऋत्विग्भ्याम् | ऋत्विग्भ्यः |
| षष्ठी | ऋत्विजः | ऋत्विजोः | ऋत्विजाम् |
| सप्तमी | ऋत्विजि | ऋत्विजोः | ऋत्विक्षु |
| सम्बोधनं | हे ऋत्विक्-ग्! | हे ऋत्विजौ! | हे ऋत्विजः! |

'रात्सस्य' इति नियमान्न संयोगान्तलोपः- ऊर्क्-ऊर्ग्। ''ऊर्ज बलप्राणनयोः'' इति चुरादिगणीयधातोः णिचि, ऊर्जिधातोः क्विपि, तस्य सर्वापहारिलोपे, ''णेरनिटि'' इति सूत्रेण णिज्लोपे, ऊर्ज्प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, ''ऊर्ज्'' इत्यवस्थायाम्, ''संयोगान्तस्य लोपः'' इत्यनेन जकारस्य लोपप्राप्ते परञ्च ''रात्सस्य'' इति सूत्रेण निषेधे, ''चोः कुः'' इति सूत्रेण कुत्वे गकारे, वैकल्पिक चर्त्वे, ''ऊर्क्-ऊर्ग्'' इति सिद्धम्।

## ३८१. तदोः सः सावनन्त्ययोः ७/२/१०६ ।।

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ परे।

स्यः। त्यौ। त्ये। त्यम्। त्यौ। त्यान्। सः। तौ। ते। परमसः। परमतौ। परमते। द्विपर्यन्तानामित्येव, नेह– त्वम्। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यम्, अतित्वमिति गौणे चरितार्थत्वात्। सञ्ज्ञायां गौणत्वे चात्वसत्वे न– त्यद्। त्यदौ। त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु एनम्। एनौ। एनान्। एनेन। एनयोः। एनयोः।

तदोः सः सावनन्त्ययोः–विधिसूत्रम्।

**पदच्छेदः –** तदोः, सः, सौ, अनन्त्ययोः। तदोः षष्ठ्यन्तम्, सौ सप्तम्यन्तम्, सः प्रथमान्तम्, अनन्त्ययोः षष्ठ्यन्तम्।

**अनुवृत्तिः –** ''त्यदादीनामः'' इति सूत्राद् त्यदादीनामः इत्यनुवर्तते।

**सूत्रार्थः –** त्यदादीनाम् अन्त्यभिन्नस्य तकारस्य दकारस्य च स्थाने सकारादेशः स्यात् सुप्रत्यये परे। स्यः। त्यौ। त्ये। त्यम्। त्यौ। त्यान्।

**रूपलेखनप्रकारः – स्यः** – त्यद्शब्दात् प्रातिपदिकात् सौ, अनुबन्धलोपे, ''त्यदादीनामः'' इति सूत्रेण दकारस्य अत्वे, पररूपे, ''तदोः सः सावनन्त्ययोः'' इति सूत्रेण तकारस्य सकारादेशे, सस्य रुत्वे विसर्गे च ''स्यः'' इति सिद्धम्। सः। तौ। ते।

सः = तद्शब्दात् प्रातिपदिकात् सौ, अत्वे, पररूपे ''तदोः सः सावनन्त्ययोः'' इति सूत्रेण तकारस्य स्थाने सकारे, सस्य रुत्वे विसर्गे च ''सः'' इति सिद्धम्।

### तद्शब्दस्य रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात्–द् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

सम्बोधनं–सर्वनामशब्देषु सम्बोधनं न भवति।

**व्याख्या –** परमसः। परमतौ। परमते। ''परमश्चासौ सः'' इति विग्रहे कर्मधारयसमासत्वात् तद्शब्दस्यैव प्राधान्यता वर्तते। अतः त्यदादीनामः, ''तदोः सः सावनन्त्ययोः'' एतानि सूत्राणि 'अङ्गस्य' इत्यस्याधिकारत्वात् अतः ''पदाङ्गाधिकारे तस्य च तदन्तस्य च'' इति सहकारेण परमतद्शब्दात् अत्वे, पररूपे, सकारादेशे सस्य रुत्वे विसर्गे च ''परमसः'' इति सिध्यति। इत्थमेव परमतौ, परमतेऽपि

द्विपर्यन्तानामित्येव। नेह त्वम्। ''त्यदादीनामः'' इति सूत्राद् त्यद्–तद्–इदम्–अदस्–यद्–एतद्–एक–द्विपर्यन्तशब्दानामेव अत्वं भवति। युष्मद्शब्दस्तु एतस्माद् परिगणाद् बहिर्विद्यते। अतः ''त्वम्'' इत्यत्र ''तदोः सः सावनन्त्ययोः'' इति सूत्राद् दकारस्य स्थाने सकारादेशो न भवति। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यम्, अतित्वमिति गौणे चरितार्थत्वात्।

**शङ्का** – ''त्वाहौ सौ'' सूत्रस्यानुसारं ''त्वम्'' इति पदे युष्म स्थाने त्वादेशः भवति। यदि तकारस्य स्थाने सकारः अभीष्टं भवति चेत् ''स्वाहौ सौ'' इति सूत्रं भवितव्यमासीत् अतः 'द्विपर्यन्तानामेवेष्टिः' इत्यस्यानुवृत्तिः 'तदोः सः

सावनन्त्ययो:'' सूत्रेऽस्मिन् कथं क्रियते?

**समाधानम्** - तकारोच्चारणसामर्थ्यात् 'त्वम्' इति पदे ''तदो: स: सावनन्त्ययो:'' इति सूत्रेण सकारादेश: न भवितव्य: इति न सम्मतम् यतोहि 'द्विपर्यन्तानाम्' इत्यस्य अनुवृत्तिरभावात् 'अतित्वम्' इति पदे सत्वस्याप्रवृत्तित्वाद् तकारोच्चारणं सार्थकोऽस्ति, अनर्थको नास्ति, अत: 'त्वम्' इति पदे ''तदो: स: सावनन्त्ययो:'' इति सूत्रेण सत्वस्य निवृत्त्यर्थं। 'द्विपर्यन्तानाम्' इति अनुवृत्तिरावश्यकी।

**व्याख्या** - सञ्ज्ञायां गौणत्वे चात्वसत्वे न। त्यद्, त्यदौ, त्यद: अतित्यद्, अतित्यदौ, अतित्यद:। सर्वनामशब्दानां प्रयोग: यदि संज्ञारूपे गौणत्वे च क्रियते तर्हि त्यदादिषु अत्व-सत्वञ्च न भवन्ति।

**रूपलेखनप्रकार: - त्यद्** = त्यद् (नरबोधकत्वात्) शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे अत्र अत्व-सत्वस्य प्रवृत्ति: न।

**अतित्यद्** - 'त्यम् अतिक्रान्त:' विग्रहात्, त्यद् शब्दस्य गौणत्वात् अत्व-सत्वस्य प्रवृत्ति: न। अन्वादेशस्य विषयस्तु पूर्वं कथितं वर्तते।

## ३८२. ङेप्रथमयोरम् ७/१/२८।।

युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेश: स्यात्।

ङे प्रथमयोरम्-विधिसूत्रम्।

**पदच्छेद:** - ङे-प्रथमयो:, अम्। ङे लुप्तषष्ठीकं पदम्, प्रथमयो: षष्ठ्यन्तम्, अम् प्रथमान्तम्।

**अनुवृत्ति:** - ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्राद् युष्मदस्मद्भ्याम् इत्यनुवर्तते।

**सूत्रार्थ:** - युष्मदस्मद्शब्दानां परस्य ङे विभक्ते: स्थाने तथा च प्रथमाद्वितीयाविभक्त्यो: स्थाने अम् इत्यादेशो भवति।

## ३८३. मपर्यन्तस्य ७/२/९१।।

इत्यधिकृत्य।

मपर्यन्तस्य-अधिकारसूत्रम्।

**पदच्छेद:** - म: पर्यन्तम् (अवधि:) यस्य स मपर्यन्तस्तस्य मपर्यन्तस्य।

**सूत्रार्थ:** - अग्रे वक्ष्यमाणानि कार्याणि मपर्यन्तभागमधिकृत्यैव भवन्ति।

## ३८४. त्वाहौ सौ ७/२/९४।।

युष्मदस्मदोर्मपर्यन्तस्य 'त्व' 'अह' इत्येतावादेशौ स्त: सौ परे।

त्वाहौ सौ-विधिसूत्रम्।

**पदच्छेद:** - त्वश्च अहश्च तयोरितरेतरद्वन्द्व: त्वाहौ। त्वाहौ प्रथमान्तं सौ सप्तम्यन्तम्।

**अनुवृत्ति:** - ''युष्मदस्मदोरनादेशे'' इति सूत्रात् युष्मदस्मदो: इत्यनुवर्तते। 'मपर्यन्तस्य' 'अङ्गस्य' चाधिकार:।

**सूत्रार्थ:** - मपर्यन्तस्य युष्मद्शब्दस्य त्व् इत्यादेश: तथा च अस्मद्शब्दस्य अह् इत्यादेशो भवति सुपरे।

## ३८५. शेषे लोप: ७/२/९०।।

आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोप: स्यात्।

**'अतो गुणे' ( सू. १९१ )। 'अमि पूर्व:' ( सू. १९४ )।** त्वम्। अहम्। ननु 'त्वम् स्त्री' 'अहम् स्त्री' इत्यत्र 'त्व अम्' 'अह अम्' इति स्थिते अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वाट्टाप् प्राप्नोति। सत्यम्। अलिङ्गे युष्मदस्मदी। तेन स्त्रीत्वाभावान्न टाप्। यद्वा शेष इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया। तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोप:, स च परोऽप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभान्न टाप्। परमत्वम्। परमाहम्। अतित्वम्। अत्यहम्।

शेषे लोप:-विधिसूत्रम्।

**पदच्छेद:** - शेषे सप्तम्यन्तम्, लोप: प्रथमान्तम्।

**अनुवृत्तिः** – 'युष्मदस्मदोरनादेशे' इति सूत्रात् युष्मदस्मदोः इत्यनुवर्तते। 'अलोऽन्त्यस्य' इति परिभाषासूत्रस्योपस्थितिः।

**सूत्रार्थः** – आत्वयत्वनिमित्ताद्भिन्नविभक्तौ युष्मद्शब्दस्य अस्मद्शब्दस्य चान्त्यस्य लोपो भवति।

**रूपलेखनप्रकारः** – **त्वम्-अहम्** – युष्मदस्मद्शब्दयोः प्रातिपदिकात् सौ, ''ङे प्रथमयोरम्'' इति सूत्रेण सु स्थाने अमादेशे, ''त्वाहौ सौ'' इति सूत्रेण मपर्यन्तस्य युष्मदस्मद्शब्दयोः स्थाने त्वाहादेशौ, ''त्व अद् अम्'' ''अह अद् अम्'' इत्यवस्थायाम्, ''अतो गुणे'' इत्यनेन पररूपे ''शेषे लोपः'' इति सूत्रेण दलोपे, ''अमि पूर्वः'' इत्यनेन पूर्वरूपमेकादेशे, ''त्वम्'' ''अहम्'' इति सिद्धम्।

**व्याख्या** – ननु 'त्वं स्त्री' अहं स्त्री 'इत्यत्र' 'त्व अम् ' 'अह अम्' इति स्थिते अमि पूर्वरूपं परमपि बाधित्वा अन्तरङ्गत्वाट्टाप् प्राप्नोति।

ननु 'त्वं स्त्री' अहं स्त्री इत्यत्र युष्मदस्मद्शब्दयोः प्रयोगः स्त्रीलिङ्गे भवति चेत् अमादेशे, त्वाहादेशे, दलोपे, पररूपे 'त्व+अम्, 'अह+अम्' इति स्थिते ''अमि पूर्वः'' इति सूत्रेण पूर्वरूपस्य तथा च ''अजाद्यतष्टाप्'' इति सूत्रेण टाप्प्रत्ययस्य युगपत्प्राप्तौ, ''विप्रतिषेधे परं कार्यम्'' इत्यनेन परत्वात् पूर्वरूपं बाधित्वा ''अजाद्यतष्टाप्'' इति सूत्रेण टाप्प्रत्यये, सवर्णदीर्घे, ''अमि पूर्वः'' इत्यनेन पूर्वरूपे, 'त्वाम्, अहाम्' इति रूपद्वयं सिध्यति, तत् कथन्न? सत्यम्। अलिङ्गे युष्मदस्मदी। तेन स्त्रीत्वाभावान्न टाप्। तत्तु अर्द्धसत्यम्। ''सामआकम्'' सूत्रेऽस्मिन् भाष्यकारः युष्मदस्मद्शब्दान् अलिङ्गं स्वीकरोति अतः लिङ्गरहितशब्दयोस्तु, टाप् न भवति।

युष्मदस्मद्शब्दयोः अलिङ्गं स्वीक्रियते चेत् एका समस्या समागच्छति यत् ''युष्मान् ब्राह्मणीः पश्यामि अस्मान् ब्राह्मणी पश्य'' इत्यत्र ब्राह्मणीशब्देन सह पठितं सर्वनामयुष्मदस्मद्शब्दयोः द्वितीयाबहुवचने ''तस्माच्छसो नः पुंसि'' इति सूत्रेण सकारस्य स्थाने नकारादेशोऽपि भवितुं नार्हति। तथा च ''युष्मान् ब्राह्मणकुलानि पश्य, अस्मान् ब्राह्मणकुलानि पश्य'' एतयोः उदाहरणयोः नपुंसककारणात् नकारादेशो भवितुं नार्हति। अतः उक्तोदाहरणयोः ''शसो न'' इति सूत्रेण नकारादेशो भवति।

''अलिङ्गे युष्मदस्मदी'' अस्य भाष्यवचनस्य अभिप्रायो विद्यते यत् युष्मदस्मद्शब्दयोः त्रिषु लिङ्गेषु समानरूपकारणात् पुल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग शब्दानां बोधकान्यशब्दानां सन्निधिं विना एतयोः शब्दयोः लिङ्गविशेषस्य ज्ञानं भवितुं नार्हति। अतः स्त्रीत्वविवक्षायां टाप्प्रत्ययः भवितव्यः यतोहि 'अलिङ्गे युष्मदस्मदी' इति भाष्यवचनात् टाप्निवारणं कृतमासीत्, तन्न।

यद्वाशेष इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया। तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोपः, स च परोऽप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभावान्न टाप्। ''त्व+अद्+अम्'' इत्यत्रान्तरङ्गत्वात् पररूपे, ''त्वद्+अम्'' इत्यवस्थायाम्, शेषे लोपः इति सूत्रेण टेर्लोपे, 'त्व्+अम्' 'अह्+अम्' इत्यवस्थायां, अदन्तत्वाभावात् ''अजाद्यतष्टाप्'' इत्यनेन न टापि।

'परमत्वम्, परमाहम्' इत्यत्र 'ङे प्रथमयोरम्' इति सूत्रमङ्गाधिकारे पठितमस्ति अतः तदन्तविधिः विद्यते ''पदाङ्गाधिकारे तस्य च तदन्तस्य च'' इत्यनेन सर्वाणि कार्याणि भवन्ति, अतः परमत्वम्, परमाहम् इति।

## ३८६. युवावौ द्विवचने। ७/२/९२।।

द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।

युवावौ द्विवचने- विधिसूत्रम्।

**पदच्छेदः** – युवावौ, द्विवचने। युवश्च आवश्च तयोरितरेतरद्वन्द्वो युवावौ। युवावौ प्रथमान्तम्, द्विवचने सप्तम्यन्तम्।

**अनुवृत्तिः** – ''युष्मदस्मदोरनादेशे'' इति सूत्रात् युष्मदस्मदोः तथा च ''अष्टन आ विभक्तौ'' इत्यतः विभक्तौ इत्यनुवर्तते। 'मपर्यन्तस्य' इत्यस्याधिकारः।

**सूत्रार्थः** – द्वित्वविशिष्टार्थस्य वाचिनोः युष्मदस्मदोः मपर्यन्तस्य भागस्य क्रमशः युवावौ (युव, आव) स्तः विभक्तौ परे।

**३८७. प्रथमायाश्च द्विवचने भाषायाम्। ७/२/८८।।**

इह युष्मदस्मदोराकारोऽन्तादेशः स्यात्।

युवाम्। आवाम्। '**औङि**' इत्येव सुवचम्। भाषायाम् किम्? 'युवं वस्त्राणि' 'मपर्यन्तस्य' (सू. ३८३) किम्? साकच्कस्य मा भूत्, युवकाम्। आवकाम्। 'त्वया' 'मया' इत्यत्र 'त्व्या' 'म्या' इति मा भूत्। 'युवकाभ्याम्' 'आवकाभ्याम्' इति च न सिध्येत्।

प्रथमायाश्च द्विवचने भाषायाम्- विधिसूत्रम्।

**पदच्छेदः** – प्रथमायाः, च, द्विवचने, भाषायाम्। प्रथमायाः षष्ठ्यन्तम्, च अव्ययपदम्, द्विवचने सप्तम्यन्तम्, भाषायां सप्तम्यन्तम्।

**अनुवृत्तिः** – ''युष्मदस्मदोरनादेशे'' इति सूत्रात् युष्मदस्मदोः तथा च ''अष्टन आ विभक्तौ'' इत्यतः विभक्तौ इत्यनुवर्तते।

**सूत्रार्थः** – लौकिके व्यवहारे प्रथमाद्विवचने परे युष्मदस्मदोः आकारादेशः स्यात्।

**युवाम्, आवाम्**- युष्मद्शब्दात् प्रातिपदिकात् औ, ''ङे प्रथमयोरम्'' इति सूत्रेण अमादेशे, ''युवावौ द्विवचने'' इति सूत्रेण मपर्यन्तभागस्य स्थाने युवादेशे, ''युव+अद्+अम्'' इत्यवस्थायाम्, ''अतो गुणे'' इत्यनेन पररूपे, ''प्रथमायाच द्विवचने भाषायाम्'' इति सूत्रेण दकारस्यात्वे, ''युव+आ+अम्'' इत्यवस्थायाम्, सवर्णदीर्घे, ''युवा+अम्'' इत्यवस्थायाम्, ''अमि पूर्वः'' इत्यनेन पूर्वरूपे, ''युवाम्'' इति सिद्धम्। इत्थमेव आवाम्।

**व्याख्या** – 'औङि' इत्येव सुवचनम्। भट्टोजिदीक्षितेन मन्यते यत् ''प्रथमायाश्च द्विवचने भाषायाम्'' अस्य सूत्रस्य स्थाने ''औङि भाषायाम्'' इत्येव सूत्रं समीचीनमासीत्।

प्रत्युदाहरणम् – भाषायां किम्? युवं वस्त्राणि। ''प्रथमायाश्च द्विवचने भाषायाम्'' सूत्रेऽस्मिन् भाषायां इति पदप्रयोगात् लौकिकप्रयोगे आत्वं न तु वैदिकप्रयोगे। अतः ''युवं वस्त्राणि'' इति वैदिकोदाहरणे अनात्वे।

प्रत्युदाहरणम्- मपर्यन्तस्य किम्? साकच्कस्य माभूत्। युवकाम्। आवकाम्।

''युवावौ द्विवचने'' इति सूत्रेण सकलयुष्मद् अस्मद् शब्दयोः स्थाने युवावादेशकरणादपि आत्वं कृत्वा 'युवाम् – आवाम्' इति भवितुमर्हति, तत् कथन्नेति? ''युवावौ द्विवचने'' एतत् सूत्रं ''मपर्यन्तस्य'' इति सूत्रस्याधिकारक्षेत्रे पठनस्य कारणं किम्? साकच्कस्य मा भूत्। साकच्-युष्मकद्-अस्मकद् अत्र मा भूत्। अत्र 'युवाम्-आवाम्' इति रूपाणि न भवन्ति, अत्र तु मपर्यन्तत्वाद् 'युवकाम्-आवकाम्' रूपाणि भवन्ति।

'त्वया' 'मया' इत्यत्र त्व्या 'म्या' इति माभूत्। अत्र ''युवावौ द्विवचने'' एतत् सूत्रं ''मपर्यन्तस्य'' इति सूत्रस्य अधिकारक्षेत्रे पठनस्य द्वितीयं प्रयोजनं वर्तते यत् ''त्वमावेकवचने'' इति सूत्राद् त्व-मादेशाः सकल-युष्मदस्मद्स्थाने न स्युः केवलं मपर्यन्तभागस्य स्थाने स्युः। अतः त्व्या 'म्या' इति माभूत्।

'युवकाभ्याम्' 'आवकाभ्याम्' इति च न सिध्येत्। उक्तसूत्रेषु 'मपर्यन्तस्य' सूत्रस्याधिकारक्षेत्रे पठनस्य प्रयोजनं वर्तते यत् 'युवकाभ्याम्' 'आवकाभ्याम्' इत्यस्य सिद्धकरणम् अन्यथा 'युवाभ्याम्' 'आवाभ्याम्' रूपाण्येव भविष्यन्ति, तत्कथमिति चेत्? 'युष्मद्+भ्याम्', 'अस्मद्+भ्याम्' इत्यत्र 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्' इति वार्तिकसहकारेण ''अव्ययसर्वनाम्नामकच् प्राक्टेः'' इति सूत्रेण अकच्कृते 'युष्मकद्+भ्याम्, 'अस्मकद्+भ्याम्' इत्यवस्थायाम्, 'तन्मध्यपतितन्यायेन सकलाङ्गस्य स्थाने युवावादेशे, 'युष्मदस्मदोरनादेशे' इति सूत्रेण आकारादेशे, अतः अकच्स्थलेऽपि युवाभ्याम् आवाभ्याम् रूपाण्येव भविष्यन्ति, परञ्च तन्न समीचीनम्, अतः उक्तसूत्राणां पाठः 'मपर्यन्तस्य' इत्यस्य सूत्रस्याधिकारक्षेत्रे पठनात् 'युवकाभ्याम्, आवकाभ्याम्' इत्यभीष्टरूपाणि भविष्यन्ति।

## ३८८. यूयवयौ जसि ७/२/९३।।

स्पष्टम्। यूयम्। वयम्। परमयूयम्। परमवयम्। अतियूयम्। अतिवयम्। इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शीः प्राप्तः, '**अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्**' ( प. ९३ ) इति न भवति। '**ङेप्रथमयोरम्**' ( सू. ३८२ ) इत्यत्र मकारान्तरं प्रश्लिष्य 'अम् मान्त एवावशिष्यते, न तु विक्रियते' इति व्याख्यानाद्वा।

यूयवयौ जसि–विधिसूत्रम्।

**पदच्छेदः** – यूयवयौ, जसि। यूयश्च वयश्च तयोरितरेतरद्वन्द्वो यूयवयौ। यूयवयौ प्रथमान्तम्, जसि सप्तम्यन्तम्।

**अनुवृत्तिः** – 'युष्मदस्मदोरनादेशे' इति सूत्रात् युष्मदस्मदोः इत्यनुवर्तते। 'मपर्यन्तस्य' इत्यस्याधिकारः।

**सूत्रार्थः** – युष्मदस्मदोः मपर्यन्तस्य यूय वय इत्यादेशौ स्तः जसि परे।

**रूपलेखनप्रकारः** – **यूयम् ( वयम् )** – युष्मद्शब्दात् प्रातिपदिकात् जसि, 'ङे प्रथमयोरम्' इति सूत्रेण जस्स्थाने अमि, ''यूयवयौ जसि'' इत्यनेन ''मपर्यन्तस्य'' इति सूत्रसहकारेण यूयादेशे, ''यूय+अद्+अम्'' इत्यवस्थायाम्, पररूपे, ''शेषे लोपः'' इत्यनेन अद्भागस्य लोपे 'यूयम्' इति सिद्धम्। इत्थमेव वयम्। परमयूयम्, परमवयम्–कर्मधारयसमासेऽपि उपर्युक्तकार्याणि भवन्ति, अतः परमयुष्मद् परमास्मद् शब्दाभ्यां 'परमयूयम् परमवयम्' सिद्धम्। इत्थमेव गौणस्थलेऽपि 'अतियूयम् अतिवयम्' इति सिद्धम्।

**व्याख्या** – इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी प्राप्तः, अङ्गकार्ये कृते पुनर्नाङ्गकार्यम् इति न भवति। युष्मदस्मद्शब्दाभ्यां जसि ''यूय+अद्+जस्''' आव+अद्+जस्' इत्यत्र पररूपे, 'यूयद्+जस्, 'आवद्+जस्' इत्यवस्थायाम्, ''शेषे लोपः'' इति सूत्रेण दकारस्य लोपे, 'यूय+जस्' आव+जस् इत्यवस्थायाम् अवर्णान्तसर्वनामशब्दत्वात् ''जसः शी'' इति सूत्रेण श्यादेशप्राप्ते, परञ्च अङ्गकार्ये कृते पुनर्नाङ्गकार्यम् इति परिभाषया श्यादेशस्य निषेधे, यतोहि एकवारम् अङ्गाधिकारीयकार्यं भवति तदा पुनः तस्मिन्स्थाने एव अङ्गाधिकारीयकार्यं न भवति।

**व्याख्या** – 'ङे प्रथमयोरम्' इत्यत्र मकारान्तं प्रश्लिष्य 'अम् मान्त एवावशिष्यते, न तु विक्रियते' इति व्याख्यानाद्वा। 'ङे प्रथमयोरम्' इति सूत्रे 'अम्' इत्यनेन सहान्यस्य मकारस्य प्रश्लेषं कृत्वा ''संयोगान्तस्य लोपः'' इत्यनेन मकारस्य संयोगान्तलोपे, प्रश्लिष्टमकारं 'अम्' इत्यस्य विशेषणं स्वीकृत्य तदन्तविधिं कृत्वा मकारान्तं 'अमादेशस्य एव विधानं कृतं वर्तते। अतः पुनर्मान्तविधानसामर्थ्याद् न श्यादेशे।

## ३८९. त्वमावेकवचने ७/२/९७।।

एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।

त्वमावेकवचने– विधिसूत्रम्।

**पदच्छेदः** – त्वमौ एकवचने। त्वश्च मश्च तयोरितरेतरद्वन्द्वः। त्वमौ। एकस्य वचनम् एकवचनम् त्वमौ, प्रथमान्तम् एकवचने सप्तम्यन्तम्।

**अनुवृत्तिः** – ''अष्टन आ विभक्तौ'' इत्यतः विभक्तौ तथा च ''युष्मदस्मदोरनादेशे'' इत्यतः युष्मदस्मदोः इत्यनुवर्तते।

**सूत्रार्थः** – एकत्वार्थस्य वाचिनोः युष्मदस्मदोः मपर्यन्तस्य क्रमशः त्वमौ (त्व, म) भवतः विभक्तौ परे।

## ३९०. द्वितीयायां च ७/२/८७।।

युष्मदस्मदोराकारः स्यात्। त्वाम्। माम्। युवाम्। आवाम्।

द्वितीयायां च–विधिसूत्रम्।

**पदच्छेदः**– द्वितीयायां, च। द्वितीयायां सप्तम्यन्तम्, चाव्ययपदम्।

**अनुवृत्तिः** – 'अष्टन आ विभक्तौ' इति सूत्रात् विभक्तौ तथा च ''युष्मदस्मदोरनादेशे'' इत्यतः युष्मदस्मदोः इत्यनुवर्तते।

**सूत्रार्थः** – द्वितीयाविभक्तौ परतः युष्मदस्मदोः आकारः अन्तादेशः स्यात्।

**त्वाम् ( माम् )** युष्मद्शब्दात् प्रातिपदिकात् अमि, ''ङे प्रथमयोरम्'' इत्यनेन अम् स्थाने अमि, ''त्वमावेकवचने''

इति सूत्रेण मपर्यन्तभागस्य युष्म् स्थाने त्वादेशे, ''त्व+अद्+अम्'' इत्यवस्थायाम्, पररूपे, ''द्वितीयायां च'' इति सूत्रेण दस्यात्वे, ''त्व+आ+अम्'' इत्यवस्थायाम्, सवर्णदीर्घे, पूर्वरूपे च ''त्वाम्'' इति सिद्धम्। इत्थमेव मामपि।

### ३९१. शसो न ७/२/२९ ।।

नेत्यविभक्तिकं पदम्। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात्। अमोऽपवादः। **'आदेः परस्य' ( सू. ४४ )**। **'संयोगान्तस्य लोपः' ( सू. ४४ )**। युष्मान्। अस्मान्।

शसो न- विधिसूत्रम्।

**पदच्छेदः** - शसः, न। शसः षष्ठ्यन्तम्, न लुप्तप्रथमान्तपदम्।

**अनुवृत्तिः** - ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्रात् युष्मदस्मद्भ्यां इत्यनुवर्तते।

**सूत्रार्थः** - युष्मदस्मद्भ्यां परस्य शसः नकारः स्यात्। 'ङे प्रथमयोरम्' इत्यस्य अमोऽपवादः। ''आदेः परस्य'' इत्यनेन शसः अकारस्य स्थाने न भवति, न तु अलोऽन्त्यस्य इति। न इति अविभक्तिकं पदं वर्तते, न तु निषेधार्थकम् अव्ययपदम्।

**रूपलेखनप्रकारः** - **युष्मान् ( अस्मान् )** - युष्मद्शब्दात् प्रातिपदिकात् शसि, अनुबन्धलोपे, ''ङे प्रथमयोरम्'' इति सूत्रेण अमादेशप्राप्ते परञ्च ''शसो न'' इत्यनेन ''आदेः परस्य'' इति परिभाषया सहकारेण अकारस्य स्थाने नकारादेशे, 'युष्मद्+न्स्' इत्यवस्थायाम् ''द्वितीयायां च'' इति सूत्रेण दस्यात्वे, सवर्णदीर्घे, ''संयोगान्तस्य लोपः'' इत्यनेन सलोप, ''युष्मान्'' इति सिद्धम्। इत्थमेवास्मान्।

**विशेषः** - युष्मदस्मद्शब्दयोः अलिङ्गत्वात् पुल्लिङ्गे ''प्राप्तं ''तस्माच्छसो नः पुंसि'' इत्यनेन नकारादेशः न भवति अतः एतत् सूत्रमावश्यकम्।

### ३९२. योऽचि ७/२/८९ ।।

अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः। त्वया। मया।

योऽचि- विधिसूत्रम्।

**पदच्छेदः** - यः अचि। यः प्रथमान्तम्, अचि सप्तम्यन्तम्।

**अनुवृत्तिः** - ''युष्मदस्मदोरनादेशे'' इति सूत्रात् उभयपदस्य तथा च ''अष्टन आ विभक्तौ'' इति सूत्रात् विभक्तौ इत्यनुवर्तते।

**सूत्रार्थः** - अनादेशे अजादौ विभक्तौ युष्मदस्मदोः अन्त्यस्य यादेशः स्यात्।

**रूपलेखनप्रकारः** - **त्वया ( मया )** - युष्मद्शब्दात् प्रातिपदिकात् टाविभक्तौ, अनुबन्धलोपे, ''त्वमावेकवचने'' इत्यनेन मपर्यन्तभागस्य युष्म्स्थाने त्वादेशे, ''त्व+अद्+आ'' इत्यवस्थायाम्, पररूपे ''योऽचि'' इति सूत्रेण दस्य यादेशे, ''त्वया'' इति सिद्धम्। इत्थमेव मया।

### ३९३. युष्मदस्मदोरनादेशे ७/२/८६ ।।

अनयोराकारः स्यादनादेशे हलादौ विभक्तौ।

युवाभ्याम्। आवाभ्याम्। युष्माभिः। अस्माभिः।

युष्मदस्मदोरनादेशे-विधिसूत्रम्।

**पदच्छेदः** - युष्मदस्मदोः, अनादेशे। युस्मच्च अस्मच्च तयोरितरेतरयोगद्वन्द्वो युष्मदस्मदौ, तयोः युष्मदस्मदोः। नास्ति आदेशो यस्य स अनादेशस्तस्मिन् अनादेशे।

**अनुवृत्तिः**- ''रायो हलि'' इति सूत्रात् हलि तथा च ''अष्टन आ विभक्तौ'' इत्यतः विभक्तौ इत्यनुवर्तते।

**सूत्रार्थः** - आदेशभिन्नहलादौ विभक्तौ युष्मदस्मदोः अन्त्यस्य दकारस्य आकारादेशः स्यात्। ''अलोऽन्त्यस्य'' इति सहाय्येन।

**रूपलेखनप्रकारः – युवाभ्याम् ( आवाभ्याम् )** युष्मद्शब्दात् प्रातिपदिकात् भ्यामि, ''युवावौ द्विवचने'' इति सूत्रेण युष्म्स्थाने युवादेशे, ''युव+अद्+भ्याम्'' इत्यवस्थायाम् पररूपे, ''युष्मदस्मदोरनादेशे'' इति सूत्रेण दकारस्य आकारे, सवर्णदीर्घे, ''युवाभ्याम्'' इति सिद्धम्। इत्थमेवावाभ्याम्।

### ३९४. तुभ्यमह्यौ ङयि ७/२/९५।।

अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः।'**शेषे लोपः**'**( सू. ३८५ )**। तुभ्यम्। मह्यम्। परमतुभ्यम्। परममह्यम्। अतितुभ्यम्। अतिमह्यम्। युवाभ्याम्। आवाभ्याम्।

तुथ्यमह्यौ ङयि–विधिसूत्रम्।

**पदच्छेदः –** तुभ्यमह्यौ, ङयि। तुभ्यश्च मह्यश्च तयोरितरेतरद्वन्द्वः तुभ्यमह्यौ। तुभ्यमह्यौ प्रथमान्तम्, ङयि सप्तम्यन्तम्।

**अनुवृत्तिः –** ''युष्मदस्मदोरनादेशे'' इति सूत्रात् युष्मदस्मदोः इत्यनुवर्तते।'मपर्यन्तस्य' इत्यस्याधिकारः।

**सूत्रार्थः –** ङे विभक्तौ युष्मदस्मदोः मपर्यन्तस्य क्रमशः तुभ्यमह्यौ आदेशौ स्तः।

**रूपलेखनप्रकारः – मह्यम् ( तुभ्यम् )** – अस्मद्शब्दात् प्रातिपदिकात् ङेविभक्तौ, ''ङे प्रथमयोरम्'' इति सूत्रेण ङे स्थाने अमादेशे, स्थानिवद्भावमाश्रित्य ''तुभ्यमह्यौ ङयि'' इति सूत्रेण मपर्यन्तस्य अस्म् स्थाने मह्यादेशे, ''मह्य+अद्+अम्'' इत्यवस्थायाम्, पररूपे ''मह्यद्+अम्'' इत्यवस्थायाम्, ''शेषे लोपः'' इति सूत्रेण टेर्लोपे, ''मह्यम्'' इति सिद्धम्। इत्थमेव तुभ्यमिति। कर्मधारयसमासत्वात् परमयुष्मद् परमास्मद्शब्दयोः 'परमतुभ्यम्' 'परममह्यम्' इति। गौणत्वे तु अतितुभ्यम् अतिमह्यमिति।

### ३९५. भ्यसो भ्यम् ७/१/३०।।

भ्यसो भ्यम् अभ्यम् वादेशः स्यात्। आद्यः शेषे लोपस्यान्त्यलोपत्व एव। तत्राङ्गवृत्तपरिभाषया एत्त्वं न। अभ्यम् तु पक्षद्वयेऽपि साधुः। युष्मभ्यम्। अस्मभ्यम्।

भ्यसोभ्यम्- विधिसूत्रम्।

**पदच्छेदः –** भ्यसः भ्यम्। भ्यसः षष्ठ्यन्तम् भ्यम् प्रथमान्तम्।

**अनुवृत्तिः –** ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्रात् युष्मदस्मद्भ्याम् इत्यनुवर्तते।

**सूत्रार्थः –** युष्मदस्मद्शब्दाभ्यां परस्य भ्यस् स्थाने भ्यम् अभ्यम् विकल्पेन इत्यादेशो भवति।

**व्याख्या –** आद्यःशेषे लोपस्यान्त्यलोपत्व एव। तत्राङ्गवृत्तपरिभाषया एत्वं न। अभ्यम् तु पक्षद्वयेऽपि साधुः। भ्यसोभ्यम् पदस्यास्य प्रकारद्वयं पदच्छेदः भवितुमर्हति भ्यसः भ्यम् तथा च भ्यसः अभ्यम्। दीक्षितस्य मतानुसारं भ्यम् अभ्यम् वादेशः भवति।

आद्यपक्षे भ्यमादेशे, ''युष्मद्+भ्यम् इत्यत्र ''शेषे लोपः'' इति सूत्रेण दस्य लोपे, ''युष्मभ्यम्'' इति सिद्धम्। इत्यत्र यद्यपि ''बहुवचने झल्येत्'' इत्यनेन एत्वप्राप्ते परञ्च ''अङ्गवृत्ते पुनर्वृत्तावविधिः'' इति परिभाषया अङ्गकार्यस्य निषेधत्वात् एत्वं न भवति।

अभ्यमादेशपक्षे ''शेषे लोपः'' इति सूत्रेणान्त्यदकारस्य लोपेऽथवा टेर्लोपे, उभयत्र ''युष्मभ्यम्, अस्मभ्यम्, इति सिद्धं भवति। दकारलोपपक्षे तु ''अतो गुणे'' इति सूत्रेण पररूपं भवति।

**रूपलेखनप्रकारः – युष्मभ्यम् ( अस्मभ्यम् )**

युष्मद्शब्दात् प्रातिपदिकात् भ्यसि, ''भ्यसो भ्यम्'' इति सूत्रेण भ्यस् स्थाने भ्यमादेशे, ''शेषे लोपः'' इति सूत्रेणान्त्यलोपपक्षे दकारस्यलोपे, ''बहुवचने झल्येत्'' इति सूत्रेण एत्वप्राप्ते परञ्च ''अङ्गवृत्ते पुनर्वृत्तावविधिः'' इत्यनेन निषेधे, ''युष्मभ्यम्'' इति सिद्धम्। इत्थमेव अस्मभ्यमिति।

### ३९६. एकवचनस्य च ७/१/३२।।

आभ्यां पञ्चम्येकवचनस्य अत् स्यात्।

त्वत्। मत्। '**ङसेश्च**' इति सुवचम्। युवाभ्याम्। आवाभ्याम्।

एकवचनस्य च - विधिसूत्रम्।

**पदच्छेदः** - एकवचनस्य षष्ठ्यन्तम्, चाव्ययपदम्।

**अनुवृत्तिः** - ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्रात् युष्मदस्मद्भ्यां तथा च। पञ्चम्या अत् इत्यतः सकलसूत्रं अनुवर्तते।

**सूत्रार्थः** - युष्मदस्मद्भ्यां परस्य ङसि स्थाने अत् आदेशः स्यात्।

**रूपलेखनप्रकारः** - **त्वत् ( मत् )** युष्मद्शब्दस्य प्रातिपदिकात् ङसिविभक्तौ, अनुबन्ध लोपे, ''एकवचनस्य च'' इति सूत्रेण ''अनेकाल्शित्सर्वस्य'' इति सूत्रसहकारेण अस् स्थाने अदादेशे, ''युष्मद्+अत्'' इत्यवस्थायाम्, ''त्वमावेकवचने'' इत्यनेन युष्म् स्थाने त्वादेशे, ''त्व+अद्+अत्'' इत्यवस्थायाम् पररूपे, टेर्लोपे, ''त्व्+अत्'' इत्यवस्थायाम् 'त्वत्' इति सिद्धम्।

**विशेषः** - ङसेश्च इत्येव सुवचम्। भट्टोजिदीक्षितस्य मतानुसारं 'एकवचनस्य च' इति सूत्रस्य स्थाने 'ङसेश्च' इत्येव समीचीनं मात्रालाघवञ्च वर्तते।

## ३९७. पञ्चम्या अत् ७/१/३१ ।।

आभ्यां पञ्चम्या भ्यसोऽत् स्यात्। युष्मत्। अस्मत्।

पञ्चम्या अत्- विधिसूत्रम्।

**पदच्छेदः** - पञ्चम्याः, अत्। पञ्चम्याः षष्ठ्यन्तम्, अत् प्रथमान्तम्।

**अनुवृत्तिः**- ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्रात् युष्मदस्मद्भ्याम् तथा च 'भ्यसो भ्यम्' इत्यतः भ्यसः इत्यनुवर्तते।

**सूत्रार्थः** - युष्मदस्मद्भ्यां परस्य पञ्चमीविभक्तेः भ्यसः स्थाने अत् इत्यादेशः स्यात्।

**रूपलेखनप्रकारः** - **युष्मत् ( अस्मत् )** युष्मद्शब्दात् प्रातिपदिकात् भ्यसि, 'पञ्चम्या अत्' इति सूत्रेण भ्यसः स्थाने अदिति सर्वादेशे, 'शेषे लोपः' इत्यनेन टिलोपे। इत्थमेवास्मदिति।

## ३९८. तवममौ ङसि ७/२/९६ ।।

अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।

तवममौ ङसि- विधिसूत्रम्।

**पदच्छेदः** - तवश्च ममश्च तयोरितरेतरद्वन्द्वः तवममौ। तवममौ प्रथमान्तम् ङसि सप्तम्यन्तम्।

**अनुवृत्तिः** - युष्मदस्मदोरनादेशे इति सूत्रात् युष्मदस्मदोः इत्यनुवर्तते। 'मपर्यन्तस्य' इत्यस्याधिकारः।

**सूत्रार्थः** - युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमशः तव मम इत्यादेशौ स्तः ङसि परे।

## ३९९. युष्मदस्मद्भ्यां ङसोऽश् ७/१/२७।।

स्पष्टम्। तव। मम। युवयोः। आवयोः।

युष्मदस्मद्भ्यां ङसोऽस्- विधिसूत्रम्।

**पदच्छेदः** - युष्मदस्मद्भ्यां पञ्चम्यन्तम्, ङसः षष्ठ्यन्तम् अश् प्रथमान्तम्।

**सूत्रार्थः** - युष्मदस्मद्भ्यां परस्य ङस् इत्यस्य स्थाने अश् आदेशः स्यात्।

**तव ( मम )** युष्मद्शब्दात् प्रातिपदिकात् ङसि, ''तवममौ ङसि'' इति सूत्रेण मपर्यन्तभागस्य युष्म स्थाने तवादेशे, ''तव+अद्+अस्'' इत्यवस्थायाम्, ''युष्मदस्मद्भ्यां ङसोऽश्' इति सूत्रेण अशादेशे, ''तव+अद्+अ'' इत्यवस्थायाम् पररूपे टेर्लोपे, ''तव'' इति सिद्धम्। इत्थमेव ममेति।

## ४००. साम आकम् ७/१/३३ ।।

आभ्यां परस्य साम आकं स्यात्। भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। युष्माकम्। अस्माकम्। त्वयि। मयि।

युवयोः। आवयोः युष्मासु। अस्मासु।

**समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी।**
**समासार्थोऽन्यसंख्यश्चेत्स्तो युवावौ त्वमावपि।।१।।**
**सुजस्ङेङस्सु परत आदेशाः स्युः सदैव ते।**
**त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि।।२।।**
**एते परत्वाद्बाधन्ते युवावौ विषये स्वके।**
**त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः।।३।।**
**द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी।**
**तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च।।४।।**

त्वां मां वा अतिक्रान्त इति विग्रहे अतित्वम्, अत्यहम्। अतित्वाम्, अतिमाम्। अतियूयम्, अतिवयम्। अतित्वाम्, अतिमाम्। अतित्वाम्, अतिमाम्। अतित्वान्, अतिमान्। अतित्वया, अतिमया। अतित्वाभ्याम्, अतिमाभ्याम्, अतित्वाभिः, अतिमाभिः। अतितुभ्यम्, अतिमह्यम्। अतित्वाभ्याम्, अतिमाभ्याम्। अतित्वभ्यम्, अतिमभ्यम्। ङसिभ्यसोः- अतित्वत् अतित्वत्। अतिमत्। भ्यामि प्राग्वत्। अतितव, अतिमम। अतित्वयोः, अतिमयोः। अतित्वाकम्, अतिमाकम्। अतित्वयि, अतिमयि। अतित्वयोः, अतिमयोः। अतित्वासु, अतिमासु।।

युवाम् आवां वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औ-अम्-औट्सु अतियुवाम्। अतियुवाम्, अतियुवाम्। अत्यावाम्, अत्यावाम्, अत्यावाम्। अतियुवान्, अत्यावान्। अतियुवया, अत्यावया। अतियुवाभ्याम् ३, अत्यावाभ्याम् अतियुवाभिः, अत्यावाभिः। भ्यसि-अतियुवभ्यम्, अत्यावभ्यम्। ङसिभ्यसोः-अतियुवत्। अतियुवत्। अत्यावत्, अत्यावत्। ओसि- अतियुवयोः, अतियुवयोः। अत्यावयोः, अत्यावयोः। अतियुवाकम्, अत्यावाकम्। अतियुवयि, अत्यावयि। अतियुवासु। अत्यावासु।।

युष्मानस्मान् वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औ-अम्-औट्सु अतियुष्माम्। अतियुष्माम्, अतियुष्माम्। अत्यस्माम् अतियुष्मान् अत्यस्मान् अतियुष्मया अत्यस्मया अतियुष्माभ्याम् ३, अत्यस्माभ्याम् ३। अतियुष्माभिः, अत्यस्माभिः। भ्यसि अतियुष्मभ्यम्, अत्यस्मभ्यम्। ङसिभ्यसोः-अतियुष्मत् २, अत्यस्मत् २। ओसि-अतियुष्मयोः, अतियुष्मयोः। अत्यस्मयोः, अत्यस्मयोः। अतियुष्माकम्, अत्यस्माकम्। अतियुष्मयि, अत्यस्मयि। अतियुष्मासु, अत्यस्मासु।

साम आकम्- विधिसूत्रम्।

**पदच्छेदः -** सामः, आकम्। सामः षष्ठ्यन्तम्, आकं प्रथमान्तम्।

**अनुवृत्तिः -** ''युष्मदस्मद्भ्यां ङसोऽश्'' इति सूत्रात् युष्मदस्मद्भ्यां इत्यनुवर्तते।

**सूत्रार्थः -** युष्मदस्मद्भ्यां परस्य षष्ठीबहुवचने सामः स्थाने आकमादेशः स्यात्।

**व्याख्या -** भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः ''युष्मदस्मद्शब्दाः हलन्ताः वर्तन्ते, अतः ''आमि सर्वनाम्नः सुट्'' इति सूत्रेण सुडागमस्य प्राप्तिरेव न भवति। यदा स्थानी साम् नास्ति तदा अस्य स्थाने आकमादेशस्य किं प्रयोजनमस्ति?

''शेषे लोपः'' इति सूत्रात् दकारस्य लोपत्वात् युष्मदस्मद्शब्दयोः सुडागमः प्राप्तिः भवति अतः भाविसुडागमस्य निवारणार्थं ''साम आकम्'' इति सूत्रे 'साम्' स्थानी विद्यते। अतः आकमादेशानन्तरं युष्मदस्मद्शब्दयोः अन्त्यवर्णदकारस्य लोपत्वादपि अकारान्तत्वादपि सुडागमः भवितुं नार्हति।

युष्माकम् (अस्माकम्) युष्मद्शब्दात् प्रातिपदिकात् आमि, ''साम आकम्'' इति सूत्रेण आम् स्थाने आकमादेशे, ''युष्मद्+आकम्'' इत्यवस्थायाम्, ''शेषे लोपः'' इति सूत्रेण टेर्लोपे, ''युष्माकम्'' इति सिद्धम्।

## युष्मद् - रूपाणि

| | | | |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## अस्मद् रूपाणि

| | | | |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

''त्वमावेकवचने'' इत्यत्र 'युवावौ द्विवचने' इत्यत्र च एक-वचनद्विवचनशब्दौ योगिकौ, न तु प्रत्ययपराविति स्थितम् तत्फलं श्लोक चतुष्टयेन गृह्णाति- समस्यमान इति।

अन्वयः (१) समस्यमाने युष्मदस्मदी द्वयेकत्ववाचिनौ (तदा) समासार्थः अन्यसंख्यः चेद् (अपि) युवावौ, त्वमौ स्तः।

(२) सुजस्ङेङस्सुपरतः ते त्वाहौ यूयवयौ तुभ्यमह्यौ तवममौ इति आदेशाः सदैव स्युः।

(३) एते परत्वात् स्वके विषये युवावौ बाधन्ते। त्वमावपि पूर्वविप्रतिषेधतः प्रबाधन्ते।

(४) यदा द्व्येकसंख्यः समासार्थः बह्वर्थे युष्मदस्मदी (तदा) तयोः अद्वयेकतार्थत्वात् न युवावौ न च त्वमौ।

अतित्वम्- अत्यहम्

''त्वां मां वा अतिक्रान्तः' विग्रहेऽस्मिन् 'अत्यादयः द्वितीयया' इत्यनेन समासकारणात् अतियुष्मद्-अत्यस्मद् शब्दाभ्यां सौ, ''त्वाहौ सौ'' इति सूत्रेण त्व-अहादेशयोः ''ङे प्रथमयोरम्'' इति सूत्रेण अमादेशयोः, ''अतित्व+अद्+अम्'' अति+अह+अद्+अम्'' इति स्थितौ, ''अतो गुणे'' इति सूत्रेण पररूपे, यणि, अतित्वद्+अम्, अत्यहद्+अम्, इति स्थितौ, ''शेषे लोपः'' इत्यनेन अद्भागस्य लोपे, ''अतित्वम्-अत्यहम्' इति।

## समस्यमान-एकत्ववाची-अतियुष्मद् शब्दरूपाणि

| | | | |
|---|---|---|---|
| प्रथमा | अतित्वम् | अतित्वाम् | अतियूयम् |
| द्वितीया | अतित्वाम् | अतित्वाम् | अतित्वान् |
| तृतीया | अतित्वया | अतित्वाभ्याम् | अतित्वाभिः |
| चतुर्थी | अतितुभ्यम् | अतित्वाभ्याम् | अतित्वभ्यम् |
| पञ्चमी | अतित्वत् | अतित्वाभ्याम् | अतित्वत् |
| षष्ठी | अतितव | अतित्वयोः | अतित्वाकम् |

| | | | |
|---|---|---|---|
| सप्तमी | अतित्वयि | अतित्वयोः | अतित्वासु |

**समस्यमान-एकत्ववाची- अत्यस्मद् शब्दरूपाणि**

| | | | |
|---|---|---|---|
| प्रथमा | अत्यहम् | अतिमाम् | अतिवयम् |
| द्वितीया | अतिमाम् | अतिमाम् | अतिमान् |
| तृतीया | अतिमया | अतिमाभ्याम् | अतिमाभिः |
| चतुर्थी | अतिमह्यम् | अतिमाभ्याम् | अतिमभ्यम् |
| पञ्चमी | अतिमत् | अतिमाभ्याम् | अतिमत् |
| षष्ठी | अतिमम | अतिमयोः | अतिमाकम् |
| सप्तमी | अतिमयि | अतिमयोः | अतिमासु |

युवाम् आवाम् वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः विग्रहेऽस्मिन् शब्दरूपाणि–

**समस्यमान-द्वित्ववाची-अतियुष्मद् शब्दरूपाणि**

| | | | |
|---|---|---|---|
| प्रथमा | अतित्वम् | अतियुवाम् | अतियूयम् |
| द्वितीया | अतियुवाम् | अतियुवाम् | अतियुवान् |
| तृतीया | अतियुवया | अतियुवाभ्याम् | अतियुवाभिः |
| चतुर्थी | अतितुभ्यम् | अतियुवाभ्याम् | अतियुवभ्यम् |
| पञ्चमी | अतियुवत् | अतियुवाभ्याम् | अतियुवत् |
| षष्ठी | अतितव | अतियुवयोः | अतियुवाकम् |
| सप्तमी | अतियुवयि | अतयुवयोः | अतियुवासु |

**समस्यमान-द्वित्ववाची-अत्यस्मद् शब्दरूपाणि**

| | | | |
|---|---|---|---|
| प्रथमा | अत्यहम् | अत्यावाम् | अतिवयम् |
| द्वितीया | अत्यावाम् | अत्यावाम् | अत्यावान् |
| तृतीया | अत्यावया | अत्यावाभ्याम् | अत्यावाभिः |
| चतुर्थी | अतिमह्यम् | अत्यावाभ्याम् | अत्यावभ्यम् |
| पञ्चमी | अत्यावत् | अत्यावाभ्याम् | अत्यावत् |
| षष्ठी | अतिमम | अत्यावयोः | अत्यावाकम् |
| सप्तमी | अत्यावयि | अत्यावयोः | अत्यावासु |

"युष्मान् अस्मान् वा अतिक्रान्तः" इति विग्रहेऽस्मिन् शब्दरूपाणि–

**समस्यमान-बहुत्ववाची-अतियुष्मद् शब्दरूपाणि**

| | | | |
|---|---|---|---|
| प्रथमा | अतित्वम् | अतियुष्माम् | अतियूयम् |
| द्वितीया | अतियुष्माम् | अतियुष्माम् | अतियुष्मान् |
| तृतीया | अतियुष्मया | अतियुष्माभ्याम् | अतियुष्माभिः |
| चतुर्थी | अतितुभ्यम् | अतियुष्माभ्याम् | अतियुष्मभ्यम् |
| पञ्चमी | अतियुष्मत् | अतियुष्माभ्याम् | अतियुष्मत् |
| षष्ठी | अतितव | अतियुष्मयोः | अतियुष्माकम् |
| सप्तमी | अतियुष्मयि | अतियुष्मयोः | अतियुष्मासु |

## समस्यमान-बहुत्ववाची-अत्यस्मद् शब्दरूपाणि

| | | | |
|---|---|---|---|
| प्रथमा | अत्यहम् | अत्यस्माम् | अतिवयम् |
| द्वितीया | अत्यस्माम् | अत्यस्माम् | अत्यस्मान् |
| तृतीया | अत्यस्मया | अत्यस्माभ्याम् | अत्यस्माभिः |
| चतुर्थी | अतिमह्यम् | अत्यस्माभ्याम् | अत्यस्मभ्यम् |
| पञ्चमी | अत्यस्मत् | अत्यस्माभ्याम् | अत्यस्मत् |
| षष्ठी | अतिमम | अत्यस्मयोः | अत्यस्माकम् |
| सप्तमी | अत्यस्मयि | अत्यस्मयोः | अत्यस्मासु |

### ४०१. पदस्य ८/१/१६।।

पदस्य-अधिकारसूत्रम्।

'पदस्य' इत्यस्याधिकारः। "अपदान्तस्य मूर्धन्यः" इति सूत्रात् पूर्वपर्यन्तं अधिकारो विद्यते। पदस्य तात्पर्यं "सुप्तिङन्तं पदं इति सूत्रेण विद्यते।

### ४०२. पदात् ८/१/१७।।

पदात्- अधिकारसूत्रम्।

पदात् पञ्चम्यन्तमेकपदं सूत्रम्। अस्य सूत्रस्याधिकारः "कुत्सने च सुप्यगोत्रादौ" इति सूत्रात् पूर्वपर्यन्तं विद्यते।

### ४०३. अनुदात्तं सर्वमपादादौ ८/१/१८।।

इत्यधिकृत्य।

अनुदात्तं सर्वमपदादौ-अधिकारसूत्रम्।

**पदच्छेदः** - पादस्यादिः पादादिः, न पादादिरपादादिस्तस्मिन् अपादादौ षष्ठीगर्भनञ्तत्पुरुषः। अनुदात्तं प्रथमान्तं,सर्वं प्रथमान्तं, अपादादौ सप्तम्यन्तम्।

अष्टाध्यायाः प्रथमपादस्य समाप्तिपर्यन्तं "विभाषितं विशेषवचने बहुवचनम्" इत्यस्याधिकारः।

### ४०४. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ८/१/१२०।।

पदात् परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः तौ चानुदात्तौ।

युष्मस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ- विधिसूत्रम्।

**पदच्छेदः** - युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः, वाम्-नावौ।

**अनुवृत्तिः** - 'पदस्य' पदात् तथा अनुदात्तं सर्वमपदादौ इति त्रयाणां सूत्राणामधिकारः।

**सूत्रार्थः** - पदात्परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाविशिष्टयोः युष्मदस्मदोः स्थाने क्रमशः वां नौ इत्यादेशौ भवतः।

**विशेषः** - युष्मदस्मद्शब्दयोः पूर्वं पदमावश्यकं तथा च पद्यरचनायां युष्मदस्मद्शब्दान् श्लोकस्य ऋचायाश्चाद्यौ न भवितव्यौ।

### ४०५ बहुवचनस्य वस्नसौ ८/१/२०।।

उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः। वान्नावोरपवादः।

बहुचनस्य वस्नसौ-विधिसूत्रम्।

**पदच्छेदः** - वस् च नस् च तयोरितरेतरद्वन्द्वः। बहुवचनस्य षष्ठ्यन्तम्, वस्नसौ प्रथमान्तम्।

**अनुवृत्तिः** - युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ इति सूत्रात् युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः इत्यनुवर्तते।

**सूत्रार्थः** – पदात्परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाबहुवचनविशिष्टयोः युष्मदस्मदोः स्थाने क्रमशः वस् नस् इत्यादेशौ स्तः।

वान्नावोरपवादः। बहुवचने प्रयोगत्वात् सूत्रमेतद् युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ इत्यस्य सूत्रस्यापवादः।

## ४०६. तेमयावेकवचनस्य ८/१/२२।।

उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।

तेमयावेकवचनस्य– विधिसूत्रम्।

**पदच्छेदः** – तेश्च मेश्च तयोरितरेतरद्वन्द्वः। तेमयौ प्रथमान्तम्, एकवचनस्य षष्ठ्यन्तम्।

**अनुवृत्तिः** – ''युष्मदस्मदोः–'' इत्यादिना सूत्रात् 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः' इत्यनुवर्तते।

**सूत्रार्थः** – पदात्परयोः अपादादौ स्थितयोः षष्ठीचतुर्थ्येकवचनान्तयोः स्थाने क्रमशः ते मे इत्यादेशौ स्याताम्।

## ४०७. त्वामौ द्वितीयायाः ८/१/२३।।

द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः।

**श्रीशस्त्वावतु मापीह, दत्तात्ते मेऽपि शर्म सः।**
**स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः।।१।।**
**सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।**
**सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः।।२।।**

पदात्परयोः किम्? वाक्यादौ मा भूत्, त्वां पातु, मां पातु। अपादादौ किम्? 'वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदाऽवतु।' स्थग्रहणाच्छ्रूयमाणविभक्तिकयोरेव। नेह– इति युष्मत्पुत्रो ब्रवीति, इत्यस्मत्पुत्रो ब्रवीति।

**'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः'( वा. ४७१४ )।'एकतिङ् वाक्यम्'( वा. ११९९ )।** तेनेह न– ओदनं पच, तव भविष्यति। इह तु स्यादेव– शालीनां ते ओदनं दास्यामि इति।

**'एते वान्नावादय आदेशा अनन्वादेशे वा वक्तव्याः'( वा. ४७१७ )।** अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्तीति वा। तस्मै ते नम, इत्येव।

त्वामौ द्वितीयायाः– विधिसूत्रम्।

**पदच्छेदः** – त्वाश्च माश्च तयोरितरेतरद्वन्द्वः, त्वामौ प्रथमान्तम् द्वितीयायाः षष्ठ्यन्तम्।

**अनुवृत्तिः** – ''युष्मदस्मदोः–'' इत्यादिना सूत्रात् षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ तथा च ''तेमयावेकवचनस्य'' इत्यतः एकवचनस्य इत्यनुवर्तते।

**सूत्रार्थः** – पदात्परयोः अपादादौ स्थितयोः द्वितीयाविभक्तेः एकवचनविशिष्टयोः युष्मदस्मदोः स्थाने त्वा मा इत्यादेशौ भवतः।

**विशेषः** – उक्तानां चतुर्णां सूत्राणां द्वितीयाचतुर्थीषष्ठीविभक्तिषु यानि रूपाणि भवन्ति तानि कारिकायां स्पष्टीकृतानि। द्वितीयाचतुर्थीषष्ठीक्रमेण तथा च एकवचनद्विवचनबहुवचनक्रमेण।

**प्रथमभागे** – विभक्तित्रयस्य एकवचनस्योदाहरणानि–

**द्वितीयायाम्** – श्रीशस्त्वावतु, मापीह (श्रीशः त्वा अवतु मा अपि इह) – इत्यत्र ''त्वामौ द्वितीयायाः'' इत्यनेन त्वां मां स्थाने त्वा–मा इत्यादेशौ कृतौ।

**चतुर्थ्याम्** – दत्ताते मेऽपि शर्म सः – इत्यत्र 'तेमयावेकवचनस्य तुभ्यम् मह्यम् इति स्थाने ते मे इत्यादेशौ कृतौ।

**षष्ठ्याम्** – स्वामी ते मेऽपि स हरिः – 'तेमयावेकवचनस्य' तव मम इति स्थाने ते मे इत्यादेशौ कृतौ।

**द्वितीयभागे** = द्विवचने = विभक्तित्रयस्य द्विवचनस्योदाहरणानि।

**द्वितीयायाम्** - पातु वामपि नौ विभुः-इत्यत्र ''युष्मदस्मदो.'' इत्यादिना सूत्रेण युवाम् आवाम् स्थाने वाम् नौ इत्यादेशौ।

**चतुर्थ्याम्** - सुखं वां नौ ददात्वीशः-इत्यत्र ''युष्मदस्मदोः'' इत्यदिना सूत्रेण युवाभ्याम् आवाभ्याम् इति स्थाने वाम् नौ इत्यादेशौ।

**षष्ठ्याम्** - पतिः वामपि नौ विभुः-इत्यत्र ''युष्मदस्मदो.'' इत्यादिना सूत्रेण युवयोः आवयोः स्थाने वाम्, नौ इत्यादेशौ।

**तृतीयभागे** - विभक्तित्रयस्य बहुवचनस्योदाहरणानि -

**द्वितीयायाम्** - सोऽव्याद् वः नः।

**चतुर्थ्याम्** - शिवं वः नः दद्यात्।

**षष्ठ्याम्** - सेव्यः अत्र वः स नः- इत्यत्र द्वितीयाचतुर्थीषष्ठीबहुवचने 'युष्मदस्मदोः' इत्यादिना सूत्रेण युष्मान् अस्मान् युष्मभ्यम्- अस्मभ्यम्, युष्माकम्-अस्माकम् इति स्थाने वस् नस् इत्यादेशौ कृतौ रूपाणीमानि।

**व्याख्या** - पदात्परयोः किम्? वाक्यादौ मा भूत्। त्वां पातु मां पातु।

उपर्युक्तादेशेषु 'पदस्य' तथा च 'पदात्' इति सूत्रयोरधिकारत्वात् वाक्यादौ युष्मदस्मद्शब्दयोः स्थाने वाम्- नौ इत्यादेशौ न भवतः। अतः ''त्वां पातु, मां पातु'' वाक्ययोः त्वाम्, वाम् शब्दयोः स्थाने वाक्यादिस्थितत्वात् 'त्वा' 'मा' इत्यादेशौ भवतः।

अपादादौ किम्? 'वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु अपदाद्यधिकारत्वात् 'वेदैरशेषैः श्लोकस्यास्य द्वितीयचरणे 'अस्मान्' इति स्थाने ''बहुवचनस्य वस्नसौ'' इति सूत्रेण नसादेशो नाभवत्।

**समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः ( वार्तिकः )**

**वार्तिकार्थः**- समानवाक्ये एव अनुदात्त-युष्मदस्मद् शब्दयोः स्थाने वां-नौ, ते-मे, वः-नः, त्वा-मा देशाः भवन्ति

व्याख्या- 'एकतिङ् वाक्यम्' (वा.)। तेनेह न-ओदनं पच, तव भविष्यति। इह तु स्यादेव-शालीनां ते ओदनं दास्यामि इति।

एकं तिङन्तं यस्मिन् यस्य वा विग्रहे बहुव्रीहिसमासोऽस्ति। वैयाकरणानां वाक्यलक्षणं विद्यते-एकतिङ्प्रधानम् 'ओदनं पच, तव भविष्यति' वाक्येऽस्मिन् समानवाक्यस्य अभावे 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति वार्तिकेन 'ते' आदेशः न भवति। अत्र वाक्यद्वयं विद्यते। (१) ओदनं पच।

(२) तव भविष्यति।

अतः भिन्नवाक्यस्थकारणात् 'ते' आदेशो न। 'शालीनां ते ओदनं दास्यामि' इत्यत्र एकवाक्यकारणात् तुभ्यम् स्थाने 'ते' आदेशो भवति।

**'रुते वान्नावादय आदेशा अनन्वादेशे वा वक्तव्या ( वा. )**

**वार्तिकार्थः**- एते वां-नौ, ते-मे, वः-नः, त्वा-मादेशाः अन्वादेशभिन्ने विकल्पेन भवन्ति।

घाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्ति इति वा। इत्यत्र अन्वादेशभिन्नकारणात् ''तेमयावेकवचनस्य'' इति सूत्रेण विकल्पेन तव स्थान ते आदेशे। अतः वाक्यद्वयं सिध्यति। तस्मै ते नमः इत्यत्र किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः इति परिभाषया अन्वादेशवाक्यकारणात् ''तेमयावेकवचनस्य'' इति सूत्रेण नित्यं 'तव' स्थाने ते आदेशे।

**४०८. न चवाहाहैवयुक्ते ८/१/२४।।**

चादिपञ्चकयोगे नैते आदेशाः स्युः।

हरिस्त्वां मां च रक्षतु, कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगेऽयं निषेधः। परम्परासम्बन्धे त्वादेशः स्यादेव। हरो हरिश्च मे स्वामी।
न चवाहाहैवयुक्ते- विधि (निषेध) सूत्रम्।

**पदच्छेदः-** चश्च वाश्च हश्च अहश्च एवश्च तेषामितरेतरयोगद्वन्द्वः। चवाहाहैवास्तैर्युक्तं चवाहाहैवयुक्तम् तस्मिन् चवाहावयुक्ते।

**अनुवृत्तिः-** ''युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वान्नावौ'' इति सूत्रात् युष्मदस्मदोः तथा च षष्ठीचतुर्थीद्वितीयास्थयोः इत्यनुवर्तते।

**सूत्रार्थः-** च, वा, ह, अह, एव, एतस्मिन् चादिसमूहे एकस्यापि योगकारणेन वां-नौ, ते-मे, वः-नः, त्व-मादेशाः न भवन्ति।

हरिः त्वां मां च रक्षतु-'' अस्मिन् वाक्ये ''त्वामौ द्वितीयायाः'' इति सूत्रेणं त्वां-मां स्थाने त्वा-मादेशप्राप्ते परञ्च ''न चवाहाहैवयुक्ते'' इति सूत्रेण निषेधे।

कथं त्वां मां वा न रक्षेदित्यादि। अत्रापि निषेधत्वात्।

विशेषः युक्तग्रहणात् साक्षाद्योगेऽयं निषेधः। परम्परासम्बन्धे त्वादेशः स्यादेव। हरो हरिश्च मे स्वामी।''न चवाहाहैवयुक्ते'' इति सूत्रे युक्तशब्दप्रयोगकारणेन साक्षाद्योगे एव निषेधः। परम्परासम्बन्धे त्वादेशः भवत्येव।''हरो हरिश्च मे स्वामी'' इत्यत्र साक्षात् योग-अभावकारणेन 'तेमयावेकवचनस्य' इति सूत्रेण मम स्थाने 'मे' आदेशो, भवति।

## ४०९. पश्यार्थैश्चानालोचने ८/१/२५।।

अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः। चेतसा त्वां समीक्षते।
परम्परासम्बन्धेऽप्ययं निषेधः, भक्तस्तव रूपं ध्यायति। आलोचने तु भक्तस्त्वां पश्यति चक्षुषा।
पश्यार्थैश्चानालोचने-विधि (निषेध) सूत्रम्।

**पदच्छेदः-** पश्योऽर्थो येषां ते पश्यार्थास्तैः पश्यार्थैः। न आलोचनम् अनालोचनम्, तस्मिन् अनालोचने।

**अनुवृत्तिः-** ''युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ इति सूत्रात् युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, तथा च ''न चवाहाहैवयुक्ते'' इति सूत्रात् न इत्यनुवर्तते।

**सूत्रार्थः-** अचाक्षुषज्ञानार्थदृश्धातोः योगे एते आदेशाः न भवन्ति अर्थात् चाक्षुषज्ञानभिन्नदर्शनार्थकैः दृश् धात्वर्थैः धातुभिः योगे वां-नौ, वस्नसौ, ते-मे इत्याद्यादेशाः न भवन्ति।

**चेतसा त्वां समीक्षते-** इत्यत्र चाक्षुषभिन्नज्ञानार्थसमीक्ष्धातोः योगकारणात् ''त्वामौ द्वितीयायाः'' इति सूत्रस्य ''पश्यार्थैश्चानालोचने'' इति सूत्रेण निषेधो भवति।

**विशेषः-** परम्परा सम्बन्धेऽप्ययं निषेधः। भक्तस्तवरूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा। ''भक्तस्तवरूपं ध्यायति'' वाक्येऽस्मिन् 'तव' इत्यस्य रूपेन सहान्वयः तथा च रूपस्य ध्यायेन सहान्वयः। 'तव' इत्यस्य 'ध्यायति' पदेन सह साक्षात्सम्बन्धो नास्ति। अतः निषेधो भवति।

आलोचने त्वादेशाः भवन्त्येव। यथा ''भक्तस्त्वा पश्यति चक्षुषा'' इत्यत्र आलोचनकारणात् ''त्वामौ द्वितीयायाः'' इति सूत्रेण त्वां स्थाने त्वादेशे।

## ४१०. सपूर्वायाः प्रथमाया विभाषा ८/१/२६।।

विद्यमानपूर्वात् प्रथमान्तात् परयोरनयोरन्वादेशेऽप्येते आदेशा वा स्युः।
भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्। त्वा मा इति वा।
(४१०) सपूर्वायाः प्रथमाया विभाषा-विधिसूत्रम्

**पदच्छेदः-** सह = विद्यमानं पूर्वं यस्याः सा सपूर्वा, तस्याः सपूर्वायाः। सपूर्वायाः पञ्चम्यन्तं, प्रथमायाः पञ्चम्यन्तम्, विभाषा प्रथमान्तम्।

**अनुवृत्तिः** ''युष्मदस्मदोः.......'' इत्यादि सूत्रात् युष्मदस्मदोः तथा षष्ठीचतुर्थीद्वितीयास्थयोः इत्यनुवर्तते।

**सूत्रार्थः** विद्यमानपूर्वकात् प्रथमान्तात् परयोः षष्ठीचतुर्थीद्वितीयास्थयोः युष्मदस्मदोः वां-नौ, वस्नसौ, ते-मे, त्वा-मा इत्याद्यादेशाः विकल्पेन भवन्ति। भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्। त्वा  मा इति वा।

इत्यत्र 'हरिः' इति प्रथमान्तपदमस्ति। अस्मात्पूर्वं 'तेन' इति पदमस्ति। अतः प्रथमान्तपदं सपूर्वपदमस्ति, अतः 'सपूर्वायाः प्रथमाया विभाषा'' इति सूत्रेण विकल्पेन त्वा-मादेशाः भवन्ति।

### ४११. सामन्त्रितम् २/३/४८।।

सम्बोधने या प्रथमा तदन्तमामन्त्रितसञ्ज्ञं स्यात्।

सामन्त्रितम्-संज्ञासूत्रम्।

**पदच्छेदः-** सा प्रथमान्तम्, आमन्त्रितं प्रथमान्तम्।

**अनुवृत्तिः-** ''सम्बोधने च'' इति सूत्रात् सम्बोधने तथा च ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' इति सूत्रात् प्रथमा इत्यनुवर्तते।

**सूत्रार्थः-** सम्बोधने या प्रथमाविभक्तिः भवति तदन्तम् आमन्त्रितसञ्ज्ञं स्यात्।

### ४१२. आमन्त्रितं पूर्वमविद्यमानवत् ८/१/७२

स्पष्टम्। अग्ने तव। देवास्मान्पाहि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशस्तिङन्तनिघातः आमन्त्रितनिघातश्च न। 'सर्वदा रक्ष देव नः' इत्यत्र तु देवेत्यस्याविद्यमानवद्भावेऽपि ततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः। एवम् 'इमं मे गङ्गे यमुने' इति मन्त्रे यमुन इत्यादिभ्यः प्राचीनानामामन्त्रितानामविद्यमानवद्भावेऽपि मे-शब्दमेवाश्रित्य सर्वेषां निघातः।

आमन्त्रितं पूर्वमविद्यमानवत् -अतिदेशसूत्रम्।

**पदच्छेदः-** न विद्यमानम् अविद्यमानं, तेन तुल्यम् अविद्यमानवत्

**अनुवृत्तिः-** 'पदस्य' इत्यस्याधिकारः।

**सूत्रार्थः-** आमन्त्रितसंज्ञकं पूर्वं विद्यमानं पदम् अविद्यमानवत् भवति।

विशेषः - अविद्यमानवद्भावः पदन्तु विद्यमानं भवति परञ्च अविद्यमानवत्कारणेन विद्यमानवत् कार्याणि न भवन्ति।

**अग्ने तव-** इत्यत्र 'अग्ने' इति सम्बोधनपदं विद्यते, तथा च तस्मात् परे युष्मद्शब्दस्य 'तव' इति षष्ठ्यन्तपदं विद्यते, अतः ''सामन्त्रितम्'' इति सूत्रेण 'अग्ने' इति पदस्य आमन्त्रितसंज्ञायाम्, ''आमन्त्रितं पूर्वमविद्यमानवत्'' इति सूत्रेण अविद्यमानवद्भावे, अतः ''तेमयावेकवचनस्य'' इति सूत्रेण। 'तव' स्थाने ते आदेशः न भवति।

इत्थमेव देवास्मान् पाहि, अग्ने नय, अग्न इन्द्र वरुण इत्यादीनि वाक्यानि सिध्यन्ति।

**व्याख्या-** 'सर्वदा रक्ष देव नः' इत्यत्र तु देवेत्यस्यस्या- विद्यमानवद्भावेऽपि ततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः। ''सर्वदा रक्ष देव नः' इत्यत्र देवशब्दस्य ''सामन्त्रितम्'' इति सूत्रेणामन्त्रितसंज्ञायाम्, तथा चाविद्यमानवद्भावेऽपि तथापि अस्मान् इति पदस्य स्थाने ''बहुवचनस्य वस्नसौ इत्यनेन नसादेशे, पदात्परयोः कारणात्।

एवम् 'इमं मे गङ्गे यमुने' इति मंत्रे यमुन इत्यादिभ्यः प्राचीनामन्त्रिताविद्यमानवद्भावेऽपि मे-शब्दमेवाश्रित्य सर्वेषां निघातः। निघातः इत्युक्ते-अनुदात्तम्।

### ४१३. नामन्त्रिते समानाधिकरणे सामान्यवचनम् ८/१/७३।।

विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत् स्यात्। हरे दयालो नः पाहि। अग्ने तेजस्विन्।

‘**विभाषितं विशेषवचने**’ (**सू. ३६५५**)। अत्र भाष्यम् ‘बहुवचनमिति वक्ष्यामि’ इति। बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवद्वा। यूयं प्रभवः, देवाः शरण्याः। युष्मान् भजे, वो भजे इति वा। इहान्वादेशेऽपि वैकल्पिका आदेशाः। सुपात्, सुपाद्। सुपादौ। सुपादः। सुपादम्। सुपादौ।

नामन्त्रिते समानाधिकरणे सामान्यवचनम् अतिदेशे (निषेध)सूत्रम्।

**पदच्छेदः**- समानमधिकरणं यस्य तत् समानाधिकरणम् तस्मिन् समानाधिकरणे। सामान्यस्य वचनम् सामान्यवचनम्। न अव्ययम्, आमन्त्रिते सप्तम्यन्तम्, समानाधिकरणे सप्तम्यन्तम्, सामान्यवचनं प्रथमान्तम्

**अनुवृत्तिः**- ‘आमन्त्रितं पूर्वमविद्यमानवत्’ इति सूत्रात् आमन्त्रितम्, पूर्वम्, अविद्यमानवत् इत्यनुवर्तते। ‘पदस्य’ सूत्रस्याधिकारः।

**सूत्रार्थः**- आमन्त्रिते समानाधिकरणे विशेषणे परे सामान्य वचनं (विशेष्यम्) आमन्त्रितम् अविद्यमानवत् न भवति।

हरेः दयालो नः पाहि-इत्यत्र ‘हरेः’ विशेष्यपदं विद्यते तथा च ‘दयालो’ विशेषणपदमस्ति। उभयोः ‘‘सामन्त्रितम्’’ इति सूत्रेणामन्त्रितसंज्ञायाम्, ‘‘आमन्त्रितं पूर्वमविद्यमानवत्’’ इति सूत्रेणाविद्यमानवद्भावप्राप्ते परञ्च ‘‘नामन्त्रिते समानाधिकरणे सामान्यवचनम्’’ इति सूत्रेणाविद्यमानवद् भावस्य निषेधकारणात् ‘‘बहुवचनस्य वस्नसौ’’ इति सूत्रेण अस्मान् इति पदस्य स्थाने नसादेशे, सस्य रुत्वे विसर्गे च, ‘‘हरे दयालो नः पाहि’’ इति।

- ‘अग्ने तेजस्विन्’ इत्यत्र ‘तेजस्विन्’ इति पदे आमन्त्रित संज्ञक समानाधिकरणे परे ‘अग्ने’ इति पदे प्राप्ते अविद्यमानवद्भावस्य निषेधात्। तेजस्विन्’ इति पदे अनुदात्तं भवति।
- यूयं प्रभवः देवाः शरण्याः। युष्मान् भजे इति वा। इहान्वादेशेऽपि वैकल्पिका आदेशाः।

इत्यत्र विशेष्यवाचिनौ ‘यूयं’ ‘देवाः’ बहुवचनान्तौ। अतः ‘विभाषितं विशेषवचने’’ इति सूत्रेण एकस्मिन् पक्षे अविद्यमानवद्भावस्य अभावात् ‘प्रभवः’ इति पदम् अनुदात्तं न भूत्वा आद्युदातं भवति।

### ४१४. पादः पत् ६/४/१३०।।

पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छदस्य पदादेशः स्यात्।

सुपदः। सुपदा। सुपाद्भ्यामित्यादि। **इति दान्ताः**। अग्निं मन्थतीत्यग्निमत्, अग्निमद्। अग्निमथौ, अग्निमथः। अग्निमद्भ्यामित्यादि। **इति थान्ताः।**

‘**ऋत्विग्-**’ (**सू. ३७३**) इत्यादिसूत्रेणाञ्चेः सुप्युपपदे क्विन्।

पादः पत् - विधिसूत्रम्।

**पदच्छेदः** - पादः षष्ठ्यन्तम्, पत् प्रथमान्तम्।

**अनुवृत्तिः** - ‘भस्य’ ‘अङ्गस्य’ चाधिकारः।

**सूत्रार्थः** - पाद्शब्दान्तं यद् भसञ्ज्ञकम् अङ्गम् तदवयवस्य पादशब्दस्य स्थाने पदादेशः स्यात्।

**रूपलेखनप्रकारः** - **सुपदः**- ‘‘शोभनौ पादौ यस्य बहुव्रीहिसमासकारणात् सुपाद् शब्दात् प्रातिपदिकात् शसि, अनुबन्धलोपे, भसंज्ञायाम्, ‘‘पादः पत्’’ इति सूत्रेण पदादेशे, सस्य रुत्वे विसर्गे च ‘‘सुपदः’’ इति सिद्धम्।

अग्निं मन्थतीत्यग्निमत्- अग्निमद्, अग्निमथौ, अग्निमथः अग्निमद्थ्यामित्यादि। इति थान्ताः।

अग्निं मथ्नाति इत्यर्थे अग्निमथ्शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, जश्त्वे, वैकल्पिकचर्त्वे अग्निमत्-द् इति सिद्धम्।

### ४१५. अनिदितां हल उपधायाः क्ङिति ६/४/२४।।

हलन्तानामनिदितामङ्गानामुपधायाः नस्य लोपः स्यात् किति ङिति च। ‘**उगिदचाम्-**’ (**सू. ३६१**) इति नुम्, ‘**संयोगान्तस्य लोपः**’ (**सू. ५४**), नुमो नकारस्य ‘**क्विन्प्रत्ययस्य कुः**’ (**सू. ३७७**) इति कुत्वेन ङकारः,

प्राङ्। अनुस्वारपरसवर्णौ प्राञ्चौ। प्राञ्चः। प्राञ्चम्। प्राञ्चौ।

अनिदितां हल उपधायाः क्ङिति- विधिसूत्रम्।

**पदच्छेदः** - अनिदितां हलः, उपधायाः क्ङिति। न इदितः अनिदितः तेषां अनिदिताम्।

**अनुवृत्तिः** - 'अङ्गस्य' इत्यस्याधिकारः। 'श्नान्नलोपः' इति सूत्रात् 'न' 'लोपः' इत्यनुवर्तते।

**सूत्रार्थः** - किति ङिति च प्रत्यये परे हलन्तानामनिदितामङ्गानामपुधायाः नकारस्य लोपः स्यात्।

प्राङ्-प्रपूर्वकात् अञ्चुधातोः "ऋत्विग्दधक्स्रग्दि..." इत्यादिना सूत्रेण क्विन्प्रत्यये, तस्य सर्वापहारिलोपे, "अनिदितां हल उपधायाः क्ङिति" इति सूत्रेण नलोपे, "प्र+अच्" इत्यवस्थायाम् सवर्णदीर्घे, प्राच्प्रातिपदिकात् सौ, उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रेण नुमि, अनुबन्धलोपे, हल्ङ्यादिलोपे, "संयोगान्तस्य लोपः" इति सूत्रेण चस्य लोपे, "क्विन्प्रत्ययस्य कुः" इति सूत्रेण कुत्वेन ङकारे, "प्राङ्" इति सिद्धम्।

**रूपलेखनप्रकारः** - **प्राञ्चौ** - प्रपूर्वकात् अञ्चुधातोः क्विन्प्रत्यये, तस्य सर्वापहारिलोपे, "अनिदितां हल उपधायाः क्ङिति" इति सूत्रेण नलोपे सवर्णदीर्घे प्राच्प्रातिपदिकात् नुमागमेऽनुबन्धलोपे "नश्चापदान्तस्य झलि" इति सूत्रेण नकारस्यानुस्वारे "अनुस्वारस्य ययि परसवर्णः" इत्यनेनानुस्वारस्य परसवर्णे "प्राञ्चौ" इति सिद्धम्।

## ४१६. अचः ६/४/१३८॥

लुप्तनकारस्याऽञ्चतेर्भस्याकारस्य लोपः स्यात्।

अचः-विधिसूत्रम्।

**पदच्छेदः** - अचः षष्ठ्यन्तम्।

**अनुवृत्तिः** - 'भस्य' इति सूत्रस्याधिकारः। "अल्लोपोऽनः" इति सूत्रात् अल्लोप इत्यनुवर्तते।

**सूत्रार्थः** - भसंज्ञकस्य लुप्तनकारस्य अञ्चुधातोः अकारस्य लोपो भवति।

## ४१७. चौ ६/३/१३८॥

लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्।

प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चम्। प्रत्यञ्चौ। '**अचः**' (**सू. ४१६**) इति लोपस्य विषयेऽन्तरङ्गोऽपि यण् न प्रवर्तते। '**अकृतव्यूहाः**-' (**प. ५७**) इति परिभाषया। प्रतीचः प्रतीचा 'अमुमञ्चति' इति विग्रहे 'अदस् अञ्च्' इति स्थिते।

चौ-विधिसूत्रम्।

**पदच्छेदः** - चौ सप्तम्यन्तम्।

**अनुवृत्तिः** - "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति सूत्रात् पूर्वस्य, दीर्घः, अण् इत्यनुवर्तते।

**सूत्रार्थः** - लुप्ताकारनकारे अञ्चुधातोः परे पूर्वस्य अणो दीर्घो भवति।

**प्राचः** प्रपूर्वकात् अञ्चुधातो क्विन्प्रत्यये, तस्य सर्वापहारिलोपे "अनिदितां" इत्यादिना सूत्रेण नलोपे, प्र अच् इत्यवस्थायाम्, प्रातिपदिकसंज्ञायाम्, शसि अनुबन्धलोपे, भसंज्ञायाम्, अचः इति सूत्रेण अकारस्य लोपे, "चौ" इत्यनेन दीर्घे, सस्य रुत्वे विसर्गे च "प्राचः" इति सिद्धम्।

**रूपलेखनप्रकारः** - **प्रत्यङ्**: - प्रतिपूर्वकात् अञ्चुधातोः क्विनि, तस्य सर्वापहारिलोपे, "अनिदितां" इत्यादिना सूत्रेण नलोपे, यणि, प्रत्यच्प्रातिपदिकात् सौ "उगिदचां सर्वनामस्थानेऽधातोः" इत्यनेन नुमि, अनुबन्धलोपे, हल्ङ्यादिलोपे चकारस्य संयोगान्तलोपे, "क्विन्प्रत्ययस्य कुः" इत्यनेन कुत्वे ङकारे, "प्रत्यङ्" इति सिद्धम्।

**विशेषः** - 'अचः' इति लोपस्य विषयेऽन्तरङ्गोऽपि यण् न प्रवर्तते, अकृतव्यूहाः इति परिभाषया।

'प्रति+अच्+अस्' इत्यत्र नलोपत्वात् "अचः" इति सूत्रेण अकारस्य लोपकाले अन्तरङ्गत्वात् 'इको यणचि' इति सूत्रेण यणादेशः कथन्न भवति? अस्य समाधानं वर्तते यत् अत्र यणादेशस्य निमित्त-अकारस्य "अचः"

इति सूत्रेण अकारलोपसम्भावितं विद्यते अतः "अकृतव्यूहाः पाणिनीयाः" इति परिभाषया अन्तरङ्गयणादेशस्य प्रवृत्तिरेव भवति।

**प्रतीचः**– प्रतिपूर्वकादञ्चुधातोः क्विनि, तस्य सर्वापहारि लोपे, नलोपे, अन्तरङ्गस्य यणादेशस्य 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषया निषेधे, शसि अनुबन्धलोपे, भसंज्ञायाम् 'अचः' इति सूत्रेण अलोपे, "चौ" इत्यनेन प्रतेः इकारस्य दीर्घे, सस्य रुत्वे विसर्गे च प्रतीचः इति सिद्धम्।

### ४१८. विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ६/३/९२।।

अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्ते अञ्चतौ परे।

'अदद्रि अञ्च्' इति स्थिते, यण्।

विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये–विधिसूत्रम्।

**पदच्छेदः** – ष्विग्देवयोः, च, टेः, अद्र्यञ्चतौ, अप्रत्यये। विष्वग्देवयोः षष्ठीद्विवचनान्तम्, टेः षष्ठ्यन्तम्, अद्रि इति लुप्तप्रथमाकं पदम्, अञ्चतौ सप्तम्यन्तम्, अप्रत्यये सप्तम्यन्तम्।

**अनुवृत्तिः** – "अलुगुत्तरपदे" इति सूत्रात् उत्तरपदे इत्यनुवर्तते।

**सूत्रार्थः** – विष्वग्देवयोः सर्वनाम्नश्च टेः अद्रि आदेशः स्यात् अप्रत्ययान्ते अञ्चतौ परे।

### ४१९. अदसोऽसेर्दादुदो मः ८/२/८०।।

अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च।

उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्चः। अमुमुयञ्चम्, अमुमुयञ्चौ, अमुमुईचः। अमुमुईचा, अमुमुयग्भ्यामित्यादि। मुत्वस्यासिद्धत्वान्न यण्। '**अन्त्यबाधेऽन्त्यसदेशस्य**' (प. १०४) इति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते 'मदमुयङ्'। 'अः सेः सकारस्य स्थाने यस्य सः असिः, तस्य असेः' इति व्याख्यानात् 'त्यदाद्यत्वविषय एव मुत्वं नान्यत्र' इति पक्षे 'अदद्र्यङ्'। उक्तं च (भाष्ये) –

> **'अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्।**
> **केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते।।' इति।**

'विष्वग्देवयोः' किम्? अश्वाची। 'अञ्चतौ' किम्? विष्वग्युक्। 'अप्रत्यये' किम्? विष्वगञ्चनम्। अप्रत्ययग्रहणं ज्ञापयति '**अन्यत्र धातुग्रहणे तदादिविधिः**' इति। तेनायस्कारः। '**अतः कृकमि-**' (**सू. १६०**) इति उदङ्, उदञ्चौ, उदञ्चः। शसादावचि –

अदसोऽसेर्दादु दो मः– विधिसूत्रम्।

**पदच्छेदः** – अदसः, असेः, दात्, उ, दः, मः। नास्ति सिः यस्य सः असि तस्य असेः। अदसः षष्ठ्यन्तम्, असेः षष्ठ्यन्तम्, दात् पञ्चम्यन्तम्, ड लुप्तप्रथमाकं, दः षष्ठ्यन्तम्, स प्रथमान्तम्।

**सूत्रार्थः** – अविद्यमानसकारान्तस्य अदस् शब्दात् परवर्णस्य स्थाने उकारः ऊकारो वा भवति तथा च दकारस्य स्थाने मकारादेशोऽपि भवति अर्थात् मात्रा कृतान्तरतम्यात् दकारात् परे यदि ह्रस्ववर्णः स्यात् तदा ह्रस्वः उकारः, दीर्घस्य स्थाने दीर्घः ऊकारो भवति।

**रूपलेखनप्रकारः** – **अमुमुयङ्** – 'अमुम् अञ्चति' इति विग्रहे क्विन्प्रत्यये, तस्य सर्वापहारिलोपे, उपपदसमासे, प्रातिपदिकसंज्ञायाम्, सुपो लुकि, "अदस्+अञ्च्" इत्यवस्थायाम्, 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे, "विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये इति सूत्रेण अदस् शब्दस्य टेः अद्रि–आदेशे "अद्+अद्रि+अच्" इत्यवस्थायाम् यणि अदद्रयच्शब्दात् सौ, नुमि, हल्ङ्यादिलोपे, 'अदसोऽसेर्दादुदो मः" इत्यनेन प्रथम दकारस्य मकारे, अकारस्य उकारे तथा च द्वितीयदकारस्य मकारे, रकारस्य च उकारे, "संयोगान्तस्य लोपः इत्यनेन चलोपे, "क्विन्प्रत्ययस्य कुः"

इत्यनेन कुत्वे ङकारे ''अमुमुयङ्'' इति सिद्धम्। अन्त्यबाधेऽन्त्यसदेशस्य इति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते अदमुयङ्।

**अदमुयङ्**– 'अदस्+अञ्च्' इत्यवस्थायां नलोपे, सुप्रत्यये, टेः स्थानेऽद्रि आदेशे, नुमि ''अदसोऽसेर्दादु दो मः'' इति सूत्रेण केषां मतानुसारं 'अन्त्यबाधेऽन्त्यसदेशस्य'' इति परिभाषया परस्य एव अद्रेः द्रेफयोः स्थाने मुत्वे, यणि, अद्+अमु य् अन् च्+ सु' इति जाते, सुलोपे, ''संयोगान्तस्य लोपः'' इति सूत्रेण चलोपे, कुत्वे (नस्य ङकारे), 'अदमुयङ्' इति सिद्धम्।

**अदद्र्यङ्**– 'अदद्रयञ्च् स्' इत्यत्र असेः इत्यस्य अः सकारस्य स्थाने यस्य इति व्याख्यानपक्षे अत्वाभावे ''अदसोऽसेर्दादु दो मः'' इति सूत्रस्य प्रवृतिं न स्वीकुर्वन्ति, तेन उभयोरपि मुत्वं न भवति। सुलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन संयोगान्तलोपे, नस्य ङकारे च 'अदद्र्यङ्' भवति इति अन्येषां मतम्।

**कारिका–**

अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्।<br>केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते।।

**अन्वयः**– केचित् लत्ववत् अदसोऽद्रेः पृथङ्मुत्वम् इच्छन्ति केचिदन्त्यसदेशस्य (मुत्वम् इच्छन्ति) एके असेर्हि (मुत्वं) दृश्यते अतः (अतः मुत्वं) नेति (स्वीकुर्वन्ति)।

**विशेषः–** 'अमुम् अञ्चति' इत्यर्थे अदस् अञ्च् इति शब्दे ''अदसो---'' इत्यस्य प्रवृत्यप्रवृतिभ्यां रूपाणि त्रीणि मूले विवेचनं कृतानि सन्ति (१) अमुमुयङ् (२) अदमुयङ् अदद्र्यङ् इति।

**व्याख्या–** केषामाचार्याणां मते लत्ववत् चलीक्लृप्यते इत्यत्र यथा ''कृपो रो लः'' इति री इत्यस्य कृप् इति ऋकारावयवस्य रेफस्य च यथा पृथक्-पृथक् किन्तु सहैव लत्वं भवति तथैव ''अदसोऽसेर्दादु दो मः'' इति सूत्रेण अदस्शब्दस्य दकारस्य अद्रेश्च दकारस्य पृथक्-पृथक् किन्तु एकप्रवृत्या एव मुत्वं भवति इति इच्छन्ति।

(२) केषामाचार्याणां मते ''अन्त्यबाधेऽन्त्यसदेशस्य'' इति परिभाषामाश्रित्य अद्रेः दकारस्य तथा च रेफस्य स्थाने एव मुत्वं कुर्वन्ति। तेन 'अदमुयङ्' इति सिध्यति।

(३) केषामाचार्याणां मते न इति एके। अदसोऽसेः इत्यस्य तत्रैव प्रवृत्तिर्जायते यत्र अदसः सकारस्य अत्वं स्यात्। अत्रस्तु सकारस्य अत्वं न भवति अतः सूत्रस्यास्य प्रवृत्तिरेव नास्ति, तस्मात् कारणात् ''अदद्र्यङ्' इत्येव रूपमिच्छन्ति।

– विष्वग्देवयोः किम्? अश्वाची।

विष्वग्देवयोः इत्यस्य प्रयोजनमस्ति यत् अप्रत्यये अञ्चुधातोः परत्वादेव 'विष्वग्' तथा च देवसर्वनाम शब्दानामेव टिभागस्य स्थाने अद्रि आदेशः स्यात्, न त्वन्यशब्दस्यः। अतः अश्वम् अञ्चति इति विग्रहे अश्वाच् शब्दात् विष्वग्देवयोः शब्दानामभावे अद्रि आदेशः न भवति। अतः स्त्रीत्वविवक्षायां ङीपि, 'अश्वाची' इति सिध्यति।

**अञ्चतौ किम्? विश्वयुक्।**

सूत्रे 'अञ्चतौ' इति पदस्य प्रयोजनमस्ति यत् अप्रत्यय-अञ्चु धातोः परत्वादेव 'विष्वग् तथा च देवसर्वनाम शब्दानामेव टिभागस्य अद्रि-आदेशः, न त्वन्यधातोः। अतः 'विश्व+युज्' इत्यत्र युज्धातोः परत्वात् विश्वशब्दस्य टिभागम् अद्रि-आदेशः न भवति।

अप्रत्यये किम्? विष्वगञ्चनम्।

यदि सूत्रे 'अप्रत्यये' इति पदस्य प्रयोगं न क्रियते चेत् 'अञ्चु+ल्युट्' इत्यत्र टि स्थाने अद्रि आदेशस्य आपत्तिः भविष्यति। 'अप्रत्यये' इति कथनकारणात् अविद्यमानप्रत्ययस्थ-अञ्चुधातोः परे एव अद्रि भवति। अत्र अनविद्यमानकारणात् अस्य सूत्रस्य प्रवृत्तिः न।

### ४२०. उद ईत् ६/१/१३९।।

उच्छब्दात् परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् स्यात्।

उदीचः। उदीचा। उदग्भ्यामित्यादि।

उद ईत्-विधिसूत्रम्।

**पदच्छेदः** - उदः पञ्चम्यन्तम्, ईत् प्रथमान्तम्।

**अनुवृत्तिः** - "अचः" इति सूत्रात् अचः तथा च "अल्लोपोऽनः" इति सूत्रात् अतः इत्यनुवर्तते।

**सूत्रार्थः** - उदः परस्य अचः लुप्तनकारस्य अञ्च् धातोः भसंज्ञकस्य अकारस्य ईत् स्यात्।

**रूपलेखनप्रकारः** - **उदीचः** -उत्पूर्वकात् अञ्च् धातोः क्विनि सर्वापहारिलोपे, नलोपे, उदच् इत्यस्य प्रातिपदिकात् शसि, अनुबन्धलोपे, भसंज्ञायाम्, "अचः" इति सूत्रं प्रबाध्य "उद ईत्" इति सूत्रेण अकारस्य ईकारे, सस्य रुत्वे विसर्गे च "उदीचः" इति सिद्धम्। इत्थमेव उदीचा, उदग्भ्यामपि।

### ४२१. समः समि ६/३/९३।।

अप्रत्ययान्तेऽञ्चतौ परे समः समिरादेशः स्यात्।

सम्यङ् सम्यञ्चौ, सम्यञ्चः। समीचः। समीचा।

समः समि-विधिसूत्रम्।

**पदच्छेदः**- समः षष्ठ्यन्तम्, समि लुप्तप्रथमाकम्।

**अनुवृत्तिः**- "विष्वग्देवयोश्च" इत्यादिसूत्रात् अञ्चतौ, अप्रत्यये इत्यनुवर्तते।

**सूत्रार्थः** - वप्रत्ययान्ते अञ्चतौ परे समः स्थाने समि इत्यादेशः स्यात्।

**रूपलेखनप्रकारः** - **सम्यङ्**- सम् पूर्वकात् अञ्चधातोः क्विनि, सर्वापहारिलोपे नलोपे, "समः समि" इति सूत्रेण सम्शब्दस्य स्थाने समि-आदेशे, यणि, सम्यच् इति प्रातिपदिकात् सौ, नुमागमे, हल्ङ्यादिलोपे, संयोगान्तस्य लोपः इति चलोपे, क्विन्प्रत्ययस्य कुः इति कुत्वे ङकारे, "सम्यङ्" इति सिद्धम्। इत्थमेव सम्यञ्चौ, समीचः सम्यग्भ्यामिति।

### ४२२. सहस्य सध्रिः ६/३/९५।।

अप्रत्ययान्तेऽञ्चतौ परे। सध्र्यङ्।

सहस्य सध्रिः-विधिसूत्रम्।

**पदच्छेदः** - सहस्य षष्ठ्यन्तम्, सध्रिः प्रथमान्तम्।

**अनुवृत्तिः** - "विष्वग्देवयोश्च"इत्यादिसूत्रात् अञ्चतौ अप्रत्यये इत्यनुवर्तते।

**सूत्रार्थः** - वप्रत्ययान्ते अञ्चतौ परे समः स्थाने समि इत्यादेशः स्यात्।

**रूपलेखनप्रकारः** - **सध्रयङ्** - 'सह चलति' इत्यर्थे सहपूर्वकात् अञ्चधातोः क्विनि, सर्वापहारिलोपे, नलोपे, "सहस्य सध्रिः" इति सूत्रेण सहस्य स्थाने सध्रि-इत्यादेशे, "सध्रि+अच्" इत्यवस्थायां, यणि, "सध्र्यच्" इति प्रातिपदिकात् सौ, "अगिदचां" इत्यनेन नुमि, हल्ङ्यादिलोपे, संयोगान्तचस्य लोपे, कुत्वे ङकारे, "सध्र्यङ्" इति सिद्धम्।

### ४२३. तिरसस्तिर्यलोपे ६/३/९४।।

अलुप्ताकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्।

तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चम्। तिर्यञ्चौ। तिरश्चः। तिरश्चा। तिर्यग्भ्यामित्यादि।

तिरसस्तिर्यलोपे-विधिसूत्रम्।

**पदच्छेदः** - नास्ति लोपो यस्य स अलोपः, तस्मिन् अलोपे, बहुव्रीहिः। तिरसः षष्ठ्यन्तम्, तिरि लुप्तप्रथमान्तम्, अलोपे सप्तम्यन्तम्।

**अनुवृत्तिः** – ''विष्वग्देवयोश्च-'' इत्यादिसूत्रात् अञ्चतौ, अप्रत्यये इत्यनुवर्तते।
**सूत्रार्थः** – अलुप्ताकारे अञ्चतौ अप्रत्ययान्ते परे तिरसः तिरि इत्यादेशः स्यात्।
**रूपलेखनप्रकारः** – **तिर्यङ्** – ''तिरस्पूर्वकात् अञ्चुधातोः क्विनि, सर्वापहारिलोपे नलोपे, ''तिरसस्तिर्यलोपे'' इति सूत्रेण तिरस् स्थाने तिरि-इत्यादेशे, शेषप्रक्रिया पूर्ववत्।

### ४२४. नाञ्चेः पूजायाम् ६/४/३०।।

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्न नुम्। प्राङ्। प्राञ्चौ। प्राञ्चः। नलोपाभावादकारलोपो न। प्राञ्चः। प्राञ्चा। प्राङ्भ्याम् इत्यादि। प्राङ्ख्षु, प्राङ्क्षुः, प्राङ्षु। एवं पूजार्थे प्रत्यङ्ङादयः। '**क्रुञ्च कौटिल्याल्पीभावयोः**'। अस्य '**ऋत्विग्-**' (**सू. ३७३**) आदिना नलोपाभावोऽपि निपात्यते। क्रुङ्। क्रुञ्चौ। क्रुङ्भ्यामित्यादि। '**चोः कुः**' (**सू. ३७८**) पयोमुक्, पयोमुग्। पयोमुचौ। पयोमुचः। '**व्रश्च-**' (**सू. २९४**) इति षत्वम्। '**स्कोः-**' (**सू. ३८०**) इति सलोपः। जश्त्वचर्त्वे। सुवृट्, सुवृड्। सवृश्चौ। सुवृश्चः। सुवृट्त्सु, सुवृट्सु। **इति चान्ताः**।'**वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च**' (**उ.सू. २४१**) एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। '**सान्तमहतः-**' (**सू. ३१४**) इति दीर्घः। मह्यते पूज्यते इति महान्। महान्तौ। महान्तः। हे महन्। महतः। महता, महद्भ्यामित्यादि।

नाञ्चेः पूजायाम्-विधिसूत्रम्।

**पदच्छेदः**- न, अञ्चेः, पूजायाम्। न अव्ययपदम्, अञ्चेः षष्ठ्यन्तम्, पूजायां सप्तम्यन्तम्।
**अनुवृत्तिः** – ''अनिदितां हल उपधायाः क्ङिति इत्यतः उपधायाः तथा च ''श्नान्नलोपः'' इति सूत्रात् न लोपः इत्यनुवर्तते।
**सूत्रार्थः** – पूजार्थकाद् अञ्चुधातोः प्राप्तस्योपधाभूतस्य नकारस्य लोपो न भवति।
**विशेषः** – अञ्चुधातोरर्थद्वयं भवति- पूजार्थः गत्यर्थश्च। उभयत्राञ्चुधातोः नलोप प्राप्तिः भवति परञ्च पूजार्थे ''नाञ्चेः पूजायाम्'' इति सूत्रेण नलोपस्य निषेधो भवति तथा चाप्लुतनकारत्वान्न नुम् अर्थात् नकारस्य लोपाभावे ''उगिदचां सर्वनामस्थानेऽधातोः'' इति सूत्रेण नुमागमोऽपि न भवति।
**रूपलेखनप्रकारः** – **प्राङ्** – 'प्रकर्षेण अञ्चति' इत्यर्थे क्विनि, सर्वापहारिलोपे, ''अनिदितां...'' इति सूत्रेण नलोप प्राप्ते परञ्च पूजार्थे ''नाञ्चेः पूजायाम्'' इत्यनेन निषेधे, सवर्णदीर्घे, प्राञ्च् इत्यस्मात् सौ, हल्ङ्याब्भ्यो दिलोपे चस्य लोप, कुत्वे च ''प्राङ्'' इति सिद्धम्।
**व्याख्या** – नकारलोपाभावादकारलोपो न। नकारस्य लोपाभावाद् ''अचः'' इति सूत्रेणाकारलोपोऽपि न भवति।
**प्राञ्चः** – शस्विभक्तौ, नकारलोपस्याभावात् ''अचः'' इति सूत्रेण अलोपो न, सवणदीर्घे, सस्य रुत्वे विसर्गे च ''प्राञ्चः'' इति सिद्धम्।

### पूजार्थक अञ्च्धातोः प्राञ्च् इत्यस्य रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्राङ् | प्राञ्चौ | प्राञ्चः |
| द्वितीया | प्राञ्चम् | प्राञ्चौ | प्राञ्चः |
| तृतीया | प्राञ्चा | प्राङ्भ्याम् | प्राङ्भिः |
| चतुर्थी | प्राञ्चे | प्राङ्भ्याम् | प्राङ्भ्यः |
| पञ्चमी | प्राञ्चः | प्राङ्भ्याम् | प्राङ्भ्यः |
| षष्ठी | प्राञ्चः | प्राञ्चोः | प्राञ्चाम् |
| सप्तमी | प्राञ्चि | प्राञ्चोः | प्राङ्खषु, प्राङ्क्षु, प्राङ्षु |
| सम्बोधनं | हे प्राङ् | हे प्राञ्चौ! | हे प्राञ्चः! |

**प्राङ्खषु** – प्राङ्क्षु-प्राङ्षु-इत्यत्र ''ङ्णो कुक्-टुक् शरि'' इत्यनेन वैकल्पिक कुगागमे, तथा च 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन पाक्षिके खकारे।

**व्याख्या** – (क) इत्थमेव पूजार्थे प्रति+अञ्च् धातोः प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्च। प्रत्यञ्चम्, प्रत्यञ्चौ, प्रत्यञ्चः इत्यादीनि रूपाणि भविष्यन्ति।

(ख) 'कुञ्च कौटिल्याल्पीभावयोः'। अस्य 'ऋत्विग्' आदिना नलोपाभावोऽपि निपात्यते। क्रुङ्, कुञ्चौ, क्रुञ्चः। क्रुङ्भ्यामित्यादि।

कौटिल्ये अल्पार्थे कुञ्च्धातोः ''ऋत्विग्'' इत्यादिना सूत्रेण क्विनि नलोपस्याभावो निपातनात् भवति।

**क्रुङ्** – क्रुञ्च्धातोः 'ऋत्विग्..' इत्यादिना सूत्रेण निपातनात् क्विनि, नलोपस्याभावात् प्रातिपदिकात्-सौ, हल्ङ्यादिलोपे संयोगान्तचलोपे, कुत्वे, ''क्रुङ्'' इति सिद्धम्।

(ग) पयो मुञ्चतीति पयोमुक्।

पयोमुक्-पयोमुग् = 'पयः मुञ्चति' इत्यर्थे क्विपि, उपपदसमासे, प्रातिपदिकसंज्ञायाम्, सुपो लुकि, पयोमुच्प्रातिपदिकात् सौ, हल्ङ्यादिलोप, ''चोः कुः'' इत्यनेन कुत्वे, जश्त्वे वैकल्पिकचर्त्वे च ''पयोमुक्-पयोमुग्'' इति सिद्धम्।

**रूपलेखनप्रकारः – सुवृट्-सुवृड्** – 'सु = शोभनं वृश्चति' इत्यर्थे व्रश्च्धातोः क्विपि ''ग्रहिज्या'' इत्यादिना सूत्रेण रेफस्य सम्प्रसारणे, पूर्वरूपे सुवृश्च्' इति प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, श्चुत्वस्य असिद्धत्वात् ''स्कोः संयोगाद्योरन्ते च'' इति सूत्रेण सलोपे, ''व्रश्चभ्रस्जसृजमृज-'' इत्यादिना सूत्रेण चकारस्य स्थाने षकारे, जश्त्वे, वैकल्पिकचर्त्वे ''सुवृट्-सुवृड्' इति सिद्धम्।

**व्याख्या** – 'वर्तमाने पृषदन्महद्बृहज्जगच्छतृवच्च' एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। 'सान्त महतः' इति दीर्घः। मह्यते पूज्यते इति महान्, महान्तौ, महान्तः। हे महन्। महतः। महता। महद्भ्यामित्यादि।

**महान्** – 'मह्यते पूज्यतेऽसौ' इत्यर्थे मह पूजायां धातोः 'वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च' इति उणादिसूत्रेण अतिप्रत्यये, निपातनात् गुणाभावे, शतृवद्भावे, महत्शब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसंज्ञायाम्, सौ, उगित्त्वान्नुमि, ''महन्त्स्'' इत्यवस्थायाम्, ''सान्त महतः संयोगस्य इति सूत्रेणापधादीर्घे, हल्ङ्यादिलोपे, ''संयोगान्तस्य लोपः'' इत्यनेन तकारस्य लोपे, संयोगान्तलोपस्य असिद्धत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपो न, 'महान्' इति सिद्धम्।

### तकारान्त-महत्शब्दस्य रूपाणि

| | **एकवचनम्** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | महान् | महान्तौ | महान्तः |
| द्वितीया | महान्तम् | महान्तौ | महतः |
| तृतीया | महता | महद्भ्याम् | महद्भिः |
| चतुर्थी | महते | महद्भ्याम् | महद्भ्यः |
| पञ्चमी | महतः | महद्भ्याम् | महद्भ्यः |
| षष्ठी | महतः | महतोः | महताम् |
| सप्तमी | महति | महतोः | महत्सु |
| सम्बोधनम् | हे महन्! | हे महान्तौ! | हे महान्तः! |

### ४२५. अत्वसन्तस्य चाधातोः ६/४/१४॥

अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे।

परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः। ततो नुम्। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्! शसादौ महद्वत्। धातोरप्यत्वन्तस्य दीर्घः। गोमन्तमिच्छति, गोमानिवाचरतीति वा क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप्। '**उगिदचाम्**' (**सू. ३६१**) इति सूत्रेऽज्ग्रहणं नियमार्थम्। '**धातोश्चेदुग्त्कार्यं तर्ह्यञ्चतेरेव**' इति। तेन 'स्रत्' 'ध्वत्' इत्यादौ न। '**अधातोः**' इति त्वधातुभूतपूर्वस्यापि नुमर्थम्। गोमान्। गोमन्तौ। गोमन्तः इत्यादि। '**भातेर्डवतुः**' (**उ.सू. ६३**)। भवान्। भवन्तौ। भवन्तः। शत्रन्तस्य त्वत्वन्तत्वाभावान्न दीर्घः। भवतीति भवन्।

अत्वसन्तस्य चाधातोः विधिसूत्रम्।

**पदच्छेदः** - अत्वसन्तस्य, च, अधातोः। अत्वसन्तस्य षष्ठयन्तम्, चाव्ययपदम्, अधातोः षष्ठ्यन्तम्।

**अनुवृत्तिः**- "नोपधायाः" इति सूत्रात् न, उपधायाः "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इत्यतः दीर्घः "सर्वनामस्थाने चासम्बुद्धौ" इत्यतः सकलसूत्रस्य तथा च "सौ च" इत्यतः सौ इत्यनुवर्तते।

**सूत्रार्थः** - सम्बुद्धिभिन्ने सुप्रत्यये परे अत्वन्तस्य धातुभिन्नासन्तस्य च उपधायाः दीर्घः स्यात्।

**विशेषः** - परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः। ततो नुम्। "उगिदचां सर्वनामस्थानेऽधातोः" इत्यनेन नुमागमस्य तथा च "अत्वसन्तस्य चाधातोः" इत्यनेनोपधादीर्घस्य युगपत् प्राप्तिकाले नुमागमस्य नित्यत्वाद् परत्वाच्च पूर्वन्तु नुमागमो भवितव्यः परञ्च वचनसामर्थ्यादुपधादीर्घस्तु पूर्वं तदनन्तरं नुमागमो भविष्यति।

**रूपलेखनप्रकारः** - **धीमान्** - 'धीः अस्यास्ति' इत्यर्थे "तदस्यास्यास्मिन्नेति मतुप्" इत्यनेन मतुप्प्रत्ययेऽबन्धलोपे, धीमत् शब्दात् प्रातिपदिकात् सुप्रत्यये, "उगिदचां" इति सूत्रं प्रवाध्य अत्वन्तत्वात् "अत्वसन्तस्य चाधातोः" इति सूत्रेण उपधादीर्घे, "धीमात्+स्" इत्यवस्थायाम्, नुमागमेऽनुबन्धलोपे हल्ङ्यादिलोपे, संयोगान्ततलोपे, "धीमान्" इति सिद्धम्।

शसादौ महद्वत्। असर्वनामस्थानशसादिविभक्तिषु धीमत्शब्दस्य रूपाणि महद्वत् चलिष्यन्ति। धातोरप्यत्वन्तस्य दीर्घः। "अत्वसन्तस्य चाधातोः" इत्यत्र 'अधातो' इति पदस्य 'असन्तस्य' इति पदेन सह सम्बन्धोऽस्ति न तु अत्वन्तेन सह। अतः अतुप्रत्ययान्तधातोरुपधायाः दीर्घादेशो भवति। यदि अधातोः इति पदस्य सम्बन्धः उभयत्र भवति चेत् धातोः दीर्घादेशः न भवितुमर्हति।

## ४२६. उभे अभ्यस्तम् ६/१/५।।

षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसञ्ज्ञे स्तः।

उभे अभ्यस्तम् - संज्ञासूत्रम्।

**पदच्छेदः** - उभे प्रथमान्तम्, अभ्यस्तं प्रथमान्तम्।

**अनुवृत्तिः** - 'एकाचो द्वे प्रथमस्य' इति सूत्रात् द्वे इत्यनुवर्तते।

**सूत्रार्थः** - षष्ठाध्यायविहिते द्वे (द्वित्वे) अभ्यस्तसंज्ञके स्तः।

**विशेषः** - अष्टाध्यायीग्रन्थे द्वित्वप्रकरणस्योल्लेखं वारद्वयमस्ति षष्ठाध्याये अष्टाध्याये च । षष्ठाध्याये प्रथमपादस्य प्रथमतः द्वादशसूत्राणि द्वित्वविधायकसूत्राणि सन्ति। एतेषां सूत्राणामेव (षष्ठाध्यायस्थसूत्राणाम्) अभ्यस्तसंज्ञा भवति 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायबलात्।

## ४२७. नाभ्यस्ताच्छतुः ७/१/७८।।

अभ्यस्तात् परस्य शतुर्नुम् न स्यात्। ददत्, ददद्। ददतौ। ददतः।

नाभ्यस्ताच्छतुः - विधि (निषेध) सूत्रम्।

**पदच्छेदः** - न, अभ्यस्तात्, शतुः। न अव्ययपदम्, अभ्यस्तात् पञ्चम्यन्तम्, शतुः षष्ठ्यन्तम्।

**अनुवृत्तिः** - "इदितो नुम् धातोः" इति सूत्रात् नुम् इत्यनुवर्तते।

**सूत्रार्थः –** अभ्यस्तसञ्ज्ञकात्परस्य शतृप्रत्ययस्य नुमागमो न भवति।

**रूपलेखनप्रकारः – ददत्-ददद् –** दाधातोः लटः स्थाने शतृप्रत्यये, सार्वधातुकत्वात् शपि, शपः श्लौ द्वित्वेभ्याससंज्ञायाम्, ह्रस्वे, आकारलोपे च ददत् इत्यस्य प्रातिपदिकसंज्ञायाम्, ''उगिदचां'' इत्यनेन नुम्प्राप्ते, ''नाभ्यस्ताच्छतुः'' इति सूत्रेण निषेधे, हल्ङ्यादि लोपे, जश्त्वे, वैकल्पिकचर्त्वे ''ददत्-ददद्'' इति सिद्धम्।

**तकारान्त-ददत्शब्दस्य रूपाणि**

| | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ददत्-ददद् | ददतौ | ददतः |
| द्वितीया | ददतम् | ददतौ | ददतः |
| तृतीया | ददता | ददद्भ्याम् | ददद्भिः |
| चतुर्थी | ददते | ददद्भ्याम् | ददद्भ्यः |
| पञ्चमी | ददतः | ददद्भ्याम् | ददद्भ्यः |
| षष्ठी | ददतः | ददतोः | ददताम् |
| सप्तमी | ददति | ददतोः | ददत्सु |
| सम्बोधनं | हे ददत्-ददद्! | हे ददतौ! | हे ददतः! |

**४२८. जक्षित्यादयः षट् ६/१/६।।**

षड् धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसञ्ज्ञाः स्युः।

जक्षत्, जक्षद्। जक्षतौ, जक्षतः। एवं जाग्रत्, दरिद्रत्, शासत्, चकासत्। दीधीवेव्योर्ङित्त्वेऽपि छान्दसत्वाद् व्यत्ययेन परस्मैपदम्। दीध्यत्, वेव्यत्। **इति तान्ताः।** गुप्, गुब्। गुपौ, गुपः। गुब्भ्यामित्यादि। **इति पान्ताः।**

जक्षित्यादयः षट्-संज्ञासूत्रम्

**पदच्छेदः –** इति आदिर्येषां ते इत्यादयः। इतिशब्देन जक्ष्-परामर्शः जक्ष् प्रथमान्तम्, इत्यादयः प्रथमान्तम्, षट् प्रथमान्तम्।

**अनुवृत्तिः –** ''उभे अभ्यस्तम्'' इति सूत्रात् अभ्यस्तम् इत्यनुवर्तते।

**सूत्रार्थः –** जक्ष् जागृ-दरिद्रा-शासु-चकासृ-दीधीङ्-वेवीङ् इत्येतेषां सप्तधातूनाम् अभ्यस्तसंज्ञा भवति।

**व्याख्या –** जआदिसप्तधातवः अभ्यस्तसंज्ञकाः भवन्ति। एतेषां सप्तधातूनां परिगणनं निम्नकारिकायां कृतं विद्यते–

**जक्षि-जागृ-दरिद्रा-शास्-दीधीङ्-वेवीङ्-चकास्तथा।**
**अभ्यस्तसंज्ञा विज्ञेया धातवो मुनिभाषिताः।।**

अत्र सर्वनामस्थानविभक्तिषु नुमागमः प्राप्ते परञ्चाभ्यस्तसंज्ञात्वात् ''नाभ्यस्ताच्छतुः'' इति सूत्रेण नुमागमस्य निषेधे, अतः ददत्वत् रूपाणि भविष्यन्ति।

**रूपलेखनप्रकारः – जक्षत्-जक्षद् –** शतृप्रत्ययान्तस्य जक्षत्, शब्दस्य ''जक्षित्यादयः षट्'' इति सूत्रेण अभ्यस्तसंज्ञायां, प्रातिपदिकात् सौ, नुम्प्राप्ते परञ्च ''नाभ्यस्ताच्छतुः'' इति सूत्रेण निषेधे, सुलोपे, जश्त्वे, विकल्पेन चर्त्वे, ''जक्षत्-जक्षद्'' इति सिद्धम्।

**व्याख्या –** दीधीवेव्योर्ङित्वेऽपि छान्दसात्वाद्व्यत्ययेन परस्मैपदम्।

**दीध्यत्, वेव्यत् –** दीधीङ् तथा वेवीङ् धातवः वेदे प्रयुक्ताः भवन्ति। ङितत्वात् ''अनुदात्तङित आत्मनेपदम्'' इति सूत्रेण धातवः आत्मनेपदे भवितव्याः परञ्च ''व्यत्ययो बहुलम्'' इति सूत्रेण व्यत्ययत्वात् परस्मैपदत्वात् लटः स्थाने शतृप्रत्ययत्वात् दीध्यत्, वेव्यत् रूपाणि।

**४२९. त्यदादिषु दृशोऽनालोचने कञ्च ३/२/६०**

त्यदादिषूपपदेष्वज्ञानार्थाद् दृशेर्धातोः कञ् स्यात्, चात् क्विन्।

त्यदादिषु दृशोऽनालोचने कञ्च- विधिसूत्रम्।

**पदच्छेदः –** त्यदादिषु, दृशः, अनालोचने, कञ् च। त्यद् आदिर्येषां ते त्यदादयः, तेषु त्यदादिषु, बहुव्रीहिः। आलोचनं ज्ञानम्, न आलोचनम् अनालोचनं, तस्मिन् अनालोचने।

**अनुवृत्तिः –** ''स्पृशोऽनुदके क्विन्'' इति सूत्रात् क्विन् इत्यनुवर्तते।

**सूत्रार्थः –** त्यदादिषु उपपदेषु, ज्ञानभिन्नार्थस्य वाचकाद् दृश्धातोः कञ्प्रत्ययः तथा च चकारेण क्विन्प्रत्ययोऽपि स्यात्।

## ४३०. आ सर्वनाम्नः ६/३/९१।।

सर्वनाम्नः आकारोऽन्तादेशः स्याद् दृग्दृश्वतुषु।

कुत्वस्यासिद्धत्वात् '**व्रश्च-**' (**सू. २९४**) इति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। तादृक्, तादृग्। तादृशौ। तादृशः। 'षत्वापवादत्वात् कुत्वेन खकारः' इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्त्वं प्रति कुत्वस्यासिद्धत्वात्। '**दिगादिभ्यो यत्**' (**सू. १४२९**) इति निर्देशान्नासिद्धत्वमिति वा बोध्यम्। '**व्रश्च-**' (**सू. २९४**) इति षत्वम्, जश्त्वचर्त्वे विट्, विड्। विशौ। विशः। विशम्।

आ सर्वनाम्नः – विधिसूत्रम्।

**पदच्छेदः –** आ लुप्तप्रथमाङ्कं पदं, सर्वनाम्नः पञ्चम्यन्तम्।

**अनुवृत्तिः –** दृग्दृशवतुषु इति सूत्रस्यानुवृत्तिः स्वीक्रियते।

**सूत्रार्थः –** सर्वनाम्नः स्थाने आकार-अन्तादेशो भवति दृक्-दृश् वतु च परे। आकारान्तादेशः ''अलोऽन्त्यस्य'' इति सूत्रेणान्त्यवर्णस्य स्थाने भवति।

**व्याख्या –** कुत्वस्यासिद्धत्वात् ''व्रश्च'' इति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। तादृक्-तादृग्। ''क्विन्प्रत्ययस्य कुः'' ८/२/६२ इति सूत्रस्य परत्रिपादीकारणात् ''व्रश्चभ्रस्ज.'' ८/२/३६ इति सूत्रं प्रति ''पूर्वत्रासिद्धम्'' इति सूत्रेण असिद्धं वर्तते, अतः कुत्वस्यासिद्धत्वात् षकारादेशे जश्त्वे, कुत्वे, चर्त्वे च।

**रूपलेखनप्रकारः – तादृक्-तादृग्**

तद् उपपदपूर्वात् दृश्धातोः ''त्यदादिषु दृशोऽनालोचने कञ्च'' इति सूत्रेण क्विनि, सर्वापहारिलोपे, उपपदसमासे, प्रातिपदिकसंज्ञायाम्, सुपोलुकि, ''तद्+दृश्'' इत्यवस्थायाम्, ''आ सर्वनाम्नः'' इति सूत्रेण दस्यात्वे, सवर्णदीर्घे तादृश् शब्दात् सुप्रत्यये, सुलोपे, कुत्वस्य असिद्धत्वात् ''व्रश्चभ्रस्ज.'' इत्यादिना शस्य षकारे, जश्त्वेडकारे, ''क्विन्प्रत्ययस्य कुः'' इत्यनेन कुत्वे गकारे, विकल्पेन चर्त्वे, ''तादृक्-तादृग्'' इति सिद्धम्।

**व्याख्या –** षत्वापवादत्वात् कुत्वेन खकारः इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्त्वं प्रति कुत्वस्यासिद्धत्वात्।

कैयटहरदत्तादिमते ''त्यदादिषु.......'' इत्यादि सूत्रमपवादोऽस्ति। अतः षत्वं प्रबाध्य शस्य स्थानेऽघोषमहाप्राणप्रयत्नसाम्यात् कुत्वखकारो हि भवति। ''व्रश्चभ्रस्ज.......'' इत्यादिना सूत्रेण षत्वं न। तथा चर्त्वेन ककारः। चर्त्वाभावपक्षे खकारो हि श्रूयते, न तु गकारः यतोहि जश्त्वं प्रति कुत्वासिद्धो भवति ''दिगादिथ्यो यत्'' इति निर्देशान्नासिद्धत्वमिति वा बोध्यम्। भट्टोजिदीक्षितानुसारन्तु तादृक्-तादृग् रूपाण्येव। तेषां मतानुसारं पाणिनेर्सूत्रं ''दिगादिभ्यो यत्'' सूत्रेऽस्मिन् दिग्प्रयोगो प्रमाणं स्वीक्रियते अतः तेषां मते कुत्वमसिद्धं न भवति।

**विट्-विड् –** ''विश प्रवेशने'' धातोः क्विपि, सर्वापहारिलोपे, विसश् इत्यस्य प्रातिपदिक संज्ञायाम् सुप्रत्यये, हल्ङ्यादिलोपे, ''व्रश्चभ्रस्ज........'' इत्यादिना सूत्रेण शस्य षकारे, जश्त्वे, विकल्पेन चर्त्वे, ''विट्-विड्'' इति सिद्धम्।

## ४३१ नशेर्वा ८/२/६३

नशेः कवर्गोऽन्तादेशो वा स्यात् पदान्ते।

नक्, नग्, नट्,। नशौ। नशः। नग्भ्याम्, नड्भ्यामित्यादि।

**पदच्छेदः** – नशेः षष्ठ्यन्तम्, वा अव्ययपदम्।

**अनुवृत्तिः** – ''क्विन्प्रत्ययस्य कुः'' इति सूत्रात् कुः तथा ''स्कोः संयोगाद्योरन्ते च'' इत्यतः अन्ते इत्यनुवर्तते। 'अलोऽन्त्यस्य' इति सूत्रात् अन्त्यस्य पदस्य प्राप्तिः।

**सूत्रार्थः** – नशेः विकल्पेन कवर्गः अन्तादेशो भवति पदस्यान्ते।

**रूपलेखनप्रकारः** – **नक्-नग्, नट्-नड्** –

नश्धातोः क्विपि, सर्वापहारिलोपे, प्रातिपदिकत्वात् सुप्रत्यये, हल्ङ्यादिलोपे, 'व्रश्चभ्रस्ज......'' इति सूत्रं प्रबाध्य ''नशेर्वा'' इति सूत्रेण विकल्पेन शस्य कुत्वेन घकारे, जश्त्वे, वैकल्पिकचर्त्वे, ''नक्-नग्'' इति। पक्षे-कुत्वाभावे तु ''व्रश्चभ्रस्ज....'' इत्यादिना सूत्रेण शस्य षत्वे, जश्त्वे, विकल्पेन चर्त्वे, ''नट्-नड्'' इति चत्वारि रूपाणि।

## ४३२ स्पृशोऽनुदके क्विन् ३/२/५८

अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्।

घृतस्पृक्, घृतस्पृग्। घृतस्पृशौ, घृतस्पृशः। क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम्। स्पृक्। षडगकाः प्राग्वत्। **इति शान्ताः**। '**ञिधृषा प्रागल्भ्ये**'। अस्मात् '**ऋत्विग्-**' ( **सू॰ ३७३** ) आदिना क्विन्। द्वित्वमन्तोदात्तत्वं च निपात्यते। कुत्वात् पूर्वं जश्त्वेन डः, गः, कः। धृष्णोतीति दधृक्, दधृग्। दधृषौ। दधृषः। दधृग्भ्यामित्यादि। रत्नानि मुष्णातीति रत्नमुट्, रत्नमुड्। रत्नमुषौ। रत्नमुषः। '**षड्भ्यो लुक्**' ( **सू. २६९** )। षट्, षड्। षड्भिः। षड्भ्यः। षड्भ्यः। '**षट्चतुर्भ्यश्च**' ( **सू. ३३८** ) इति नुट्। '**अनाम्**' इति पर्युदासान्न ष्टुत्वनिषेधः। '**यरोऽनुनासिके-**' ( **सू. ११६** ) इति विकल्पं बाधित्वा '**प्रत्यये भाषायां नित्यम्**' ( **वा. ५०१७** ) इति वचनान्नित्यमनुनासिकः। षण्णाम्। षट्त्सुषट्सु। तदन्तविधिः। परमषट्। परमषण्णाम्। गोणत्वे तु प्रियषषः। प्रियषषाम्। रुत्वं प्रति षत्वस्यासिद्धत्वात् '**ससजुषो रुः**' ( **सू. १३२** ) इति रुत्वम्।

**पदच्छेदः** – न उदकम् अनुदकं, तस्मिन् अनुदके। स्पृशः पञ्चम्यन्तम्, अनुदके सप्तम्यन्तम्, क्विन् प्रथमान्तम्।

**अनुवृत्तिः** – ''सुपि स्थः'' इति सूत्रात् सुपि इत्यनुवर्तते।

**सूत्रार्थः** – उदकशब्दभिन्ने सुबन्ते उपपदे स्पृश् धातोः क्विन्प्रत्ययः स्यात्।

घृतस्पृक्-घृतस्पृग् –

''घृतं स्पृशति' इति विग्रहात् घृतशब्दोपपदात् स्पृश्धातोः ''स्पृशोऽनुदके क्विन्'' इति सूत्रेण क्विनि, सर्वापहारिलोपे, उपपदसमासे, घृतस्पृश् इत्यस्मात् सुप्रत्यये, हल्ङ्यादिलोपे ''व्रश्चभ्रस्ज........'' इत्यादिना सूत्रेण शस्य षत्वे, जश्त्वे, विकल्पेन चर्त्वे, ''घृतस्पृक्-घृतस्पृग्'' इति सिद्धम्।

**व्याख्या** – क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम्। स्पृक्। षडगकाः प्राग्वत्।

''क्विन्प्रत्ययस्य कुः'' अस्य सूत्रस्य स्थाने ''क्विनः कुः'' इत्येतावतैवि क्विन्नन्तस्येति लब्धे प्रत्ययग्रहणं क्विन् प्रत्ययो यस्मादिति बहुव्रीहिलाभाय इत्युक्तं युञ्शब्द निरूपणावसरे। षडगकाः षत्व-डत्व-गत्व-चर्त्वादिकार्याणि पूर्ववत्। अतः स्पृश्धातुत्वादपि स्पृक्-स्पृगादि रूपाणि भवन्ति।

**( ख )** 'ञिधृषा प्रागल्भ्ये'। अस्मात् ''ऋत्विग्....''आदिना क्विन् द्वित्वमन्तोदात्तत्वं च निपात्यते। कुत्वात् पूर्वं जश्त्वेन, डः गः, कः।

'ञिधृषा प्रागल्भ्ये' इत्यस्मात् धृष्धातोः क्विनि, निपातनादेव द्वित्वे अन्तोदात्तत्वे चाभ्यासादिकार्ये, दधृष् इत्यस्य प्रातिपदिकसंज्ञायां सुप्रत्यये, हल्ङ्यादिलोपे, जश्त्वे, कुत्वे, विकल्पेनचर्त्वे, ''दधृक्-दधृग्'' इति सिद्धम्। रत्नमुट्-रत्नमुड्-रत्नानिमुष्णाति इत्यर्थे रत्नोपपदात् 'मुष स्तेय' धातोः क्विपि, उपपदसमासे, प्रातिपदिकसंज्ञायाम्,

सुपोलुकि, रत्नमुष्शब्दात् सुप्रत्यये, सुलोपे, जश्त्वे, विकल्पेन चर्त्वे, 'रत्नमुट्' इति सिद्धम्।
पक्षे-चर्त्वाभावे 'रत्नमुड्' इति।

**रूपलेखनप्रकारः – षट्-षड्**=षष्शब्दात् जसि, शसि च ''ष्णान्ता षट्'' इत्यनेन षट्संज्ञायाम्, ''षड्भ्यो लुकि'' इति सूत्रेण जश्शसोः लुकि, जश्त्वे, विकल्पेन चर्त्वे ''षट्-षड्'' इति सिद्धम्।

**षण्णाम्** – षष्शब्दात् आमि, षट्संज्ञायाम्, ''षट् चतुर्भ्यश्च'' इति सूत्रेण नुडागमे, ''षष्+नाम्'' इत्यवस्थायाम्, पदसंज्ञायाम् ''अनाम्नवतिनगरीणामिति वाच्यम्'' इति वार्तिकसहकारेण ''ष्टुना ष्टुः'' इति सूत्रेण नस्य ष्टुत्वे णकारे, ''षड्+णाम्'' इत्यवस्थायाम्, ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रेण विकल्पेन प्राप्तणकारं प्रबाध्य ''प्रत्यये भाषायां नित्यम्'' इति वार्तिकेन डस्यानुनासिके, ''षण्णाम्'' इति सिद्धम्।

**परमषट् – परमषण्णाम्** – 'षड्भ्यो लुक्' 'षट्चतुर्भ्यश्च' इति अङ्गस्याधिकारत्वात् कर्मधारयसमासे प्रधानार्थरूपत्वात् अत्रापि रूपाणि षष्शब्दवत्।

**प्रियषषः**। प्रियषषाम्। ''प्रियाः षट् यस्य'' इति विग्रहात् बहुव्रीहिसमासत्वात् षष्शब्दस्य गौणत्वात् तदन्तविधेः अभावात् रूपाणीमानि।

## ४३३ र्वोरुपधाया दीर्घ इकः ८/२/७६

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते।

पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्याम्। '**वा शरि**' ( **सू. १५१** ) इति वा विसर्जनीयः।

र्वोरुपधाया दीर्घ इकः – विधिसूत्रम्।

**पदच्छेदः** – र् च व् च र्वौ-र्वौ, तयोः-र्वोः। र्वोः षष्ठ्यन्तम् उपधायाः षष्ठ्यन्तं, दीर्घः प्रथमान्तम्, इकः प्रथमान्तम्।

**अनुवृत्तिः** – ''सिपि धातो रुर्वा'' इति सूत्रात् धातोः तथा च ''स्कोः संयोगाद्योरन्ते च'' इत्यतः अन्ते इत्यनुवर्तते। 'पदस्य' इति सूत्रस्याधिकारः।

**सूत्रार्थः** – रेफान्तस्य तथा च वकारान्तस्य धातोः उपधायाः इकः स्थाने दीर्घः स्यात् पदान्ते।

**विशेषः** – रुत्वं प्रति षत्वस्यासिद्धत्वात् ''ससजुषो रुः इति रुत्वम्'' पिपठिष्शब्दे ''ससजुषो रुः'' ८/२/६६ इति सूत्रेण षस्य रुत्वप्राप्ते, परञ्च ''पूर्वत्रासिद्धम्'' इति सूत्रेण परत्रिपादीत्वात् ''आदेश प्रत्यययोः'' ८/३/५९ इति सूत्रेण षत्वासिद्धत्वात् ''ससजुषो रुः'' इति सूत्रेण रुत्वे इति।

**रूपलेखनप्रकारः – पिपठीः** ''पठितुमिच्छति'' इत्यर्थे 'पठ व्यक्तायां वाचि' धातोः ''धातोः कर्मणः समानकर्तृकादिच्छायां वा'' इति सूत्रेण सन् प्रत्ययेऽनुबन्धलोपे, ''सन्यङो'' इति सूत्रेण द्वित्वेऽभ्यासादिकार्ये, ''आर्धधातुकस्येड्वलादेः'' इत्यनेन इडागमेऽनुबन्धलोपे, ''आदेश प्रत्यययोः'' इति सूत्रेण षत्वे, पिपठिष धातोः ''सनाद्यन्ता धातवः'' इत्यनेन धातुसंज्ञायाम्, क्विपि, सर्वापाहारिलोपे, ''अतो लोपः'' इत्यनेन अलोपे, पिपठिष्शब्दात् प्रातिपदिकात् सुप्रत्यये, ''हल्ङ्याभ्यो'' इत्यादिना सूत्रेण सुलोपे, ''ससजुषो रुः'' इत्यनेन रुत्वेऽनुबन्धलोपे ''र्वोरुपधाया दीर्घ इकः'' इति सूत्रेणोपधादीर्घे, रकारस्य विसर्गे ''पिपठीः'' इति सिद्धम्।

## ४३४ नुम्विसर्जनीयशर्व्यवायेऽपि ८/३/५८

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्।

ष्टुत्वेन पूर्वस्य षत्वम्। पिपठीष्षु, पिपठीःषु। '**प्रत्येकम्**' इतिव्याख्यानादनेकव्यवधाने षत्वं न। निंस्स्व। निंस्से। नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं व्याख्यानात्। तेनेह न-सुहिन्सु। पुंसु। अत एव न शर्ग्रहणेन गतार्थता। '**रात्सस्य**' ( **सू. २८०** ) इति सलोपे विसर्गः। चिकीः। चिकीर्षौ। चिकीर्षः। '**रोः सुपि**' ( **सू. ३३९** ) इति नियमात्र विसर्गः। चिकीर्षु। '**दमेर्डोस्**' ( **उ.सू. २२७** )। डित्वसामर्थ्याट्टिलोपः। षत्वस्यासिद्धत्वाद् रुत्वविसर्गौ। दोः। दोषौ, दोषः। '**पद्दन्नो-**' ( **सू. २२८** ) इति वा दोषन्। दोष्णः। दोष्णा। दोषः। दोषा। '**विश प्रवेशने**'। सन्नन्तात् क्विप्।

कत्वस्यासिद्धत्वात् संयोगान्तलोपः। **'व्रश्च-' ( सू. १९४ )** इति षः। जश्त्वचर्त्वे। विविट्, विविड्। विविक्षौ। विविक्षः।

**'स्कोः-' ( सू. ३८० )** इति कलोपः। तट्, तड्। तक्षौ। तक्षः। गोरट्, गोरड्। गोरक्षौ गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु **'स्कोः-' ( सू. ३८० )** इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात्। **'पूर्वत्रासिद्धे न स्थानिवत्' ( वा. ४३३ )** इति त्विह नास्ति, **'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' ( वा. ४४० )** इति निषेधात्। तस्मात् संयोगान्तलोप एव। तक् तग्। गोरक्, गोरग्। **'स्कोः-' ( सू. ३८० )** इति कलोपं प्रति कुत्वस्यासिद्धत्वात् संयोगान्तलोपः। पिपक्, पिपग्। एवं विवक्। दिधक्। **इति षान्ताः।**

**'पिस गतौ'।** सुष्ठु पेसतीति सुपीः। सुपिसौ। सुपिसः। सुपिसा। सुपीर्भ्याम्। सुपीःषु, सुपीष्षु। एवं सुतूः। **'तुस खण्डने'।** विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्! विद्वांसम्। विद्वांसौ।

नुम्विसर्जनीयशर्व्यवायेऽपि - विधिसूत्रम्।

**पदच्छेदः -** नुम् च विसर्जनीयश्च, शर् च तेषामितरेतरद्वन्द्वो नुम्विसर्जनीयशरः, तेषां व्यवायो नुम्विसर्जनीयशर्व्यवायः, तस्मिन् नुम्विसर्जनीयशर्व्यवाये।

**अनुवृत्तिः -** 'इण्कोः' इत्यधिकारः। ''सहेः साडः सः'' इति सूत्रात् सः तथा च ''अपदान्तस्य मूर्धन्यः'' इत्यतः मूर्धन्यः इत्यनुवर्तते।

**सूत्रार्थः -** 'नुम्-विसर्जनीय-शर्' इति एतेषु कस्यापि एकस्य व्यवधाने सति इण्कुभ्यां परस्य सकारस्य षकारः मूर्धन्यादेशः स्यात्।

**रूपलेखनप्रकारः - पिपठीष्षु-पिपठीःषु -**

पिपठिष्शब्दात् प्रातिपदिकात् सुपि, षस्य रुत्वे ''र्वोरुपधाया दीर्घ इकः'' इति सूत्रेणोपधादीर्घे, ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे, ''पिपठीः+सु'' इत्यवस्थायाम्, ''विसर्जनीयस्य सः'' इति सूत्रेण विसर्गस्य स्थाने सकारप्राप्ते परञ्च तत् प्रबाध्य ''वा शरि'' इत्यनेन विकल्पेन विसर्गादेशे, ''पिपठीस्+सु'' ''पिपठीः+सु'' इत्यवस्थायाम्, ''नुम्विसर्जनीयशर्व्यवायेऽपि'' इति सूत्रेण सस्य षत्वे, ''पिपठीस्+षु'', ''पिपठीः षु'' इत्यवस्थायाम्, ''नुम्विसर्जनीयशर्व्यवायेऽपि'' इति सूत्रेण सस्य षत्वे, ''पिपठीस्+षु'' ''पिपठीः+षु'' इत्यावस्थायाम्, ''ष्टुना ष्टुः'' इति सूत्रेण ष्टुत्वेन पूर्वस्य षत्वे, ''पिपठीष्षु-पिपठीः षु'' इति सिद्धम्।

**व्याख्या -** 'प्रत्येकम्' इति व्याख्यानादनेकव्यवधाने षत्वं न। निंस्स्वा निंस्से।

''नुम्विजसर्जनीयशर्व्यवायेऽपि'' इति सूत्रेण नुम् अथवा विसर्जनीयः अथवा शर्प्रत्याहारस्थवर्णस्य एकस्यैव व्यवधानं भवितव्यं तदैव मूर्धन्यादेशः भवति। यदि अनेकस्य व्यवधानं चेत् षत्वं न भवति। यथा - निंस्स्व। इत्यत्र एकाधिकव्यवधानात् षत्वं न।

= नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं व्याख्यानात्। तेनेह न-सुहिन्सु। पुंसु।

'नुम्विजसर्जनीयशर्व्यवायेऽपि' सूत्रेऽस्मिन् नुम्ग्रहणं नुमस्थानिक-अनुस्वारस्य उपलक्षणमस्ति अतः ''सुहिन्सु, पुंसु'' इत्यत्र नकार-मकारस्थानिकानुस्वारत्वात् मूर्धन्यादेशः नाभवत्।

अत एव न शरग्रहणेन गतार्थता। नुम्स्थानिकानुस्वारस्यग्रहणकारणात्। 'शरग्रहणात्' नुम्ग्रहणस्य न गतार्थता। नुम्ग्रहणं केवलम् अनुस्वारस्य उपलक्षणं भवति चेत् अयोगवाहानां ( अनुस्वार-विसर्जनीय-जिह्वामूलीय-उपाध्मानीयानां) गणना शर्प्रत्याहारे स्वीकरणात् अनुस्वारस्थलेषु शर्ग्रहणेन षत्वकार्यं भवितुं शक्यते तर्हि सूत्रे नुम्ग्रहणं व्यर्थम्। अतः शर्ग्रहणेन नुम् इत्यस्य गतार्थता न।

**रूपलेखनप्रकारः - चिकीः -** ''कर्तुमिच्छतीति चिकीर्षति'' इत्यर्थे 'डुकृञ् करणे' धातोः क्विपि, सर्वापहारिलोपे, ''अतो लोपः'' इत्यनेन अलोपे, चिकीर्ष्शब्दात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे, षत्वस्य असिद्धत्वात् ''रात्सस्य''

इति सूत्रसहकारेण ''संयोगान्तस्य लोप:'' इति सूत्रेण सलोपे, रेफस्य 'खरवसानयोविर्जसर्जनीय:'' इत्यनेन विसर्गे, ''चिकी:'' इति सिद्धम्।

''रो: सुपि'' इति नियमान्न विसर्ग:।

चिकीर्षु – चिकीर्ष्शब्दात्प्रातिपदिकात् सुपि, अनुबन्धलोपे, ''चिकीर्+सु'' इत्यवस्थायाम् ''रो: सुपि'' इति सूत्रेण रुस्थानीयरेफस्य एव विसर्गकारणात् न विसर्गे, ''आदेश प्रत्यययो:'' इति सूत्रेण सस्य षत्वे, ''चिकीर्षु'' इति सिद्धम्। दमेर्डोस्, डित्वसामर्थ्याट्टिलोप:। षत्वस्यासिद्धत्वकारणात् रुत्वविसर्गो:।

दो: – दोष्शब्दात् प्रातिपदिकात्, सुप्रत्यये, हल्ङ्यादिलोपे, ''ससजुषो रु:'' इति सूत्रेण षत्वस्यासिद्धत्वकारणात् सस्य रुत्वे, रेफस्य विसर्गे ''दो:'' इति सिद्धम्।

**विविट्-विविड**- ''विश प्रवेशने'' इत्यस्माद्धातो: सन्प्रत्यये, द्वित्वादिकार्ये, विविक्ष्प्रातिपदिकात् सौ, हल्ङ्यादिलोपे ''स्को: संयोगाद्योरन्ते च'' इति सूत्रेण संयोगादिलोपे कर्तव्ये ''षढो: क: सि'' इति सूत्रेण कत्वस्य असिद्धत्वात् ''संयोगान्तस्य लोप:'' इति सूत्रेण षलोपे, निमित्तनाशे कत्वस्य निवृत्तौ 'विविश्' इत्यवस्थायाम्, ''व्रश्चभ्रस्ज.'' इत्यादिना सूत्रेण शस्य षकारे, ''जश्त्वे, विकल्पेन चर्त्वे, ''विविट्'' इति सिद्धम्। चर्त्वाभावे ''विविड्'' इति सिद्धम्।

**तट्-तड्** – 'तक्षति' इत्यर्थे तक्ष तनूकरणे इत्यस्माद्धातो: क्विपि, सर्वापहारिलोपे, तक्ष् इत्यस्य प्रातिपदिकसंज्ञायाम्, सुप्रत्यये हल्ङ्यादिलोपे, ''स्को: संयोगाद्योरन्ते च'' इत्यनेन ककारस्य लोपे, ''तष्'' इत्यवस्थायाम्, जश्त्वे, विकल्पेन चर्त्वे, 'तट्-तड्' इति निष्पन्नम्।

**व्याख्या** – तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु 'स्को:.........' इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात्।

तक्षिरक्षिभ्यां इत्यत्र ''हेतुमति च'' इति सूत्रेण णिचि, अनुबन्ध लोपे, णिलोपस्य रक्षानिवद्भावत्वात् ''स्को: संयोगाद्योरन्ते च'' इत्यनेन कलोपो न भवति, ''तस्य दोष: संयोगादिलोपलत्वणत्वेषु इति वार्तिकनियमात् ''पूर्वत्रासिद्धे न स्थानिवत्'' इत्यनेन स्थानिवद्भावस्य निषेधो न, अत: संयोगान्तलोपे, जश्त्वे, चर्त्वे च।

**रूपलेखनप्रकार: – गोरट्-गोरड्** –

''गां रक्षति'' इत्यर्थे गो इत्युपपदात् रक्ष पालने धातो: क्विपि, उपपदसमासे प्रातिपदिकत्वात्, सुपो लुकि, गोरक्ष्, (गोरक्ष्) शब्दात् प्रातिपदिकात् सुप्रत्यये, सोर्हल्ङ्यादिलोपे, ''स्को: संयोगाद्योरन्ते च'' इति सूत्रेण कलोपे, जश्त्वे, विकल्पेन चर्त्वे, ''गोरट्-गोरड्'' इति रूपम्। णिजन्तस्य रक्षे: 'गोरक्-गोरग्' इति रूपम्।

**पिपक्-पिपग्**

'पक्तुमिच्छति' इत्यर्थे डुपचष् पाके धातो: सनि, द्वित्वादिकार्ये पिपक्ष् (पिपक्ष्) इत्यस्य प्रातिपदिकत्वात् सौ, हल्ङ्यादिलोपे, ''स्को: संयोगाद्योरन्ते च'' इत्यनेन कुत्वस्य असिद्धत्वात् ''संयोगान्तस्य लोप:'' इति सूत्रेण षलोपे, ''चो: कु:'' इति कुत्वे चकारे, जश्त्वे, गस्य विकल्पेन ककारे, ''पिपक्-पिपग्'' इति निष्पन्नम्।

**सुपी:**

'सुष्ठु पेसति' इत्यर्थे पिस गतौ धातो: क्विपि, सर्वापहारिलोपे, सुपिस् इत्यस्य प्रातिपदिकात् सुप्रत्यये, सोर्हल्ङ्यादिलोपे, सस्य रुत्वेऽनुबन्धलोपे, ''र्वोरुपधाया: दीर्घ इक:'' इति सूत्रेण उपधादीर्घे, रेफस्य विसर्गे, ''सुपी:'' इति सिद्धम्।

**विद्वान्** – 'विद् ज्ञाने' इत्यस्याद्धातो: लटि, लट: स्थाने शतृप्रत्यये, शपि, शपो लुकि, ''विदे: शतुर्वसु:'' इति सूत्रेण अतो वस्वादेशेऽनुबन्धलोपे, विद्वस् इत्यस्य प्रातिपदिकसंज्ञायाम् सुप्रत्यये, ''उगिदचां सर्वनामस्थानेऽधातो:'' इत्यनेन नुमि, अनुबन्धलोपे, ''विद्वन्स्+सु'' इत्यवस्थायाम्, ''सान्त महत: संयोगस्य'' इति सूत्रेण दीर्घे, सोर्हल्ङ्यादिलोपे, संयोगान्तसस्य लोपे, 'विद्वान्' इति।

## सकारान्त-विद्वस्शब्दस्य रूपाणि

| | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया | विद्वांसम् | विद्वांसौ | विदुषः |
| तृतीया | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थी | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पञ्चमी | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| षष्ठी | विदुषः | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | विदुषोः | विद्वत्सु |
| सम्बोधनं | हे विद्वन्! | हे विद्वांसौ! | हे विद्वांसः! |

## ४३५ वसोः सम्प्रसारणम् ६/४/१३१

वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। पूर्वरूपं षत्वम्। विदुषः। विदुषा। **'वसुस्रंसु-'** **( सू. ३३४ )** इति दत्वम्। विद्वद्भ्यामित्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसम्। अन्तरङ्गोऽपीडागमः सम्प्रसारणविषये न प्रवर्तते, **'अकृतव्यूहाः-'** **( प. ५७ )** इति परिभाषया। सेदुषः। सेदुषा। सेदिवद्भ्यामित्यादि। **'सान्तमहतः-'** **( सू. ३१७ )** इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः, महच्छब्दसाहचर्यात्। सुष्ठु हिनस्तीति सुहिन्। सुहिंसौ। सुहिंसः। सुहिन्भ्याम् इत्यादि। सुहिन्त्सु, सुहिन्सु। ध्वत्, ध्वद्। ध्वसौ। ध्वसः। ध्वद्भ्याम्। एवं स्रत्।

वसोः सम्प्रसारणम्-विधिसूत्रम्।

**पदच्छेदः** - वसोः षष्ठ्यन्तम्, सम्प्रसारणं प्रथमान्तम्।

**अनुवृत्तिः** - 'भस्य' तथा च "अङ्गस्य" सूत्रयोरधिकारः।

**सूत्रार्थः** - वसुप्रत्ययान्तस्य भसञ्ज्ञकस्य अङ्गस्य स्थाने सम्प्रसारणं स्यात्।

**रूपलेखनप्रकारः** - **विदुषः** - विद्वस् शब्दात् शसि, अनुबन्धलोपे, भसंज्ञायाम्, "विद्+वस्+अस्" इत्यवस्थायाम्, "वसोः सम्प्रसारणम्" इति सूत्रेण वकारस्य स्थाने सम्प्रसारणे उकारे, "विद् उ अस्+अस्" इत्यवस्थायाम्, "सम्प्रसारणाच्च" इत्यनेन पूर्वरूपमेकादेशे, "विदुस्+अस्" इत्यवस्थायाम्, "आदेश प्रत्यययोः" इति सूत्रेण षत्वे, रुत्वे विसर्गे च "विदुषः" इति निष्पन्नम्।

**विद्वद्भ्याम्**

विद्वस्शब्दात् प्रातिपदिकात् भ्यामि, "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायाम्, "वसुस्रंसुध्वंसनडुहां दः" इति सूत्रेण सकारस्य स्थाने दकारे, "विद्वद्भ्याम्" इति सिद्धम्।

**सेदिवान्** - 'षद्लृ विशरणगत्यवसादनेषु' इत्यस्माद्धातोः षस्य सत्वे, लिटि, "भाषायां सदवसश्रुवः" इत्यनेन लिटः क्वस्वादेशेऽनुबन्धलोपे, द्वित्वादिकार्ये, सेदिवस्प्रातिपदिकात् सुप्रत्यये, नुमि, "सेदिवन्स्+सु" इत्यवस्थायाम्, "सान्त महतः संयोगस्य" इति सूत्रेण दीर्घे, हल्ङ्यादिलोपे, "संयोगान्तस्य लोपः" इति सस्य लोपे, संयोगान्तलोपस्य असिद्धत्वात् न लोपः प्रातिपदिकान्तस्य इति नलोपो न, "सेदिवान्' इति रूपम्।

**विशेषः** - अन्तरङ्गोऽपीडागमः सम्प्रसारणविषये न प्रवर्तते, 'अकृतव्यूहाः' इति परिभाषया। सेदुषः।

"सेद्+वस्+अस्" इत्यवस्थायाम् इडागमस्य अन्तरङ्गत्वादपि बहिरङ्गसम्प्रसारणात् प्राक् इडागमस्य प्रवृतिः कथन्नेति? तदित्थं यत् "अकृतव्यूहाः पाणिनीयाः" इति परिभाषया निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न भवति अर्थात् इडागमस्य निमित्तं वकारोऽस्ति, वकारस्तु सम्प्रसारणात् विनष्टं भवति, अतः अन्तरङ्गत्वात् प्राप्तावपि इडागमस्य न प्रवृत्तिः।

**सेदुषः** = 'सेद्वस्' इत्यत्र शसि, ''अकृतव्यूहाः पाणिनीयाः'' इति परिभाषया अन्तरङ्ग–इडागमस्य अप्रवृत्तौ, भसंज्ञायाम्, ''वसोः सम्प्रसारणम्'' इति सूत्रेण वस्य सम्प्रसारणे उकारे, ''सेद् उ अस् + अस्'' इत्यवस्थायाम्, ''सम्प्रसारणाच्च'' इति सूत्रेण पूर्वरूपमेकादेशे, ''सेदुस्+अस्'' इत्यवस्थायाम् ''आदेश प्रत्यययोः'' इत्यनेन सस्य षत्वे, ''सेदुषः'' इति निष्पन्नम्।

**विशेषः** – 'सान्त महतः संयोगस्य' इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः महच्छब्दसाहचर्यात्। ''सुहिन्स्+स्'' इत्यवस्थायां ''सान्तमहतः'' इत्यादिना सूत्रेण सान्तसंयोगस्य उपधाभूत–इकारस्य स्थाने दीर्घः कथं न भवति तस्य समाधानमेतत् यत् ''सान्त महतः'' इत्यादि सूत्रे सान्तसंयोगः प्रातिपदिकस्यैव गृह्यते, न तु धातोः। ''सुहिन्स्'' इत्यत्र सान्तसंयोगस्तु विद्यते परञ्च धातोः वर्तते अतः दीर्घस्तु न।

**सुहिन्** – 'सुष्ठु हिनस्ति' इत्यर्थे सुपूर्वकात् हिसि हिंसायाम् धातोः ''इदितो नुम्धातोः'' इत्यनेन नुमि, क्विपि, नस्यानुस्वारे, सुहिन्स् इत्यस्य प्रातिपदिकसंज्ञायाम्, सौ, हल्ङ्यादिलोपे, संयोगान्तस्य लोपे, संयोगान्तलोपस्य असिद्धत्वात् ''न लोपः–'' इत्यादिना सूत्रेण नलोपो न, ''सुहिन्'' इति निष्पन्नम्।

**ध्वत्–ध्वद्** – 'ध्वंसु अवस्रंसने' धातोः क्विपि, अनुस्वारस्य असिद्धत्वात् ''अनिदितां–'' इत्यादिना सूत्रेण नलोपे, ध्वस् इत्यस्य प्रातिपदिकसंज्ञायाम्, सौ, हल्ङ्यादिलोपे, ''वसुस्रंसुध्वंस्वडुहां दः'' इति सस्य दकारे, विकल्पेन चर्त्वे तकारे, ''ध्वत्–ध्वद्'' इति सिद्धम्।

## ४३६ पुंसोऽसुङ् ७/१/८९

सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। असुङः उकार उच्चारणार्थः। 'बहुपुंसी' इत्यत्र **'उगितश्च'** **( सू. ४५५ )** इति ङीबर्थं कृतेन **'पुञो डुंसुन्'** इति प्रत्ययस्योगित्त्वेनैव नुम्सिद्धेः। पुमान्। हे पुमन्! पुमांसौ। पुमांसः। पुंसः। पुंसा। पुम्भ्याम्। पुम्भिः इत्यादि। पुंसि। पुंसु। **'ऋदुशन–'** **( सू. २७६ )** इत्यनङ्। उशना, उशनसौ। उशनसः।

**'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः'** **( वा. ५०३७ )**। हे उशनन्!, हे उशन!, हे उशनः! उशनोभ्यामित्यादि। अनेहा। अनेहसौ। अनेहसः। हे अनेहः! अनेहोभ्यामित्यादि। वेधाः। वेधसौ। वेधसः। हे वेधः! वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्ठु वस्ते सुवः। सुवसौ। सुवसः। पिण्डं ग्रसते पिण्डग्रः, पिण्डग्लः। 'ग्रसु ग्लसु अदने'।

पुंसोऽसुङ्–विधिसूत्रम्।

**पदच्छेदः** – पुंसः षष्ठ्यन्तम्, असुङ् प्रथमान्तम्।

**अनुवृत्तिः** – ''इतोऽत् सर्वनामस्थाने'' इति सूत्रात् सर्वनामस्थाने इत्यनुवर्तते।

**सूत्रार्थः** – सर्वनामस्थाने प्रयोक्तुम् इष्टे सति पुंसः असुङ् आदेशः भवति। ''ङिच्च'' इति सूत्रेण असुङ् आदेशः अन्त्यस्य भवति।

**व्याख्या** – असुङ् उकार उच्चारणार्थः। बहुपुंसी इत्यत्र ''उगितश्च'' इति ङीबर्थं कृतेन पूञो डुम्सुन् इति प्रत्ययस्यागित्त्वेनैव नुम्सिद्धेः।

असुङ् उकार उच्चारणार्थः। प्रयोजनस्य अभावात् असुङ् इत्यादेशे उकार इत् नास्ति, यतोहि बहवो पुंमासो यस्यां सा 'बहुपुंसी' इत्यत्र ''उगितश्च'' इति सूत्रेण उगित् इति स्वीकृत्य ङीप्रत्ययः भवति, इत्यपि न। पुंस्शब्दस्तु डुम्सुन्प्रत्ययत्वात् पूर्वमेव उगिदन्तं वर्तते।

**रूपलेखनप्रकारः** – **पुमान्** – पूञ् पवने धातोः डुम्सुन्प्रत्ययेऽनुबन्धलोपे, डित्वात् टेर्लोपे, मस्यानुस्वारे, पुंस्शब्दात् प्रातिपदिकात् ''पुंसोऽसुङ्'' इति सूत्रेण सुविवक्षायां ''ङिच्च'' इति सूत्रसहकारेण असुङादेशे, ''पुम् + अस्'' इत्यवस्थायाम्, सुप्रत्ययेऽनुबन्धलोपे, नुमि, ''सान्त महतः संयोगस्य'' इत्यनेन दीर्घे, हल्ङ्यादिलोपे, संयोगान्तसस्य लोपे, ''पुमान्'' इति सिद्धम्।

## सकारान्त-पुम्स्शब्दस्य रूपाणि

| | एकवचनं | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पुमान् | पुमांसौ | पुमांसः |
| द्वितीया | पुमांसम् | पुमांसौ | पुंसः |
| तृतीया | पुंसा | पुम्भ्याम् | पुम्भिः |
| चतुर्थी | पुंसे | पुम्भ्याम् | पुम्भ्यः |
| पञ्चमी | पुंसः | पुम्भ्याम् | पुम्भ्यः |
| षष्ठी | पुंसः | पुंसोः | पुंसाम् |
| सप्तमी | पुंसि | पुंसोः | पुंसु |
| सम्बोधन | हे पुमन्! | हे पुमांसौ! | हे पुमांसः! |

**रूपलेखनप्रकारः – उशना** – 'वष्टिं कामयते' इत्यर्थे वशकान्तौ धातोः कनसिप्रत्ययेऽनुबन्धलोपे, सम्प्रसारणे, पूर्वरूपे, उशनस्प्रातिपदिकात् सौ, ''ऋदुशनस्पुरुदंसोऽनेहसां च'' इति सूत्रेण सस्य अनङादेशेऽनुबन्धलोपे, ''उशन+अन्+स्'' इत्यवस्थायाम्, ''सर्वनामस्थाने चासम्बुद्धौ'' इति सूत्रेण उपधादीर्घे, हल्ङ्यादिलोपे, ''न लोपः प्रातिपदिकान्तस्य'' इति नलोपे, ''उशना'' इति पूर्णम्।

**वार्तिकः** – 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः'

**वार्तिकार्थः** – सम्बुद्धौ परतः उशनस्शब्दस्य सकारस्य स्थाने विकल्पेन अनङ् इत्यादेशः तथा च नकारस्यापि विकल्पेन लोपो भवति।

हे उशनन्! हे उशन! हे उशनः!

उशनस्शब्दात् सम्बोधनस्यैकवचने सौ, ''एकवचनं सम्बुद्धिः'' इति सूत्रेण सम्बुद्धिसंज्ञायाम्, ''अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः'' इति वार्तिकेन विकल्पेन सस्य स्थाने अनङि, तथा च विकल्पेन नस्य लोपे, पररूपे, हल्ङ्यादिलोपे, ''हे उशनन्-हे उशन'' इति सिद्धम्। अनङ् अभावे सस्य रुत्वे विसर्गे च 'हे उशनः' इति रूपम्।

**रूपलेखनप्रकारः – अनेहा** – 'न हन्यते' इत्यर्थे नञ् उपपदात् हन हिंसागत्योः धातोः असिप्रत्यये, हन्स्थाने एहादेशे, उपपद समासे, नलोपे, ''तस्मान्नुडचि'' इति सूत्रेण नुडागमेऽनुबन्धलोपे, अनेहस्प्रातिपदिकात् सुप्रत्यये, ''ऋदुशनसपुरुदंसोऽनेहसाञ्च'' इति सूत्रेण अनङादेशेऽनुबन्धलोपे, उपधादीर्घे, हल्ङ्यादिलोपे, नलोपे, ''अनेहा'' इति सिद्धम्।

**वेधाः** – 'विदधाति' इत्यर्थे विपूर्वकात् डुधाञ् धारणपोषणयोः धातोः असुन्प्रत्यये, वेधादेशे च, वेधस्प्रातिपदिकात् सुप्रत्यये, ''अत्वसन्तस्य चाधातोः'' इत्यनेनोपधादीर्घे, हल्ङ्यादिलोपे, सस्य रुत्वे विसर्गे च ''वेधाः'' इति निष्पन्नम्।

**विशेषः** – अधातोरित्युक्तेर्न दीर्घः। 'अत्वसन्तस्य चाधातोः' सूत्रेऽस्मिन् अधातोः उक्तत्वात् वस्धातोः क्विप्प्रत्ययत्वात् क्विब्विड्विजन्ता धातुत्वं न जहति इति नियमात् धातुत्वकारणात् न दीर्घादेशः।

**सुवः** – ''सुष्ठु वस्ते'' इत्यर्थे वस आच्छादने धातोः क्विपि, सर्वापहारिलोपे, सुवस् प्रातिपदिकात् सुप्रत्यये, हल्ङ्यादिलोपे, सस्य रुत्वे विसर्गे च 'सुवः' इति सिद्धम्।

### ४३७ अदस औ सुलोपश्च ७/२/१०७

अदस औकारोऽन्तादेशः स्यात् सौ परे सुलोपश्च। '**तदोः सः सौ-**' ( **सू. ३८१** ) इति दस्य सः। असौ।

'**औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च**' ( **वा. ४४८२** )। प्रतिषेधसंनियोगशिष्टमुत्वं तदभावे न प्रवर्तते। असकौ, असुकः। त्यदाद्यत्वं, पररूपम्, वृद्धिः। '**अदसोऽसेः-**' ( **सू. ४१९** ) इति मत्वोत्वे। अमू। '**जसः**

शी' ( सू. २१४ )। 'आद्गुणः' ( सू. ६९ )।

अदस औ सुलोपश्च-विधिसूत्रम्।

**पदच्छेदः** – सोर्लोपः सुलोपः, षष्ठीतत्पुरुषः। अदसः षष्ठ्यन्तम् औ लुप्तप्रथमाङ्कं पदम्, सुलोपः प्रथमान्तम्, चाव्ययपदम्।

**अनुवृत्तिः** – ''तदोः सः सावनन्त्ययोः'' इति सूत्रात् सौ इत्यनुवर्तते।

**सूत्रार्थः** – सुविभक्तिपरतः अदसः अन्त्यस्य सकारस्य स्थाने औकारादेशः तथा च सुलोपो भवति।

**असौ** – अदस्शब्दात् प्रातिपदिकात् सुप्रत्यये, ''त्यदादीनामः'' इति सूत्रं प्रबाध्य, ''अदस औ सुलोपश्च'' इति सूत्रेण सकारस्य औकारादेशे, सुलोपे च, ''तदोः सः सावनन्त्ययोः'' इति सूत्रेण दस्य सकारे, ''वृद्धिरेचि'' इति सूत्रेण वृद्धौ, ''असौ'' इति सिद्धम्।

वार्तिकः = 'औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च'

**वार्तिकार्थः** – अकच्सहितं-अदस्शब्दस्य स्थाने औत्त्वस्य विकल्पेन प्रतिषेधे तथा च सकारपरे अकारस्य स्थाने उकारादेशः स्यात्।

प्रतिषेधसन्नियोगशिष्टमुत्त्वं तदभावे न प्रवर्तते। उकारादेशः औत्वनिषेधेन सह प्रवर्तते यतोहि उभयोः युगपत्विधानं विद्यते। यस्मिन् पक्षे औत्त्वं भवति, तस्मिन् पक्षे उत्त्वमपि भवति अन्यथा न भवति। ''सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'' इति परिभाषया यस्य युगपत् विधानं तेषां युगपत् प्रवृत्तिः, युगपत् निवृतिश्च भवति।

**असकौ – असुकः** – अदस्शब्दात् ''अव्ययसर्वनाम्नामकच् प्राक् टेः'' इति सूत्रेण अकच्प्रत्यये, अदकस्शब्दात् सुप्रत्यये, ''अदस औ सुलोपश्च'' इति सूत्रस्य ''औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च'' इति वार्तिकेन विकल्पेन निषेधे, ''तदोः सः सावनन्त्ययोः'' इति सूत्रेण दस्य सकारे तथा चाकारस्य उत्वे, ''असुकद्+स्'' इत्यवस्थायां अत्वे, पररूपे, सस्य रुत्वे विसर्गे च ''असुकः'' इति रूपम्। वार्तिकविकल्पे ''अदकस्+स्' इत्यवस्थायाम्, ''अदस औ सुलोपश्च'' इति सस्य औत्वे सुलोपे च ''अदक+औ'' इतिजाते, ''तदोः सः'' इत्यादिना सूत्रेण दस्य सकारे, वृद्धौ, ''असकौ'' इति सिद्धम्।

**हलन्त पुल्लिङ्ग प्रकरणस्य प्रश्नाः**

**( क ) वस्तुनिष्ठप्रश्नाः–**

१. **लिह् धातोः कः प्रत्ययः भवति–**

(अ) क्विन् (ब) क्विप् (स) विट् (द) विच्

२. **'लिट्त्सु' इत्यत्र कस्य आगमो भवति–**

(अ) टुक् (ब) नुट् (स) धुट् (द) कुक्

३. **दुह् शब्दस्य प्रथमैकवचने रूपं किम्–**

(अ) दुहम् (ब) दुहा (स) दुहे (द) धुक्

४. **विद्वस् शब्दस्य द्वितीयाबहुवचने रूपं किम्–**

(अ) विदुषः (ब) विद्वांसः (स) विद्वान् (द) विद्वांसम्

५. **चतुर्शब्दो नित्यं--------- वचनान्तः?**

(अ) एकवचनान्तः (ब) द्विवचनान्तः

(स) बहुवचनान्तः (द) चतुर्वचनान्तः

**( ख ) अति लघुत्तरात्मकः–**

६. किन्नाम् सम्प्रसारणम्?

७. ''सावनडुहः'' इति सूत्रस्य किं कार्यम्?

८.	'अनड्वान्' इत्यत्र विभक्तिः का?
९.	षट्संज्ञा केषां शब्दानां विद्यते?
१०.	'बहुलम्' इत्यस्य केऽर्थाः भवन्ति?
११.	पथिनशब्दे इकारस्य स्थाने अकारः केन सूत्रेण भवति?
१२.	'राज्ञः' इत्यत्र 'ज्ञः' कयोः वर्णयोः मेलनम्?
१३.	'अहम्-त्वम्' इत्यत्र विभक्तिः का?
१४.	जक्षित्यादयः कति भवन्ति?
१५.	त्यदादिशब्दाः के वर्तन्ते?

**लघुत्तरात्मकप्रश्नाः**

१६.	'अनड्वान् -हे अनड्वन्' इत्यत्र कौ आगमौ भवतः?
१७.	''दिव औत्'' इति सूत्रस्य किमुदाहरणम्?
१८.	सर्वनामशब्देषु सम्बोधनं कथन्न भवति?
१९.	राजन्-पथिन् शब्दयोः रूपाणि लिखत।
२०.	क्विन्प्रत्ययस्य सर्वापहारिलोपः कथं भवति?
२१.	'पूर्वत्राऽसिद्धम्' इति सूत्रे सपादसप्ताध्यायी-त्रैपादिकसूत्रेषु को भेदः भवति?
२२.	इदम्-अदस् शब्दयोः कानि रूपणि भवन्ति?
२३.	'अचः-चौ' सूत्रद्वयस्य कार्यं किम्?
२४.	'अत्वसन्तस्य चाधातोः' सूत्रस्य कार्यं किम्?
२५.	''र्वोरुपधाया दीर्घ इकः'' इति सूत्रस्यार्थोदाहरणं लिखत।
२६.	अस्मद् युष्मदशब्दयोः रूपाणि लेखनीयानि।

**निबन्धात्मकप्रश्नाः-**

२७.	सिद्धिद्वयं करणीयम्-
धुट्त्सु, विश्वौहः, सुद्युभ्याम्, कः
२८.	सिद्धिद्वयं कर्तव्यम्-
अयम्, राज्ञः, वृत्रघ्नः, मघोनः
२९.	सिद्धित्रयं साधनीयम्-
पन्थाः, ऋत्विक्, सुयुक्, स्यः, वयम्, युष्माकम्।
३०.	सिद्धिचतुष्टयं ससूत्रं विवेचनीयम्-
सुपदः, प्राङ्, उदीचः, महान्, तादृक्, घृतस्पृक्, असौ, अमी।

## ।। अथ हलन्तस्त्रीलिङ्गप्रकरणम् ।।

हलन्तपुल्लिङ्गप्रकरणवत् हलन्तस्त्रीलिङ्गशब्देषु अपि हलन्तानां क्रमः नास्ति वर्गानुसारेण, माहेश्वरसूत्रानुसारेण हकारादिक्रमस्य अनुसरणमेव कृतं विद्यते।

### ४४० नहो धः ८/२/३४

नहो हस्य धः स्याज्झलि पदान्ते च।

उपानत्, उपानद्। उपानहौ। उपानहः। उपानद्भ्याम्। उपानत्सु। उत्पूर्वात् '**ष्णिह प्रीतौ**' ( **धा. १२०१** ) इत्यस्मात् '**ऋत्विग्-**' ( **सू. ३७३** ) आदिना क्विन्, निपातनाद् दलोपषत्वे, क्विन्नन्तत्वात्कुत्वेन हस्य घः, जश्त्वचर्त्वे। उष्णिक्, उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्। उष्णिक्षु। **इति हान्ताः।** द्यौः। दिवौ। दिवः। द्युभ्याम्। द्युषु। **इति वान्ताः।** गीः। गिरौ। गिरः। एवं पूः। चतुरश्चतस्रादेशः। चतस्रः। चतस्रः। चतसृणाम्। **इति रेफान्ताः।** किमः कादेशे टाप्। का। के। काः। सर्वावत्।

नहो धः - विधिसूत्रम्।

नहः धः इति पदच्छेदः अस्मिन्सूत्रे हो ढः (८/२/३१) इत्यतः 'ह' इत्यनुवर्तते। ''झलो झलि'' (८/२/२६) इत्यतः झलि। 'पदस्य' अधिकृतम् ''स्कोः संयोगाद्योरन्ते च'' (८/२/२९) इत्यतः अन्ते चानुवर्तते।

**सूत्रार्थः -** नह्शब्दे यो हकारः तस्य धकारादेशः स्यात् झलि परे तथा च पदान्ते। उपानत्-उपानद्

**रूपलेखनप्रकारः -** उपपूर्वात् 'णह बन्धने' धातुत्वात् क्विपि, सर्वापहारिलोपे, ''नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ'' इति सूत्रेण उप इत्यकारस्य दीर्घे, उपानह् इति प्रातिपदिकत्वात्, सौ, सुलोपे, ''नहो धः'' इत्यनेन हस्य धकारे, जश्त्वे, चर्त्वे, ''उपानत्'' इति सिद्धम्। चर्त्वाभावे 'उपानद्' इति। पादत्राणम् इत्यर्थः।

'उपानह्' इत्यस्माद्प्रातिपदिकत्वात् तृतीयाद्विवचने उपानद्भ्याम् - ''नहो धः'' इत्यनेन धकारादेशः, जश्त्वे, च।

उपानत्सु- उपानह् इत्यस्माद् प्रातिपदिकत्वात् सप्तमी बहुवचने सुपि धकारादेशः, 'खरि च' इत्यनेन चर्त्वे।

### हकारान्तस्त्रीलिङ्गे-उपानह् शब्दस्य रूपाणि

| | एकवचनम् | द्विवचनं | बहुवचनम् |
|---|---|---|---|
| प्रथमा | उपानत्-उपानद् | उपानहौ | उपानहः |
| द्वितीया | उपानहम् | उपानहौ | उपानहः |
| तृतीया | उपानहा | उपानद्भ्याम् | उपानद्भिः |
| चतुर्थी | उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| पञ्चमी | उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| षष्ठी | उपानहः | उपानहोः | उपानहाम् |
| सप्तमी | उपानहि | उपानहोः | उपानत्सु |
| सम्बोधनम् | हे उपानत्-उपानद्! | हे उपानहौ! | हे उपानहः! |

उष्णिक्-छन्दोविशेषः। 'ष्णिह प्रीतौ'

**रूपलेखनप्रकारः - उष्णिक्-उष्णिग्** - उत्पूर्वात् स्निह् (ष्णिह) धातोः ''ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'' इति सूत्रेण क्विन्प्रत्ययत्वात् तथा च निपातनात् दलोपे, 'धात्वादेः षः सः' इति षत्वे, 'रषाभ्यां नोणः समानपदे' इति सूत्रेण णत्वे, उष्णिह्, प्रातिपदिकत्वात् ''क्विन् प्रत्ययस्य कुः'' इति कुत्वे, जश्त्वे, चर्त्वे च 'उष्णिक्-उष्णिग्' इति सिद्धम्।

**उष्णिक्षु -** उष्णिह्शब्दात् प्रातिपदिकत्वात् सप्तमी बहुवचने सुपि, कुत्वे, घकारे, चर्त्वे, ककारे, 'आदेश प्रत्यययोः'

इत्यनेन षत्वे, ''कृष्संयोगे क्षः'' इत्यनेन क्षकारे 'उष्णिक्षु' इति सिद्धम्।

### उष्णिह्शब्दरूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | उष्णिक्–ग् | उष्णिहौ | उष्णिहः |
| द्वितीया | उष्विहम् | उष्णिहौ | उष्णिहः |
| तृतीया | उष्णिहा | उष्णिग्भ्याम् | उष्णिग्भिः |
| चतुर्थी | उष्णिहे | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| पञ्चमी | उष्णिहः | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| षष्ठी | उष्णिहः | उष्णिहोः | उष्णिहाम् |
| सप्तमी | उष्णिहि | उष्णिहोः | उष्णिक्षु |
| सम्बोधनम् | हे उष्णिक्–ग्! | हे उष्णिहौ! | हे उष्णिहः! |

एवं दिव्शब्दः। द्यौः, दिवौ, दिवः। द्युभ्याम्। द्युषु। दिव्शब्दस्यरूपाणि पुल्लिङ्गस्थ–सुदिव् शब्दस्यानुसारम्।
**द्यौः**– दिव् शब्दात् प्रातिपदिकत्वात् प्रथमाया एकवचने सुप्रत्यये, ''दिव्+सु'' इत्यवस्थायाम्, ''दिव औत्'' इति सूत्रेण वस्य औकारादेशे, ''दि औ+सु'' इत्यवस्थायां यणि, अनुबन्धलोपे, सस्य रुत्वे विसर्गे च, ''द्यौः'' सिद्धम्।
**रूपलेखनप्रकारः – द्युभ्याम्** – अत्र ''दिव उत्'' इत्यनेन उदादेशत्वात् ''द्युभ्याम्'' सिद्धम्।

गिर् = वाणी। ''गॄ निगरणे'' धातोः क्विपि, सर्वापहारिलोपे, ''ॠत इद्धातोः'' इति सूत्रेण ॠकारस्य इकारादेशे रपरत्वे, 'गिर्' इति सिद्धम्।

गीः = अत्र ''र्वोरुपधाया दीर्घ इकः'' इत्यनेन उपाधदीर्घे, विसर्गे, ''गीः'' सिद्धम्।

### रेफान्तस्त्रीलिङ्गे गिर् शब्दस्य रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गीः | गिरौ | गिरः |
| द्वितीया | गिरम् | गिरौ | गिरः |
| तृतीया | गिरा | गीर्भ्याम् | गीर्भिः |
| चतुर्थी | गिरे | गीर्भ्याम् | गीर्भ्यः |
| पञ्चमी | गिरः | गीर्भ्याम् | गीर्भ्यः |
| षष्ठी | गिरः | गिरोः | गिराम् |
| सप्तमी | गिरि | गिरोः | गीर्षु |
| सम्बोधनम् | हे गीः! | हे गिरौ! | हे गिरः! |

एवं पूः। पूः = नगरी। पॄ पालनपूरणयोः। पॄधातोः क्विपि, सर्वापहारिलोपे, ''उदोष्ठ्यपूर्वस्य'' इति सूत्रेण ॠकारस्य उकारादेशे, रपरत्वे, ''पुर्'' इति सिद्धम्। शेषरूपाणि गिर्शब्दवत्। पूः पुरौ पुरः। पुरम्, पुरा, पूर्भ्याम्, पूर्भिः, पुरे, पुरः, पुरोः, पुराम्, पुरि, पूर्षु।

चतुरशब्दो नित्यं बहुवचनान्तः। चतुरश्चतस्रादेशः। चतस्रः = चतुर्शब्दात् प्रातिपदिकत्वात् जस् शस् प्रत्ययत्वात् ''त्रिचतुरोः स्त्रियां तिसृचतसृ'' इति सूत्रेण चतुर् स्थाने चतसृ आदेशे, ''अचि र ऋतः'' इत्यनेन ऋकारस्य स्थाने रेफादेशे, ''चतस् र् अस्'' इत्यवस्थायाम्, रुत्वे विसर्गे च ''चतस्रः'' इति सिद्धम्।

चतसृणाम् – अत्र ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण नुडागमप्राप्ते ''अचि र ऋतः'' इत्यनेन रकारप्राप्ते, अतः ''विप्रतिषेधे परं कार्यम्'' इति सूत्रेण परकार्यत्वात् रकारप्राप्ते, परञ्च ''नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'' इति

वार्तिकेन नुडागमे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन णत्वे, ''चतसृणाम्'' इति सिद्धम्। इत्यत्र ''नामि'' इत्यनेन दीर्घप्राप्ते, परञ्च ''न तिसृचतसृ'' इत्यनेन विषेधे।

किमः कादेशे टाप्। का, के, काः। सर्वावत्। किम्शब्दात् स्त्रीलिङ्गे ''अजाद्यतष्टाप्'' इत्यनेन टापि, सवर्णदीर्घे 'का' रूपं निष्पन्नम्।

के-काशब्दात् प्रथमाया द्विवचने औ, ''औङ आपः'' इत्यनेन शी आदेशे, गुणे ''के'' सिद्धम्।

### मकारान्त किम् शब्दस्य स्त्रीलिङ्गे रूपाणि

| | **एकवचनम्** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

### ४४१ यः सौ ७/२/११०

इदमो दस्य यः स्यात्सौ। **'इदमो मः' ( सू. ३४३ )**। इयम् त्यदाद्यत्वम्, टाप्, **'दश्च' ( सू. ३४५ )** इति मः। इमे। इमाः। इमाम्। इमे। इमाः। अनया। **'हलि लोपः' ( सू. ३४७ )**। आभ्याम्। आभ्याम्। आभिः। अस्यै। अस्याः। अनयोः आसाम्। अस्याम्। अनयोः। आसु। अन्वादेशे तु एनाम्, एने, एनाः। एनया। एनयोः। एनयोः। **इति मान्ताः। 'ऋत्विग्-' ( सू. ३७३ )** आदिना सृजेः क्विन् अमागमश्च निपातितः। स्रक्, स्रग्। स्रजौ। स्रजः। स्रग्भ्याम्। स्रक्षु। **इति जान्ताः।** त्यदाद्यत्वम्, टाप्। स्या। त्ये। त्याः। एवं तद् यद्, एतद्। **इति दान्ताः।** वाक्, वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। **इति चान्ताः।** अप्शब्दो नित्यं बहुवचनान्तः। **'अप्तृन्-' ( सू. २७७ )** इति दीर्घः। आपः। अपः।

यः सौ-विधिसूत्रम्।

यः प्रथमान्तं, सौ सप्तम्यन्तं, द्विपदमिदं सूत्रम्। अस्मिन्सूत्रे ''इदमो मः'' इत्यतः 'इदमः' ''दश्च'' इत्यतो दः इत्यनुवर्तते।

**सूत्रार्थः** - इदम्शब्दस्य यो दकारः तस्य यादेशः सुविभक्तिपरतः।

**रूपलेखनप्रकारः** - **इयम्** - इदम् शब्दात् प्रातिपदिकात् सौ, अत्वं प्रबाध्य 'इदमो मः' इत्यनेन मत्वे, ''यः सौ'' दस्य यकारे, सुलोपे 'इयम्' सिद्धम्।

**इमे** - इदम्प्रातिपदिकात् प्रथमाद्विवचने औ, अत्वपररूपे, टापि, सवर्णदीर्घे, ''इदा+औ'' इत्यवस्थायाम्, ''दश्च'' इति मकारे, ''औङ आपः'' इति श्यादेशे, गुणे इमे सिद्धम्।

**अनया** - 'इदम्+टा' इत्यत्र अत्वे, पररूपे, टापि, ''अनाप्यकः'' इति सूत्रेण इद् स्थाने अन् आदेशे, ''अना + आ'' इत्यवस्थायाम्, ''आङि चापः'' इति आकारस्थाने एकारादेशे, अयादेशे, ''अनया'' सिद्धम्।

**अस्यै** - 'इदम्+ङे' इत्यत्र अत्वे, पररूपे, टापि, ''सर्वनाम्नः स्याड्ढ्रस्वश्च'' इति सूत्रेण स्याडागमे, ह्रस्वे च, इद्भागस्य लोपे, ''अ+स्या+ए'' इत्यवस्थायाम्, ''वृद्धिरेचि'' इति वृद्धौ, ''अस्यै'' सिद्धम्।

**अस्याम्** - ''ङेराम्नद्याम्नीभ्यः'' इति ङि स्थाने आमादेशे।

अन्वादेशे तु एनाम्, एने, एनाः, एनया, एनयोः, एनयोः। ''द्वितीया टौस्स्वेनः'' इति सूत्रेण पुल्लिङ्गवत् स्त्रीलिङ्गेऽपि द्वितीयायां टा-ओस्स्थानेषु एनादेशः। अदन्तत्वात् टापि।

**एनया** - अन्वादेशे एनादेशे, टापि, ''एन+टाप्+आ'' इत्यवस्थायाम्, सवर्णदीर्घे, ''आङि चापः'' इति एकारादेशे, अयादेशे च 'एनया' सिद्धम्।

### इदम् शब्दस्य स्त्रीलिङ्गे रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम्, एनाम् | इमे, एने | इमाः, एनाः |
| तृतीया | अनया, एनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः, एनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः, एनयोः | आसु |

'ऋत्विग्' = आदिना सृजेः क्विन् अमागमश्च निपातितः। 'सृजविसर्गे' धातुत्वात् ''ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'' इति सूत्रेण क्विन्प्रत्यये, निपातनात् अमागमे च, यणि कृते सति 'स्रज्' इति निष्पन्नम्।

**स्रक्-स्रग्** - स्रज्शब्दात् सौ, हल्ङ्यादिलोपे, ''क्विन्प्रत्ययस्य कुः'' इत्यनेन कुत्वे गकारे, वैकल्पिक चर्त्वे, 'स्रक्-स्रग्' इति सिद्धम्।

**स्रक्षु** - स्रज् शब्दात् सुपि, कुत्वे, ''खरि च'' इति चर्त्वे, ''आदेश प्रत्यययोः'' इति षत्वे, 'स्रक्षु' इति सिद्धम्। इति जान्ताः। त्यदाद्यत्वम्, टाप्। स्या त्ये त्याः।

**स्या** - त्यद्शब्दात् स्त्रीलिङ्गे ''त्यदादीनामः'' इति अत्वे, पररूपे, ''अजाद्यतष्टाप्'' इति टापि, अनुबन्धलोपे, सवर्णदीर्घे, ''तदोः सः सावनन्त्ययोः'' इति तस्य सत्वे, विभक्तिलोपे, 'स्या' इति सिद्धम्।

त्यदादिगणस्य सर्वादिगणे पाठः भवति अतः सर्वनामसंज्ञादीनि सर्वकार्याणि भवन्त्येव।

त्यद्शब्दस्य स्त्रीलिङ्गे स्या, त्ये, त्याः रूपाणि भवन्ति।

तद्शब्दस्य स्त्रीलिङ्गे ''सा, ते, ताः'' रूपाणि भवन्ति। यद्शब्दस्य स्त्रीलिङ्गे ''या, ये, याः'' रूपाणि भवन्ति। इत्थमेव एतद्शब्दस्य ''एषा, एते, एताः'' रूपाणि।

### तद् शब्दस्य रूपाणि

| | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

**रूपलेखनप्रकारः वाच्** = वाणी। वक्तीति वाक्। 'वच परिभाषणे' धातुत्वात् ''क्विब्वचिप्रच्छ्ययायतस्तुकटप्रूजुश्रीणां दीर्घोऽसम्प्रसारणञ्च'' इति सूत्रेण क्विप्प्रत्यये, ''वचिस्वपियजादीनां किति'' इति सम्प्रसारणस्य अभावे, क्विप्प्रत्ययस्य सर्वापहारिलोपे, 'वाच्' इति सिद्धम्।

**वाक्-ग्** = वाच्शब्दात् प्रातिपदिकात् सौ, हल्ङ्याब्भ्यो दीर्घात्... हल्ङ्यादिलोपे, ''चोः कुः'' इति कुत्वे, चर्त्वे च ''वाक्-वाग्'' इति सिद्धम्।

**वाक्षु** – वाच्शब्दात् प्रातिपदिकात् सुपि, षत्वे ''क्षसंयोगे क्षः'' इत्यनेन ''वाक्षु'' इति सिद्धम्।

**वाक्-ग्,** वाचौ, वाचः। वाचा, वाग्भ्याम्, वाक्षु। इतिचान्ताः अप्शब्दो नित्यं बहुवचनान्तः। आपः, अपः, अद्भिः, अद्भ्यः, अपाम्, अप्सु।

**आपः** – अप्शब्दात् प्रातिपदिकात् प्रथमाबहुवचने जसि, ''अप्तृन्तृच्स्वसृनप्तृनेष्टृक्ष'' इत्यादिना उपाधादीर्घे, ''आपः'' इति सिद्धम्।

## ४४२ अपो भि ७/४/४८

अपस्तकारः स्याद्भादौ प्रत्यये परे।

अद्भिः। अद्भ्यः। अपाम्। अप्सु। **इति पान्ताः।** दिक्, दिग्। दिशौ। दिशः। दिग्भ्याम्। दिक्षु। **'त्यदादिषु' ( सू. ४२९ )** इति दृशेः क्विन्विधानादन्यत्रापि कुत्वम्। दृक्, दृग्। दृशौ। दृशः। **इति शान्ताः।** त्विट्, त्विड्। त्विषौ। त्विषः। त्विड्भ्याम्। त्विट्त्सु, त्विट्सु। सह जुषत इति सजूः। सजुषौ। सजुषः। सजूर्भ्याम्। सजूष्षु, सजूःषु। षत्वस्यासिद्धत्वाद्रुत्वम्। आशीः। आशिषौ। आशिषः। आशीर्भ्याम्। आशीर्भिः। **इति षान्ताः।** असौ। त्यदाद्यत्वम्, टाप्। औङः शी। उत्वमत्वे। अमूः। अमूः। अमूम्। अमू। अमूः। अमुया। अमूभ्याम्। अमूभिः। अमुष्यै। अमूभ्याम्। अमूभ्यः। अमुष्याः। अमुष्याः। अमुयोः। अमूषाम्। अमुष्याम्। अमुयोः। अमूषु। **इति सान्ताः।।**

अपो भि ८/४/४८ विधिसूत्रम्।

'अपः भि' अपः षष्ठ्यन्तं, भि सप्तम्यन्तं द्विपदमिदं सूत्रम् ''अच उपसर्गात्तः'' इत्यतो त इत्यनुवर्तते। सूत्रमिदं अङ्गाधिकारे विद्यते।

**सूत्रार्थः** – भकारादिप्रत्यये परे अङ्गस्वरूपस्य अपः पकारस्य स्थाने तकारादेशः भवति।

**अद्भिः** – अप्शब्दात् प्रातिपदिकात् तृतीयाबहुवचने भिस्विभक्तौ ''अपो भि'' इति पस्य तकारे, ''झलां जशोऽन्ते'' इति जश्त्वे, सस्य रुत्वे विसर्गे च, 'अद्भिः' इति सिद्धम्।

दिश् = दिशा। दिक्-दिग्।

दिश्धातोः ''ऋत्विग्दधृक्....'' इत्यादिना सूत्रेण क्विनि, तस्य सर्वापहारिलोपे, सु विभक्तौ, विभक्तिलोपे, ''व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'' इति षत्वे, जश्त्वे, ''क्विन्प्रत्ययस्य कुः'' इति कुत्वे गकारे, वैकल्पिक चर्त्वे, ''दिक्-दिग्'' इति सिद्धम्।

### दिश् शब्दस्य रूपाणि

| | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | दिक्-दिग् | दिशौ | दिशः |
| द्वितीया | दिशम् | दिशौ | दिशः |
| तृतीया | दिशा | दिग्भ्याम् | दिग्भिः |
| चतुर्थी | दिशे | दिग्भ्याम् | दिग्भ्यः |
| पञ्चमी | दिशः | दिग्भ्याम् | दिग्भ्यः |
| षष्ठी | दिशः | दिशोः | दिशाम् |

| | | | |
|---|---|---|---|
| सप्तमी | दिशि | दिशोः | दिक्षु |
| सम्बोधनं | हे दिक्-ग्! | हे दिशौ! | हे दिशः! |

'त्यदादिषु-' (सू. ४२९) इति दृशेः क्विन्विधानादन्यत्रापि कुत्वम्। दृक्-दृग्, दृशौ, दृशः।

'त्यदादिषु-' (सू. ४२९) सूत्रस्याशयः वर्तते यत् यदा त्यदादिशब्दादयः उपपदे स्युः तदा एव दृश् धातोः क्विन्प्रत्ययः न स्यात्, यदा त्यदादिशब्दादयः उपपदे न स्युः तदपि क्विन्प्रत्ययः स्यात्। अतः दृश्धातोः क्विन् स्यात्। अतः दिश्वत् दृश्रूपाणि।

त्विष्=दीप्तिः। त्विट्-त्विड्, त्विषौ, त्विषः। त्विड्भ्याम् त्विट्त्सु-त्विट्सु।

**रूपलेखनप्रकारः** - 'त्विष दीप्तौ' धातोः क्विप्प्रत्यये, सर्वापहारिलोपे, प्रातिपदिकत्वात् जश्त्वे, वैकल्पिक चर्त्वे, 'त्विट्-त्विड्' इति सिद्धम्।

त्विट्त्सु-त्विट्सु-त्विष् धातोः, क्विप्प्रत्यये, सर्वापहारिलोपे प्रातिपदिकसंज्ञायाम्, वैकल्पिकधुडागमे, चर्त्वे, 'त्विट्त्सु-त्विट्सु' इति सिद्धम्। सहजुषत इति सजूः। सजुषौ। सजुषः। सजूर्भ्याम्। सजूष्षु-सजूःषु। जुषी प्रीतिसेवनयोः।

सजूः - 'सह जुषते' इत्यर्थे सहपूर्वात् जुष्धातोः क्विप्प्रत्यये, सर्वापहारिलोपे, ''सहस्य सः संज्ञायाम्'' सूत्रेण सह स्थाने सादेशे, सजुष्शब्दात् प्रातिपदिकत्वात् ''ससजुषो रुः'' इति सूत्रेण रुत्वे, अनुबन्धलोपे, 'र्वोरुपधाया दीर्घ इकः'' इति सूत्रेण उकारस्य दीर्घे, विसर्गे च, ''सजूः'' इति सिद्धम्।

सजूष्षु - सजूः षु - सजुष्शब्दात् प्रातिपदिकत्वात्, सुपि, ''ससजुषो रुः'' इति रुत्वे, ''र्वोरुपधायाः दीर्घ इकः'' इति सूत्रेण उपधादीर्घे, रेफस्य विसर्गे, ''वा शरि'' इति सूत्रेण वैकल्पिकविसर्गे, ''नुम्विसर्जनीयशर्व्यवायेऽपि'' इति सूत्रेण सकारस्य मूर्धन्यादेशे, ''सजूः षु'' इति सिद्धम्। पक्षे-विसर्गे, ष्टुत्वे च ''सजूष्षु'' इति सिद्धम्।

षत्वस्यासिद्धत्वाद्रुत्वम्। आशीः। आशिषौ। आशिषः। आशीर्भ्याम्। आशीर्भिः। इति षान्ताः।

**आशीः** - आङ् पूर्वकात् शासु इच्छायाम् धातोः क्विप्प्रत्यये सर्वापहारिलोपे, 'आ + शास्' इत्यवस्थायाम्, 'आशासः क्वावुपसङ्ख्यानम्' इति वार्तिकेन शास्धातोः आ स्थाने इकारे, 'आशिस्' इत्यवस्थायाम्, ''शासिवसिघसीनाञ्च'' ८.३.६० इति सूत्रेण सस्य षत्वे आशिष्शब्दात्प्रातिपदिकत्वात् ''ससजुषो रुः'' ८.२.६६ इति सूत्रेण षस्य रुत्वे यतोहि ''पूर्वत्राऽसिद्धम्'' इति सूत्रेण षत्वस्य असिद्धत्वात् ''ससजुषो रुः'' ८.२.६६ इति सूत्रेण रुत्वेऽनुबन्धलोपे, ''र्वोरुपधाया दीर्घ इकः'' इति सूत्रेण उपधादीर्घे, सस्य रुत्वे विसर्गे च ''आशीः'' इति सिद्धम्।

असौ। त्यदाद्यत्वं, टाप्, औङः शी, उत्वमत्वे। अमू। अमूः। अमूम्, अमू, अमूः। अमुया, अमूभ्याम्, अमूभिः। अमुष्यै, अमूभ्याम्, अमूभ्यः। अमुष्याः। अमुष्याः, अमुयोः अमूषान्। अमुष्याम्, अमुयोः, अमूषु। इति सान्ताः।

''असौ'' इत्यस्य पुल्लिङ्वत् रूपम्।

अमू-अदस् शब्दात् प्रातिपदिकत्वात् प्रथमायाः द्विवचने औ, अत्वे, पररूपे, ''अजाद्यतष्टाप्'' इति टापि, अनुबन्धलोपे, ''अद+आ+औइत्यवस्थायाम्, सवर्णदीर्घे, वृद्धौ, ''अदौ'' इत्यवस्थायाम्, ''अदसोऽसेर्दादु दो मः'' इति सूत्रेण औ स्थाने ऊकारे, दस्य च मकारे, ''अमू'' इति सिद्धम्।

अमुया - अदस् शब्दात् प्रातिपदिकत्वात् तृतीयाया एकवचने टा विभक्तौ, अत्वे पररूपे, टापि, अनुबन्धलोपे, सवर्णदीर्घे, ''अदा+आ'' इत्यवस्थायाम्, ''आङि चापः'' इति सूत्रेण आ स्थाने एकारे, अयादेशे, ''अदया'' इत्यवस्थायाम्, ''अदसोऽसेर्दादु दो मः'' इत्यनेन दस्य मकारे, अस्य च उकारे, ''अमुया'' इति सिद्धम्।

अमुष्यै – अदस्शब्दात् प्रातिपदिकत्वात् चतुर्थ्या एकवचने ङविभक्तौ, अत्वे, पररूपे, टापि, अनुबन्धलोपे, सवर्णदीर्घे ''अदा+ए'' इत्यवस्थायाम्, ''सर्वनाम्न स्याड्ढ्रस्व इत्यनेन ह्रस्वे स्याडागमे च, ''अद+स्या+ए'' इत्यवस्थायाम्, वृद्धौ, दस्य मकारे, अस्य च उकारे, ''अमुष्यै'' इति सिद्धम्।

अमुष्याम् – अदस्शब्दात् प्रातिपदिकत्वात् ङिविभक्तौ, ''अत्वे, पररूपे, टापि, सवर्णदीर्घे, ''ङेराम्नद्याम्नीभ्यः'' इति सूत्रेण ङि स्थाने आमादेशे, ''अदा+आम्'' इत्यवस्थायाम्, ''सर्वनाम्नः स्याड्ढ्रस्वश्च'' इति सूत्रेण ह्रस्वे, स्याडागमे च अनुबन्धलोपे, ''अद+स्या+आम्'' इत्यवस्थायाम्, ''अदसोऽसेर्दादु मः'' इति सूत्रेण दस्य मकारे, अस्य च उकारे, ''आदेश प्रत्ययोः'' इति सूत्रेण सस्य षत्वे, ''अमुष्याम्'' इति सिद्धम्।

**हलन्तस्त्रीलिङ्गप्रकरणस्य प्रश्नाः-**

**वस्तुनिष्ठप्रश्नाः-**

१. अप्शब्दो नित्यं---------वचनान्तः।

(अ) बहुवचनान्तः (ब) द्विवचनान्तः

(स) एकवचनान्तः (द) कोऽपि न

२. चतुर्शब्दे स्त्रीलिङ्गे प्रथमैकवचने किं रूपम्?

(अ) चत्वारः (ब) चतुरः

(स) चतस्रः (द) चत्वारि

**अति-लघूत्तरात्मकप्रश्नाः**

३. उपानह्शब्दस्य प्रथमैकवचने किं रूपम्?

४. 'इयम्' इत्यत्र दस्य यः केन सूत्रेण भवति?

५. अपस्तकारः केन सूत्रेण भवति?

**लघूत्तरात्मकप्रश्नाः**

६. 'नहो: धः' सूत्रस्य कोऽर्थः?

७. किम्शब्दस्य स्त्रीलिङ्गे रूपाणि कानि?

## अथ हलन्तनपुंसकलिङ्गप्रकरणम्

अथ हलन्तनपुंसकलिङ्गे हकारान्ता निरुप्यन्ते। सु-शोभना: अनड्वाह: यस्य तत् कुलम् स्वनडुत्-स्वनडुद्। स्वमोर्लुक्। दत्वम्। स्वनडुत्, स्वनडुद्। स्वनडुही। '**चतुरनडुहो:-**' ( **सू. ३३१** ) इत्याम्। स्वनड्वांहि। पुनस्तद्वत्। शेषं पुंवत्। **इति हान्ता:।** '**दिव उत्**' ( **सू. ३३७** ) अहर्विमलद्यु। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम् '**उत्तरपदत्वे चापदादिविधौ प्रतिषेध:**' ( **वा. ४८०** ) इति प्रत्ययलक्षणं न। विमलदिवी। विमलदिवि। 'अपदादिविधौ' किम्? दधिसेचौ। इह षत्वनिषेधे कर्त्तव्ये पदत्वमस्त्येव। चकारस्य कुत्वे तु न। **इति वान्ता:।** वा:, वारी। अझलन्तत्वान्न नुम्- वारि। चत्वारि। **इति रेफान्ता:।** '**न लुमता-**' ( **सू. २६३** ) इति कादेशो न। किम्। के। कानि। इदम्। इमे। इमानि।

### रूपलेखनप्रकार: -

स्वनडुत्-स्वनडुद्-स्वनडुह् शब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञायाम् ''स्वौजसमौट्'' इत्यादिना सु प्रत्यये अनुबन्धलोपे स्वनडुह्+स् इति जाते ''हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्'' इति सुलोपे प्राप्ते तं प्रबाध्य ''स्वमोर्नपुंसकात्'' इति सुलुकि ''प्रत्ययलोपेप्रत्ययलक्षणम्'' इति प्रत्ययलक्षणत्वात् पदत्वे ''वसुस्रंसुध्वस्वनडुहां द:'' इति सूत्रेण हस्य दकारे स्वनडुद् इति जाते ''वाऽवसाने'' इति सूत्रेण विकल्पेन चर्त्वे स्वनडुत् इति रूपं सिद्ध्यति। चर्त्वाभावे स्वनडुद् इति रूपं भवति।

स्वनडुही-स्वनडुह् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इत्यादिना औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे स्वनडुही इति रूपं भवति।

स्वनड्वांहि-स्वनडुह् इत्यस्मात् प्रातिपदिकात् ''स्वौजसमौट्.'' इत्यादिना जस्-शस् प्रत्यये स्वनडुह्+जस्/शस् इति जाते ''जश्शसो: शि'' इति सूत्रेण जस्/शस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् ''चतुरनडुहोरामुदात्त:'' इति सूत्रेण आमागमे अनुबन्धलोपे ''नपुंसकस्य झलच:'' इति नुमागमे अनुबन्धलोपे स्वनडु आन् ह् + इ इति जाते ''इको यणचि'' इति यणि ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे स्वनड्वांहि इति रूपं भवति।

द्वितीयायां विभक्तावपि एवमेव रूपाणि भवन्ति। तृतीयादिषु पुंवत् भ्याम्, भिस्, भ्यस्, सुप् प्रत्ययेषु परे ''वसुस्रंसुध्वंस्वनडुहां द:'' इति हस्य दत्वं भवति।

### स्वनडुह् शब्दस्य रूपाणि

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | स्वनडुत्-द् | स्वनडुही | स्वनड्वांहि |
| द्वितीया | स्वनडुत्-द् | स्वनडुही | स्वनड्वांहि |
| तृतीया | स्वनडुहा | स्वनडुद्भ्याम् | स्वनडुद्भि: |
| चतुर्थी | स्वनडुहे | स्वनडुद्भ्याम् | स्वनडुद्भ्य: |
| पञ्चमी | स्वनडुह: | स्वनडुद्भ्याम् | स्वनडुद्भ्य: |
| षष्ठी | स्वनडुह: | स्वनडुहो: | स्वनडुहाम् |
| सप्तमी | स्वनडुहि | स्वनडुहो: | स्वनडुत्सु |
| सम्बोधनम् | हे स्वनडुत्-द्! | हे स्वनडुही! | हे स्वनड्वांहि! |

हति हान्ता:।

विमला द्यौ: यस्य तत् अह: इति विग्रहे बहुव्रीहि समासे विमलदिव् शब्द: भवति। रूपलेखनप्रकार: - विमलदिव् शब्दात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्.'' इति सूत्रेण सुप्रत्यये विमलदिव्+सु

इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि ''दिव उत्'' इति वकारस्य उत्वे ''इको यणचि'' इति यणि विमलद्यु इति रूपं भवति।

विमलदिवी – विमलदिव् शब्दात् ''कृतद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्.'' इत्यादिना औ प्रत्यये विमलदिव्+औ इति जाते ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणत्वात् पदत्वात् ''दिव उत्' इति वकारस्य उत्वे प्राप्ते ''उत्तरपदत्वे चापदादिविधौ प्रतिषेध:'' इति वार्तिकेन प्रत्ययलक्षणनिषेधे कृते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे विमलदिवी इति रूपं सिद्ध्यति।

विमलदिवि – विमलदिव् शब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्'' इत्यादिना जस् विभक्तौ विमलदिव्+जस् इति जाते ''जश्शसो: शि'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे विमलदिव्+इ इति जाते ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणत्वात् अन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येव उत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम् ''उत्तरपदत्वे चापदादिविधौप्रतिषेध:'' इति तन्निषेधे'' ''दिव उत्'' इति उत्वं न भवति 'विमलदिवि' इति रूपं सिद्ध्यति।

पङ्क्ति विवेचनम् –

अपदादिविधौ किम्? दधिसेचौ

ननु 'उत्तरपदत्वे चापदादिविधौ प्रतिषेध:' इति वार्तिके अपदादिविधौ इति पदं न स्यात् तदा ''दधिसेचौ'' इत्यत्र सिञ्च् धातो: क्विपि सर्वापहारिलोपे दध्न: सेचौ इत्यर्थे समासे सुब्लुकि ''प्रत्ययलोपेप्रत्ययलक्षणम् इति प्रत्ययलक्षणमाश्रित्य 'सेच्' इत्यस्य पदत्वात् ''सात्पदाद्यो:'' इति षत्वनिषेधो भवति। षत्वनिषेध: पदादिविधि: अस्ति। उत्तरपदत्वे चापदादिविधौ प्रतिषेध: इत्यत्र अपदादि इति नञि स्वीकरणात् षत्वनिषेधो न भवति।

चकारस्य कुत्वे तु न – दधि सेचौ इत्यत्र ''चो कु:'' इत्यनेन कुत्व कर्तव्यतायां सेच् इत्यस्य पदसंज्ञा न भवति। कुत्व पदान्तविधिरस्ति। अत: 'उत्तरपदत्वे चापदादिविधौ प्रतिषेध:' इति वार्तिकेन प्रत्ययलक्षणप्रतिषेधात् पदत्वाभावे कुत्वं न भवति। इति वान्ता:।

रेफान्त वार् शब्दस्य रूपलेखनप्रकार: –

वा: – वार् शब्दात् ''कृत्तद्धितसमासाश्च'' इति प्रतिपदिकसंज्ञायाम् 'स्वौजसमौट.' इत्यादिना सु प्रत्यये ''हल्ङ्याभ्यो.'' इति सुलोपे प्राप्ते तं प्रबाध्य ''स्वमोर्नपुंसकात्'' इति सुलुकि ''खरवसानयोर्विसर्जनीय:'' इति रेफस्य विसर्गे वा: इति रूपं भवति।

वारी–वार् शब्दात् प्रातिपदिकत्वात् औ विभक्तौ ''नपुंसकाच्च'' इति सूत्रेण औ स्थाने शी आदेशे अनुबन्धलोपे वारी इति रूपं भवति।

वारि–वार् शब्दात् प्रातिपदिकत्वात् जस् विभक्तौ ''जश्शसो: शि'' इति सूत्रेण जस् स्थाने शि आदेशे अनुबन्धलोपे झलन्ताभावात् न नुमि वारि इति रूपं सिद्ध्यति।

**वार् ( जलम् ) शब्दस्य रूपाणि**

| **विभक्ति** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | वा: | वारी | वारि |
| द्वितीया | वा: | वारी | वारि |
| तृतीया | वारा | वार्भ्याम् | वार्भि: |
| चतुर्थी | वारे | वार्भ्याम् | वार्भ्य: |
| पञ्चमी | वार: | वार्भ्याम् | वार्भ्य: |
| षष्ठी | वार: | वारो: | वाराम् |

| | | | |
|---|---|---|---|
| सप्तमी | वारि | वारो: | वार्षु |
| सम्बोधनम् | हे वा:! | हे वारी! | हे वारि! |

**विशेष:** – अत्र रो: रेफाभावात् 'रो: सुपि' इति रेफस्य न विसर्ग:। संख्यावाचक बहुवचनान्त 'चतुर्' शब्दस्य रूपलेखनप्रकार: –

चत्वारि–चतुर् शब्दात् प्रातिपदिकात् ''स्वौजसमौट.'' इत्यादिना जस् प्रत्यये चतुर्+जस् इति जाते ''जश्शसो: शि'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् ''चतुरनडुहोरामुदात्त:'' इति सूत्रेण आमागमे अनुबन्धलोपे ''इको यणचि'' इति यणि चत्वारि इति रूपं सिद्धम्। शसि प्रत्यये तद्वत्। शेषं पुंवत्। इति रेफान्ता:।

मकारान्त 'किम्' शब्दस्य रूपलेखनप्रकार: –

किम्–किम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट.'' इति सुप्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि किम् इति रूपं भवति।

के–किम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्०'' इति औ विभक्तौ किम्+औ इति जाते ''किम: क:'' इति किम् स्थाने कादेशे क+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे ''आद्गुण:'' इति सूत्रेण अकारेकारयो: गुणे के इति रूपं सिद्ध्यति।

कानि–किम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्०'' इत्यादिना जस् विभक्तौ 'जश्शसो: शि' इति जस: शि आदेशे अनुबन्धलोपे किम् + इ इति जाते 'शिसर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायाम् ''किम: क:'' इति किम् स्थाने कादेशे ''नपुंसकस्य झलच:'' इति नुमागमे अनुबन्धलोपे कन्+इ इति जाते ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे कानि इति रूपं सिद्ध्यति।

### किम् शब्दस्य रूपाणि

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कै: |
| चतुर्थी | कस्मै | काभ्याम् | केभ्य: |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्य: |
| षष्ठी | कस्य | कयो: | केषाम् |
| सप्तमी | कस्मिन् | कयो: | केषु |

त्यदादीनां सम्बोधनं नास्ति।

इदम् शब्दस्य रूपलेखन प्रकार: –

इदम्–इदम् शब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्०'' इत्यादिना सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणे प्राप्ते ''न लुमताङ्गस्य'' इति निषेधे विभक्ते: परत्वाभावात् ''इदमो म:'' ''त्यदादीनाम:'' इत्यस्य च प्रवृत्तिर्न भवति इदम् इति रूपं सिद्ध्यति।

इमे – इदम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्०'' इत्यादिना औ विभक्तौ इदम्+औ इति इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे ''लशक्वतद्धिते'' इति शस्येत्संज्ञायाम् इदम्+ई इति जाते ''त्यदादीनाम:'' इति अत्वे ''अतो गुणे'' इति पररूपे इद + ई इति जाते ''दश्च'' इति सूत्रेण दस्य मत्वे ''आद्गुण:'' इति सूत्रेण अकारेकारयो: एत्वे गुणे इमे इति रूपं सिद्धम्।

इमानि – इदम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्॰'' इत्यादिना सूत्रेण जस् विभक्तौ इदम्+जस् इति जाते ''त्यदादीनाम:'' इति सूत्रेण मस्यात्वे ''अतो गुणे'' इति पररूपे इद+जस् इति जाते ''जश्शसोशि'' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् ''नपुंसकस्य झलच:'' इति नुमागमे अनुबन्धलोपे ''दश्च'' इति दस्य मत्वे इमन् इ इति जाते ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे इमानि इति रूपं सिद्ध्यति।

पुनस्तद्वत्। शेषं पुंवत्।

## इदम् शब्दस्य रूपाणि

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |
| तृतीया | अनेन | आभ्याम् | एभि: |
| चतुर्थी | अस्मै | आभ्याम् | एभ्य: |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्य: |
| षष्ठी | अस्य | अनयो: | एषाम् |
| सप्तमी | अस्मिन् | अनयो: | एषु |

**वा. अन्वादेशे नपुंसके एनद्वक्तव्य:** (वा. १५३९) एनत्। एने। एनानि। एनेन। एनयो:। एनयो:। **इति मान्ता:।** ब्रह्म। ब्रह्मणी। ब्रह्माणि।

वार्तिकमिदं महाभाष्ये ''द्वितीयाटौस्स्वेन:'' इति सूत्रे पठितम्। अत: द्वितीयायाम् टायाम् ओसि च परे एव प्रवृत्तं भवति।

वार्तिकार्थ: – इदमेतदोरन्वादेशे एनत् स्यात् द्वितीयायां, टापरे ओसि च परे।

**रूपलेखनप्रकार: –**

एनत्-द्-इदम् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्॰'' इत्यादिना सूत्रेण अम् विभक्तौ इदम्+अम् इति जाते ''स्वमोर्नपुंसकात्'' इति अमो लुकि इदम् इति जाते ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणे प्राप्ते ''न लुमताङ्गस्य'' इति निषेधे ''अन्वादेशे नपुंसक एनद्वक्तव्य:'' इति वार्तिकेन इदम् स्थाने एनदादेशे ''झलां जशोऽन्ते'' इति जश्त्वे ''वाऽवसाने'' इति विकल्पेन चर्त्वे एनत् इति रूपं सिद्धम्। चर्त्वाभावे एनद् इति भवति। अत्र एनद्विधानसामर्थ्यात् प्रत्ययलक्षणत्वात् पदत्वम्।

भाष्यकारेण महाभाष्ये 'एनदिति नपुंसकैकवचने वक्तव्यम्' इति पठित्वा ''कुण्डमानय प्रक्षालयैनत्'' इत्युदाहृतम्।

## अन्वादेशे इदम् शब्दस्य रूपाणि नपुंसकलिङ्गे

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | एनत्-द् | एने | एनानि |
| तृतीया | एनेन | आभ्याम् | एभि: |
| चतुर्थी | अस्मै | आभ्याम् | एभ्य: |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्य: |
| षष्ठी | अस्य | एनयो: | एषाम् |
| सप्तमी | अस्मिन् | एनयो: | एषु |

एने–इदम् शब्दात् प्रातिपदिकत्वात् औट्विभक्तौ अनुबन्धलोपे इदम्+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे ''लशक्वतद्धिते'' इति शकारस्येत्संज्ञायाम् अन्वादेशे नपुंसके एनद् वक्तव्यः इति वार्तिकेन इदम् स्थाने एनदादेशे ''त्यदादीनामः'' इति अत्वे 'अतो गुणे' इति पररूपे ''आद्गुणः'' इति एने इति रूपं सिद्धम्।

एनानि, एनेन, एनयोः इत्यत्र इदम् स्थाने एनत् आदेशे ''त्यदादीनामः'' इति अत्वे पररूपे कृते शेषविधानं ज्ञान शब्दवत् कर्त्तव्यम्। इति मान्ताः।

नकारान्त 'ब्रह्मन्' शब्दस्य रूपलेखनप्रकारः –

ब्रह्म–ब्रह्मन् शब्दात् ''कृतद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिक संज्ञायाम् ''स्वौजसमौट्०'' इत्यादिना सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणात् पदसञ्ज्ञायाम्, ''नलोपः प्रातिपदिकान्तस्य'' इति नस्य लोपे ब्रह्म इति रूपं सिद्धम्।

ब्रह्मणी – ब्रह्मन् शब्दात् प्रातिपदिकात् औ विभक्तौ ब्रह्मन् औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे ''विभाषा ङिश्योः'' इति अनोऽकारस्य विकल्पेन लोपे प्राप्ते ''न संयोगाद् वमन्तात्'' इति तन्निषेधे ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे ब्रह्मणी इति रूपं सिद्ध्यति।

ब्रह्माणि – ब्रह्मन् शब्दात् प्रातिपदिकात् जसि प्रत्यये अनुबन्धलोपे ''जश्शसोः शिः'' इति शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसञ्ज्ञायाम्'' सर्वनामस्थाने चाऽसम्बुद्धौ ''इति उपधादीर्घे ''अट्कुप्वाङ्'' इति नस्य णत्वे ब्रह्माणि इति रूपं सिद्ध्यति।

**सम्बुद्धौ नपुंसकानां नलोपो वा वक्तव्यः ( वा. )** हे ब्रह्मन्, हे ब्रह्म। '**रोऽसुपि' ( सू. १७२ )**। अहर्भाति। '**विभाषा ङिश्योः' ( सू. २३७ )**। अह्नी, अहनी। अहानि।

वार्तिकार्थः – नपुंसकलिङ्गे नान्तशब्दस्य नकारस्य लोपः स्यात् सम्बुद्धौ परे वा।

हे ब्रह्म, हे ब्रह्मन्–ब्रह्मन् शब्दात् प्रातिपदिकात् सम्बोधने प्रथमायां सु विभक्तौ ''एकवचनं सम्बुद्धिः'' इति सम्बुद्धिसंज्ञायाम् हे ब्रह्मन्+सु इति जाते ''सम्बुद्धौ नपुंसकानां नलोपो वा वक्तव्यः'' इति विकल्पेन नकारस्य लोपे ''एङ्ह्रस्वात् सम्बुद्धेः'' इति सुलोपे हे ब्रह्म इति रूपं सिद्ध्यति। नलोपाभावपक्षे ''हल्ङ्याभ्यो.'' इति सुलोपे हे ब्रह्मन् इति रूपं भवति।

अहन् शब्दस्य रूपलेखनप्रकारः –

अहः – अहन् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इत्यादिना सु प्रत्यये अहन्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि ''प्रत्ययलोपे प्रत्ययलक्षणम् ''इति प्रत्ययलक्षणे प्राप्ते'' नु लुमताङ्गस्य इति तन्निषेधे ''रोऽसुपि'' इति नस्य रेफादेशे ''खरवसानयोर्विसर्जनीयः'' इति रेफस्य विसर्गे 'अहः' इति रूपं सिद्ध्यति।

अह्नी–अहनी–अहन् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे अहन्+ई इति जाते ''यचिभम्'' इति भत्वात् ''विभाषाङिश्योः'' इति विकल्पेन अनोऽकारस्य लोपे अह्नी इति रूपं सिद्ध्यति। लोपाभावपक्षे अहनी इति रूपं भवति।

अहानि – अहन् शब्दात् प्रातिपदिकात् जसि प्रत्यये ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थान संज्ञायाम् ''सर्वनामस्थाने चाऽसम्बुद्धौ इति उपधादीर्घे अहानि इति रूपं सिद्ध्यति।

अह्ना – अहन् शब्दात् प्रातिपदिकात्कात् टा विभक्तौ अनुबन्धलोपे ''यचि भम्'' इति भसंज्ञायाम् ''अल्लोपोऽनः'' इति अनोऽकारस्य लोपे अह्ना इति रूपं सिद्ध्यति।

### ४४३ अहन् ८/२/६८

'अहन्' इत्यस्य रुः स्यात् पदान्ते। अहोभ्याम्। अहोभिः। इह 'अहः' 'अहोभ्याम्' इत्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते '**अहन्**' इत्यावर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः। तदन्तस्यापि रुत्वरत्वे, दीर्घाण्यहानि यस्मिन् स

दीर्घाहा निदाघः। इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन '**असुपि**' इति निषेधाद्रत्वाभावे रुः, तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः। सम्बुद्धौ तु हे दीर्घाहो! निदाघ। दीर्घाहानौ। दीर्घाहानः। दीर्घाह्णा। दीर्घाहोभ्याम्। दण्डि। दण्डिनी। दण्डीनि। स्रग्वि। स्रग्विणी, स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रह। बहुवृत्रघ्नी, बहुवृत्रहणी। बहुवृत्रहाणि। बहुपूष। बहुपूष्णी, बहूपूषणी। बहुपूषाणि। बह्वर्यम। बह्वर्यम्णी, बह्वर्यमणी। बह्वर्यमाणि। **इति नान्ताः।** असृजः पदान्ते कुत्वम्, सृजेः क्विनो विधानात्। विश्वसृडादौ तु न। '**सृजिदृशोः–**' **( सू. २४०५ )** इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात्। यद्वा '**व्रश्च–**' **( सू. २९४ )** आदिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः। स्रगृत्विक्छब्दयोस्तु निपातनादेव कुत्वम्। असृक्छब्दस्तु अस्यतेरौणादिके ऋन्प्रत्यये बोध्यः। असृक्, असृग्। असृजी। असृञ्जि। '**पद्दन्–**' **( सू. २२८ )** इति वा असन्–असानि। असृजा, अस्ना। असृग्भ्याम्, असभ्यामित्यादि। ऊर्क्, ऊर्ग्। ऊर्जी, ऊन्र्जि। नरजानां संयोगः।

सूत्रप्रकारः–विधिसूत्रमिदम्

**पदच्छेदः –** अहन्

**अनुवृत्तिः –** ''ससजुषो रुः'' इति सूत्रात् रुः इत्यनुवर्तते ''स्कोः संयोगाधोरन्ते च'' इति सूत्रात् ''अन्ते'' इत्यस्यानुवृत्तिः 'पदस्य' इत्यस्याधिकारः।

**सूत्रार्थः –** अहन् शब्दस्य नस्य रुः स्यात् पदान्ते।

**व्याख्या –** अहन् इति लुप्तविभक्त्यन्तरूपम्। अहन् ङस् इत्यत्र सुपां सुलुक्. इति विभक्ति लुकि अलोऽन्त्यस्य इति पदस्यान्तस्य अहन् शब्दस्यान्त्यस्य अल आदेश स्यात्।

**रूपलेखनप्रकारः –**

अहोभ्याम्–अहन् शब्दात् प्रातिपदिकात् भ्याम् विभक्तौ अहन्+भ्याम् इति जाते ''अहन्'' इति नस्य रुत्वे अनुबन्धलोपे अह उ भ्याम् इति जाते ''आद्गुणः'' इति अकारोकारयोः गुणे अहोभ्याम् इति रूपं सिद्धम्। एवमेव अहोभिः, अहोभ्यः।

अह्नि–अहनि–अहन् शब्दात् प्रातिपदिकात् ङि विभक्तौ अनुबन्धलोपे ''अल्लोपोऽनः'' इति प्राप्तं अनोऽकारस्यलोपं प्रबाध्य ''विभाषा ङिश्योः'' इति विकल्पेन अकारस्य लोपे अह्नि इति रूपं सिद्धम्। विकल्पेपक्षे अहनि इति रूपं भवति।

अहन् सु अहः इत्यत्र 'रोऽसुपि' इति रेफे कृते रेफासिद्धत्वात् ''नलोपः प्रातिपदिकान्तस्य'' इति नस्य लोपे। अहोभ्याम् इत्यत्र 'अहन्' इति विहितस्य रु आदेशस्य असिद्धत्वात् नलोपो भवति। अस्यां दशायां 'अहन्' इति सूत्रमावर्त्य प्रथमसूत्रेण पदान्ते अहनेव भवेत् इत्यर्थः गृहीतो भवति। द्वितीय सूत्रेण अहन् इत्यस्य रुः आदेशः स्यात् पदान्ते इत्यर्थः गृहीतो भवति। तदस्यापि रुत्वरत्वे भवतः।

**दीर्घाहन् शब्दस्य रूपलेखनप्रकारः –**

दीर्घाहा–दीर्घाणि अहानि यस्मिन् सः इति विग्रहे समासे प्रातिपदिकत्वात् सुब्लुकि दीर्घाहन् इत्यस्मात् प्रातिपदिकात् सु प्रत्यये सोर्हल्ङ्यादिलोपे 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणत्वात् 'रोऽसुपि' इति सूत्रे असुपि इति प्रतिषेधात् ''अहन्'' इत्यनेन रुत्वे अनुबन्धलोपे दीर्घाहर् इति जाते ''अहन्'' इत्यस्यासिद्धत्वात् ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे दीर्घाहा इति रूपं भवति।

**सम्बुद्धौहेदीर्घाहः!** – हे दीर्घाहन् इत्यस्मात् प्रातिपदिकात् सम्बोधने प्रथमायां सुप्रत्यये 'एकवचनं सम्बुद्धि' इति सम्बुद्धिसञ्ज्ञायाम् ''हल्ङ्याभ्यो.'' इति सुलोपे ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति सूत्रे असम्बुद्धौ इति प्रतिषेधात् नोपधादीर्घे 'अहन्' इति नस्य रुत्वे अनुबन्धलोपे ''खरवसानयोर्विसर्जनीयः'' इति रेफस्य विसर्गे हे दीर्घाहः! इति रूपं सिद्धम्।

दीर्घाहानौ-दीर्घाहन् शब्दात् प्रातिपदिकात् औ विभक्तौ ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे दीर्घाहानौ इति रूपं सिद्धम्।

दीर्घाहोभ्याम् – दीर्घाहन् शब्दात् प्रातिपदिकात् भ्यामि विभक्तौ दीर्घाहन्+भ्याम् ''स्वादिष्वसर्वनामस्थाने'' इति पदत्वात् ''अहन्'' इति सूत्रेण नस्य रुत्वे अनुबन्धलोपे ''हशि च'' इत्युत्वे ''आद्गुण:'' इति गुणे दीर्घाहोभ्याम् इति रूपं सिद्धम्।

**दण्डिन् शब्दस्य रूपलेखनप्रकार: –**

**दण्डि** – 'दण्डोऽस्यास्तीति' अर्थे ''अत इनिठनौ'' इति इनि प्रत्यये नकारोत्तरवर्तीकारस्य इत्संज्ञायाम् तल्लोपे च भत्वादलोपे दण्डिन् इत्यस्मात् ''कृतद्धितसमासश्च'' इति प्रातिपदिकसंज्ञायाम् सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलोपे ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणत्वात् पदत्वात् ''नलोप: प्रातिपदिकान्तस्य'' इति नलोपे दण्डि इति रूपं सिद्ध्यति।

**दण्डिनी** – दण्डिन् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे दण्डिनी इति रूपं भवति।

**दण्डीनि** – दण्डिन् शब्दात् प्रातिपदिकात् जसि ''जश्शसो: शि:'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे दण्डीनि इति रूपं भवति।

**विशेष:** – बालमनोरमाकार: ''दण्डीनि'' इति प्रयोगे ''इन्हन्पूषार्यम्णां शौ'' इति सूत्रेण उपधादीर्घं स्वीकरोति। वस्तुत: ''सर्वनास्थाने चाऽसम्बुद्धौ'' इत्यनेनैव उपधादीर्घो भवति।

**दण्डिन् शब्दस्य रूपाणि**

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | दण्डि | दण्डिनी | दण्डीनि |
| द्वितीया | दण्डि | दण्डिनी | दण्डीनि |
| तृतीया | दण्डिना | दण्डिभ्याम् | दण्डिभि: |
| चतुर्थी | दण्डिने | दण्डिभ्याम् | दण्डिभ्य: |
| पञ्चमी | दण्डिन: | दण्डिभ्याम् | दण्डिभ्य: |
| षष्ठी | दण्डिन: | दण्डिनो: | दण्डिनाम् |
| सप्तमी | दण्डिनि | दण्डिनो: | दण्डिषु |
| सम्बोधनम् | हे दण्डि! हे दण्डिन्! | हे दण्डिनी! | हे दण्डीनि! |

**स्रग्वि** – स्रज् शब्दात् ''अस्मायामेधास्रजो विनि:'' इति विनि प्रत्यये अनुबन्धलोपे स्रज् विन् इति जाते अन्तवर्तिनीं विभक्तिमाश्रित्य पदत्वात् ''चो कु:'' इति कुत्वे स्रग्विन् इत्यस्मात् ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायाम् सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''नलोप: प्रातिपदिकान्तस्य'' इति नकारस्य लोपे स्रग्वि इति रूपं सिद्ध्यति।

**स्रग्विणी** – स्रग्विन् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे ''अट् कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे स्रग्विणी इति रूपं सिद्ध्यति।

**स्रग्वीणि** – स्रग्विन् शब्दात् प्रातिपदिकात् जसि प्रत्यये ''जश्शसो: शि:'' इति जस: शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम् इति सर्वनामस्थानसञ्ज्ञायाम् ''अनिनस्मन्.'' इति परिभाषावशात् ''इन्हपूषार्यम्णां शौ'' इति उपधादीर्घे'' अट्कुप्वाङ्.'' इति नस्य णत्वे स्रग्वीणि इति रूपं सिद्ध्यति।

**वाग्ग्मि** – वाच् शब्दात् ''वाचो ग्मिनि'' इति ग्मिनि प्रत्यये अनुबन्धलोपे वाच्+ग्मिन् इति जाते अन्तवर्तिनीं विभक्तिमाश्रित्य

वाच् इत्यस्य पदत्वे ''झलां जशोऽन्ते'' इति चकारस्य जश्त्वे जकारे वाज् ग्मिन् इति जाते ''चो कुः'' इति कुत्वे वाग्ग्मिन् इत्यस्मात् प्रातिपदिकात् सुप्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि, पदसंज्ञायाम् ''नलोपः प्रातिपदिकान्तस्य'' इति नकारस्य लोपे वाग्ग्मि इति रूपं सिद्ध्यति।

**वाग्ग्मिनी** - वाग्ग्मिन् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे वाग्ग्मिनी इति रूपं भवति।

**वाग्ग्मीनि** - वाग्ग्मिन् शब्दात् प्रातिपदिकात् जसि प्रत्यये ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् ''इन्हन्पूषार्यम्णां शौ'' इति उपधादीर्घे वाग्ग्मीनि इति रूपं सिद्ध्यति।

**बहुवृत्रहाणि** - बहवो वृत्रहणो यस्मिन् मन्वन्तरे इत्यर्थे समासे प्रातिपदिकत्वात् सुब्लुकि बहुवृत्रहन् इत्यस्मात् प्रातिपदिकात् जसि विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् ''इन्हन्पूषार्यम्णां शौ'' इति उपधादीर्घे ''एकाजुत्तरपदेणः'' इति नस्य णत्वे बहुवृत्रहाणि इति रूपं भवति।

**बहुपूषाणि** - बहवः पूषणो यस्मिन् तत् इत्यर्थे बहुव्रीहौ समासे बहुपूषन् इत्यस्मात् प्रातिपदिकात् जसि विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''इन्हन्पूषार्यम्णां शौ'' इति उपधादीर्घे ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे बहुपूषाणि इति रूपं सिद्ध्यति।

**बह्वर्यमाणि** - बहवोऽर्यमणो यस्मिन् इत्यर्थे समासे बह्वर्यमन् शब्दात् प्रातिपदिकात् जसि विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् ''इन्हन्पूषार्यम्णां शौ'' इति उपधादीर्घे ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे बह्वर्यमाणि इति रूपं सिद्ध्यति। इति नान्ताः निरूपिताः।

**पङ्क्तिविवेचनम्** -

असृजः पदान्ते कुत्वम्, सृजेः क्विनो विधानात्।

नञ्पूर्वकात् सृज् धातोः सम्पदादित्वात् क्विपि ''नलोपो नञः'' इति नकारस्य लोपे क्विपः सर्वापहारिलोपे समासे प्रातिपदिकत्वात् सुप्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि असृज् इत्यस्मात् ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणत्वात् पदत्वे ''क्विन्प्रत्ययस्य कुः'' इति विहितस्य कुत्वस्यासिद्धत्वात् ''चो कुः'' इति कुत्वे प्राप्ते तं प्रबाध्य व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छषां षः इति षत्वे असृष् इति जाते अघोषश्वासविवारमहाप्राणप्रयत्नवतः षकारस्य स्थाने ''स्थानेऽन्तरतमः'' इति अघोषश्वासविवारमहाप्राणप्रयत्नयुतः कवर्गीयः खकारः भवति। 'षत्वः निरवकाशः' इति शङ्कनीयः। 'सृष्टम्' इत्यादिषु अपदान्तेषु ''क्विन्प्रत्ययस्य कुः'' इत्यस्याप्राप्तेः षत्वचरितार्थो भवति। अत्र जिज्ञासा भवति यत् असृज् शब्दः क्विबन्तः, न तु क्विन्नन्तः तर्हि ''क्विन्प्रत्ययस्य कुः'' इति कुत्वं कथम्? इति चेदुच्यते समाधानम्- ऋत्विग्दधृक्स्रग्दिगष्णुयुजिक्रुञ्चाञ्च इति अतद्गुणसंविधान बहुव्रीहेराश्रयणात् कुत्वः निर्बाधः भवति।

**विश्वसृडादौ.........................................................रज्जुसृड्भ्याम् इति भाष्यप्रयोगात्।**

''सृजिदृशोर्झल्यमकिति'' इति सूत्रे भाष्ये 'रज्जुसृड्भ्याम्' इति प्रयोगः समुपलब्धः। तेन ज्ञाप्यते यत् 'विश्वसृड्' इत्यत्र कुत्वं न भवति।

देवान् यजतीति देवेट् इत्यादिषु ''चोः कुः'' इत्यस्यासिद्धत्वात् ''व्रश्चभ्रस्जसृज.'' इति षत्वे कृते ''क्विन्प्रत्ययस्य कुः'' इति कुत्वं प्राप्नोति तदनिष्टम्।

**यद्वा 'व्रश्च भ्रस्ज'......................................षत्वं कुत्वापवादः।**

यद्यपि 'सृष्टम्' इत्यादौ अपदान्ते षत्वः सावकाशः तथापि सृजियज्योः पूर्वोत्तरसाहचर्यात् पदान्तेऽपि विशेषविहितत्वात् निरवकाशत्वात् पदान्तविषये षत्वं कुत्वस्यापवादः।

**स्रगृत्विक्शब्दयो............................कुत्वम्।**

यदि षत्वं कुत्वापवादश्चेत् स्रक्–ऋत्विक् शब्दयोः कुत्वं प्रबाध्य षत्वं प्राप्नोति तदनिष्टम् इति चेदुच्यते समाधानम् –

''ऋत्विग्दधृक्.'' इति सूत्रे निपातनात् कुत्वं भवति तदा स्रष्टा, यष्टा इत्यादिषु अपदान्तेऽपि कुत्वं न भवति। उदाहरणम् – असृक्–ग्–अस् धातोः औणादिके ऋज् प्रत्यये असृज् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इति सुप्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''व्रश्च भ्रस्ज.'' इति जस्य षत्वे ''चो कुः'' इति कुत्वे ''वाऽवसाने'' इति वैकल्पिके चर्त्वे असृक् इति रूपं भवति। चर्त्वाभावे असृग् इति रूपं भवति।

**असृजी** – असृज् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे असृजी इति रूपं भवति।

**असृञ्जि** – असृज् शब्दात् प्रातिपदिकात् जसि विभक्तौ ''जश्शसोः शि'' इति सूत्रेण जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसञ्ज्ञायाम् ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे असृंज्+इ इति जाते ''अनुस्वारस्य ययि परसवर्णः'' इति अनुस्वारस्य परसवर्णे असृञ्जि इति रूपं सिद्ध्यति।

**असानि** – असृज् शब्दात् प्रातिपदिकात् शसि विभक्तौ ''जश्शसोः शि'' इति शसः स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थान संज्ञायाम् असृज्+इ इति जाते ''पद्दन्नोमास्हृन्निशसन्यूषन्.'' इति सूत्रेण विकल्पेन असृज् स्थाने असन् आदेशे असन्+इ इति जाते ''सर्वनाम स्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे असानि इति रूपं भवति। विकल्पपक्षे असृञ्जि रूपं भवति।

**अस्ना** – असृज् शब्दात् प्रातिपदिकात् टा विभक्तौ ''चुटू'' इति टस्येत्संज्ञायाम् 'यचि भम्' इति भसंज्ञायाम् ''पद्दन्नोमास्हृन्निशसन्.'' इति विकल्पेन असन् आदेशे ''अल्लोपोऽनः'' इति अनोऽकारस्य लोपे अस्ना इति रूपं सिद्धम्। असन् आदेशविकल्पपक्षे असृजा इति रूपं भवति।

**असभ्याम्** – असृज् शब्दात् प्रातिपदिकात् भ्याम् विभक्तौ ''स्वादिष्वसर्व.'' इति पदसञ्ज्ञायाम् ''पद्दन्नोमास्.'' इति विकल्पेन असन्नादेशे असन् भ्याम् इति जाते ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे असभ्याम् इति रूपं सिद्ध्यति। असनभावपक्षे ''चो कुः'' इति कुत्वे असृग्भ्याम् इति रूपं भवति।

**ऊर्क्–ऊर्ग्** – ऊर्ज बलप्राणनयोः धातोः क्विपि सर्वापहारिलोपे ऊर्ज् इति प्रातिपदिकात् ''स्वौजसमौट्.'' इति सुप्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि पदत्वात् ''चोः कुः'' इति कुत्वे ''वाऽवसाने'' इति विकल्पेन चर्त्वे ऊर्क् इति रूपं सिद्ध्यति। चर्त्वाभावे ऊर्ग् इति रूपं भवति।

**ऊर्जी** – ऊर्ज् शब्दात् प्रातिपदिकात् औ ''नपुंसकाच्च'' इति शी आदेशे अनु.लोपे ऊर्जी इति रूपं भवति।

**ऊर्न्जि** – ऊर्ज् शब्दात् प्रातिपदिकात् जसि विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् सिद्ध्यति। नरजानां संयोगः अत्र वर्तते।

## ऊर्ज् शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ऊर्क्–ऊर्ग् | ऊर्जी | ऊर्न्जि |
| द्वितीया | ऊर्क्–ऊर्ग् | ऊर्जी | ऊर्न्जि |
| तृतीया | ऊर्जा | ऊर्भ्याम् | ऊर्ग्भिः |
| चतुर्थी | ऊर्जे | ऊर्भ्याम् | ऊर्ग्भ्यः |
| पञ्चमी | ऊर्जः | ऊर्भ्याम् | ऊर्ग्भ्यः |
| षष्ठी | ऊर्जः | ऊर्जोः | ऊर्जाम् |

| | | | |
|---|---|---|---|
| सप्तमी | ऊर्जि | ऊर्जोः | ऊर्क्षु |
| सम्बोधनम् | हे ऊर्क्-ग्! | हे ऊर्जौ! | हे ऊर्न्जि! |

**बहूर्जि नुम्प्रतिषेधः (वा. ४३३१)। अन्त्यात्पूर्वो वा नुम् (वा. ४३३२)।** बहूर्जि, बहूर्ञ्जि वा कुलानि। **इति जान्ताः। त्यत्, त्यद्। त्ये। त्यानि। तत्, तद्। ते। तानि। यत्, यद्। ये। यानि। एतत्, एतद्। एते। एतानि। अन्वादेशे तु एनत्। बेभिद्यतेः क्विप्। बेभित्, बेभिद्। बेभिदी। शावल्लोपस्य स्थानिवत्त्वादझलन्तत्वान्न नुम्। अजन्तलक्षणस्तु नुम् न, स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि ब्राह्मणकुलानि। चेच्छिदि। इति दान्ताः।**

**रूपलेखनप्रकारः –**

**बहूर्जि** – बहूर्ज् शब्दात् जसि ''जश्शसोः शि'' इति शि आदेशे अनुबन्धलोपे बहूर्जि इति रूपं सिद्ध्यति। अत्र ''नपुंसकस्य झलचः'' इति झलन्तलक्षणनुमः प्राप्तिर्भवति ''बहूर्जि प्रतिषेधो वक्तव्यः'' इति निषेधे। केषाञ्चित् आचार्याणां मते ''अन्यात्पूर्वो वा नुम्'' इति वार्तिकेन विकल्पेन नुमि श्चुत्वे बहूर्ञ्जि इति रूपं भवति। नुमभावपक्षे बहूर्जि इति रूपं भवति। इति जान्ताः निरूपिताः।

**त्यत्-त्यद्** – त्यद् शब्दात् प्रातिपदिकात् सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''प्रत्ययलोपेप्रत्ययलक्षणम्'' इति पदत्वात् ''वाऽवसाने'' इति चर्त्वे त्यत् इति रूपं भवति। चर्त्वाभावपक्षे त्यद् इति रूपं भवति।

**त्ये** – त्यद् शब्दात् प्रातिपदिकात् औ विभक्तौ ''त्यदादीनामः'' इति अत्वे त्य+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे त्य+ई जाते ''आद्गुणः'' इति गुणे त्ये इति रूपं भवति।

**त्यानि** – त्यद् शब्दात् प्रातिपदिकात् जसि विभक्तौ त्यद्+जस् इति जाते ''त्यदादीनामः'' इति अत्वे पररूपे त्य+जस् इति जाते ''जश्शसोः शि'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थान संज्ञायाम् ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे उपधादीर्घे त्यानि इति रूपं सिद्ध्यति।

**तत्-तद्** – तद् शब्दात् प्रातिपदिकात् सुप्रत्यये तद्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि पदसञ्ज्ञायाम् ''वाऽवसाने'' इति विकल्पेन दस्य चर्त्वे तकारे तत् इति सिद्ध्यति। चर्त्वाभावे तद् इति रूपम्।

**ते** – तद् शब्दात् प्रातिपदिकात् औ विभक्तौ ''त्यदादीनामः'' इति अत्वे 'अतो गुणे' इति पररूपे त औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे त+ई इति जाते ''आद् गुणः'' इति गुणे ते इति रूपं सिद्ध्यति।

**तानि** – तद् शब्दात् प्रातिपदिकात् जसि विभक्तौ तद्+जस् इति जाते ''त्यदादीनामः'' इति अत्वे पररूपे ''जश्शसोः शि'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् ''नपुंसकस्य झलचः'' इति नुमागमे अनु. लोपे उपधादीर्घे तानि इति रूपं सिद्धम्।

**यत्-यद्** – यत् शब्दात् प्रातिपदिकात् सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि 'वाऽवसाने' इति चर्त्वे यत् इति सिद्ध्यति। चर्त्वोभावे यद् इति भवति।

**ये** – यद् शब्दात् प्रातिपदिकात् औ विभक्तौ अत्व पररूपे शीआदेशे गुणे रूपम्।

**यानि** – तद् शब्दवत् रूपम्।

**एतद्-एतत्** – तद् शब्दवत् रूपाणि।

## एतद् शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत्-एतद् | एते | एतानि |
| द्वितीया | एतत्-एतद् | एते | एतानि |

| | | | |
|---|---|---|---|
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

त्यदादीनां सम्बोधनं नास्ति।

## एन्वादेशे तु एनत्

एनत्-एतद् शब्दात् प्रातिपदिकात् अम् विभक्तौ एतत्+अम् इति जाते "स्वमोर्नपुंसकात्" इति सुलुकि एतत् इति जाते "अन्वादेशे नपंसुके एनद् वक्तव्यः" इति वातिकेन एतद् स्थाने एनत् आदेशे एनत् इति रूपं भवति।

**बेभित्-बेभिद्** - भिदिर् विदारणे धातोः यङि प्रत्यये "सन्यङोः" इति धातोः द्वित्वे भिद् भिद् य इति जाते "पूर्वोऽभ्यासः" इति अभ्याससञ्ज्ञायाम् 'हलादि शेषः' इति अभ्यासदस्य लोपे "अभ्यासे चर्च" इति अभ्यास भस्य बत्वे गुणो यङ्लुको: इति धातुत्वात् क्विपि सर्वापहारिलोपे "यस्य हलः" इति यकारस्य लोपे बेभिद् इति शब्दस्य प्रातिपदिकसञ्ज्ञायाम् सु प्रत्यये "स्वमोर्नपुंसकात्" इति सुलुकि पदत्वात् "वाऽवसाने" इति चर्त्वे बेभित् इति रूपं भवति। चर्त्वाभावे बेभिद् इति रूपं भवति।

**बेभिदी** - बेभिद् शब्दात् प्रातिपदिकात् औ विभक्तौ "नपुंसकाच्च" इति औ स्थाने शी आदेशे अनुबन्धलोपे बेभिदी इति रूपं भवति।

**बेभिदि ब्राह्मणकुलानि** - बेभिद् शब्दात् प्रातिपदिकात् जस्-विभक्तौ "जश्शसोः शिः" इति जस् स्थाने शि आदेशे अनुबन्धलोपे "शिसर्वनामस्थानम्" इति सर्वनामस्थानसंज्ञायाम् "अल्लोपस्य स्थानिवत्वात् झलन्तत्वाभावात् "नपुंसकस्य झलचः" इति न नुम् स्वविधौ स्थानिवद्भावात् अजन्त लक्षणनुम् अपि न भवति बेभिदि इति रूपं सिद्ध्यति।

**चेच्छिदि** - छिदिर् धातोः यङि चेच्छिद्य धातोः क्विपि सर्वापहारिलोपे "अतो लोपः" इति अकारस्य लापे "यस्य हलः" इति यकारस्य लोपे चेच्छिद् इत्यस्मात् प्रातिपदिकात् जसि "जश्शसोः शि" इति जस् स्थाने शि आदेशे अनुबन्धलोपे नुमभावात् चेच्छिदि इति रूपं भवति।

इति दान्ताः निरूपिताः

**गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः।**
**असंध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम्।।१।।**
**स्वम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः।**
**चत्वारि शेषे दशके रूपाणीति विभावय।।३।।**

तथा हि। गामञ्चतीति विग्रहे **'ऋत्विग्' ( सू. ३७३ )** आदिना क्विन्। गतौ नलोपः। **'अवङ् स्फोटायनस्य' ( सू. ८८ )** इत्यवङ्। गवाक्, गवाग्। **'सर्वत्र विभाषा-' ( सू. ८७ )** इति प्रकृतिभावे- गोअक्, ओअग्। पूर्वरूपे- गोऽक्-गोऽग्। पूजायां नस्य कुत्वेन ङः-गवाङ्, गोऽङ्, गोअङ्। अम्यप्येतान्येव नव। औङः शी, भत्वाद् **'अचः' ( सू. ४१६ )** इत्यल्लोपः। गोची। पूजायां तु गवाञ्ची, गोअञ्ची, गोऽञ्ची। **'जश्शसोः शि' ( सू. ३१२ )** शेस्सर्वनामस्थानत्वान्नुम्। गवाञ्चि, गोअञ्चि, गोऽञ्ची। गतिपूजनयोस्त्रीण्येव। गोचा, गवाञ्चा, गोअञ्चा, गोऽञ्चा। गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् इत्यादि। सुपि तु ङान्तानां पक्षे **'ङ्णोः कुक्-' ( सू. १३० )** इति कुक्। गवाङ्क्षु, गोअङ्क्षु, गोऽङ्क्षु, गोअङ्षु, गोऽङ्षु, गवाक्षु, गोअक्षु, गोऽक्षु। न चेह **'चयो द्वितीयाः-' ( वा. ५०२३ )** इति पक्षे ककारस्य खकारेण षण्णामाधिक्यं शङ्क्यम्, चर्त्वस्यासिद्धत्वात्। कुक्पक्षे तु तस्यासिद्धत्वाज्जश्त्वाभावे पक्षे चयो द्वितीयादेशात् त्रीणि रूपाणि वर्धन्त एव।

**ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात्।**

**रूपाण्यश्वाक्षिभूतानि ( ५२७ ) भवन्तीति मनीषिभिः।।**

तिर्यक्। तिरश्ची। तिर्यञ्ची। पूजायां तु तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। **इति चान्ताः।**

यकृत्, यकृती, यकृन्ति। **पद्दन्-' ( सू. २२८ )** इति वा यकन्। यकानि। यक्ना, यकृता। शकृत्, शकृती। शकृन्ति, शकानि। शक्ना, शकृता। ददत्, ददती।

**गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागति भेदतः।**

**असन्ध्यवङ्पूर्वरुपैर्नवाधिकशतं मतम्।।**

**कारिकार्थः** – नपुंसकलिङ्गे अञ्चुधातोः पूजायाम्, गतौ इति अर्थद्वयभेदात् प्रकृतिभाव-अवङ्आदेश-पूर्वरूपाधारेण गोपूर्वकक्विन्प्रत्ययान्ताञ्चुधातोः गवाक् शब्दस्य नवाधिकशतं रूपाणि भवन्ति। यथा –

**स्वमसुप्सु नवषड्भादौ षट्के, स्युस्त्रीणि जश्शसोः।**

**चत्वारि शेषे दशके रूपाणीति विभावय।।**

गामञ्चतीति गवाक् शब्दस्य सु, अम्, सुप् प्रत्ययेपरे प्रत्येकस्मिन् पूजायाम्, गत्यर्थे च नवरूपाणि भवन्ति यथा – गत्यर्थे सु प्रत्यये-गवाक्-गवाग्, गो अक्-गो अग्, गोऽक्-गोऽग्, पूजायामर्थे सु प्रत्यये-गवाङ्, गो अङ्, गोऽङ् इति। गत्यर्थे अम्प्रत्यये परे – गवाक्-गवाग्, गो अक्-गो-अग् गोऽक्-गोऽग् पूजायामर्थे अम्प्रत्यये-गवाङ्, गो अङ्, गोऽङ् इति। गत्यर्थे सुप्प्रत्यये-गवाक्षु, गो अक्षु, गोक्षु इति। पूजायाम् सुप्प्रत्यये- गवाङ्क्षु, गवाङ्षु, गोअङ्क्षु, गो अङ्क्षु, गो अङ्षु, गोङ्क्षु, गोङ्षु इति। भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस् इति षट्सु भादिभिक्तौ प्रत्येकस्मिन् षट्-षट्रूपाणि भवन्ति। यथा गत्यर्थे – गवाग्भ्याम्, गो अग्भ्याम्, गोऽग्भ्याम्। पूजायामर्थे – गवाङ्भ्याम्, गो अङ्भ्याभ्याम्, गोऽङ्भ्याम् इति। गत्यर्थे भिस्प्रत्यये – गवाग्भिः, गो अग्भिः, गोऽग्भिः। पूजायामर्थे – गवाङ्भिः, गो अङ्भिः, गोऽङ्भिः गत्यर्थे भ्यस्प्रत्यये – गवाग्भ्यः, गो अग्भ्यः, गोऽग्भ्यः। गवाङ्भ्यः, गो अङ्भ्यः, गोऽङ्भ्यः- इति त्रीणि पूजायामर्थे। जसि शसि च प्रत्यये पूजायां गत्यर्थे च सरूपाणि भवन्ति। यथा – गवाञ्चि, गो अञ्चि, गोऽञ्चि इति। अवशिष्टासु दशषु विभक्तिषु चत्वारि – चत्वारिरूपाणि भवन्ति। यथा – औ विभक्तौ गत्यर्थे-गोची, पूजायामर्थे-गवाञ्ची, गो अञ्ची, गोऽञ्ची इति रूपाणि। एवमेव औट्-पूर्ववत्। टा-ङे-ङसि-ङस्-ओस्-आम्-ङि विभक्तिषु प्रत्येकस्मिन् चत्वारि रूपाणि भवन्ति।

गामञ्चतीति विग्रहौ ''अञ्चु गतिपूजनयोः'' धातोः गो अम् उपपदपूर्वकात् ''ऋत्विक्दधृक्.'' इति सूत्रेण क्विन् प्रत्यये क्विनः सर्वापहारि लोपे ''अनिदितां हल उपधायाः क्ङिति'' इति नकारस्य लोपे गो अच् इत्यस्मात् स्वादिप्रत्ययाः भवन्ति।

**रूपलेखनप्रकारः –**

**( १-२ ) गवाक्-गवाग्** – गो अच् इत्यस्मात् ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिक सञ्ज्ञायाम् ''स्वौजसमौट्.'' इति सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''क्विन्प्रत्ययस्य कुः'' इति कुत्वस्यासिद्धत्वात् ''चोः कुः'' इति कुत्वे गो अक् इति जाते 'अवङ् स्फोटायनस्य' इति विकल्पेन ओकारस्य अवङि ''अकः सवर्णे दीर्घः'' इति सवर्णदीर्घे गवाक् इति जाते ''झलां जशोऽन्ते'' इति जश्त्वे गवाग् इति जातेः ''वाऽवसाने'' इति विकल्पेन चर्त्वे गवाक् इति रूपं सिद्ध्यति। चर्त्वाभावे गवाग् इति रूपं भवति।

**( ३ )** अवङ् विकल्पपक्षे ''सर्वत्र विभाषा गोः'' इति सूत्रेण विकल्पेन प्रकृतिभावे गो अक्-गो अग् इति रूपं भवति।

**( ४ )** प्रकृति भावविकल्पपक्षे ''एङः पदान्तादति'' इति सूत्रेण पूर्वरूपे गोऽक् गोऽग् इति रूपं भवति।

**( ५ ) गवाङ्** – गो अम् उपपदपूर्वकात् अञ्चु धातोः ''ऋत्विग्दधृक्स्रग्दिगष्णुयुजिक्रुञ्चां च'' इति क्विन्प्रत्यये क्विनः सर्वापहारिलोपे ''अनिदितां हल उपधाया क्ङिति'' इति नकारस्य लोपे प्राप्ते पूजार्थत्वात् ''नाञ्चेः पूजायाम्'' इति

तन्निषेधे ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिक सञ्ज्ञायाम् सु प्रत्यये गो अञ्च् सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि ''पदसञ्ज्ञायाम्'' संयोगान्तस्यलोप:'' इति चस्य लोपे ''निमित्तपाये नैमित्तिकस्याप्यपाय:'' इति परिभाषया नकारे ''क्विन्प्रत्ययस्य कु: ''इति कुत्वे'' अवङ् स्फोटायनस्य'' इति विकल्पेन अवङि ''अक: सवर्णे दीर्घ:'' इति सवर्णदीर्घे गवाङ् इति रूपं सिद्ध्यति।

**( ६ ) गो अङ्** – अवङ् विकल्पपक्षे ''सर्वत्र विभाषा गो:'' इति विकल्पेन प्रकृति भावे रूपम्।

**( ७ ) गोऽङ्** – गो+अङ् इत्यत्र अवङ्प्रकृतिभावविकल्पपक्षे ''एङ:पदान्तादति'' इति पूर्वरूपे गोऽङ् इति रूपं भवति।

**( ८ ) गोची** – गो अच् इत्यस्मात् प्रातिपदिकात् औ विभक्तौ गत्यर्थे अकारलोपत्वात् भत्वात् ''अच:'' इति सूत्रेण अकारस्य लोपे ''नपुंसकाच्च'' इति शी आदेशे अनुबन्धलोपे गोची इति रूपं सिद्ध्यति।

**( ९ ) गवाञ्ची** – पूजायामर्थे नकारलोपनिषेधत्वात् ''अच:'' इत्यस्य प्रवृत्ति: न भवति। गो अञ्च् औ इत्यत्र ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे ''अवङ् स्फोटायनस्य'' इति विकल्पेन अवङ् आदेशे ''अक: सवर्णे दीर्घ:'' इति सवर्णदीर्घे गवाञ्ची इति रूपं भवति।

**( १० ) गो अञ्ची** – अवङ् आदेशविकल्पपक्षे ''सर्वत्र विभाषा गो:'' इति विकल्पेन प्रकृतिभावे रूपम्।

**( ११ ) गोऽञ्ची** – अवङ्प्रकृतिभावविकल्पपक्षे ''एङ: पदान्तादति'' इति पूर्वरूपे रूपम्।

**( १२ ) गवाञ्चि** – गत्यर्थे नकारलोपत्वात् गो अच् इत्यस्मात् प्रातिपदिकात् जस् प्रत्यये ''जश्शसो: शि'' इति जस: श्यादेशे अनुबन्धलोपे शि सर्वनामस्थानम् इति सर्वनाम स्थानसञ्ज्ञायाम् ''उगिदचां सर्वनामस्थानेऽधातो:'' इति नुमागमे अनुबन्धलोपे गो अन् च् इ इति जाते ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे ''अनुस्वारस्य ययि परसवर्ण:'' इति पर सवर्णे ''अवङ् स्फोटायनस्य'' इति सूत्रेण विकल्पेन अवङादेशे अनुबन्धलोपे ''अक: सवर्णे दीर्घ:'' इति सूत्रेण सवर्णदीर्घे गवाञ्चि इति रूपं सिद्ध्यति।

**( १३ ) गो अञ्चि** – अवङभावे ''सर्वत्र विभाषा गो:'' इति पाक्षिके प्रकृति भावे रूपम्।

**( १४ ) गोऽञ्चि** – अवङ्प्रकृतिभावाभावे – ''एङ: पदान्तादति'' इति पूर्वरूपे रूपम्। एवमेव जस्वत् शसि विभक्तौ रूपाणि भवन्ति।

**( १५ ) गोचा** – गो अच् इत्यस्मात् प्रातिपदिकात् गत्यर्थे नकारलोपत्वात् टा विभक्तौ ''यचि भम्'' इति भसञ्ज्ञायाम् ''अच:'' इति सूत्रेणाकारस्य लोपे गोचा इति रूपं भवति।

**( १६ ) गवाञ्चा** – गो अञ्च् शब्दात् पूजायामर्थे ''नाञ्चे: पूजायाम् इति नकारलोपनिषेधे ''अच:'' इत्यस्याप्रवृत्तौ ''स्वौजसमौट्.'' इति टा विभक्तौ अनुबन्धलोपे गो अञ्च् आ इति जाते ''अवङ् स्फोटायनस्य'' इति सूत्रेण विकल्पेन अवङादेशे अनुबन्धलोपे ''अक: सवर्णे दीर्घे:'' इति सवर्णदीर्घे गवाञ्चा इति रूपं भवति।

**( १७ ) गो अञ्चा** – अवङभावे पाक्षिके प्रकृतिभावे रूपम्।

**( १८ ) गोऽञ्चा** – अवङ्प्रकृतिभावविकल्पपक्षे पूर्वरूपे रूपम्।

**( १९ ) गवाग्भ्याम्** – गत्यर्थे गो अच् भ्याम् इत्यवस्थायां ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायां ''चो: कु:'' इति कुत्वे गो अक्भ्याम् इति जाते ''झलां जशोऽन्ते'' इति जश्त्वे ''अवङ् स्फोटायनस्य'' इति सूत्रेण विकल्पेन 'अवङ्' आदेशे सवर्णदीर्घे गवाग्भ्याम् इति रूपं सिद्ध्यति।

**( २० ) गो अग्भ्याम्** – गत्यर्थे भ्यामि अवङभावे रूपम्।

**( २१ ) गोऽग्भ्याम्** – गत्यर्थे भ्यामि अवङ्प्रकृतिभावाभावे रूपम्।

**( २२ ) गवाङ्भ्याम्** – पूजायामर्थे गो अञ्च् भ्याम् इति दशायां ''संयोगान्तस्य लोप:'' इति चकारस्य लोपे ''निमित्तापाये नैमित्तिकस्याप्यपाय:'' इति परिभाषया नकारे ''क्विन्प्रत्ययस्य कु:'' इति कुत्वे गो अङ्भ्याम् इति जाते ''अवङ्

स्फोटायनस्य'' इति विकल्पेन अवङादेशे अनुबन्धलोपे सवर्णदीर्घे गवाङ्भ्याम् इति रूपं भवति।
**( २३ ) गो अङ्भ्याम्** – पूजायामर्थे अवङ्विकल्पे प्रकृति भावे रूपम्।
**( २४ ) गोऽङ्भ्याम्** – पूजायामर्थे पूर्वरूपे रूपम्।
**( २५ ) गवाग्भिः** – गो अच्+भिस् इति गत्यर्थे ''चोः कुः'' इति कुत्वे ''झलां जशोऽन्ते'' इति जश्त्वे ''अवङ् स्फोटायनस्य'' इति विकल्पेन अवङ्आदेशे सवर्णदीर्घे रूपं भवति।
**( २६ ) गो अग्भिः** – अवङभावे ''सर्वत्र विभाषा गोः'' इति पाक्षिके प्रकृतिभावे रूपम्।
**( २७ ) गोऽग्भिः** – अवङ्प्रकृतिभावाभावे ''एङः पदान्तादति'' इति पूर्वरूपे रूपम्।
**( २८ ) गवाङ्भिः** – पूजायामर्थे भिस्प्रत्यये अवङादेशे रूपम्।
**( २९ ) गोअङ्भिः** – पूजायामर्थे अवङ्भावे प्रकृति भावे रूपम्।
**( ३० ) गोऽङ्भिः** – पूजायामर्थे पूर्वरूपे रूपम्।
**( ३१ ) गवाग्भ्यः** – 'गवाग्भ्याम्' इति रूपवत्।
**( ३२ ) गो अग्भ्यः** – 'गो अग्भ्याम्' इतिवत्।
**( ३३ ) गोऽग्भ्यः** – 'गोऽग्भ्याम्' इतिवत् रूपम्।
**( ३४ ) गवाङ्भ्यः** – पूजायामर्थे 'गवाङ्भ्याम्' इतिवत् रूपम्।
**( ३५ ) गो अङ्भ्यः** – 'गो अङ्भ्याम्' इतिवत् रूपम्।
**( ३६ ) गोऽङ्भ्यः** – 'गोऽङ्भ्याम्' इतिवद्रूपम्।

पङ्क्तिविवेचनम् –

सुपि तु ङान्तान्तानां................................इति कुक्।

सप्तमी बहुवचने सुप्प्रत्यये गत्यर्थे भ्याम् प्रत्ययवत् विधानं कृत्वा ''खरि च'' इति गकारस्य चर्त्वे ककारे ''आदेशप्रत्यययोः'' इति सस्य मूर्धन्यादेशे षत्वं भवति। पूजायामर्थे भ्याम्प्रत्ययवत् विधानं कृत्वा ''ङ्णोः कुक्टुक् शरि'' इति कुगागमः विकल्पेन भवति। ''चयोः द्वितीयाः शरि पौष्करसादेरितिवाच्यम्'' इति वार्तिकेन विकल्पेन द्वितीयाक्षरः खकारः भवति। अवङ्, प्रकृति भावः पूर्वरूपम् इति पक्षत्रये कुगागमे कुगभावे च षट् रूपाणि भवन्ति। पूजायामर्थे नवरूपाणि भवन्ति।

**रूपलेखनप्रकारः –**

**( ३७ ) गवाक्षु** – गत्यर्थे गो अच् सुप् इत्यत्र ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''चोः कुः'' इति कुत्वे ''झलां जशोऽन्ते'' इति जश्त्वे गो अग् सु इति जाते 'खरि च' इति चर्त्वे ''आदेशप्रत्यययोः'' इति षत्वे ''कषसंयोगेक्षत्वे गो अक्षु इति जाते'' अवङ्स्फोटायनस्य'' इति अवङादेशे सवर्णदीर्घे गवाक्षु इति रूपं सिद्ध्यति। ध्यातव्यम् – 'खरि च' इति सूत्रं ''चयो द्वितीयाः शरिपौष्करसादेरिति वाच्यम्'' इति वार्तिक दृष्ट्या असिद्धमस्ति। अतः द्वितीयाक्षरः ककारस्य खकारः न भवति।
**( ३८ ) गो अक्षु** – अवङभावे ''सर्वत्र विभाषा गोः'' इति पाक्षिके प्रकृतिभावे रूपं भवति।
**( ३९ ) गोऽक्षु** – अवङ्प्रकृतिभावविकल्पपक्षे पूर्वरूपे रूपम्।
**( ४० ) गवाङ्क्षु** – पूजायामर्थे ''नाञ्चे पूजायाम्'' इति नलोपनिषेधे स्वादिष्वसर्वनामस्थाने इति पदसञ्ज्ञायाम् गो अञ्च् सु इति जाते ''संयोगान्तस्य लोपः'' इति चकारस्य लोपे ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति ञकारस्य नकारे ''क्विन्प्रत्ययस्य कुः'' इति कुत्वे ''आदेशप्रत्यययोः'' इति षत्वे ''अवङस्फोटायनस्य'' इति अवदादेशे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे गवाङ्क्षु इति रूपं भवति।
**( ४१ ) गो अङ्क्षु** – अवङभावे ''सर्वत्र विभाषा गोः'' इति प्रकृति भावे रूपम्।

**( ४२ ) गोऽङ्षु** – अवङ्प्रकृतिभावाभावे पूर्वरूपे रूपम्।
**( ४३ ) गवाङ्क्षु** – गो अङ् सु इति दशायां ङ्णोः कुक् टुक् शरि इति कुगासामे षत्वे क्षत्वे अवङादेशे रूपम्।
**( ४४ ) गो अङ्क्षु** – अवङभावे प्रकृतिभावपक्षे रूपम्।
**( ४५ ) गोऽङ्क्षु** – कुगागमे पूर्वरूपे रूपम्।
**( ४६ ) गवाङ्ख्षु** – अवङादेशे "चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्" इति वार्तिकेन कस्य खकारे रूपम्।
**( ४७ ) गो अङ्ख्षु** – प्रकृतिभावे, कुगागमे, कस्य खकारे।
**( ४८ ) गोऽङ्ख्षु** – पूर्वरूपे, कुगागमे, ककारस्य द्वितीयाक्षरे खकारे रूपं भवति।

**विशेषः –** गत्यर्थे पूजायामर्थे च "चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्" इति विकल्पे द्वितीयाक्षराभावे "ङणोः कुक् टुक् शरि (८-३-२८) इति सम्बन्धे अस्य वार्तिकस्य दृष्ट्या "खरि च" (८-४-५५) इति सूत्रम् अष्टाध्यायी क्रमे परत्वात् असिद्धमस्ति। अतः षण्णां रूपाणामाधिक्यं सङ्गतं नास्ति। अतः सूत्रकारः नवाधिकशतरूपाणि (१०९) एव स्वीकरोति।

**ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात्।**
**रूपाण्यश्वाक्षिभूतानि ( ५२७ ) भवन्तीति मनीषिभिः।।**

तिर्यक्। तिरश्ची। तिर्यञ्चि। पूजायां तु तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। **इति चान्ताः।**

यकृत्, यकृती, यकृन्ति। '**पद्दन्-' ( सू. २२८ )** इति वा यकन्। यकानि। यक्ना, यकृता। शकृत्, शकृती। शकृन्ति, शकानि। शक्ना, शकृता। ददत्, ददती।

**कारिकार्थः –** गो अच् शब्दस्य "अनचि च" (४८) इति पाक्षिके द्वित्वे "अणोऽप्रगृह्यस्यानुनासिकः" इति पाक्षिके अनुनासिके अश्वाक्षिभूतानि (५२७) (सप्तविंशत्यधिकपञ्चशतानी त्यर्थः) रूपाणि भवन्ति इति वैयाकरणाः विद्वांसः स्वीकुर्वन्ति। यथा –

**( क )** प्रथमा विभक्तौ एकवचने सुप्रत्यये अन्त्यवर्णस्य "अनचि च" इति पाक्षिके द्वित्वे, तदभावपक्षे च अष्टादश (१८) रूपाणि भवन्ति। प्रथमा द्विवचने यानि चत्वारि रूपाणि तेषु पूजार्थकानां त्रयाणां रूपाणां ञकारस्य पाक्षिके द्वित्वे षट् रूपाणि, आहत्य सप्त (७) रूपाणि भवन्ति। प्रथमा बहुवचने पूर्वोक्तानां त्रयाणां रूपाणां ञकारस्य पाक्षिके द्वित्वे कर्तव्ये षट्रूपाणि "षण्णाम् रूपाणाम् अन्तिम इकारस्य पाक्षिके अनुनासिके (१२) द्वादशरूपाणि भवन्ति। फलतः प्रथमाविभक्तौ ३७ (सप्तत्रिंशत्) रूपाणि भवन्ति।

**( ख )** द्वितीया विभक्तौ प्रथमावत् सप्तत्रिंशत् (३७) रूपाणि भवन्ति।

**( ग )** तृतीया विभक्तौ एकवचने पूजार्थकानां त्रयाणां रूपाणां पाक्षिके द्वित्वे सप्तानां रूपाणामन्त्यस्य आकारस्य "अणोऽप्रगृह्यस्यानुनासिकः" इति पाक्षिके अनुनासिके चतुर्दशरूपाणि भवन्ति।

तृतीया-द्विवचने-गत्यर्थकानां पूजार्थकानाञ्च षण्णां रूपाणाम् गकारङकारयोः द्वित्वे रूपसंख्या द्वादश (१२) भवति। "यणो मयो द्वे वाच्ये" इति वार्तिकेन यकारस्य पाक्षिके द्वित्वे चतुर्विंशतिः (२४) रूपाणि भवन्ति।

तृतीया विभक्तौ (बहुवचने) – षण्णां रूपाणां गत्यर्थकपूजार्थकयोः ककारङकारयोः पाक्षिके द्वित्वे द्वादश (१२) रूपाणि भवन्ति। विसर्गस्य पाक्षिके द्वित्वे चतुर्विंशतिरूपाणि भवन्ति।

**( घ )** चतुर्थी-एकवचने-चतुर्षु रूपेषु पूजार्थकानां रूपाणां ञकारस्य पाक्षिके द्वित्वे षड्रूपाणि। आहत्य सप्तरूपाणि (७) भवन्ति। चतुर्थी द्विवचने भ्यामि पूर्ववत् अष्टचत्वारिंशत् (४८) रूपाणि भवन्ति। चतुर्थी बहुवचने "यणो मयो द्वे वाच्ये" इति वार्तिकेन यकारस्य विसर्गस्य च द्वित्वे अष्टचत्वारिंशत् (४८) रूपाणि भवन्ति।

**( ङ )** पञ्चमी-एकवचने पूजार्थकानां त्रयाणां रूपाणां ञकारस्य द्वित्वे कृते गत्यर्थकस्य च एकं रूपमाहत्य सप्तरूपाणि (७) भवन्ति। सप्तानां विसर्गस पाक्षिके द्वित्वे चतुर्दश (१४) रूपाणि भवन्ति। पञ्चमी द्विवचने भ्यामि-पूर्ववत्

अष्टचत्वारिंशत् रूपाणि भवन्ति। पञ्चमी बहुवचने भ्यस्प्रत्यये पूर्ववत् अष्टचत्वारिंशत् (४८) रूपाणि भवन्ति।

**( च )** षष्ठी एकवचने चतुर्दशरूपाणि भवन्ति। षष्ठी द्विवचनेऽपि चतुर्दशरूपाण्येव षष्ठी बहुवचनेऽपि चतुर्दश एव रूपाणि।

**( छ )** सप्तम्येकवचने ङि प्रत्यये चतुर्दश रूपाणि भवन्ति द्विवचनेऽपि चतुर्दश एव रूपाणि भवन्ति। सप्तमी बहुवचने चतुरशीतिः रूपाणि भवन्ति। एवं प्रकारेण गवाञ्च् शब्दस्य सप्तसु विभक्तिषु आहत्य (५२७) सप्तविंशत्यधिक पञ्चशतं रूपाणि भवन्ति। एकः विद्वान् विद्वत्सभायां कस्याम् आगत्य उक्तवान् यत् (५२७) कस्य शब्दस्य रूपाणि भवन्ति तद्विषये श्लोकः–

**जायन्ते नव सौ, तथामि च नव, भ्याम्भिस्भ्यसां संगमे** ह्व
**षट्सङ्ख्यानि, नवैव सुप्यथ, जसि त्रीण्येव, तद्वच्छसि।**
**चत्वार्यन्यवचस्सु कस्य विबुधाः शब्दस्य रूपाणि तज्-**
**जानन्तु प्रतिभाऽस्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः।।**

तिर्यक् तिरश्ची (वै. सि. कौमुदी)– ''तिरः अञ्चतीति अर्थे'' ''ऋत्विग्दधृक्स्रग्दिगष्णुयुजि क्रुञ्चां च'' इति क्विन् प्रत्यये क्विनः सर्वापहारि लोपे। गत्यर्थे ''अनिदितां हल उपधाया क्ङिति'' इति नकारस्य लोपे तिरस् अच् इत्यस्य ''कृतद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायाम्।

**( १ ) तिर्यक्-तिर्यग्** – तिरस् अच् इत्यस्मात् प्रातिपदिकात् सु प्रत्यये 'हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्' इति सुलोपं प्रबाध्य ''स्वमोर्नपुंसकात्'' इति सुलुकि ''तिरसस्तिर्यलोपे'' इति तिरस् स्थाने तिरि आदेशे ''इको यणचि'' इति यणादेशे अनुबन्धलोपे तिर्यच् इति जाते ''चोः कुः'' इति कुत्वे ''झलां जशोऽन्ते'' इति जश्त्वे ''वाऽवसाने'' इति विकल्पेन चर्त्वे तिर्यक् इति रूपं सिद्ध्यति। चर्त्वाभावे तिर्यग् इति रूपं भवति।

**( २ ) तिरश्ची** – तिरस् अच् शब्दात् ''कृतद्धितसमासाश्च'' इति प्रातिपदिक संज्ञायाम् ''स्वौजसमौट्.'' इति औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे तिरस् अच्+ई इति जाते ''यचि भम्'' इति भसञ्ज्ञायाम् ''अचः'' इति सूत्रेण अकारस्य लोपे तिरस् च् ई इति जाते 'अलोपे' इति प्रतिषेधात् ''तिरसस्तिर्यलोपे'' इति तिर्यादेशो न भवति ''स्तोः श्चुना श्चुः'' इति सस्य श्चुत्वे शकारे तिरश्ची इति रूपं भवति।

**( ३ ) तिर्यञ्चि** – तिरस् अच् शब्दात् ''कृत्तद्धितसमासाश्च'' इति प्रातिपादिकसंज्ञायाम् ''स्वौजसमौट्.'' इति जस् प्रत्यये ''जश्शसोः शि'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् ''अगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमे अनुबन्धलोपे तिरस् अन्च्+इ इति जाते ''तिरसस्तिर्यलोपे'' इति तिरस् स्थाने तिरि आदेशे ''इको यणचि'' इति यणादेशे ''स्तोः श्चुना श्चुः'' इति श्चुत्वे तिर्यञ्चि इति रूपं भवति।

**( ४ ) तिर्यङ्** – तिरस् अञ्च् क्विन् इत्यत्र पूजायामर्थे ''नाञ्चेः पूजायाम्'' इति सूत्रेण नकारलोपनिषेधे क्विनः सर्वापहारिलोपे तिरस् अञ्च् इति जाते ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिक संज्ञायाम् ''स्वौजसमौट्.'' इति सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलोपे पदसञ्ज्ञायाम् ''तिरसस्तिर्यलोपे'' इति तिर्यादेशे ''संयोगान्तस्य लोपः'' इति चकारस्य लोपे ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति परिभाषक नकारे ''इको यणचि'' इति यणि क्विन्प्रत्ययस्य कुः इति कुत्वे तिर्यङ् इति रूपं सिद्ध्यति।

**( ५ ) तिर्यञ्ची** – तिरस् अञ्च् शब्दात् औ प्रत्यये ''नपुंसकाच्च'' इति औस्थाने शी आदेशे अनुबन्धलोपे ''तिरसस्तिर्यलोपे'' इति तिर्यादेशे तिरि अञ्ची इति जाते ''इको यणचि'' इति यणि तिर्यञ्ची इति रूपं भवति।

**( ६ ) तिर्यञ्चि** – तिरस् अञ्च् शब्दात् प्रातिपदिकात् जस् प्रत्यये ''जश्शसोः शि'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''तिरसस्तिर्यलोपे'' इति तिरस् स्थाने तिर्यादेशे तिर्यञ्चि इति रूपं सिद्ध्यति। इति चान्ताः निरूपिताः।

## तिर्यञ्च् शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तिर्यक्–तिर्यग्–तिर्यङ् | तिरश्ची–तिर्यञ्ची | तिर्यञ्चि |
| द्वितीया | तिर्यक्–तिर्यग्–तिर्यङ् | तिरश्ची–तिर्यञ्ची | तिर्यञ्चि |
| तृतीया | तिरश्चा–तिर्यञ्चा | तिर्यग्भ्याम्–तिर्यङ्भ्याम् | तिर्यग्भिः–तिर्यङ्भिः |
| चतुर्थी | तिरश्चे–तिर्यञ्चे | तिर्यग्भ्याम्–तिर्यङ्भ्याम् | तिर्यग्भ्यः–तिर्यङ्भ्यः |
| पञ्चमी | तिरश्चः–तिर्यञ्चः | तिर्यग्भ्याम्–तिर्यङ्भ्याम् | तिर्यग्भ्यः–तिर्यङ्भ्यः |
| षष्ठी | तिरश्चः–तिर्यञ्चः | तिरश्चोः–तिर्यञ्चोः | तिरश्चाम्–तिर्यञ्चाम् |
| सप्तमी | तिरश्चि–तिर्यञ्चि | तिरश्चोः–तिर्यञ्चोः | तिर्यक्षु–तिर्यङ्क्षु–तिर्यङ्क्षु |
| सम्बोधनम् | हे तिर्यक्–हे तिर्यग्! | हे तिरश्ची–हे तिर्यञ्ची | हे तिरश्ची, हे तिर्यञ्ची, हे तिर्यञ्चि |

यकृत् शब्दस्य विभक्तिषु विशेषकार्यस्य रूपलेखनप्रकारः –

( १ ) **यकृत्-यकृद्** – यकृत् शब्दात् प्रातिपदिकात् सु प्रत्यये यकृत्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''झलां जशोऽन्ते'' इति तकारस्य जश्त्वे दकारे यकृद् इति जाते ''वाऽवसाने'' इति विकल्पेन चर्त्वे यकृत् इति रूपं सिद्ध्यति। चर्त्वाभावे यकृद् इति रूपं भवति।

( २ ) **यकृती** – यकृत् शब्दात् प्रातिपदिकात् औ विभक्तौ यकृत्+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे यकृती इति रूपं भवति।

( ३ ) **यकृन्ति** – यकृत् शब्दात् प्रातिपदिकात् जस् विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् अनुबन्धलोपे यकृत्+इ इति जाते ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे यकृन्ति इति रूपं सिद्ध्यति।

( ४ ) **यकानि** – यकृत् शब्दात् प्रातिपदिकात् शस् विभक्तौ ''जश्शसोः शिः'' इति शस् स्थाने शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् ''पद्दन्नोमास्हन्निशसन्.'' इति सूत्रेण यकृत् स्थाने यकन् आदेशे यकन्+इ इति जाते सर्वनामस्थाने चाऽसम्बुद्धौ इति उपधादीर्घे यकानि इति रूपं सिद्ध्यति।

( ५ ) **यक्ना-यकृता** – यकृत् शब्दात् प्रातिपदिकात् टा विभक्तौ ''चुटू'' इति टस्येत्सञ्ज्ञायाम् ''यचि भम्'' इति भसञ्ज्ञायाम् ''पद्दन्नोमास्हन्निशसन्.'' इति सूत्रेण विकल्पेन यकृत् स्थाने यकनादेशे यकन्+आ इति जाते ''अल्लोपोऽनः'' इति अकारस्य लोपे यक्ना इति रूपं सिद्ध्यति। यकनादेशविकल्पपक्षे यकृता इति रूपं भवति।

( १ ) **शकृत्-शकृद्** – शकृत् शब्दात् प्रातिपदिकात् सु प्रत्यये शकृत्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि पदसंज्ञायाम् ''झलां जशोऽन्ते'' इति तस्य जश्त्वे दकारे ''वाऽवसाने'' इति विकल्पेन चर्त्वे शकृत् इति रूपं सिद्ध्यति। चर्त्वाभावे शकृद् इति रूपम्।

( २ ) **शकृती** – शकृत् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदशे अनुबन्धलोपे शकृती इति रूपं सिद्ध्यति।

( ३ ) **शकृन्ति** – शकृत् शब्दात् प्रातिपदिकात् जस् विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसंज्ञायाम् ''नपुंसकस्य झलचः'' इति नुमि ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे ''अनुस्वारस्य ययि परसवर्णः'' इति परसवर्णे शकृन्ति इति रूपं भवति।

( ४ ) **शकानि** – शकृत् शब्दात् प्रातिपदिकात् शस् विभक्तौ अनुबन्धलोपे शकृत्+अस् इति जाते ''जश्शसोः शि'' इति शसः शि आदेशे अनुबन्धलोपे शकृत्+इ इति जाते ''यचि भम्'' इति भसंज्ञायाम् ''पद्दन्नोमास्हन्निशसन्.'' इति विकल्पेन शकन् आदेशे शकन्+इ इति जाते ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे शकानि इति रूपं भवति।

शकन् विकल्पपक्षे शकृन्ति इति रूपं भवति।

**(५) शक्ना-शकृता** - शकृत् शब्दात् प्रातिपदिकात् टा विभक्तौ अनुबन्धलोपे भसञ्ज्ञायाम् "पद्दन्नोमास्." इति विकल्पेन शकृत् स्थाने शकन् आदेशे "अल्लोपोऽन:" इति अनोऽकारस्य लोपे शक्ना इति रूपं भवति। शकन्विकल्पपक्षे शकृता इति रूपं भवति।

**(६) ददत्-ददद्**- शतृप्रत्ययान्त ददत् शब्दात् प्रातिपदिकात् सु विभक्तौ "स्वमोर्नपुंसकात्" इति सुलुकि, पदसञ्ज्ञायाम्, "झलां जशोऽन्ते" इति तस्य जश्त्वे दकारे "वाऽवसाने" इति विकल्पेन चर्त्वे ददत् इति रूपं भवति। चर्त्वाभावे ददद् इति रूपं भवति।

**(७) ददती** - ददत् शब्दात् प्रातिपदिकात् औ विभक्तौ "नपुंसकाच्च" इति औ स्थाने शी आदेशे अनुबन्धलोपे ददती इति रूपं सिद्ध्यति।

## ४४४ वा नपुंसकस्य ७/१/७९

**अभ्यस्तात् परो यः शता, तदन्तस्य क्लीबस्य नुम् वा स्यात् सर्वनामस्थाने परे।**

**ददन्ति, ददति। तुदत्।**

**सूत्रप्रकारः - विधिसूत्रम्।**

**पदच्छेदः -** वा, नपुंसकस्य।

**अनुवृत्तिः -** "नाभ्यस्ताच्छतुः" इति सूत्रात् अभ्यस्तात्, शतुः इत्यनुवर्तेते। "इदितो नुम्धातोः" इति नुमनुवर्तते "उगिदचां सर्वनामस्थानेऽधातोः" इति सर्वनामस्थाने इत्यनुवर्तते। 'अङ्गस्य' इत्यस्याधिकारः।

**सूत्रार्थः -** अभ्यासात् परो यो शतृप्रत्ययः तदन्तस्य क्लीबस्य नुम् वा स्यात् सर्वनामस्थाने परे।

**व्याख्या -** "नपुंसकस्य" इति पदम् "अङ्गस्य" इत्यस्य विशेषणम्। अभ्यस्तात् इति पञ्चम्यन्तं पदम्। तस्मादित्युत्तरस्य इति परिभाषा सूत्रेण अभ्यस्तात् परस्याव्यवहितोत्तरस्य कार्यं स्यात्। "उभे अभ्यस्तम्" इति अभ्यस्तसंज्ञा भवति। 'शतुः' इति षष्ठ्यन्तं पदम्। अतः अर्थो भवति शतृ प्रत्ययः यस्याङ्गस्य इति। नुमः मित्वात् "मिदचोऽन्त्यात्परः" इत्यस्य प्रवृत्तिर्भवति। अभ्यस्तसञ्ज्ञकत्वात् "नाभ्यस्ताच्छतुः" इति नुम्प्रिषेधः भवति। अतः सूत्रमिदं तस्यापवादस्वरूपम्।

**रूपलेखनप्रकारः -**

**ददन्ति-ददति**- ददत् शब्दात् प्रातिपदिकात् जस् विभक्तौ "जश्शसोः शि" इति जस् स्थाने शि आदेशे अनुबन्धलोपे "शि सर्वनामस्थानम्" इति सर्वनामस्थानसञ्ज्ञायाम् ददत्+इ इति जाते "नपुंसकस्य झलचः" इति नुमागमे प्राप्ते "उभे अभ्यस्तम्" इति अभ्यस्तसंज्ञायाम् "नाभ्यस्ताच्छतुः" इति प्राप्तस्य नुमः निषेधे प्राप्ते तं प्रबाध्य "वा नपुंसकस्य" इति विकल्पेन नुमागमे अनुबन्धलोपे "नश्चापदान्तस्य झलि" इति नस्यानुस्वारे "अनुस्वारस्य ययि परसवर्णः इति परसवर्णे ददन्ति इति रूपं सिद्ध्यति। नुम्विकल्पपक्षे ददति इति रूपं भवति। तुद् व्यथने धातोः "वर्तमाने लट्" इति लटि "लटः शतृशानचौ." इति लटः शतृ आदेशे अनुबन्धलोपे तुद् अत् इति जाते "तिङ् शित् सार्वधातुकम्" इति सार्वधातुकसञ्ज्ञायाम् "कर्तरि शप्" इति शपागमे प्राप्ते तं प्रबाध्य "तुदादिभ्यः शः" इति शप्रत्ययागमे अनुबन्धलोपे तुद अत् इति जाते "अतो गुणे" इति पररूपे तुदत् इत्यस्य "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञा भवति।

**तुदत् शब्दस्य रूपलेखनप्रकारः -**

**तुदत्-तुदद्** - तुदत् शब्दात् प्रातिपदिकात् सु प्रत्यये "स्वमोर्नपुंसकात्" इति सुलुकि पदत्वात् "झलां जशोऽन्ते" इति तस्य जश्त्वे दत्वे "वाऽवसाने" इति विकल्पेन चर्त्वे तुदत् इति रूपं भवति। चर्त्वाभावे तुदद् इति रूपं भवति।

## ४४५ आच्छीनद्योर्नुम् ७/१/८०

**अवर्णान्तादङ्गात् परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम् वा स्याच्छीनद्योः परतः।**

**तुदन्ती, तुदती। तुदन्ति। भात्। भान्ती, भाती। भान्ति। पचत्।**

**सूत्रप्रकारः-विधिसूत्रम्।**

**पदच्छेदः -** आत्, शीनद्योः, नुम् इति।

**अनुवृत्तिः -** ''अङ्गस्य'' इत्यस्याधिकारः। ''वा नपुंसकस्य'' इति सूत्रात् वा इत्यनुवर्तते। ''नाभ्यस्ताच्छतुः'' इति 'शतुः' इत्यनुवर्तते।

**सूत्रार्थः -** अवर्णान्तात् अङ्गात् परो यः शतुरवयवः, तदन्तस्याङ्गस्य नुम् वा स्यात् शीनद्योः परतः।

**व्याख्या -** 'अङ्गस्य' इति पदं पञ्चम्यां विपरिणमते। ''आत्'' इति पञ्चम्यन्तं पदम्। आत् इति अङ्गात् इत्यस्य विशेषणपदम्। विशेषणात् ''येन विधिस्तदन्तस्य'' इति तदन्तविधिः अवर्णान्तात् अङ्गात् इति भवति। भ्वादि-दिवादि-तुदादि-चुरादिगणे शतुरकारे परे शबादिविकरणस्याकारस्य पररूपे कृते तकारमात्रम् अवशिष्यते। अतः शतुरवयवतकारः तदन्तात् अङ्गसञ्ज्ञकात् नुमागमः विकल्पेन भवति।

**रूपलेखनप्रकारः -**

**तुदन्ती-तुदती -** तुदत् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इति औ विभक्तौ तुदत्+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे तुदत्+ई इति जाते ''यस्मात्प्रत्ययविधिः तदादिप्रत्ययेऽङ्गम्'' इति अङ्गसञ्ज्ञायाम् ''आच्छीनद्योर्नुम्'' इति सूत्रेण विकल्पेन नुमागमे अनुबन्धलोपे तुदन्ती इति रूपं सिद्ध्यति। नुमभावे तुदत्+ई-तुदती इति रूपं भवति।

**तुदन्ति -** तुदत् शब्दात् प्रातिपदिकात् जस् विभक्तौ ''जश्शसोः शिः'' इति सूत्रेण जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सूत्रेण सर्वनामस्थानसञ्ज्ञायाम् अनुबन्धलोपे तुदत्+इ इति जाते ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमे अनुबन्धलोपे तुदन्ति इति रूपं भवति। (अत्र ''नपुंसकस्य झलचः'' इति सूत्रेणापि नुमागमः भवितुं शक्यते अनुस्वारे पर सवर्णे च कृते रूपम्)।

**तुदत् शब्दस्य रूपाणि**

| **विभक्तिः** | **एवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | तुदत्-तुदद् | तुदन्ती-तुदती | तुदन्ति |
| द्वितीया | तुदत्-तुदद् | तुदन्ती-तुदती | तुदन्ति |
| तृतीया | तुदता | तुदद्भ्याम् | तुदद्भिः |
| चतुर्थी | तुदते | तुदद्भ्याम् | तुदद्भ्यः |
| पञ्चमी | तुदतः | तुदद्भ्याम् | तुदद्भ्यः |
| षष्ठी | तुदतः | तुदतोः | तुदताम् |
| सप्तमी | तुदति | तुदतोः | तुदत्सु |
| सम्बोधनम् | हे तुदत्-हे तुदद्! | हे तुदन्ती-हे तुदती! | हे तुदन्ति |

जुहोत्यादिगणे पठित 'भा दीप्तौ' धातोः लटि शतृप्रत्यये भात् इति तकारान्तरूपलेखनप्रकारः -

**(१) भात्-भाद् -** भात् शब्दात् ''कृत्तद्धितसमासश्च'' इति प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्.'' इति सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सु लुकि पदसंज्ञायाम् 'झलां जशोऽन्ते' इति तस्य जश्त्वे दकारे ''वाऽवसाने'' इति विकल्पेन चर्त्वे भात् इति रूपं सिद्ध्यति। चर्त्वाभावे भाद् इति रूपं भवति।

**(२) भान्ती-भाती -** भात् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे भात्+ई इति जाते ''आच्छीनद्योर्नुम्'' इति विकल्पेन नुमागमे अनुबन्धलोपे भान्ती इति रूपं सिद्ध्यति। नुमभावपक्षे भाती इति रूपं भवति।

**(३) भान्ति-** भात् शब्दात् प्रातिपदिकात् जस् विभक्तौ ''जश्शसोः शिः'' इति जसः शि-आदेशे ''शि सर्वनामस्थानम्''

इति सर्वनामस्थान संज्ञायाम् अनुबन्धलोपे "नपुंसकस्य झलचः" इति नुमागमे अनुबन्धलोपे भान्ति इति रूपं सिद्ध्यति।

"डुपचष् पाके" इत्यस्मात् पच् धातोः शतृप्रत्यये पचत् इति शतृप्रत्ययान्त शब्दस्य रूपलेखनप्रकारः –

**पचत्-पचद्**– पचत् शब्दात् "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञायाम् "स्वौजसमौट्." इति सु प्रत्यये पचत्+सु इति जाते "स्वमोर्नपुंसकात्" इति सुलुकि "झलां जशोऽन्ते" इति तस्य जश्त्वे दकारे "वाऽवसाने" इति विकल्पेन चर्त्वे पचत् इति रूपं सिद्ध्यति। चर्त्वाभावे पचद् इति रूपं भवति।

## ४४६ शप्श्यनोर्नित्यम् ७/१/८१

**शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः।**

**पचन्ती। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति। इति तान्ताः।**

**सूत्रप्रकारः– विधिसूत्रमिदम्।**

**पदच्छेदः** – शप्श्यनोः, नित्यम्।

**अनुवृत्तिः** – 'अङ्गस्य' इत्यस्याधिकारः। "आच्छीनद्योर्नुम्" इति सूत्रमनुवर्तते। "नाभ्यस्ताच्छतुः" इति सूत्रात् 'शतुः' इत्यनुवर्तते।

**सूत्रार्थः** – शप्श्यनोरात् परो यः शतुरवयवस्तदन्तस्य नित्यं नुमागमः स्यात् शीनद्योः परतः।

**व्याख्या** – 'शप्श्यनोः' इति षष्ठ्यन्तं पदम्। 'कर्तरि शप्' इत्यतः शप्, "दिवादिभ्यः श्यन्" इति श्यन् प्रत्ययश्च भवति। शपः अनुबन्धलोपे अकारः अवशिष्यते, श्यन् इत्यस्य यकारः अवशिष्यते। अनुवृत्तः आत् ग्रहणात् शपः अकारस्य श्यन् इत्यस्य यकारस्थाकारस्य ग्रहणं भवति।

**रूपलेखनप्रकारः** –

**पचन्ती** – पचत् शब्दात् प्रातिपदिकात् औ विभक्तौ "नपुंसकाच्च" इति औ स्थाने शी आदेशे अनुबन्धलोपे पचत्+ई इति जाते "अन्तादिवच्च" इति सहायतया "यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्" इति अङ्गसञ्ज्ञायाम् "शप्श्यनोर्नित्यम्" इति नुमागमे अनुबन्धलोपे पचन्त्+ई इति जाते "नश्चापदान्तस्य झलि" इति नस्यानुस्वारे "अनुस्वारस्य ययि पर सवर्णः" इति परसवर्णे पचन्ती इति रूपं सिद्ध्यति।

**पचन्ति** – पचत् शब्दात् प्रातिपदिकात् जस् विभक्तौ "जश्शसोः शिः" इति जस् स्थाने शि आदेशे "शि सर्वनामस्थानम्" इति सर्वनामस्थान सञ्ज्ञायाम् "नपुंसकस्य झलचः" इति नुमागमे अनुबन्धलोपे पचन्ति इति रूपं सिद्ध्यति।

**ध्यातव्यः** – पचत् शब्दवत् एव गच्छत्, चलत्, भवत्, नयत्, नमत्, वदत् इत्यादिभ्वादिगणीय शब्दाः, चोरयत् इति चुरादिगणीय शब्दश्च सिद्ध्यन्ति।

दिवु क्रीडा विजिगीषाव्यवहारद्युतिस्तुति मोदमदस्वप्नकान्तिगतिषु इति धातोः लटि, लटः शतृ–आदेशे "दिवादिभ्यः श्यन्" इति श्यनि दिव्+श्यन्+शतृ इति जाते अनुबन्धलोपे "हलि च" इति उपधादीर्घे "अतो गुणे" इति पररूपे दीव्यत् शब्दः निष्पद्यते।

**दीव्यत् शब्दस्य रूपलेखनप्रकारः** –

**दीव्यत्-दीव्यद्**– दीव्यत् शब्दात् प्रातिपदिकात् सु प्रत्यये दीव्यत्+सु इति जाते "स्वमोर्नपुंसकात्" इति सुलुकि, पदसञ्ज्ञायाम्, "झलां जशोऽन्ते" इति जश्त्वे "वाऽवसाने" इति वैकल्पिके चर्त्वे दीव्यत् इति रूपं भवति। चर्त्वाभावे दीव्यद् इति रूपं भवति।

**दीव्यन्ती** – दीव्यत् शब्दात् प्रातिपदिकात् औ विभक्तौ "नपुंसकाच्च" इति औ स्थाने शी आदेशे अनुबन्धलोपे दीव्यत् इति जाते "शप्श्यनोर्नित्यम्" इति नुमागमे अनुबन्धलोपे अनुस्वारे परसवर्णे च कृते दीव्यन्ती इति रूपं सिद्ध्यति।

एवमेव सीव्यत्, अस्यत्, कुप्यत्, शुध्यत् इत्यादयः शब्दाः सिद्ध्यन्ति।

**इति तान्ताः निरूपिताः।**

स्वप्, स्वब्। स्वपी। नित्यात्परादपि नुमः प्राक् '**अमृन्-**' (**सू. २७७**) इति दीर्घः। प्रतिपदोक्तत्वाद् नुम् - स्वाम्पि। '**निरवकाशत्वं प्रतिपदोक्तत्वम्**' इति पक्षे तु प्रकृते तद्विरहान्नुमेव। स्वम्पि। स्वपा। '**अपो भि**' (**सू. ४४२**) स्वद्भ्याम्। स्वद्भिः। **इति पान्ताः।** '**अर्तिपृवपि-**' (**उ.सू. २७४**) इत्यादिना धनेरुस्। षत्वस्यासिद्धत्वाद् रुत्वम्। धनुः। धनुषी। '**सान्त-**' (**सू. ३१७**) इति दीर्घः। '**नुम्विसर्जनीय-**' (**सू. ४३४**) इति षत्वम्। धनूंषि। धनुषा। धनुर्भ्याम्। एवं चक्षुर्हविरादयः। पिपठिषतेः क्विप्। '**र्वो-**' (**सू. ४३३**) इति दीर्घः। पिपठीः। पिपठिषी। अल्लोपस्य स्थानिवत्वाःझलन्तलक्षणो नुम् न। स्वविधौ स्थानिवत्वाभावादजन्तलक्षणोऽपि नुम् न। पिपठिषि। पिपठीर्भ्यामित्यादि पुंवत्। **इति षान्ताः।** पयः, पयसी, पयांसि। पयसा, पयोभ्याम् इत्यादि। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यम्, उत्वमत्वे-अमू। अमूनि। शेषं पुंवत्। **इति सान्ताः।**

**रूपलेखनप्रकारः -**

स्वप्-स्वब्-स्वप् शब्दात् ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्.'' इति सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि पदसञ्ज्ञायाम् ''झलां जशोऽन्ते'' इति पकारस्य जश्त्वे बकारे ''वाऽवसाने'' इति विकल्पेन चर्त्वे स्वप् इति रूपं सिद्ध्यति। चर्त्वाभावे स्वब् इति रूपं सिद्ध्यति।

स्वपी-स्वप् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे स्वपी इति रूपं सिद्धम्।

स्वाम्पि - स्वप् शब्दात् प्रातिपदिकात् जस् विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'' इति परिभाषाबलेन नित्यात्परादपि नुमः प्राक् ''असृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्'' इति उपधादीर्घे स्वाप्+इ इति जाते ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे स्वान्प्+इ इति जाते ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे ''अनुस्वारस्य ययि परसवर्णः'' इति परसवर्णे स्वाम्पि इति रूपं सिद्धम्।

स्वम्पि - स्वप्+शस्, शस् स्थाने शि आदेशे, सर्वनामस्थानसञ्ज्ञायाम् ''निरवकाशत्वं प्रतिपदोक्तम्'' इति पक्षे प्रकृते नुमि एव कृते अनुस्वारे परसवर्णे च कृते स्वम्पि इति रूपं सिद्ध्यति।

स्वपा-स्वप् शब्दात् प्रातिपदिकात् टा विभक्तौ अनुबन्धलोपे स्वप इति रूपं भवति।

स्वद्भ्याम् - स्वप् शब्दात् प्रातिपदिकात् भ्याम् विभक्तौ स्वप्+भ्याम् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''अपोभिः'' इति पस्य तकारे ''झलां जशोऽन्ते'' इति जश्त्वे स्वद्भ्याम् इति रूपं भवति।

स्वद्भिः - स्वप् शब्दात् भिस् प्रत्यये पदसञ्ज्ञायाम् ''अपोभिः'' इति पस्यदकारे स्वद्भिः इति सिद्ध्यति।

इति पकारान्ताः निरूपिताः।

धन धान्ये (जुहो. प.) अथवा धन शब्दे धातोः ''अतिपृवपियजितनिधनितपिभ्यो नित्'' इति औणादिक सूत्रेण उस् प्रत्यये ''आदेश प्रत्यययोः'' इति उस् प्रत्ययावयवसस्य षत्वे 'धनुष्' इति शब्दः निष्पद्यते। धनुष् शब्दस्य रूपलेखनप्रकारः -

**धनुः** - धनुष् शब्दात् प्रातिपदिकात् सु प्रत्यये अनुबन्धलोपे धनुष्+स् इति जाते ''हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्'' इति सुलोपे प्राप्ते ''स्वमोर्नपुंसकात्'' इति सुलुकि धनुष् इति जाते ''आदेशप्रत्यययोः'' इति षत्वस्यासिद्धत्वात् ''ससजुषो रुः'' इति सस्य रुत्वे अनुबन्धलोपे रेफस्य विसर्गे च धनुः इति रूपं भवति।

**धनुषी** - धनुष् शब्दात् प्रातिपदिकात् ''औ'' विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे धनुषी इति रूपं सिद्धयति।

**धनूंषि** - धनुष् शब्दात् प्रातिपदिकात् जस् प्रत्यये ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थान संज्ञायाम् अनुबन्धलोपे धनुष्+इ इति जाते ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे

धनुन्ष्+इ इति जाते ''सान्तमहतः संयोगस्य'' इति उपधादीर्घे धनून्ष्+इ इति जाते ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति षस्य सत्वे ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे नुम्विसर्जनीयशर्व्यवायेऽपि (३५२) इति सस्य षत्वे धनूंषि इति रूपं सिद्धम्।

**धनुषा** – धनुष् शब्दात् प्रातिपदिकात् टा विभक्तौ अनुबन्धलोपे धनुषा इति रूपं सिद्ध्यति।

**धनुर्भ्याम्** – धनुष् शब्दात् प्रातिपदिकात् भ्यामि प्रत्यये धनुष्+भ्याम् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् षत्वस्य असिद्धत्वात् ''ससजुषो रुः'' इति सस्य रुत्वे अनुबन्धलोपे धनुर्भ्याम् इति रूपं सिद्ध्यति।

**धनुष् शब्दस्य रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धनुः | धनुषी | धनूंषि |
| द्वितीया | धनुः | धनुषी | धनूंषि |
| तृतीया | धनुषा | धनुर्भ्याम् | धनुर्भिः |
| चतुर्थी | धनुषे | धनुर्भ्याम् | धनुर्भ्यः |
| पञ्चमी | धनुषः | धनुर्भ्याम् | धनुर्भ्यः |
| षष्ठी | धनुषः | धनुषोः | धनुषाम् |
| सप्तमी | धनुषि | धनुषोः | धनुःषु–धनुष्षु |
| सम्बोधनम् | हे धनुः! | हे धनुषी! | हे धनूंषि! |

**धनुषु, धनुष्षु** – धनुष् शब्दात् प्रातिपदिकात् सुप् प्रत्यये अनुबन्धलोपे सस्य ''आदेशप्रत्यययोः'' इति षत्वे धनुष्+षु इति जाते ''षत्वस्यासिद्धत्वात्'' वाशरि इति विकल्पेन सस्य विसर्गे धनुःषु इति रूपं सिद्ध्यति। विसर्गविकल्पपक्षे ''ष्टुना ष्टुः'' इति सस्य ष्टुत्वे धनुष्षु इति रूपं भवति।

**अन्योदाहरणानि –**

एवंप्रकारेणैव – चक्षुषु, हविष्, वपुष्, जनुष्, यजुष्, ज्योतिष्, आयुष्, अरुष्, अर्चिष्, सर्पिष्, तनुष् इत्यादयः शब्दाः निष्पद्यन्ते।

'पठितुमिच्छति' इत्यर्थे सन्नन्ताद् पठ् धातोः क्विपि, क्विपः सर्वापहारिलोपे ''अतो लोपः'' इत्यकारस्य लोपे पिपठिष् इति शब्दः निष्पद्यते।

**पिपठीः**– पिपठिष् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इति सु प्रत्यये पिपठिष्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि पिपठिष् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''आदेशप्रत्यययोः'' इति षत्वस्यासिद्धत्वात् ''ससजुषो रुः'' इति रुत्वे अनुबन्धलोपे पिपठिर् इति जाते ''र्वोरुपधाया दीर्घ इकः'' इति उपधादीर्घे पिपठीर् इति जाते खरवसानयोर्विसर्जनीयः इति रेफस्य विसर्गे पिपठीः इति रूपं सिद्धम्।

पिपठिषी–पिपठिष् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे पिपठिषी इति रूपं सिद्ध्यति।

पिपठिषि – पिपठिष् शब्दात् प्रातिपदिकात् जस् प्रत्यये ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थान सञ्ज्ञायाम् अनुबन्धलोपे पिपठिष्+इ इति जाते ''अतो लोपः'' इति अल्लोपस्य स्थानिवद्भावात् ''नपुंसकस्य झलचः'' इति झलन्तलक्षणो नुम् न भवति। स्वविधौ स्थानिवद्भावाभावात् ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमोऽपि न भवति। पिपठिषि इति रूपं सिद्ध्यति।

पिपठीर्भ्याम् – पिपठिष् शब्दात् प्रातिपदिकात् भ्याम्–विभक्तौ पिपठिष्+भ्याम् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''आदेशप्रत्यययोः'' इति षत्वस्यासिद्धत्वात् ''ससजुषो रुः'' इति

सस्य रुत्वे अनुबन्धलोपे पिपठिर्+भ्याम् इति जाते र्वोरुपधाया दीर्घ इकः - ३३३ इति उपधादीर्घेपिपठीर्भ्याम् इति रूपं सिद्धम्।

## पिपठिष् शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिपठीः | पिपठिषी | पिपठिषि |
| द्वितीया | पिपठीः | पिपठिषी | पिपठिषि |
| तृतीया | पिपठिषा | पिपठीर्भ्याम् | पिपठीर्भिः |
| चतुर्थी | पिपठिषे | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| पञ्चमी | पिपठिषः | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| षष्ठी | पिपठिषः | पिपठिषोः | पिपठिषाम् |
| सप्तमी | पिपठिषि | पिपठिषोः | पिपठीःषु पिपठीष्षु |
| सम्बोधनम् | हे पिपठीः! | हे पिपठिषी! | हे पिपठिषि! |

इति षकारान्ताः शब्दाः।

**(१) पयः** - पयस् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इति सु प्रत्यये ''स्वमोर्नपुंसकात्'' इति सुलुकि ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''ससजुषो रुः'' इति सस्य रुत्वे अनुबन्धलोपे पयद् इति जाते ''खरवासनयोर्विसर्जनीयः'' इति रेफस्य विसर्गे पयः इति रूपं सिद्धम्।

**(२) पयसी** - पयस् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे पयसी इति रूपं सिद्धम्।

**(३) पयांसि** - पयस् शब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इति जस् विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् अनुबन्धलोपे पयस्+इ इति जाते ''नपुंसकस्य झलचः'' इति नुमागमे अनुबन्धलोपे पयन्स्+इ इति जाते ''सान्तमहतः संयोगस्य'' इति उपधादीर्घे ''नश्चापदान्तस्य झलि'' इति मस्य अनुस्वारे पयांसि इति रूपं सिद्धम्।

**(४) पयोभ्याम्** - पयस् शब्दात् प्रातिपदिकात् भ्यामि विभक्तौ पयस्+भ्याम् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''ससजुषो रुः'' इति सस्य रुत्वे अनुबन्धलोपे पयर्+भ्याम् इति जाते ''हशि च'' इति रेफस्य उत्वे पय उ+भ्याम् इति जाते ''आद्गुणः'' इति अकारोकारयोः गुणे पयोभ्याम् इति रूपं सिद्धम्।

## पयस् शब्दस्य रूपाणि

| विभक्तिः | एवकचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पयः | पयसी | पयांसि |
| द्वितीया | पयः | पयसी | पयांसि |
| तृतीया | पयसा | पयोभ्याम् | पयोभिः |
| चतुर्थी | पयसे | पयोभ्याम् | पयोभ्यः |
| पञ्चमी | पयसः | पयोभ्याम् | पयोभ्यः |
| षष्ठी | पयसः | पयसोः | पयसाम् |
| सप्तमी | पयसि | पयसोः | पयःसु, पयस्सु |
| सम्बोधनम् | हे पयः! | हे पयसी! | हे पयांसि! |

**अन्योदाहरणानि –**

एवं प्रकारेण–चेतस्, तपस्, अम्भस्, अर्शस्, उरस्, तमस्, रहस्, रेतस्, सरस्, स्रोतस, वयस्, तेजस्, यशस्, मनस्, रजस्, वक्षस्, एते सकारान्ताः शब्दाः निष्पद्यन्ते।

सुपुंस् – शु–शोभनाः पुमांसो यस्य गृहस्य इति बहुव्रीहिसमासः, सुपुंस् शब्दस्य रूपलेखनप्रकारः –

**( १ ) सुपुम्** – सुपुंस् शब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिक संज्ञायाम् ''स्वौजसमौट्.'' इति सु प्रत्यये सुपुंस्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि सुपुंस् इति जाते ''संयोगान्तस्य लोपः'' इति सकारस्य लोपे ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति परिभाषया अनुस्वारस्यमकारे सुपुम् इति रूपं सिद्ध्यति।

**( २ ) सुपुंसी** – सुपुंस् शब्दात् प्रातिपदिकात् औ विभक्तौ सुपुंस्+औ इति जाते ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे सुपुंसी इति रूपं सिद्धम्।

**( ३ ) सुपुमांसि** – सुपुंस् इत्यस्मात् प्रातिपदिकात् जस्विभक्तौ ''जश्शसोः शिः'' इति जस् स्थाने शि आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् सुपुंस्+इ इति जाते ''पुंसोऽसुङ्'' इति सूत्रेण असुङ् अन्त्यादेशे सुपुमस्+इ इति जाते ''नपुंसकस्य झलचः'' इति सूत्रेण नुमागमे अनुबन्धलोपे ''सान्तमहतः संयोगस्य'' इति उपधादीर्घे ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे सुपुमांसि इति रूपं सिद्ध्यति।

द्वितीया विभक्तौ एवमेव रूपाणि भवन्ति। शेषं पुंवत्।

**अदस् शब्दस्य रूपलेखनप्रकारः –**

**( १ ) अदः** – अदस् शब्दात् ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायाम् ''स्वौजसमौट्.'' इति सुप्रत्यये अदस्+सु इति जाते ''स्वमोर्नपुंसकात्'' इति सुलुकि अदस् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायाम् ''ससजुषो रुः'' इति सस्य रुत्वे अनुबन्धलोपे ''खरवसानयोर्विसर्जनीयः'' इति रेफस्य विसर्गे अदः इति रूपं सिद्ध्यति।

**( २ ) अमू** – अदस् शब्दात् प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति औ स्थाने शी आदेशे अनुबन्धलोपे अदस्+ई इति जाते ''त्यदादीनामः'' इति सस्य अत्वे अद अ+ई इति जाते ''अतो गुणे'' इति पररूपे अद+ई इति जाते ''आद्गुणः'' इति अकार–ईकारयोः गुणे अदे इति जाते 'अदसोऽसेर्दादु दो मः' इति मूत्वे कृते अमू इति रूपं सिद्ध्यति।

**( ३ ) अमूनि** – अदस् शब्दात् प्रातिपदिकात् प्रथमाबहुवचने जस् विभक्तौ अदस्+जस् इति जाते ''जश्शसोः शिः'' इति जसः शि आदेशे ''शि सर्वनामस्थानम्'' इति सर्वनामस्थानसञ्ज्ञायाम् अदस्+इ इति जाते ''त्यदादीनामः'' इति सस्य अत्वे ''अतो गुणे'' इति पररूपे अद+इ इति जाते ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमे अनुबन्धलोपे अदन्+इ इति जाते ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे अदानि इति जाते अदसोऽसेर्दादु दो मः इति मूत्वे कृते अमूनि इति रूपं भवति।

शेषं पुंवत्।

**अदस् शब्दस्य नपुंसकलिङ्गे रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अदः | अमू | अमूनि |
| द्वितीया | अदः | अमू | अमूनि |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |

| | | | |
|---|---|---|---|
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

त्यदादीनां सम्बोधनं नास्ति। इति सकारान्ताः।

**इति वैयाकरणसिद्धान्तकौमुद्यां हलन्तनपुंसकलिङ्गप्रकरणं समाप्तम्।**

## हलन्तनपुंसकलिङ्गप्रकरणे-अभ्यासार्थप्रश्नाः

### (क) वस्तुनिष्ठ प्रश्नाः -

(१) अहोभ्याम् इति प्रयोगे रुत्वं केन सूत्रेण भवति?

(क) ससजुषो रुः (ख) अहन् (ग) रोऽसुपि (घ) हशि च

(२) चतुर् शब्दे नपुंसके प्रथमाबहुवचने किं रूपम्?

(क) चत्वारः (ख) चतस्रः (ग) चत्वारि (घ) चतुर्णाम्

### (ख) अतिलघूत्तरात्मकप्रश्नाः -

(१) स्वनड्वांहि इत्यत्र आमागमः केन सूत्रेण भवति?

(२) इदम् शब्दस्यान्वादेशे द्वितीयैकवचने किं रूपं भवति?

(३) ऊर्न्जि इति प्रयोगः कस्यां विभक्तौ रूपं भवति?

### (ग) लघूत्तरात्मकप्रश्नाः -

(१) ''शप्श्यनोर्नित्यम्'' इति सूत्रं व्याख्यायत।

(२) ददत् शब्दस्य रूपाणि लिखत।

(३) अदस् शब्दस्य नपुंसके रूपाणि लिखत।

(४) वार्षु इत्यत्र खरि परे रेफस्य विसर्गः कथं न भवति?

### (घ) निबन्धात्मकप्रश्नाः -

(१) गो अञ्च् शब्दस्य १०९ (नवाधिकशतम्) रूपाणां विवेचनं कुरुत।

(२) निम्नलिखितप्रयोगाः सूत्रनिर्देशपुरःसरं साधनीयाः।

ऊर्न्जि, चत्वारि, अह्नी, धनूंषि, पयोभिः, धनुष्षु, हे दण्डि, स्वनडुत्, अमूनि।

# अथ अव्ययप्रकरणम्

## स्वरादिनिपातमव्ययम् 1/1/3711

**स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि।**

**सूत्रप्रकारः** – संज्ञासूत्रमिदम्।

**पदच्छेदः** – स्वरादिनिपातम्, अव्ययम्।

**सूत्रार्थ** – स्वरादिगणपठितानि, निपातसंज्ञकपदानि च अव्ययसंज्ञकानि स्युः। स्वरादिनिपातम्, अव्ययम् इति पदच्छेदः। स्वरादिनिपातम् इति पदं संज्ञी, अव्ययम् इति संज्ञापदम्। स्वर् आदिर्येषां ते स्वरादयः। स्वरादयश्च निपाताश्च इत्यनयोः समाहारद्वन्द्वः। चादीनां पृथक् पाठस्तु स्वरभेदार्थः 'निपाता आद्युदात्ताः' इति नियमात्। अद्रव्यवाचिनां चादिगणपठितानामेव अव्ययसंज्ञा भवति। स्वरादीनां तु द्रव्यवाचिनाम्, अद्रव्यवाचिनाञ्च अव्ययसंज्ञा भवति।

**स्वरादिगणपठितशब्दानामर्थाः –**

**स्वर्** – स्वर्गः, पारलौकिकसुखविशेषः, परलोकार्थवाचकः।

**अन्तर्** – मध्ये। प्रातर् – प्रत्यूषे।

**पुनर्** – पुनः।

**सनुतर्** – अन्तर्धौ, ह्नुते, विलीयते।

**उच्चैस्** – उन्नतः, उपरि।

**नीचैस्** – अल्पः, अधोगतिः।

**शनैस्** – क्रियामान्द्ये, ऋधक् – सत्यम्, वियोगः, शीघ्रता, सामीप्यम्, लाघवम्।

**ऋते** – वर्जनम्, निषेधः, विना।

युगपत्– एकसमये। आरात् – दूरे समीपे च। पृथक् –भिन्नः। ह्यस् – अतीते दिवसे, श्वस्–अनागते दिवसे। दिवा–दिवसे। रात्रौ–निशि। सायम्–निशारम्भे। चिरम्–बहुकालं यावत्। मनाक् – किञ्चिद्। ईषत् – स्वल्पः। जोषम् – सुखम्, मौनम्। तृष्णीम्– मौनम्। बहिस्, अवस् – बहिः, समया – समीपे, मध्ये। निकषा– समीपे स्वयम् – स्वार्थे। वृथा – व्यर्थः। नक्तम् – रात्रिः। नञ् – निषेधः, तत्सदृशः, अभावः, तद्भिन्नः, अल्पः, अप्रसिद्धः, विरोधश्च।

**तत्सादृश्यमभावश्च तादन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।**

हेतौ – निमित्ते। इद्धा – प्रकाशः, स्पष्टः। अद्धा – स्पष्टः, अवधारणम्, निश्चयः, तत्वकथनम्, अतिशयः। सामि – अर्धः, निन्दितः।

**वाक्यप्रयोगः –**

(१) युधिष्ठिरः स्वरगच्छत् (२) विद्यालयस्य अन्तः छात्राः सन्ति। (३) सः प्रातः स्नानं करोति। (४) सः पुनः वदति। (५) देवः सनुतः अभूत्। (६) पर्वतः हिमालयः उच्चैरस्ति। (७) नदी इतः नीचैः वहति। (८) पीनः छात्रः शनैः धावति। (९) ज्ञानात् ऋते न सुखम्। (१०) एतद्वचः ऋधक् अत्र कथने ऋधक्। अयं मार्गः अस्मात् मार्गात् ऋधक्। (११) रामः लक्ष्मणश्च युगपत् वनम् अगच्छताम् (१२) ग्रामात् वनम् आरात्, नदी च आरात् अस्ति। (१३) ताम्रात् स्वर्णं पृथक् वस्तु। (१४) ह्यःसः जयपुरमगात्। (१५) श्वः रामः अत्रागमिष्यति। (१६) उल्लूकः रात्रौ पश्यति। (१७) सः सायं पर्यटति। (१८) श्रमिकः चिरं कार्यमकरोत्। (१९) अस्मिन् विषये मनाक् अपि सन्देहो नास्ति। (२०) सः जोषमनुभवति सः जोषमस्ति। (२१) तृष्णीम् भव, बहु वदसि। (२२) विद्यालयात्

बहिः (अवः) राजमार्गः अस्ति। (२३) त्वां मां समया कोऽस्ति। ग्रामं समया कूपः अस्ति। (२४) जयपुरं निकषा बहूनि उद्योगक्षेत्राणि सन्ति। (२५) सः स्वयं कार्यं विदधाति। (२६) वृथा कालं न यापय। (२७) अयं छात्रः नक्तं पठति, प्रातः स्वपिति। (२८) कार्यं त्वया न कर्तव्यम्। सः रामः नास्ति। अनुदरा इयं कन्या। त्वं न ब्राह्मणोऽसि। सः असुरो वर्तते। नायं ब्राह्मणवत्। अत्र घटो नास्ति। (२९) अयं छात्रः अद्धा उक्तवान्। अस्ति मम अद्धा। (३०) चौरः सामि भवति। इदं वस्तु सामि एव अस्ति।

**वत् ( ग.4 ) ब्राह्मणवत्। क्षत्रियवत्। सना। सनत्। सनात्। उपधा। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कम्। शम्। सहसा। विना। नाना। स्वस्ति। स्वधा। अलम्। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो, भिस्। प्रायस्। मुहुस्। प्रबाहुकम्। प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशाम्। प्रतान्। मा। माङ्। आकृतिगणोदयम्। इति स्वरादयः।**

**व्याख्या** – वत् प्रत्ययान्तम् अव्ययसञ्ज्ञकं भवति। वत्प्रत्ययेनेह 'तेन तुल्यं क्रिया चेद्वतिः' 'तत्र तस्येव' 'तदर्हम्' इत्येतैः सूत्रैः विहित वतिप्रत्ययस्य ग्रहणं भवति। तद्धितश्चासर्वविभक्तिः इत्यनेन सूत्रेणैव। अव्ययसंज्ञा सिध्यति। अतः स्वरादिगणे वत्प्रत्ययस्य पाठः व्यर्थ इति। केवलप्रत्ययस्य अव्ययसंज्ञाप्रयोजनाभावात्।

**अर्थः, वाक्यप्रयोगश्च –**

ब्राह्मणवत्–ब्राह्मणसदृशः। अयं क्षत्रियः ब्राह्मणवत्। क्षत्रियवत्–क्षत्रियसदृश अयं ब्राह्मणः क्षत्रियवत्। सना, सनत्, सनात्–नित्यम्। वेदाः सना–सनत् सनात् वा सन्ति। उपधा–भेदः। कास्ति अनयोः उपधा। तिरस्–अन्तर्धौ। सिंहः तिरोऽभवत्। अन्तरा–मध्ये, विना। त्वां माम् अन्तरा गृहमस्ति। अन्तरेण–वर्जने। विद्यामन्तरा अन्तरेण वा न सुखम्। ज्योक्–समयाधिक्यम्, प्रश्नः, शीघ्रम्, सम्प्रति। ज्योक् गच्छतु। अस्मिन् कार्ये ज्योक् न कर्तव्यम्। कम्–जलम्, मूर्धा, निन्दा, सुखम्। कं स्वीकरोतु, कमनुभवामि। सः तव कं करोति।

शम्–सुखम्। भवान् शमनुभवतु। सहसा–आकस्मिकम्। सहसा कार्यं न कुर्वीत। विना–वर्जनम्। नाना–अनेके, निष्फलम्, वर्जनम्, विना। जलं विना, नाना जीवनम्। नाना नारीं निष्फला लोकयात्रा।

स्वस्ति–कल्याणम्, मङ्गलम्। स्वस्ति ते भूयात्। स्वधा–पितृभ्यः हविर्दानम् इदमन्नं पितृभ्यः स्वधा। अलम्–भूषणे पर्याप्त्यर्थे, शक्त्यर्थे, वारणे निषेधे च अलं श्रमेण। सा आत्मानमलङ्करोति। अलं विवादेन। हरिः दैत्येभ्यः अलम्। वषट्, श्रौषट्, वौषट् – देवेभ्यः हविर्दाने। इन्द्राय वषट्, श्रौषट्, वौषट्। अन्यत्–भिन्नम्। एतद् अन्यत् वस्तु अस्ति। अस्ति–सत्तायाम्। इयम् गौः अस्तिक्षीरा। उपांशु–अस्पष्टोच्चारणे मनसोच्चारणे एकान्ते च। इदमुपांशुकथनम्। उपांशु जपति। क्षमा–क्षान्तिः। वीरस्य भूषणं क्षमा। विहायसा–आकाशे सः विहायसा गच्छति। दोषा–रात्रिः। दिनम् दोषा इव भाति। मृषा–मिथ्या=असत्यम्। अयं दुर्जनः मृषा मिथ्या वा वदति। मुधा–व्यर्थम्। मुधा तव जल्पितम्। पुरा––प्राचीनकाले, आसन्नभविष्ये वा। पुरा अहमवोचम् पुरा अहं वक्ष्यामि। मिथः मिथो – एकान्ते, परस्परे वा। मिथः मिथो वा सम्बन्धस्तयोरस्ति। प्रायस्–बाहुल्येन। अयं प्रायः हसत्येव। मुहुस्–पौनःपुन्येन, वारम्वारम्। शिशुः मुहुः क्रन्दति। प्रवाहुकम्–समानकाले ऊर्ध्वे चाऽर्थे। प्रवाहुकम् सः अवोचत्। आर्यहलम्–बलपूर्वकम्। सः आर्यहलं कार्यं कृतवान्। अभीक्ष्णम्- पुनः पुनः। अभीक्ष्णं शब्दं वद। साकम्–सार्धम्–सह। पित्रा साकं सार्धं वा गच्छति पुत्रः। नमस्–नमस्कारः। देवाय नमः हिरुक्–वर्जनम्, निषेधः। एतत्कार्यं हिरुक्। धिक्–निन्दा, भर्त्सना। दुर्जनं त्वां धिक्।

अम्–शीघ्रम्, अल्पम्। एतद् वस्तु अम् अस्ति। अम् कार्यं निष्पादयतु। आम्=अङ्गीकरणम्। आम्, वदतु भवान्। प्रताम्–ग्लानिः। सः प्रतामनुभवति। प्रशाम्–शमनार्थे। सः सन्तापं प्रशाम्यति। प्रताम्=विस्तारः। पटं प्रतान् करोतु मा माङ्=निषेधः। कार्यं मा करोतु। कार्यं मा कार्षीः। आकृतिगणोऽयम् – स्वरादिगणः आकृतिगणोऽस्ति।

आकृत्या स्वरूपेण गण्यते। तदनन्तरम् अन्येऽपि शब्दाः स्वरादिगणे बोध्याः। यथा – कामम् –स्वतन्त्रता, स्वच्छन्दता। प्रकामम्–अतिशये। साचि–तिर्यक्, वर्तुलम्। सत्यम्–अर्धस्वीकृति। मङ्क्षु–आशु–शीघ्रता। संवत्–वर्षे। अवश्यम्–निश्चितम्। सपदि–शीघ्रम्। बलवत्–अतिशयः। प्रादुस्–आविस्=प्रकटीकरणम्। अनिशम्–नित्यम्, सदा, अजस्रम् सन्ततम्–निरन्तरार्थे प्रयुज्यन्ते। उषा–रात्रिः। रोदसी–द्युलोक, पृथिवी, ओम्–स्वीकरणम्, ब्रह्म। अ+उ+म् – ब्रह्मविष्णुशिववाचकः ब्रह्मरूपी। अव+मनिन् टिलोप=ओम् इत्यस्य अर्थः 'ब्रह्म' इत्यस्ति।

भूः=पृथिवी। भुवः=अन्तरिक्षः। झटिति, प्राक्, तरसा=शीघ्रता, सुष्ठु–प्रशंसायाम्। दुष्ठु=निष्कृष्टः। सु=पूजार्थकम्। आः=आश्चर्ये। कु–कुत्सिते, ईषदर्थे। अञ्जसा–तत्वे, शीघ्रे। मिथु=युगलम्। अस्तम्–विनाशः, स्थाने–युक्ते, ताजक्–शीघ्रता, चिराय–चिररात्राय चिरस्य–चिरेण–चिरात्–चिरम्=दीर्घकालार्थे। वरम्–किञ्चित् श्रेष्ठार्थे आनुषक्–क्रमशः सन्निवेशः, आनुपूर्वी। अनुषक्=अनुमाने। अमेनः=शीघ्रम्, साम्प्रतिकम्। सुदि=शुक्लपक्षः वदि=कृष्णपक्षः।

**च। वा। ह। अह। एव। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। किञ्चित्। यत्र। नह। हन्त। माकिः। माकिम्। नकिः। ( आकिम्/नाकिम् ) माङ्। नञ्। यावत्। ताव्। त्वै। द्वै। न्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वष्ट्। तुम्। तथाहि। खलु। किल। अथो। अथ। सुष्ठु। स्म। आदह।**

**अर्थः वाक्यप्रयोगश्च –**

चादिगणपठित अव्ययसञ्ज्ञकाः पठ्यते –

च=समुच्चयः, अन्वाचयः,इतरेतरयोगः, समाहारः।

परस्परनिरपेक्षितानामनेकेषां पदानामेकस्मिन् क्रियापदे अन्वयः समुच्चयः भवति। यथा–ईश्वरं गुरुं च भजस्व।

यत्र एकस्य पदस्य एकस्मिन् क्रियापदे परार्थप्रवृत्तये अन्वयो भवति, अपरस्य पदस्य अन्यस्मिन् क्रियापदे उद्देश्यभावेन अन्वयः अन्वाचय इत्युच्यते। यथा – भिक्षाम् अट गां च आनय।

परस्परापेक्षितपदानामेकस्मिन् क्रियापदे अन्वयः इतरेतरयोगः भवति। यथा – हरिहरौ पूजय।

समाहारः – समूहः। यथा – व्याकरणे प्रथमं संज्ञा परिभाषम् अधीष्व। वा–विकल्पः, उपमा, इवार्थे, समुच्चयः।अश्वं गजं वाऽनय। गजो वा दृष्टः। चन्द्रो वा मुखम्। ह–प्रसिद्धिः। रामः ह राजा आसीत्। अह–अद्भुतः, कष्टम्, पूजार्थे। अह अस्ति एतत्। अह स मृतः। देव अह अस्ति। एव – उक्तपरामर्शः। एवं स आह। नूनम् – निश्चयः, तर्कः। नूनं स छात्रः। नूनं तत् सत्यम्। शश्वत्–पौनःपुन्येन, नित्यम्, सहार्थः। शश्वत् पुस्तकं पठति बालः। युगपत् – एकस्मिन् काले, एकीभूय। युगपत् छात्राः ब्रुवन्ति। भूयस्–पुनरर्थे, आधिक्ये च। भूयो ब्रवीति सः। कूपत् – प्रश्ने, प्रशंसायाम्। अस्ति इदं पुस्तकं कूपत्। कुवित्–भूयर्थे, प्रशंसायाम्। विद्याधनं कुवित्। नेत्–शङ्कायां प्रतिषेधविचारसमुच्चयेषु च। वृक्षं नेत् विनाश्यम्। चेत्–यदि। ज्ञानमस्ति चेत् पूज्यः सः। चण् – यदि। अस्ति चण् धनं पुस्तकं क्रीणीहि। णानुबन्धस्तु– निपातैर्यदिहन्तकुविन्नेच्चेच्चण् –इति विशेषणार्थः। समुच्चयादौ तु यत्र अनवधारणम्, अमर्षः गर्हा, आश्चर्यम्। नावकल्पयामि, न मर्षये, आश्चर्यं वा यत्र भवान् वृषलं याजयेत्। नह–प्रत्यारम्भे, निषेधार्थे च। कार्यं नह विधेयम्। हन्त– हर्षे विषादे अनुकम्पायां वाक्यारम्भे च। हन्त आगतः पुत्रः। हन्त मृतः पालितः पशुः। हन्त गन्तव्यम् अनेन। माकिः, माकिम्, नकिः–वर्जने, निषेधे च। कस्यापि निन्दां माकिः, माकिम्, नकिः करोतु। माङ् नञ् –न, निषेधे अकर्तव्यम् मा कर्त्तव्यम्। यावत् – तावत् = साकल्यावधिमानावधारणेषु साकल्ये – यावत्कार्यं तावत्कृतम्। अवधौ – यावद्गन्तव्यं तावत्तिष्ठ। माने – यावद्दत्तं तावद् भुक्तम्। अवधारणे – यावदमत्रं तावद् ब्राह्मणान् आमन्त्रयस्व। त्वै – विशेषवितर्कयोः, द्वै = वितर्के। पञ्च छात्राः त्वै द्वै वा सन्ति। न्वै–वितर्के (पाठान्तरम्)। रै–दाने, अनादरे च। गृहाण रै। गच्छ रै। श्रौषट्, वौषट, वषट्, स्वाहा–देवेभ्यः हविर्दाने। श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः। वषडिन्द्राय, अग्नये स्वाहा। स्वधा–पितृभ्यः हविर्दाने।

पितृभ्य: स्वधा। तुम्–तुङ्कारे। गुरुं तुं कृत्य हुं कृत्य वदति। करोषि तुं कार्यम्। तथाहि – निदर्शने अर्थे। तथाहि आचार्य: उक्तवान्। खलु – निषेधवाक्यालंकारनिश्चयेषु। अयमुक्तवान् खलु। खलु इदं वक्तव्यम्? किल – वार्तायाम्, अलीके च। सुप्तोऽहं किल विललाप। किमपि वदति किल। अथो अथ – मङ्गलानन्तरारम्भप्रश्नकात्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अथ शब्दानुशासनम्। अथ स आह। अथ स्नपयामासा। अथातो धर्मजिज्ञासा। अयं स्वरादावपि। तेन मङ्गलवाचकस्य सत्वार्थत्वेऽप्यव्ययत्वं सिध्यति। अत एव श्रीहर्ष: –

**उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे।**
**यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्ग: स्नपयाम्बभूव ताम्।। इति।**

अत्र हि अथ स्नपयां बभूव इत्यस्य मंगलस्नपनं चकारेत्यर्थ:। निपातस्तु स्वरूपेणैव मंगलं मृदङ्गध्वनिवत्। सुष्ठु–स्वरभेदार्थ: पाठ:। प्रशंसायाम्। स्म–अतीते, पादपूरणे च। स: गच्छति स्म। आदह – उपक्रमहिंसाकुत्स्नेषु। 'आदह स्वधामन्वित्यत्र तु पदकारा आदिति पृथक् पदं पठन्ति।

**उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ( ग.१६ ) अवदत्तम्। अहंयु:। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथा कथा च। पाट्। प्याट्। अङ्ग। है। हे। भो:। अये। द्य। विषु। एकपदे। युत्। आत:। चादिरप्याकृतिबाण:। इति चादय:।**

चादिगणे 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' इति सूत्रं पठितमस्ति। उपसर्गश्च विभक्तिश्च स्वरश्चेति उपसर्गविभक्तिस्वरा:, तेषां प्रतिरूपका: – सदृशा: समाना: इति द्वन्द्व: तत्पुरुषश्च। द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाण: शब्द: प्रत्येकम् अभिसम्बध्यते इति नियमात् प्रतिरूपकेति पदस्य उपसर्गेण विभक्त्या स्वरेण च पदेन अन्वयो भवति। अत: सूत्रार्थो भवति – उपसर्गसदृश:, विभक्तिसदृश:, स्वरसदृशश्च शब्द: अव्ययसञ्ज्ञक: भवति।

उपसर्गसदृशस्योदाहरणम् – अवदत्तम् – इति प्रयोगे अव+दा+क्त इत्यत्र अव उपसर्ग:, नास्ति अपितु उपसर्गप्रतिरूपक: निपात: वर्तते। अत उपसर्गाभावे 'अच उपसर्गात्त' इति सूत्रेण दा स्थाने 'त्' आदेशो न भवति। अन्यथा 'दा' इत्यस्य तादेशे 'अवत्तम्' इति रूपं सिद्धयति। वाक्यप्रयोग: – धनमस्मै अवदत्तमस्ति।

ध्यातव्य: –

**अवदत्तं विदत्तं च प्रदत्तञ्चादिकर्मणि।**
**सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते।।( महाभाष्ये )**

अत्र अनु, प्र, सु, वि, नि इत्येते उपसर्गप्रतिरूपका: निपाता: सन्ति। विभक्तिप्रतिरूपक: यथा – अहंयु: = अहङ्कारवान्।

अहम् (अहङ्कार:) अस्त्यस्येति। अहंयु: इत्यत्र अहम् शब्द: अस्मद् शब्दस्य प्रथमैकवचनान्त: प्रतीयते किन्त्वत्र अहम् इति अव्ययेन मत्वर्थे 'अहं शुभयोर्युस्' इति सूत्रेण युस् प्रत्यये सिध्यति। पदत्वात् 'मोऽनुस्वार:' इति सूत्रेण मस्य अनुस्वारो भवति। अहंयु: शब्दे यदि 'अस्मद्' शब्द: स्वीक्रियेत तदा 'प्रत्ययोत्तरपदयोश्च' इत्यनेन मपर्यन्तस्य मदादेशे 'मद्यु:' इत्यनिष्टं रूपं सिध्येत।

**वाक्यप्रयोग: –** अयं जन: अहंयुरस्ति।

**ध्यातव्य: –** शुभमस्ति अस्येति 'शुभंयु:' इति भवति। चिरेण, चिराय, चिरात्, चिरे, चिरस्य इत्यादीनि अव्ययपदान्यपि विभक्तिप्रतिरूपकाव्ययपदान्येव सन्ति न तु सुब्विभक्तयान्यतानि इति।

तिङन्तप्रतिरूपकनिपातस्योदाहरणम्– अस्तिक्षीरा=क्षीरवती गौ:। अस्ति क्षीरं यस्या: इति विग्रहे बहुव्रीहिसमास:। 'अस्ति' इति क्रियावाचकं तिङ्विभक्त्यन्तं पदं नास्ति। अपितु विद्यमानार्थकं तिङन्तप्रतिरूपकमव्ययपदं वर्तते। तिङन्तत्वे सुबन्तेन क्षीरशब्देन 'अनेकमन्यपदार्थे' इति सूत्रेण समास: न सिध्यति। वाक्यप्रयोग: – इयं कृष्णा गौ: अस्तिक्षीरा वर्तते।

स्वरप्रतिरूपकः यथा –

अ=सम्बोधने। अ देवदत्त अहं वदामि। अ-निन्दायामपि यथा – अपचसि जाल्म। आ-वाक्यस्मरणयोः। आ एवं नु मन्यसे। आ एवं किल तत् इ-सम्बोधने, जुगुप्सायाम् विस्मये च अर्थे। ई ईश। इ इन्द्रं पश्य। इ किं कृतम्। इ हन्ति तम्। ई उ ऊ ए ऐ औ औ इति सप्तस्वराः सम्बोधनार्थस्य द्योतकाः। पशु-सम्यक्। इदं हविः पशु। शुकम्-शीघ्रता शुकं कार्यं कुरु। शुकं गच्छति। यथा कथा च – अनादरे। यथा कथा च अत्र उषितवान्। पाट् प्याट् – सम्बोधने। पाट् पान्थ, प्याट् पावक। अङ्ग-सम्बोधने। है राम! पाहि माम्। हे राम! किं करोषि। भोः! कस्त्वम्। अये! सम्यक् पठ। घ-पादपूर्वौ, हिंसायाम्, प्रातिलोम्ये च। सः घ निर्दिशति। विषु-साम्ये, नानार्थे च- विषु (साम्यम्) अस्त्यस्येति विषुवान्। विषुगोत्राः ब्राह्मणाः सन्ति। एकपदे – अकस्मात्। एकपदे सर्वं कार्यं सिद्धमभूत्। युत् – निन्दायाम्। युत् करोषि एतत्कार्यम्। आतः- इतोऽपि। आतः आगच्छेत् भवान्।

चादिरप्याकृतिगणः – चादिरपि आकृत्या (स्वरूपेण) अवगन्तव्यः। अतः अन्येषां तत्सदृशानाम् अव्ययानाम् अपि ग्रहणं भवति। यथा – यत् तत् – हेत्वर्थे। यद्धनं तद्दीयताम्। आहोस्वित् – विकल्पेऽर्थे पठ आहोस्वित् गच्छ। सम्-सर्वतोभावे। कम्-पादपूर्तौ। सुकम् अतिशये। अनु-वितर्के। शम्वत्-अन्तःकरणे, साम्मुख्ये। व-इवार्थे, पादपूरणे च। चटु, चाटु-प्रियवाक्ये। अयं करोति चाटुकारिताम्। वदत्ययं चटु। हुम्-भर्त्सनायाम्। इव-सादृश्ये। चन्द्र इवास्ति मुखम्। अद्यत्वे -अस्मिन् समये। अद्यत्वे बहूनि कार्याणि कुर्मः।

**ध्यातव्यः –** अस्मिन् चादिगणे अन्येऽपि अव्ययप्रयोगाः दृश्यन्ते यथा – अयि, रे, अरे, अरेरे, भोस्, हा अहह, अहो इत्यादयः।

**तद्धितश्चासर्वविभक्तिः – १/१/३८।। यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः। अम्। आम्। कृत्वोऽर्थाः। तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्। पचतिरूपम्।**

**पदच्छेदः –** अव्ययसञ्ज्ञासूत्रमस्ति। 'तद्धितः च', असर्वविभक्तिः इति पदच्छेदः। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् 'अव्ययम्' इति पदमनुवर्तते। अतः सूत्रस्यार्थो भवति –

**सूत्रार्थः –** 'यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्।'

**व्याख्या –**च – इत्यव्ययपदम्। असर्वविभक्तिः – नोत्पद्यन्ते सर्वावचनत्रयात्मिका विभक्तयो यस्मात् सोऽसर्वविभक्तिः, बहुव्रीहिसमासः। किं त्वेकवचनमेव उत्पद्यते इति भावः। परिगणनं कर्तव्यम्। (क) तद्धितप्रकरणे 'पञ्चम्यास्तसिल्' (५.३.७) सूत्रतः प्रारभ्य याप्ये पाशप् (५.३.३७) इत्यतः प्राक् अर्थात् 'द्वित्र्योश्च धमुञ्' इति पर्यन्तम्। शस्प्रभृतयः प्राक्समासान्तेभ्यः बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' इत्यारभ्य अव्यक्तानुकरणस्यात् इतौ इति सूत्रपर्यन्तम् समासान्तेभ्यः प्राक्। अम् – 'अमुं च च्छन्दसि' इत्यनेन विहितः अम्प्रत्ययान्तः। आम् – किमेतिङव्ययघादाम्बद्रव्यप्रकर्षे' इत्यनेन विहितः आमन्तः। कृत्वोऽर्थाः – संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' द्वित्रिचतुर्भ्यस्सुच्' विभाषा बहोर्धाऽविप्रकृष्टकाले' इत्येभिः सूत्रैः विहितः कृत्वसुजन्तः, सुजन्तः, धान्तः, तसिवती तसिश्च, तेन तुल्यं क्रियाचेद्वतिः, इत्यादि विहितः तसि वति प्रत्ययान्तः नानाञाविति – 'विनञ्भ्यां नानाञौ न सह' इत्यनेन विहितः नः नाञ् प्रत्ययान्तः असर्वविभक्तितद्धितान्ताव्ययसञ्ज्ञकानां परिगणनं कर्तव्यम्।

तेनेह न पचतिकल्पम् – पचतिरूपम् – परिगणनस्य फलमस्ति यत् पचति कल्पम्, पचतिरूपम् इत्यनयोः अव्ययसञ्ज्ञा न भवति। यद्यपि एतौ असर्वविभक्तितद्धितान्ताव्ययसंज्ञकानां परिगणनं कर्तव्यम्।

तेनेह न पचति कल्पम् – पचति रूपम् – परिगणनस्य फलमस्ति यत् पचतिकल्पम्, पचतिरूपम् इत्यनयोः अव्ययसञ्ज्ञा न भवति। यद्यपि एतौ असर्वविभक्तितद्धितान्तौ अव्ययौ स्तः तथापि परिगणनाभावे अव्ययत्वं न भवति एतयोः।

परिगणिताः तद्धितप्रत्ययाः – येषामव्ययसंज्ञा भवति –

तसिल्, त्रल्, ह, अत्, दा, र्हिल्, दानीम्, धुना, द्यस्, थाल्, थमु, धा, अस्ताति, अतसुच्, रिल्, आति, एनप्, आच्, आहि, असि, त्राद्व डाच्, ध्यमुञ्, धमुञ्, एधाच्, शस्, तसि, च्वि, साति, अम्, आम्, कृत्वसुच्, सुच्, वति, ना, नाञ्।

**वाक्यप्रयोगः –** अतोऽहं ब्रवीमि, इतो भ्रष्टस्ततो नष्टः, कुतस्त्वम् (तसिल्)। यत्र (त्रल्) धूमस्तत्र वह्निः। सदाभिमानैकधना हि मानिनः। एतर्हि (र्हिल्) किं कर्तव्यम्? इदानीम् (दानीम्) सायंकालः। अधुना यत्र सरिता पुरा तत्र स्रोतः आसीत्। सद्यः (घस्) बलहरा नारीं सद्यो बलकरं पयः। यथा (थाल्) राजा तथा प्रजा। इत्थम् (थमु) इत्थं कर्तव्यम्। एकधा (धा) परमात्मा अस्ति। इत्येतेषाम् अव्ययसंज्ञात्वात् अव्ययादाप्सुपः इति सुब्लुकि भवति।

**कृन्मेजन्तः १/१/३९।। कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं-स्मारम्। जीवसे। पिबध्यै।**

**सूत्रप्रकारः** – सञ्ज्ञासूत्रम्।

कृत्, मेजन्तः इति पदच्छेदः। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् 'अव्ययम्' इत्यनुवर्तते। म् च एच् च मेचौ, मेचौ अन्तौ यस्य सः मेजन्तः। केवलस्य कृतः प्रयोगः न सम्भवति अतः सञ्ज्ञाविधावपि तदन्तविधिरिति भावः।

**सूत्रार्थः** – कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्।

**उदाहरणानि –**

**स्मारं स्मारम्** – स्मृ (चिन्तायाम्) धातोः 'आभीक्ष्ण्ये णमुल् च' इति सूत्रेण णमुल् प्रत्यये अनुबन्धलोपे 'अचो ञ्णिति' इति सूत्रेण ऋकारस्य वृद्धौ रपरत्वे च कृते स्मारम् इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात्' स्वौजसमौट्' इति सुप्रत्यये 'कृन्मेजन्तः' इति अव्ययसञ्ज्ञायाम् 'अव्ययादाप्सुपः' इति सुब्लुकि 'नित्यं वीप्सयोः' इति सूत्रेण द्वित्वे कृते पूर्वमस्य अनुस्वारे स्मारं स्मारम् इति सिध्यति।

अन्योदाहरणानि – ध्यायं – ध्यायम्। पठितुम्। भवितुम्।

जीवसे – जीव् धातोः 'तुमर्थे सेसेनसेऽसेन्क्से-कसेन्-अध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः' इति सूत्रेण असे प्रत्यये जीवसे इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् 'स्वौजसमौट्' इति सुप्रत्यये 'कृन्मेजन्तः' अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सुब्लुकि जीवसे इति रूपं सिद्धम्।

**पिबध्यै** – पा धातोः 'तुमर्थे सेनसे.' इत्यादि सूत्रेण शध्यै प्रत्यये 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदाम्' पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति सूत्रेण पररूपे पिबध्यै इति जाते प्रातिपदिकत्वात् सुप्रत्यये 'कृन्मेजन्तः' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इतिसूत्रेण सुब्लुकि पिबध्यै इति रूपं सिद्धम्।

**४५०. क्त्वातोसुन्कसुनः १/१/४०।। एतदन्तमव्ययं स्यात्। कृत्वा। उदेतोः। विसृपः।**

**सूत्रप्रकारः –** संज्ञासूत्रम् ।

**पदच्छेदः –** क्त्वा च तोसुन् च कसुन् च इति। 'स्वरादिनिपातम् अव्ययम्' इति सूत्रात् अव्ययम् इति पदमनुवर्तते।

**सूत्रार्थः –** क्त्वा, तोसुन् एवं कसुन् प्रत्ययान्ताः शब्दाः अव्ययसंज्ञकाः स्युः।

**व्याख्या –** प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति तदन्तग्रहणम्। 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति निषेधस्तु नेह प्रवर्तते। यतोहि न केवलप्रत्ययस्य प्रयोगः भवति।

**उदाहरणानि –** कृत्वा – कृधातोः 'समानकर्तृकयोः पूर्वकाले' इति सूत्रेण क्त्वा प्रत्यये अनुबन्धलोपे कृ+त्वा इति जाते आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति ऋकारस्य गुणे प्राप्ते 'क्ङिति च' इति सूत्रेण गुणनिषेधे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् सुप्रत्यये 'क्त्वातोसुन्कसुनः' इतिसूत्रेण अव्ययसञ्ज्ञायाम् 'अव्ययादाप्सुपः' इति सूत्रेण सुब्लुकि कृत्वा इति सिध्यति।

**उदेतोः** – उद् उपसर्गपूर्वकात् इण् धातोः 'भावलक्षणे स्थेण्कृञ्वदि चरिहुतमिजनिभ्यस्तोसुन्' इति सूत्रेण तोसुन्

प्रत्यये उद् इ+तोस् इति जाते 'सार्वधातुकार्धधातुकयो:' इति धातो: गुणे उदेतोस् इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वे सुप्रत्यये उदेतोस्+सु इति जातेक 'क्त्वातोसुन्कसुन:' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप्सुप:' इति सुब्लुकि सस्य रुत्वे विसर्गे च कृते उदेतो: इति रूपं सिद्धम्।

**विसृप:** – विपूर्वकात् सृप् धातो: 'सृपितृदो: कसुन्' इति सूत्रेण कसुन् प्रत्यये अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति लघूपधगुणे 'प्राप्ते क्ङिति च' इति सूत्रेण गुणनिषेधे विसृपस् इति जाते प्रातिपदिकत्वात् सुप्रत्यये 'क्त्वातोसुन्कसुन:' इति अव्ययसञ्ज्ञायाम् 'अव्यपादाप्सुप:' इति सूत्रेण सुब्लुकि सस्य रुत्वविसर्गौ विसृप: इति रूपं सिद्धम्।

अन्योदाहरणानि– पठित्वा, गत्वा, भूत्वा, प्रवदितो:, प्रचरितो: आतृद:।

**४५१. अव्ययीभावश्च १/१/४१।। अधिहरि।**

**सूत्रप्रकार:** – सञ्ज्ञासूत्रम्।

**पदच्छेद:** – अव्ययीभाव:, च इति। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् अव्ययम् इति पदमनुवर्तते।

**सूत्रार्थ:** – अव्ययीभावसमास: अव्ययसञ्ज्ञ: स्यात्।

**व्याख्या** – अव्ययीभावसे समासे प्रकृतसूत्रेण अव्ययसञ्ज्ञा भवति। च इति अव्ययपदम्।

**उदाहरणानि** – अधिहरि – 'हरौ इति' इति विग्रहे हरि ङि अधि इत्यलौकिक विग्रहे 'अव्ययं विभक्तिसमीपसमृद्धि-व्यृद्ध्यर्थाभावात्ययसम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु' इति सूत्रेण समासे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसञ्ज्ञायाम् सुब्लुकि अधि' इत्यस्य पूर्वप्रयोगे 'अव्ययीभावश्च' इति अव्ययसञ्ज्ञायाम् पुन: प्रातिपदिकत्वात् सुप्रत्यये ''अव्ययादाप्सुप:'' इति सुब्लुकि अधिहरि इति रूपं सिद्धम्।

अन्योदाहरणानि – यथाशक्ति, सहरि, इत्यादय:।

**४५२. अव्ययादाप्सुप: २/४/८२।। अव्ययाद् विहितस्य आप: सुपश्च लुक् स्यात्। तत्र शालायाम्। अथ। विहितविशेषणत्वात् नेह-अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति, तथाऽपि न गौणे। आब्ग्रहणं व्यर्थमलिङ्गत्वात्।**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**
**इति श्रुतिलिङ्गकारकसंख्याभावपरा।**

**सूत्रप्रकार:** – विधिसूत्रम्।

**पदच्छेद:** – अव्ययाद्, आप्, सुप: इति। 'ण्यक्षत्रियार्षजितो यूनि लुगणिञो:' इति सूत्रात् लुक् इति पदमनुवर्तते।

आप् च सुप् च आप्सुप्, तस्य आप्सुप:, समाहारद्वन्द्व:।

**सूत्रार्थ:** – अव्ययात् विहित: आप् (टाप्, ङाप्, चाप्) इत्यस्य सुप् (सु, औ, जस् इत्यादीनाम्) लुक् स्यात्।

**उदाहरणानि** – तत्र शालायाम् – इत्यत्र 'तत्र' इति पदं 'तद्धितश्चासर्वविभक्ति:' इति सूत्रेण अव्ययसञ्ज्ञकमस्ति। 'शालायाम्' इति पदस्य विशेषणम् अस्ति। अत: स्त्रीलिङ्गपदस्य विशेषणत्वात् 'अजाद्यतष्टाप्' इति सूत्रेण टाप् प्रत्यये तत्र+टाप् शालायाम् इति जाते 'अव्ययादाप्सुप:' इति आब्लुकि तत्र शालायाम् इति सिद्धम्।

**अथ** – 'स्वरादिनिपातमव्ययम्' इति सूत्रेण 'अथ' इत्यस्य अव्ययसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये 'अव्ययादाप्सुप:' इति सुब्लुकि अथ इति रूपं सिद्धम्।

विहितविशेषान्नेह – 'अव्ययात् विहितस्य सुप: लुक्' इति विहितविशेषणत्वात् न इह – अत्युच्चैसौ इत्यत्र 'औ' इत्यस्य न लुकि। उच्चै: अतिक्रान्त: इति विग्रहे 'अत्यादय: क्रान्ताद्यर्थे द्वितीयया' इति समासे अत्युच्चैस् इति स्थिते। अधिकरणशक्तिप्रधानाव्ययवृत्तिविषये कारकं प्रधानं भवति। अत: 'अत्युच्चैस्' इत्यत्र 'उच्चैस्' इत्यपि कारकप्रधानं पदमस्ति। अत्र आगतविभक्ति: अव्ययात् विहित: नास्ति। अत: 'अव्ययादाप्सुप:' इति सूत्रेण सुब्लुकि न भवति।

यद्यपि अव्ययसंज्ञायां तदन्तविधिः भवति किन्तु 'अत्युच्चैस्' इत्यत्र 'उच्चैस्' इति अव्ययं गौणमस्ति। अतः गौणे तदन्तविधेः अभावात् अत्युच्चैस् इति अव्ययं नास्ति। यतोहि स्वरादिगणे उच्चैस् इत्येव पठितमस्ति।

आब्ग्रहणं व्यर्थमलिङ्गत्वात् –

'अव्ययादाप्सुपः' इति सूत्रे आब्ग्रहणं व्यर्थम् यतोहि अव्ययस्य लिङ्गेन सह अन्वयो न भवति। अतः अव्ययसञ्ज्ञकात् पदात् टापः प्राप्तिरेव न भवति। अतः 'तत्र' इति पदे 'टाप्' इत्यस्य अभावात् 'अव्ययादाप्सुपः' इति लुक्करणं व्यर्थम् इति।

'तद्धितश्चासर्वविभक्तिः' इति सूत्रे भाष्ये –

स्त्रीलिङ्गपुल्लिङ्गनपुंसकलिङ्गैकवचनद्विवचनबहुवचनेष्वर्थेषु यन्न व्येति (विकारं न प्राप्नोति) तदव्ययम् भवति।

अत्र प्रश्नः समुदेति यत् अव्ययेन सह लिङ्गानन्वये सदृशं त्रिषु लिङ्गेषु – इति आथर्वण श्रुत्या विरोधः भवति? तत्रोच्यते गोपथब्राह्मणे –

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

**सान्वयकारिकार्थः –**

त्रिषु लिङ्गेषु – पुल्लिङ्गस्त्रीलिङ्गनपुंसकेति त्रिषु लिङ्गेषु , सर्वासु विभक्तिषु, सर्वेषु वचनेषु (एकवचन-द्विवचन-बहुवचनादिषु) यत् – यः शब्दः न व्येति-विकारं न प्राप्नोति तत्-पदम् अव्ययम् – अव्ययम् इत्युच्यते।

अस्यां कारिकायां विभक्तिशब्दः कारकबोधकः अस्ति। वचनशब्दः संख्याबोधकश्चास्ति न तु प्रत्ययबोधकम्। यदि प्रत्ययबोधकत्वं स्वीक्रियेत तर्हि एकस्य ग्रहणं व्यर्थं भविष्यति।

**पंक्तिविवेचनम् –**

इति श्रुतिः लिङ्गकारकसंख्याभावपरा – अथर्ववेदसम्बद्धाश्रुतिरियम् अव्ययपदेषु लिङ्गस्य कारकस्य संख्याया अभावं निर्दिशति न तु लिङ्गेन सहान्वयम् इति। नियमोऽयं निपातेषु प्रवर्तते।

स्वरादिपठित केषाञ्चित् शब्दानां लिङ्गेन, कारकेन, संख्यया सहान्वयो भवति। स्वरादिनिपातमव्ययम् इति सूत्रे भाष्ये चादीनाम् असत्ववचनानामेवसंज्ञा भवति। स्वरादीनां तु द्रव्यवाचिनाम् (सत्ववचनानाम्) अद्रव्यवाचिनाम् (असत्ववचनानाम्) च अव्ययसंज्ञा भवति। अत एव – स्वस्ति वाचयति, स्वस्तिवाच्यः क्षीणे पुण्ये स्वः पतति, प्रातः यजते इत्यादिषु वाक्येषु अव्ययपदानां कर्मकारकेन योगः दृश्यते।

**वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।**
**आपं चैव हलन्तानां यथा वाचा निशा दिशा।।**
**व गाहः-अवगाहः पिधानम्-अपिधानम्।।**

**।। इत्यव्ययप्रकरणम्।।**

**मनोरमा** – प्रसङ्गवशात् अव्ययविषये भागुरिआचार्यप्रतिपादिता कारिकेयं निर्दिशति यत् –

**अन्वयः** – भागुरिः अवाप्योः उपसर्गयोः अल्लोपम् च एव हलन्तानाम् आपं वष्टि। यथा वाचा, निशा, दिशा (इति।

**व्याख्या** – आचार्यः भागुरिः अवाप्योः उपसर्गयोः अकारलोपम् इच्छन्ति। हलन्तानां शब्दानाम् आप् विधानमिच्छन्ति। यथा –

वाच् शब्दात् आप् = वाचा।
निश् शब्दात् आप् = निशा
दिश् = शब्दात् आप् = दिशा

वाचा, निशा, दिशा इत्यादीनि आबन्ताव्ययपदानि सन्ति।

अन्योदाहरणानि – क्षुधा, गिरा, तृषा, रुजा, मुदा इत्यादीनि।

रूपलेखनप्रकार: –

१. वगाह: –

अवपूर्वकात् गाह् धातो: 'भावे घञ् प्रत्यये अनुबन्धलोपे अवगाह: इति जाते' वष्टिभागुरिरल्लोप.' इति कारिकावार्तिकेन विकल्पेन अकारलोपे वगाह: इति रूपं सिद्धम्।

विकल्पपक्षे – अवगाह: इति रूपं भवति।

२. पिधानम् – अपि पूर्वकात् धा धातो: भावे करणे वा ल्युट् प्रत्यये अनुबन्धलोपे अपि धा यु इति जाते 'युवोरनाकौ' इति सूत्रेण यु स्थाने अनादेशे सवर्णदीर्घे प्रातिपदिकत्वे सुप्रत्यये अमादेशे अपि धानम् इति जाते 'वष्टिभागुरिल्लोपमवाप्यो:' इति कारिका वार्तिकेन विकल्पेन अकारस्य लोपे पिधानम् इति रूपं सिद्धम्।

विकल्पपक्षे अपिधानम् इति रूपं भवति।

अन्योदाहरणानि – अवतंस:, वतंस:, पिनद्धा, अपिनद्धा।

**।। इति वैयाकरणसिद्धान्तकौमुद्यामव्ययप्रकरणम् समाप्तम्।।**

## अव्ययप्रकरणे प्रश्ना:

**(क) वस्तुनिष्ठ प्रश्ना: –**

(१) सनुतर् शब्दस्य अव्ययसञ्ज्ञा केन सूत्रेण भवति?

(क) स्वरादिनिपातमव्यम् (ख) कृन्मेजन्त:

(ग) तद्धितश्चासर्वविभक्ति: (घ) अव्ययीभावश्च

(२) क्त्वातोसुन्कसुन: इत्यस्योदाहरणमस्ति –

(क) भूय: (ख) उदेतो:

(ग) अवदत्तम् (घ) सुष्ठु

**(ख) अतिलघूत्तरात्मकप्रश्ना: –**

(१) जीवसे इत्यत्र अव्ययसञ्ज्ञा केन सूत्रेण भवति?

(२) अहंयु: इत्यस्याव्ययसञ्ज्ञा केन सूत्रेण भवति?

(३) अधिहरि इत्यत्र अव्ययसंज्ञा केन सूत्रेण भवति?

**(ग) लघूत्तरात्मकप्रश्ना: –**

(१) स्वरादिनिपातमव्ययम् इति सूत्रं व्याख्यायत।

(२) अव्ययस्य परिभाषां लिखत।

(३) वगाह: इत्यत्र अकारलोपो केन भवति?

**(घ) निबन्धात्मकप्रश्ना: –**

(१) कृन्मेजन्त: इति सूत्रं व्याख्यायत।

(२) अव्ययादाप्सुप: इति सूत्रं व्याख्यायत।

(३) निम्नलिखित प्रयोगा: साधनीया:।

प्रात:, पिबध्यै, तत्र शालायाम्, अधिहरि, पिधानम्।

(४) निम्नलिखितानाम् अव्ययपदानामर्थं विलिख्य वाक्यप्रयोग: करणीय:।

सायम्, अथ, यावत्, तावत्, खलु, भूयस्, चेत्, हे, स्वाहा।

# अथ स्त्रीप्रत्ययप्रकरणम्

### ४५३ स्त्रियाम् ४/१/३।।

**अधिकारोऽयम् समर्थानामिति यावत्।**

अथ स्त्री प्रत्यया निरूप्यन्ते। ङ्याप्प्रातिदिकात् इत्यधिकारे ''स्वौजमौट्छष्टाभ्यां भिस्.'' इति सूत्रेण सुब्विधानमुक्तम्। अजन्तेभ्य: हलन्तेभ्यच प्रातिपदिकेभ्य: सुप्प्रत्ययविधानं कृत्वा रमा, गौरी इत्यादीनां आबन्तङ्यन्तशब्दानां रूपाणि सिद्धयन्ति। आब्ङ्यौ स्त्रीलिङ्गे प्रयुज्येते। व्याकरणशास्त्रे शब्दानां लिङ्गनिर्धारणप्रक्रियाज्ञानार्थं पुँल्लिङ्गत: स्त्रीलिङ्गशब्द रचनाया: प्रक्रियाज्ञानं ''स्त्रीप्रत्ययप्रकरण'' द्वारा भवति। महर्षिणा पाणिनिना 'अष्टाध्यायी' ग्रन्थे अष्ट-स्त्रीप्रत्ययानां विधानम् कृतमस्ति। एतेषां प्रत्ययानां व्याख्या प्रकरणेऽस्मिन् यथास्थाने भविष्यति। द्रष्टव्य:- १. टाप्, २. डाप्, ३. चाप्, ४. ङीप्, ५. ङीन्, ६. ङीष्, ७. ऊङ्, ८. ति।

अधिकार सूत्रम्+ ''समर्थानां प्रथमाद्वा'' इत्यत: प्राक्। ''अजाघतष्टाप्'' इत्याद्युत्तरसूत्रेष्वनुवृत्त्यर्थमिदं सूत्रं वर्तते न तु स्वतन्त्रविधिरित्यर्थ:।

**सूत्रार्थ:** - समर्थानां प्रथमाद्वा इति सूत्रात् प्राक् यै: सूत्रै: प्रत्ययविधानं विधीयते। ते प्रत्यया: स्त्रीत्वे वाच्या: भवन्ति। ''ङ्याप्प्रातिपदिकात्'' इति सूत्रात् 'प्रातिपदिकात्' इत्यस्यापि अधिकारोऽस्ति। अत 'अजाद्यतष्टाप्' इत्यादि उत्तरसूत्रेषु 'प्रातिपदिकात् स्त्रियाम् इत्यस्य च अधिकार: आगच्छति।

किं स्त्रीत्वम्? इति प्रश्न: समुदेति, तत्रोच्यते-महाभाष्ये पतञ्जलिना -

**स्तनकेशवती स्त्री स्याल्लोमश: पुरुष:स्मृत:।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम्।।**
**लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते**
**नत्वं खरकुटी: पश्य खट्वावृक्षौ न: सिद्धयत:।।**
**ना पुंसकं भवेत्तस्मिन् तदभावे नपुंसकम्।**
**असत्तु मृगतृष्णावत् गन्धर्वनगरं यथा।**
**आदित्यगातिवत्सन्न वस्त्रान्तर्हितवच्च त्वत्।**
**तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिष:।।**
**अन्योऽन्यं वं श्रयं त्वेतत् प्रत्यक्षण विरुध्यते।**
**तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति।।**
**संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्तत:।**
**संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूते: सप् प्रसवे पुमान्।**

**कारिकार्थ: -**

स्तनकेशाद्यवयवसंस्थानविशेषत्वम् स्त्रीत्वं भवति। लोमशावयवसंस्थानविशेषत्वं पुंस्त्वं भवति। स्त्रीपुंसयोर्भिन्न वयवसंस्थानत्वं नपुंसकत्वं भवति। ननु सत्वरजस्तमसामुपचय: पुंस्त्वम्, तेषाम् अपचय: स्त्रीत्वम्, तेषां स्थिति: नपुंसकत्वमित्यर्थ:।

### ४५४ अजाद्यतष्टाप् ४/१/४

**अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।**

**अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय। अजा। अतः-खट्वा। अजादिभिः स्त्रीत्वस्य विशेषणान्नेहपञ्चाजी। 'द्विगोः' ( सू. ४७९ ) इति ङीप्। अत्र हि समासार्थसमाहारनिष्ठ स्त्रीत्वम्। अजा। एडका। अश्वा। चटका। मूषिका। एषु जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होढा। मन्दा। विलाता। एषु 'वयसि प्रथमे' ( सू. ४७८ ) इति ङीप् प्राप्तः।**

विधिसूत्रम् इदम्।

अजादि, अतः, टाप् इति पदच्छेदः। ङ्याप्प्रातिपदिकात् इत्यतः प्रातिपदिकात् इत्यनुवर्तते। ''स्त्रियाम्'' इत्यस्य अधिकारोऽस्ति।

**सूत्रार्थः** - अजादीनामकारान्तस्य प्रातिपदिकस्य च योऽर्थः वाच्यम् (अर्थः) यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।

**व्याख्या** - अजः आदिर्येषां ते अजादयः। ते च अच्च इति समाहारद्वन्द्वात् षष्ठी। अजादिभिः अता च विशेष्यते तदन्त विधिः।

प्रत्ययः-परश्च इत्यनयोः अधिकारत्वात् टाप् प्रत्ययः अजाद्यकारान्तप्रातिपदिकात् परे भवति।

उदाहरणानि - अजा। एडका। अश्वा। चटका। मूषिका एषु जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होडा। मन्दा। विलाता एषु वयसि प्रथमे इति ङीप् प्राप्तः।

रूपलेखनप्रकारः -

**अजा** - अज शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य अजाद्यतष्टाप् इति टाप् प्रत्यये अनुबन्धलोपे अज+आ इति जाते ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे अजा इति जाते ''ङ्याप्प्रातिपदिकात्'' इति नियमात् ''स्वौजसमौट्.'' इति सुप्रत्यये अजा+सु इति जाते ''हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्'' इति सुलोपे अजा इति रूपं सिद्धम्।

एवमेव एडका, अश्वा, चटका, मूषिका इत्यादयः सिध्यन्ति।

**बाला** - बाल शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''वयसि प्रथमे'' इति सूत्रेण ङीप् प्रत्यये प्राप्ते तं प्रबाध्य ''अजाघतष्टाप्'' इति सूत्रेण टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे बाला इति जाते ''ङ्याप्प्रातिपदिकात्'' इति सूत्रनियमात् ''स्वौजसमौट्.'' इति सु प्रत्यये अनु. लोपे ''हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे बाला इति रूपं सिद्धम्।

एवमेव वत्सा, होडा, मन्दा, विलाता इत्यपि सिद्धयन्ति।

**खट्वा** - 'खट्' काङ्क्षायां धातोः ''अशूप्रुषिलटि.'' इति औणादिकसूत्रेण क्वन् प्रत्यये खट्व इति जाते ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञायां ''स्त्रीत्व विवक्षायाम्'' 'अजाघतष्टाप्' इति सूत्रेण टाप् प्रत्यये अनु.लोपे सवर्णदीर्घे स्वादिकार्ये च कृते खट्वा इति रूपं सिद्धम्।

पङ्क्तिविवेचनम् -

अजाद्युक्तिर्ङीपो ङीषश्च बाधनाय ''अजाद्यतष्टाप्'' इति सूत्रे अजादि इति गणपाठस्य ग्रहणं किमर्थम् अदन्तत्वात् एव टाप् सिद्धे इति जिज्ञासायामुच्यते-अजाद्यतष्टाप् इति सूत्रे अजादिग्रहणं जातिवाचकशब्दात् ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण प्राप्तस्य ङीष् प्रत्ययस्य बाल-वत्सादि प्रथमवयोवाचकशब्दात् ''वयसिप्रथमे'' इति सूत्रेण प्राप्तस्य ङीप् प्रत्ययस्य बाधनार्थं कृतमस्ति।

अजादिभिः स्त्रीत्वस्य विशेषणान्नेह-पञ्चाजी ननु ''प्रत्ययः'' ''परश्च'' इत्यनुवृत्तेः प्रत्ययविधौ पञ्चम्या उपस्थित्या ''अजाद्यतष्टाप्'' इति सूत्रे ''अजाद्यतः'' इति पदस्य पञ्चम्यङ्गीकरणेन तस्य अनुवृत्तेन प्रातिपदिकात् इत्यनेन सामानाधिकरण्यात् तदन्तविधिना अजादिभ्यः अकारान्तेभ्यः प्रातिपदिकेभ्यः टाप् प्रत्ययो भवेत् इत्यर्थ उचितः, अजादीनामित्यादिषष्ठ्यर्थाङ्गीकारः व्यर्थ एव इति चेन्न- ''पञ्चानामजानां समाहारः'' इति विग्रहे ''तद्धितार्थोत्तरपदसमाहारे

च'' इति समासे पञ्चाज इति जाते समासार्थसमाहारनिष्ठस्त्रीत्वेऽपि अजनिष्ठस्त्रीत्वाभावे टाप् प्रत्ययो न भवति। अपितु ''द्विगोः'' इति सूत्रेण ङीबेव भवति।

**'सम्भस्त्राजिनशणपण्डिेभ्यः फलात्' ( वा. २४९९ )। सम्फला। भस्त्रफला। 'ङ्यापोः-' ( सू.-१००१ ) इति ह्रस्वः।**

**'सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्' ( वा. १४९६ )। सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा।**

**वार्तिकार्थः** – सम्, भस्त्रा, अजिन्, शण, पिण्डादिपूर्वास् फलशब्दात् स्त्रीत्वे टाप् प्रत्ययो भवति।

उदाहरणानि –सम्फला, भस्त्रफला।

सम्फला–समृद्धानि फलानि यस्याः इति विग्रहे समासे सम्फल शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य ''सम्भस्त्राजिनशणपिण्डेभ्यः फलात्'' इति वार्तिकेन टापि अनुबन्धलोपे, सवर्णदीर्घे, सुप्रत्यये, सोर्हल्ङ्यादिलोपे च कृते सम्फला इति रूपं सिद्धम्।

भस्त्रफला – भस्त्रा इव फलानि यस्याः इति विग्रहे समासे भस्त्राफल इति जाते ''ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम्'' इति सूत्रेण भस्त्रा इत्यस्याकारस्यह्रस्वे प्रातिपदिकत्वात् स्त्रीत्वे ''पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च फलात्'' इति वार्तिकेन टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते भस्त्रफला इति रूपं सिद्धम्। अन्योदाहरणानि – अजिनफला, शणफला, पिण्डफला।

**वार्तिकार्थः** – सत्, अञ्च, काण्ड, प्रान्त, शतैकपूर्वकात् पुष्प शब्दात् स्त्रीत्वे द्योत्ये टाप् स्यात्।

उदाहरणानि – सत्पुष्पा, प्राक्पुष्पा, प्रत्यक् पुष्पा।

**रूपलेखनप्रकारः** –

**सत्पुष्पा** – सन्ति पुष्पाणि यस्याः इति विग्रहे समासे सत्पुष्प शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य ''सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्'' इति वार्तिकेन टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते सत्पुष्पा इति रूपं सिद्धम्।

प्राक्पुष्पा–प्रत्यक्पुष्पा–प्राञ्चि पुष्पाणि यस्याः प्रत्यञ्चि पुष्पाणि यस्याः इति विग्रहे समासे प्राक्पुष्प–प्रत्यक्पुष्प शब्दात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ''पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च'' इति सूत्रेण प्राप्तं ङीषं प्रबाध्य ''सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्'' इति वार्तिकेन टाप् प्रत्यये अनुबन्धलोपे ''अकः सवर्णेदीर्घे'' इति सवर्णदीर्घे स्वादिकार्ये प्राक्पुष्पा–प्रत्यक्पुष्पा इति सिध्यति।

अन्योदाहरणानि –काण्डपुष्पा, शतपुष्पा, एकपुष्पा इति रूपाणि भवन्ति।

**'शूद्रा चामहत्पूर्वा जातिः' ( वा. २४००-२४०१ )। पुंयोगे तु शूद्री। 'अमहत्पूर्वा' किम्? महाशूद्री। क्रुञ्चा। उष्णिहा। देवविशा। ज्येष्ठा, कनिष्ठा, मध्यमेति पुंयोगेऽपि। कोकिला जातावपि।**

**वार्तिकार्थः** – अमहत्पूर्वकात् जातिवाचकात् शूद्र शब्दात् स्त्रीत्वे द्योत्ये टाप् स्यात्।

**व्याख्या** – जातेरस्त्रीविषयादयोपधात् इति सूत्रेण प्राप्तस्य जातिलक्षणङीष अपवादस्वरूपमिदं वार्तिकम् ''अजाद्यतष्टाप्'' इति सूत्रे पठितमस्ति। अमहत्पूर्वा–अविद्यमानः महच्छब्दः पूर्वः यस्याः। शूद्रा–शूद्र शब्दात् टाप्स्यात् स्त्रीत्वे जातित्वे वाच्ये।

उदाहरणम् – शूद्रा–शूद्रशब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां जातेरस्त्रीविषयादयोपधात् इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य ''शूद्रा चामहत्पूर्वा जातिः'' इति वार्तिकेन टाप्प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते शूद्रा इति रूपं सिद्धम्।

**पुंयोगे तु शूद्री** – ''शूद्रा चामहत्पूर्वा जातिः'' इति वार्तिके जातेः ग्रहणस्य प्रयोजनमस्ति यत् – शूद्रस्य स्त्री इति विग्रहे ''पुंयोगात्'' शूद्रा चामहत्पूर्वा जातिः इति वार्तिकेन टाप् न भवति अपितु ''पुंयोगादाख्यायाम्'' इति सूत्रेण

ङीषेव भवति। भत्वादल्लोपे, स्वादिकार्ये च शूद्री इति रूपं भवति।

अमहत्पूर्वा किम्–महाशूद्री

ननु वार्तिकेऽस्मिन् अमहत्पूर्वा इति पदं न स्यात् तदा का हानि:? इति जिज्ञासायामुच्यते–महती चासौ शूद्रा च इति विग्रहे ''सन्महत्.'' इति सूत्रेण समासे ''पुंवद्कर्मधारय जातीदेशीयेषु'' इति सूत्रेण पुंवद्भावे महाशूद्र शब्दात् प्रातिपदिकात् स्त्रीत्वे महत्शब्दपूर्वकत्वात् ''शूद्रा चामहत्पूर्वा जाति:'' इति वार्तिकस्य प्रवृत्तिर्न भवति। अत: ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण ङीष् प्रत्यय एव भवति भत्वादल्लोपे स्वादिकार्ये च महाशूद्री इति रूपं भवति।

**क्रुञ्चा** – क्रुञ्च् शब्द: क्विन्प्रत्ययान्त:। हलन्तत्वात् टाप: अप्राप्ति:। किन्तु क्रुञ्च शब्दस्य अजादिगणे पाठात् ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये अनुबन्धलोपे स्वादिकार्ये च कृते क्रुञ्चा इतिरूपं सिद्धम्।

एवमेव उष्णिहा–उष्णिह्+टाप्, देवविशा–देवविश्+टाप् सुप्रत्यये सुलोपे च कृते सिध्यन्ति।

**ज्येष्ठा** – ज्येष्ठस्य स्त्री इति विग्रहे ज्येष्ठ शब्दात् प्रातिपदिकात् स्त्रीत्व विवक्षायां ''पुंयोगादाख्यायाम्'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य 'अजाद्यतष्टाप्' इति सूत्रेण टाप् प्रत्यये अनुबन्धलोपे ''अक: सवर्णे दीर्घ:'' इति सूत्रेण सवर्णदीर्घे स्वादिकार्ये च कृते ज्येष्ठा इति रूपं सिद्धम्।

**कनिष्ठा** – कनिष्ठस्य स्त्री इत्यर्थे कनिष्ठशब्दात् प्रातिपदिकात् स्त्रीत्वे घोत्ये ''पुंयोगादाख्यायाम्'' इति सूत्रेण प्राप्तं ङीषं प्रबाध्य ''अजाघतष्टाप्'' इति सूत्रेण टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते कनिष्ठा इति रूपं भवति।

**मध्यमा** – मध्यमस्य स्त्री इत्यर्थे मध्यम शब्दात् प्रातिपदिकात् स्त्रीत्व विवक्षायां ''पुंयोगादाख्यायाम्'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य ''अजाद्यतष्टाप्'' इति सूत्रेण टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते मध्यमा इति रूपं भवति।

**ज्येष्ठा, कनिष्ठा, मध्यमा** – प्रथमान्त्यमध्यमोत्पन्नकन्यार्थे अदन्तत्वात् टाप् कोकिला–कोकिल जाते: स्त्री इत्यर्थे कोकिल शब्दात् ''जातेरस्त्रीविषयादयोपश्चात्'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते तं प्रबाध्य अजादित्वात् ''अजाद्यतष्टाप्'' इति सूत्रेण टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कोकिला इति रूपं भवति।

**'मूलान्नञ:' ( वा. २५०० )। अमूला।**

**वार्तिकार्थ:** – नञ्पूर्वकात् मूल शब्दात् स्त्रीत्वे घोत्ये टाप् स्यात्।

**अमूला** – अविद्यमानं मूलं यस्या: इति विग्रहे ''नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोप:'' इति समासे उत्तरपदलोपे अमूल शब्दात् प्रातिपदिकात् स्त्रीत्वे ''पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च'' इति सूत्रेण ङीष् प्रत्यये प्राप्ते ''मूलान्नञ:'' इति वार्तिकेन तन्निषेधे टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते अमूला इति रूपं सिद्धम्।

**'ऋन्नेभ्यो ङीप्' ( सू. ३०६ )। कर्त्री। दण्डिनी।** – अजन्तस्त्रीलिङ्गे पठितसूत्रस्य पुन: कथनम्।

**सूत्रार्थ:** – ऋदन्तेभ्य: नान्तेभ्यश्च प्रातिपदिकेभ्य: स्त्रियां ङीप् स्यात्।

**व्याख्या** – ऋत् च न च इति ऋन्न, तेभ्य: ऋन्नेभ्य: इति पञ्चम्यन्तम् पदम्, ङीप् इति प्रथमान्तं विधेयं पदम् ''स्त्रियाम्'' इत्यस्याधिकारोऽस्ति।

उदाहरणानि –

**कर्त्री** – कर्तृ शब्दात् प्रातिपदिकात् स्त्रीत्व विवक्षायाम् ''ऋन्नेभ्यो ङीप्'' इति सूत्रेण ङीप् प्रत्यये अनुबन्धलोपे कर्तृ+ई इति जाते ''इको यणचि'' इति सूत्रेण ऋकारस्य यणादेशेरेफे कर्त्री इति जाते प्रातिपदिकत्वात् स्वादिकार्ये च कृते कर्त्री इति रूपं सिद्धम्।

**दण्डिनी** – दण्डिन् शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''ऋन्नेभ्यो ङीप्'' इति सूत्रेण ङीप् प्रत्यये अनुबन्धलोपे दण्डिन्+ई इति जाते सुप्रत्यये ''हल्ङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण सुलोपे दण्डिनी इति रूपं सिद्धम्।

## ४५५ उगितश्च ४/१/६

**उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात्।**

**भवती। पचन्ती। 'शप्श्यनोः-' ( सू. ४४६ ) इति नुम्। 'उगिदचाम्-' ( सू. ६३१ ) इति सूत्रेऽज्ग्रहणेन 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति नियम्यते। तेनेह न - उखास्रत्। क्विप्। 'अनिदिताम्-' ( सू. ४१५ ) इति नलोपः। पर्णध्वत्। अञ्चतेस्तु स्यादेव-प्राची। प्रतीची।**

**सूत्रप्रकारः** - ङीप्प्रत्ययविधायकं सूत्रमस्ति।

उगितः, च इति पदच्छेदः। ''ऋन्नेभ्योङीप्'' इति सूत्रात् ङीप् इति पदमनुवर्तते।

**सूत्रार्थः** - उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप्स्यात्।

**व्याख्या** - उक् इत् यस्य सः उगित् पञ्चम्येकवचने उगितः। स्त्रियाम्, प्रातिपदिकात् इत्यस्य च अधिकारः। विशेषणात् उगितः पदात् तदन्तविधिना उगिदन्तात् इत्यर्थः। ऋन्नेभ्योङीप् इत्यतः ङीप् इत्यनुवर्तते। उगिदन्तात् प्रातिपदिकात् ङीप् भवति स्त्रीत्वे घोत्ये।

**उदाहरणानि** -

**भवती** - भवत् (भवतु शब्दः सर्वादिगणे) शब्दात् प्रातिपदिकत्वात् स्त्रीत्वे घोत्ये ''उगितश्च'' इति सूत्रेण ङीपि अनुबन्धलोपे शत्रन्तत्वाभावात् शप्श्यनोरिति, सर्वनामस्थानसञ्ज्ञकत्वाभावाच्च उगिदचां सर्वनामस्थानेऽधातोः इति नुम् न भवति। भवती इति जाते ''ङ्याप्प्रातिपदिकात्'' इति नियमात् स्वौजसमौट्ङ इति सुप्रत्यये सोर्लोपे भवती इति रूपं सिद्धम्।

**विशेषः** - शतृप्रत्ययान्ताद् भू+शतृ-भवत् इत्यस्मात् ङीपिशप्श्यनोरिति नुम् भवन्ती इति रूपं भवति।

पचन्ती शतृ प्रत्ययान्ताद् पचत्-शब्दात् स्त्रीत्वे घोत्ये (उगितश्च) इति सूत्रेण ङीप् प्रत्यये अनुबन्धलोपे पतच्+ई इति जाते मिदचोऽन्त्यात्पर इति सूत्र सहायता ''शप्श्यनोर्नित्यम्'' इति सूत्रेण नुमागमे अनुबन्धलोपे सु प्रत्यये सोर्हल्ङ्यादिलोपे पचन्ती इति रूपं सिद्धम्।

**प्रश्नः** - उखास्रत्, पर्णध्वत् इत्यत्र ङीप् कथं न भवति?

**उत्तरम्** - उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रे अज्ग्रहणेन नियम्यते यत् - ''धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव। अतः उखास्रत्, पर्णध्वत् इत्यत्र ''उगितश्च'' इति सूत्रेण ङीप् न भवति।

**उखास्रत्** - उखायाः स्रंसते इति विग्रहे। उखा ङसि उपपदपूर्वकात् स्रंस् धातोः ''अन्येभ्योऽपि दृश्यन्ते'' इति क्विप् प्रत्यये क्विपः सर्वापहारिलोपे ''उपपदमतिङ्'' इति समासे प्रातिपदिकत्वात् ''सुपोधातुप्रातिपदिकायोः'' इति सूत्रेण सुब्लुकि ''अनिदितां हल उपधाया क्ङिति'' इति सूत्रेण नकारस्य लोपे उखास्रस् इति जाते ''एकदेशविकृतमनन्यवत्'' इति परिभाषया प्रातिपदिकात् स्त्रीत्वे ''धातोश्चेदुगित्कार्यतह्यञ्चतेरेव'' इति नियमात् ''उगितश्च'' इत्यस्य प्रसक्तिः न भवति ''स्वौजसमौट्.'' इति सु प्रत्यये ''हल्ङ्याभ्योः'' इति सुलोपे ''वसुस्रंसुध्वंस्वनडुहां दः'' इति सूत्रेण सस्य दकारे ''वाऽवसाने'' इति सूत्रेण विकल्पेन चर्त्वे उखास्रत् इति रूपं भवति। एवमेव पर्णध्वत्-पर्णात् ध्वसंते इति विग्रहे सिद्ध्यति।

**अञ्चतेस्तु स्यादेव** - ''उगिदचां सर्वनामस्थानेऽधातोः'' इति सूत्रे हलन्तपुल्लिङ्गे उक्तम् - अस्मिन् सूत्रे अच्पदग्रहणेन नियमो विधीयते यत् धातोः यदि उगित्कार्यं भवेत्तदा अञ्चु धातोरेव भवेत् इति नियमात् प्राची, प्रतीची इत्यत्र ''उगितश्च'' इति ङीप् भवति।

**प्राची-प्रतीची** - प्र पूर्वकात् अञ्चुधातोः, प्रतिपूर्वकात् अञ्चुधातोः च ''ऋत्विग्दधृक्.'' इति सूत्रेण क्विन् प्रत्यये सर्वापहारिलोपे ''अनिदितां हल उपधाया क्ङिति'' इति सूत्रेण नकारस्य लोपे प्र अच्, प्रति अच् इति जाते 'अचः' इति सूत्रेण धातोः अकारस्य लोपे ''चौ'' इति सूत्रेण प्रोपसर्गस्थस्याकारस्य प्रति इतीकारस्य दीर्घे प्राच्, प्रतीच् इति

जाते "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसञ्ज्ञायां स्त्रीत्वे "उगितश्च" इति सूत्रेण ङीप् प्रत्यये अनु.लोपे स्वादिकार्ये च कृते प्राची, प्रतीची इति रूपं भवति।

## ४५६ वनो र च ४/१/७

**वन्नन्तात् तदन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् स्यात्, रश्चान्तादेशः।**

**वन्निति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणम्। 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' (प. २४)। तेन प्रातिपदिकविशेषणात् तदन्तान्तमपि लभ्यते। सुत्वानमतिक्रान्ता अतिसुत्वरी। अतिधीवरी। शर्वरी।**

**सूत्रप्रकारः** – ङीप्, रश्चान्तादेशविधायकमिदं सूत्रम्।

**पदच्छेदः** – वनः, र, च इति। "ऋन्नेभ्यो ङीप्" इति सूत्रात् ङीप् इति पदमनुवर्तते। वन् इति ङ्वनिप्, क्वनिप्, वनिप् इत्येषां प्रत्ययानां सामान्यरूपेण बोधकः अस्ति। वनः इति पञ्चम्यन्तं पदम्। "स्त्रियाम्" प्रातिपदिकात् इत्यनयोः अधिकारः। प्रत्ययग्रहणे यस्मारस विहितः तदादेः तदन्तस्य ग्रहणम् इति परिभाषया वन् इत्यनेन वन्नन्तग्रहणम्। प्रातिपदिकात् इत्यस्य विशेषणात् वन्नन्तात् तदन्तविधिना वन्नन्तान्तात् प्रातिपदिकात् इत्यस्य ग्रहणं भवति। 'र' इति लुप्तप्रथमान्तं पदम्।

**सूत्रार्थः** – वन्नन्तात् वन्नन्तान्तात् च प्रातिपदिकात् स्त्रियां ङीप् स्यात् रश्चान्तादेशः।

**उदाहरणानि** –

**अतिसुत्वरी** – (षुञ् अभिषवेधातोः "सुयजोर्ङ्वनिप्" इत्यनेन ङ्वनिप् प्रत्यये "ह्रस्वस्य पिति कृति तुक्" इति तुगागमे अनु.लोपे सुत्वन् इति जाते सुत्वानमतिक्रान्ता इति विग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासे प्रातिपदिकत्वात् सुब्लुकि) अतिसुत्वन् शब्दात् प्रातिपदिकात् स्त्रीत्व विवक्षायाम् "ऋन्नेभ्यो ङीप्" इति ङीप् प्रत्यये प्राप्ते तं प्रबाध्य "वनोरच" इति सूत्रेण ङीप् प्रत्यये रश्चान्तादेशे अतिसुत्वरी इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे अतिसुत्वरी इति रूपं सिध्यति।

**अतिधीवरी** – (डुधाञ् धारणपोषणयोः धा धातोः "अन्येभ्योऽपि दृश्यते" इति सूत्रेण क्वनिप् प्रत्यये अनुबन्धलोपे "घुमास्थागापाजहातिसां हलि" इति सूत्रेण धातोराकारस्य ईत्वे धीवन् इति जाते। धीवानमतिक्रान्ता इति विग्रहे "अत्यादयः क्रान्ताघर्थे द्वितीयया" इति समासे प्रातिपदिकत्वात् सुब्लुकि) अतिधीवन् शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां "वनोरच" इति सूत्रेण ङीप् प्रत्यये नस्य रेफादेशे च कृते अतिधीवरी इति जाते प्रातिपदिकत्वात् सु प्रत्यये सोर्हल्ङ्यादिलोपे अतिधीवरी इति रूपं सिद्धम्।

**शर्वरी** – शॄ धातोः "अन्येभ्योऽपि दृश्यते" इति वनिप् प्रत्यये अनु.लोपे "आर्धधातुकं शेषः" इति सूत्रेण आर्धधातुकत्वात् "सार्वधातुकार्धधातुकयो" इति सूत्रेण ऋकारस्य गुणे रपरत्वे शर्वन् इति जाते प्रातिपदिकत्वात् स्त्रीत्वे घोत्ये "वनोरच" इति सूत्रेण ङीप् प्रत्यये रश्चान्तादेशे कृते शर्वरी इति जाते सुप्रत्यये "हल्ङ्याभ्यो दीर्घात्." इति सुलोपे शर्वरी इति रूपं भवति।

**ध्यातव्यः** – प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्। अर्थात् यः प्रत्ययः यस्मात् शब्दात् विधीयते, तदादेस्तदन्तस्य ग्रहणं भवति। अतः प्रकृतसूत्रे वनिति वन्नन्तग्रहणेन वन्नन्तान्तस्य अपि ग्रहणं भवति। अत अतिसुत्वन् शब्दात् अपि 'वनोरच' इत्यस्य प्रवृत्तिर्भवति।

**'वनो न हश इति वक्तव्यम्' (वा. २४०५)। हशन्ताद्धातोर्विहितो यो वन् तदन्तात्तदन्तान्ताच्च प्रातिपदिकान्ङीप् रश्च नेत्यर्थः। 'ओणृ अपनयने' वनिप्, 'विड्वनोः-' (सू. २९८२) इत्यात्त्वम्। अवावा ब्राह्मणी। राजयुध्वा।**

**वार्तिकार्थः** – दृशन्ताद् धातोः विहितः यो वन् तदन्तात् वन्नन्तात् वन्नन्तान्तात् च प्रातिपदिकात् ङीप् रश्च न स्यात्।

उदाहरणानि -

**अवावा** - ओण् धातोः ''अन्येभ्योऽपि दृश्यते'' इति सूत्रेण वनिप् प्रत्यये अनु.लोपे ओण्+वन् इति जाते ''विड्वनोरनुनासिकस्यात्'' इत्यनेन णस्य आत्वे ओ आ वन् इति जाते ''एचोऽयवायावः'' इति ओकारस्य अवादेशे अवावन् इति जाते प्रातिपदिकत्वात् स्त्रीत्वे घोत्ये ''ऋन्तेभ्योङीप्'' इति सूत्रेण ङीप् प्रत्यये प्राप्ते तं प्रबाध्य ''वनोरच'' इति सूत्रेण ङीप् प्रत्यये रश्चान्तादेशे प्राप्ते ''वनो न हश इति वक्तव्यम्'' इति वार्तिकेन तन्निषेधे ''स्वौजसमौट्.'' इति सु प्रत्यये अवावन्+स् इति जाते ''सर्वनामस्थानेचाऽसम्बुद्धौ'' इति उपधादीर्घे ''हल्ङ्याभ्यो.'' इति सुलोपे ''नलोपः प्रातिपदिकान्तस्य इति नकारस्य लोपे अवावा इति रूपं सिद्धम्।

**राजयुध्वा** - राजानं योधितवती इति विग्रहे। भूतार्थे ''राजनि युधि कृञः'' इति क्वनिप् प्रत्यये अनु.लोपे ''उपपदमतिङ्'' इति समासे ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकत्वात् ''सुपो धातुप्रातिपदिकयोः'' इति सुब्लुकि राजयुध्वन् इति जाते स्त्रीत्वे घोत्ये ''ऋन्नेभ्यो ङीप्'' इति ङीप् प्रत्यये प्राप्ते तं प्रबाध्य ''वनोरच'' इति ङीप् प्रत्यये रश्चान्तादेशे प्राप्ते ''वनो न हश इति वक्तव्यम्'' इति वार्तिकेन तन्निषेधे सुप्रत्यये उपधादीर्घे सुलोपे च कृते राजयुध्वा इति रूपं सिद्धम्।

**'बहुव्रीहौ वा' ( वा. २४०७ )। बहुधीवरी, बहुधीवा। पक्षे डाब्वक्ष्यते।**

**वार्तिकार्थः** - बहुव्रीहिसमासे वन्नन्तात् वन्नन्तान्तात् च प्रातिपदिकात् स्त्रियां ङीप् रश्चान्तादेशः वा स्यात्।

इदं वार्तिकम् 'अनो बहुव्रीहेः' इति निषेधसूत्रस्य अपवादरूपेण अस्ति।

**बहुधीवरी** - बहवः धीवानः यस्याः इति विग्रहे बहुव्रीहौ समासे प्रातिपदिकत्वात् सुपोलुकि बहुधीवन् शब्दात् प्रातिपदिकात् ऋन्नेभ्यो 'ङीप्' इति ङीप् प्रत्यये प्राप्ते तं प्रबाध्य ''वनोरच'' इति ङीप् प्रत्यये रश्चान्तादेशे प्राप्ते ''अनो बहुव्रीहेः'' इति सूत्रेण तन्निषेधे तमपि प्रबाध्य ''बहुव्रीहौ'' इति वार्तिकेन विकल्पेन ङीप् प्रत्यये रश्चान्तादेशे कृते बहुधीवरी इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे बहुधीवरी इति रूपं सिद्धम्। अस्य रूपाणि-बहुधीवरी, बहुधीवर्यौ, बहुधीवर्यः इत्यादि।

**पक्षे डाब्वक्ष्यते** - ङीप् विकल्पपक्षे बहुधीवन् शब्दात् प्रातिपदिकात् स्त्रीत्वे ''डाबुभाभ्यामन्यतरस्याम्'' इति वार्तिकेन विकल्पेन डाप् प्रत्यये अनुबन्धलोपे बहहुधीवन्+आ इति जाते 'डित्वसामर्थ्यादभस्यापि टेर्लोपः' इति टेः (अनः) लोपे बहुधीवा इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे बहुधीवा इति रूपं भवति। अयं शब्दः रमावद् भवेत्। यथा-बहुधीवा बहुधीवे, बहुधीवाः इति।

**पक्षे** - ङीप्रश्चान्तादेशडाप्प्रत्ययाभावे बहुधीवन् शब्दात् प्रातिपदिकात् सु प्रत्यये ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इत्यनेन उपधादीर्घे सुलोपे नलोपे च कृते बहुधीवा इति रूपं भवति। अयं शब्दः राजवत् भवेत् यथा - बहुधीवा, बहुधीवानौ, बहुधीवानः।

### ४५७ पादोऽन्यतरस्याम् ४/१/८

**पाच्छब्दः कृतसमासान्तस्तदन्तात् प्रातिपदिकाद् ङीब्वा स्यात्। द्विपदी, द्विपाद्।**

**सूत्रार्थः** - कृतसमासान्तात् पाद्-शब्दान्तात् प्रातिपदिकात् स्त्रियां ङीप् वास्यात्।

**पदच्छेदः** - पादः, अन्यतरस्याम्। ''ऋन्नेभ्यो ङीप्'' इत्यतः ङीप् इत्यनुर्वते।

**व्याख्या** - पादः इति पञ्चम्यन्तं पदम्। कृतसमासान्त-पाद् शब्दस्य ग्रहणमत्रास्ति। स्त्रियाम्, प्रातिपदिकात् इत्यस्य च अधिकारोऽस्ति। प्रातिपदिकात् इत्यस्य पादः इति विशेषणपदम् येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिः भवति। अतः सूत्रस्यार्थो कृतसमासान्त पाद्शब्दान्तात् प्रातिपदिकात् स्त्रियां ङीब्वा स्यात्।

**द्विपदी-द्विपाद्** - द्वौ पादौ यस्याः इति विग्रहे बहुव्रीहौ समासे द्विपाद शब्दात् ''संख्यासुपूर्वस्य'' इति अल्लोपे द्विपाद् शब्दात् कृतसमासान्तात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''पादोऽन्यतरस्याम्'' इति सूत्रेण विकल्पेन ङीप् प्रत्यये अनुबन्धलोपे द्विपाद्+ई इति जाते ''यचि भम्'' इति सूत्रेण भसञ्ज्ञायाम् ''पादः पत्'' इति सूत्रेण पाद् स्थाने पदादेशे

द्विपदी इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे द्विपदी इति रूपं भवति।

ङीप् विकल्पपक्षे-द्विपाद् इति रूपं भवति।

### ४५८ टाबृचि ४/१/९

**ऋचि वाच्यायां पादन्ताट्टाप् स्यात्।**

**द्विपदा ऋक्। एकपदा। 'न षट्स्वस्रादिभ्यः' ( सू. ३०८ )। पञ्च। चतस्रः। 'पञ्च' इत्यत्र नलोपे कृतेऽपि 'ष्णान्ता षट्' ( सू. ३६९ ) इति षट्सञ्ज्ञां प्रति 'नलोपः सुप्स्वर-' ( सू. ३५३ ) इति नलोपस्यासिद्धत्वात् 'न षट्स्वस्रादिभ्यः' ( सू. ३०८ ) इति न टाप्।**

सूत्रप्रकारः-विधिसूत्रमिदम्।

**पदच्छेदः** - टाप् ऋचि। 'पादोऽन्यतरस्याम्' इत्यतः अनुवृत्तः पाच्छब्दः प्रातिपदिकात् इत्यस्य विशेषणः। ''पादोऽन्यतरस्याम्'' इति ङीपोऽपवादोऽयम्।

**सूत्रार्थः** - ऋचि वाच्यायां पाद् शब्दान्तात् प्रातिपदिकात् स्त्रियां टाप् स्यात्।

**व्याख्या** - टाप् ऋचि इति पदद्वयं सूत्रेऽस्ति। टाप् इति प्रथमान्तं विधेयं पदम्। ऋचि इति सप्तम्यन्तं पदम्। अतः सूत्रस्य वृत्तिः भवति-पाद्शब्दान्तप्रातिपदिकात् ऋचि (इत्यर्थे) टाप् स्यात्।

**द्विपदा** - द्वौ पादौ यस्याः ऋचः इति विग्रहे समासे प्रातिपदिकत्वात् सुब्लुकि ''संख्यासुपूर्वस्य'' इति समासान्ताकारलोपे द्विपाद् इत्यस्मात् प्रातिपदिकात् स्त्रीत्वे ऋच्यर्थे ''पादोऽन्यतरस्याम्'' इति विकल्पेन ङीप् प्रत्यये प्राप्ते तं प्रबाध्य 'टाबृचि' इति टापि अनुबन्धलोपे ''यचि भम्'' इति भसञ्ज्ञायाम् ''पादः पत्'' इति सूत्रेण पाद् स्थाने पदादेशे द्विपदा इति जाते स्वादिकार्ये च कृते द्विपदा इति रूपं सिद्धम्।

**एकपदा** - एकः पादः यस्याः ऋचः इत्यर्थे बहुव्रीहौ समासे प्रातिपदिकत्वात् सुब्लुकि ''संख्यासुपूर्वस्य'' इति समासान्ताकारलोपे एकपाद् शब्दात् स्त्रीत्वे ऋच्यर्थे ''पादोऽन्यतरस्याम्'' इति प्राप्तं ङीपं प्रबाध्य ''टाबृचि'' इति टापि अनुबन्धलोपे भत्वात् पादःपदिति पदादेशे एकपदा इति जाते स्वादिकार्ये च कृते एकपदा इति रूपं भवति।

**पञ्च** - पञ्चन् शब्दात् प्रातिपदिकात् स्त्रीत्वे जसि शसि च प्रत्यये ''ष्णान्ताः षट्'' इति सूत्रेण षट्सञ्ज्ञायाम् अन्तरङ्गत्वात् ऋन्नेभ्यो ङीप् इति ङीप् प्रत्यये प्राप्ते ''न षट्स्वस्रादिभ्यः'' इति तन्निषेधे ''षड्भ्यो लुक्'' इति जश्शसोर्लुकि ''नलोपः प्रातिपदिकान्तस्य'' इति नकारस्य लोपे पञ्च इति जाते। पुनः अदन्तत्वात् टापि प्राप्ते ''न षट्स्वस्रादिभ्यः'' इति भूतपूर्वषट्त्वमादाय टापो निषेधे पञ्च इति रूपं सिद्धम्।

**चतस्रः** - चतुर् शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् जसि शसि च ''त्रिचतुरोः स्त्रियां तिसृचतसृ'' इति चतुर् स्थाने चतस्रादेशे ''ऋन्नेभ्यो ङीप्'' इति प्राप्तस्य ङीप् ''न षट् स्वस्रादिभ्यः'' इति निषेधे चतसृ+अस् इति जाते ''इको यणचि'' इति ऋकारस्य यणि रेफे सस्य रुत्वविसर्गौ चतस्रः इति रूपं भवति।

**पङ्क्तिविवेचनम्-पञ्च इत्यत्र............................न टाप्।**

ननु ''न षट्स्वस्रादिभ्यः'' इति सूत्रे ङीप्टापौ अनुवर्तेते। सूत्रेणानेन षट्सञ्ज्ञकेभ्यः स्वस्रादिभ्यः ङीपः टापश्च निषिध्यते। अत्र भवति जिज्ञासा यत् पञ्चन् इत्यस्य नान्तत्वात् ''अजाद्यतष्टाप्'' इत्यनेन टापः प्रसक्तिरेव नास्ति। अतः ङीप् मात्रस्य एव अनुवृत्तिः स्यात्। टापः अनुवृत्तेः किं प्रयोजनम्? पुनश्च पञ्च इत्यत्र नलोपे कृतेऽपि अकारान्तत्वात् टापः प्राप्तिर्भवति तदा ''ष्णान्ता षट्'' इति षट्सञ्ज्ञां प्रति ''नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'' इति नलोपस्यासिद्धत्वात् नान्तत्वात् टापः प्राप्तिर्न भवति तर्हि टापः निषेधार्थं 'न षट्स्वस्रादिभ्य.' इति सूत्रे टाबनुवृत्तिः किमर्थम्? इति चेदुच्यते -

''नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति'' इति सूत्रे टाप्विधेः ग्रहणं नास्ति। अतः जश्शसोर्लुकि नलोपे कृते 'पञ्च' इत्यकारान्तात् ''अजाघतष्टाप्'' इति प्राप्तं टापं प्रति नलोपस्यासिद्धत्वं न भवति। अत टाप् प्रत्ययस्य वारणार्थं

''न षट्स्वस्रादिभ्यः'' इति सूत्रे टापं अनुवृत्य निषेधः क्रियते।

### ४५९ मनः ४/१/११

**मन्नन्तान्न ङीप्। सीमा। सीमानौ।**

सूत्रप्रकारः - विधिनिषेधसूत्रम्।

**अनुवृत्तिः -** ''न षट्स्वस्रादिभ्यः'' इत्यतः नेति ''ऋन्नेभ्योङीप्'' इत्यतः ङीप् इति चानुवर्तते।

**सूत्रार्थः -** मन्नन्तात् प्रातिपदिकात् स्त्रियां ङीप् न स्यात्।

**व्याख्या -** 'मनः' इति मनिन्प्रत्ययस्य मनः पञ्चम्येकवचनम्। प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम् इति परिभाषया तदन्तं गृह्यते प्रातिपदिकात् स्त्रियाम् इत्यस्य च अधिकारः। अतः सूत्रान्वयो भवति यत् मन्नन्तात् प्रातिपदिकात् स्त्रियां ङीप् न स्यात्।

**उदाहरणानि -**

**सीमा** - षिञ् बन्धने धातोः ''नामन्-सीमन्-व्योमन्-रोमन्-पाप्मन्-ध्यानम्'' इति औणादिकसूत्रेण मनिन् प्रत्यये प्रकृतेदीर्घश्च कृते सीमन् इति जाते प्रातिपदिकत्वात् स्त्रीत्वे ''ऋन्नेभ्यो ङीप्'' इति सूत्रेण ङीप् प्रत्ययेप्राप्ते ''मनः'' इति सूत्रेण तन्निषेधे सु प्रत्यये ''सर्वनामस्थाने चाऽसम्बुद्धौ इति सूत्रेण उपधादीर्घे सोर्हल्ङ्यादिलोपे ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नलोपे सीमा इति रूपं सिद्धम्। अस्य शब्दस्य रूपाणि राजवद् भवति। यथा - सीमा, सीमानौ सीमानः इत्यादि।

### ४६० अनो बहुव्रीहेः ४/१/१२

**अन्नन्ताद्बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ।**

सूत्रप्रकारः-विधिनिषेधसूत्रमिदम्।

**अनुवृत्तिः -** न षट् स्वस्रादिभ्यः इत्यतः नेति, ऋन्नेभ्यो ङीप् इत्यतः ङीप् इति चानुवर्तते।

**सूत्रार्थः -** अन्नन्तात् प्रातिपदिकात् बहुव्रीहेः स्त्रियां ङीप् न भवति।

**व्याख्या -** अनः इति पञ्चम्यन्तं पदं ''बहुव्रीहेः'' इति पञ्चम्यन्तस्य विशेषणम्। ''येनविधिस्तदन्तस्य'' इत्यनेन तदन्तविधिना अन्नन्तात् इति भवति। प्रातिपदिकात्, स्त्रियाम् इत्यस्याधिकारश्च। अतः सूत्रान्वयो भवति - अन्नन्तात् प्रातिपदिकात् बहुव्रीहेः स्त्रियां न ङीप् इति।

**उदाहरणानि -**

**बहुयज्वा** - बहवः यज्वानो यस्याः इति विग्रहे ''अनेकमन्यपदार्थे इति समासे प्रातिपदिकत्वात् सुब्लुकि स्त्रीत्वविवक्षायाम् ''ऋन्नेभ्यो ङीप्'' इति सूत्रेण ङीप् प्रत्ययो प्राप्ते ''अनो बहुव्रीहेः'' इति सूत्रेण तन्निषेधे सु प्रत्यये ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे ''हल्ङ्याभ्यो दीर्घात्.'' इति सुलोपे ''नलोपः प्रातिपदिकान्तस्य'' इति नस्य लोपे बहुयज्वा इति रूपं सिद्धम्।

### ४६१ डाबुभाभ्यामन्यतरस्याम् ४/१/१३।।

**सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात्। सीमा। सीमे, सीमानौ। दामा। दामे, दामानौ। 'न पुंसि दाम' इत्यमरः। बहुयज्वा। बहुयज्वे, बहुयज्वानौ।**

सूत्रप्रकारः - विधिसूत्रमिदम्।

**पदच्छेदः -** डाप्, उभाभ्याम्, अन्यतरस्याम् इति पदच्छेदः।

**सूत्रार्थः -** मन्नन्तात् प्रातिपदिकात् अन्नन्तात् बहुव्रीहेश्च प्रातिपदिकात् स्त्रियां वा डाप् स्यात्।

**व्याख्या -** डाप् इति विधेयम् प्रत्ययम्। 'उभाभ्याम्' इति पदेन 'मनः' अनो बहुव्रीहेः इति सूत्रद्वयस्य ग्रहणं भवति। ''अन्यतरस्याम्'' इति ''वा'' इत्यर्थस्य वाचकः।

**उदाहरणानि –**

**सीमा** – सीमन् शब्दात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ''ऋन्नेभ्यो ङीप्'' इति प्राप्तस्य ङीपो ''मनः'' इति निषेधे तें निषेधमपि प्रबाध्य ''डाबुभाभ्यामन्यतरस्याम्'' इति विकल्पेन डाप् प्रत्यये अनुबन्धलोपे ''डित्वस्सामर्थ्यादभस्यापि टेर्लोपः'' इति नियमात् टेरनो लोपे सीमा इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे सीमा इति रूपं भवति।

**सीमे-सीमानौ** – सीमन् शब्दात् प्रातिपदिकात् स्त्रीत्वे ''ऋन्नेभ्योङीप्'' इति प्राप्तं ङीपं प्रबाध्य ''डाबुभाभ्यामन्यतरस्याम्'' इति विकल्पेन डाप् प्रत्यये अनु. लोपे सीमन्+आ इति जाते ''डित्वसामर्थ्यात्'' इति टेरनो लोपे प्रातिपदिकत्वात् 'स्वौजसमौट्.' इति औ विभक्तौ सीमा+औ इति जाते ''औङ आपः'' इति औ स्थाने शी आदेशे अनु.लोपे ''आद्गुणः'' इति सूत्रेण गुणे सीमे इति रूपं सिद्धम्।

डाप्प्रत्ययविकल्पपक्षे सीमन्+औ इति स्थिते ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे सीमानौ इति रूपं भवति।

एवमेव दामन् शब्दात् – दामा, दामे-दामानौ, दामाः-दामानः इत्यादि भवति।

**बहुयज्वा** – बहवः यज्वानो यस्या इति विग्रहे बहुव्रीहि समासे बहुयज्वन् शब्दात् प्रातिपदिकात् स्त्रीत्वे ''ऋन्नेभ्योङीप्'' इति प्राप्तस्य ङीपः ''अनोबहुव्रीहेः'' इति निषेधे तं प्रबाध्य ''डाबुभाभ्यामन्यतरस्याम्'' इति विकल्पेन डाप्प्रत्यये अनु.लोपे बहुयज्वन्+आ इति जाते 'डित्वसामर्थ्यादभस्यापि टेर्लोपः'' इति नियमात् टिलोपे (अनो लोपे) बहुयज्वा इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे बहुयज्वा इति रूपं भवति। (रमावत् रूपम्)।

डापो विकल्पपक्षे सुप्रत्यये, उपधादीर्घे, सुलोपे नलोपे च कृते बहुयज्वा इत्येव रूपम्। (राजवत् रूपम्)

औ विभक्तौ डाप्रत्यये टिलोपे औङः श्यादेशे 'आद्गुणः' इति गुणे बहुयज्वे इति रूपं भवति। पक्षे राजवत् रूपम्।

### ४६२ अन उपधालोपिनोऽन्यतरस्याम् ४/१/२८

**अन्नन्ताद् बहुव्रीहेरुपधालोपिनो वा ङीप् स्यात्।**

**पक्षे डाब्ङीब्निषेधौ। बहुराज्ञी, बहुराजा। बहुराज्ञ्यौ, बहुराजे, बहुराजानौ।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – अनः, उपधालोपिनः, अन्यतरस्याम् इति च्छेदः। 'बहुव्रीहेरूधसोङीव्' इति सूत्रात् बहुव्रीहेः इत्यनुवर्तते। ''संख्याव्ययादेर्ङीप्'' इति सूत्रात् ङीप् इत्यनुवर्तते।

**सूत्रार्थः** – अन्नन्ताद् बहुव्रीहेः उपधालोपिनो वा ङीप् स्यात्।

**व्याख्या** – 'अनः' इति पञ्चम्यन्तं पदम्। प्रातिपदिकात् इत्यस्याधिकारः, तस्य अनः इति विशेषणः। 'येन विधिस्तदन्तस्य' इति तदन्तविधिना अन्नन्ताद् इत्यर्थः। उपधालोपोऽस्ति अस्य इति तस्मात् उपधालोपिनः इति पदं पञ्चम्यन्तेन 'अन्नन्ताद्' इत्येनान्वितो भवति। ''स्त्रियाम्'' इत्यस्य अधिकारः। अतः सूत्रान्वयो भवति-उपधालोपिनः, अन्नन्ताद् बहुव्रीहेः प्रातिपदिकात् वा ङीप् स्यात्।

**उदाहरणानि –**

**बहुराज्ञी** – बहवः राजानः यस्याम् इति विग्रहे ''अनेकमन्यपदार्थे'' इति समासे प्रातिपदिकत्वात् सुब्लुकि बहुराजन् शब्दात् प्रातिपदिकात् स्त्रीत्वे घोत्ये ''ऋन्नेभ्यो ङीप्'' इति ङीप्रत्यये प्राप्ते तं प्रबाध्य ''अन उपधालोपिनोऽन्यतरस्याम्'' इत्यनेन विकल्पेन ङीप् प्रत्यये अनुबन्धलोपे भसञ्ज्ञकत्वाद् ''अल्लोपोऽनः'' इति टेरनो अकारस्य लोपे बहुराज्न्+ई इति जाते ''स्तोः श्चुना श्चुः'' इति नस्य श्चुत्वे ञकारे 'जञोर्ज्ञः' इति ज्ञत्वे बहुराज्ञी इति जाते सुप्रत्यये ''हल्ङ्याभ्योदीर्घात्.'' इति सुलोपे बहुराज्ञी इति रूपं भवति।

**पक्षे बहुराजा** – बहुराजन् शब्दात् स्त्रीत्वे डाबुभाभ्याम् अन्यतरस्याम् इति सूत्रेण विकल्पेन डाप् प्रत्यये अनुबन्धलोप

'डित्व सामर्थ्यादभस्यापि टेर्लोपः' इति नियमात् टेरनो लोपे बहुराजा इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे बहुराजा इति रूपं सिद्धम्।

**बहुराज्ञ्यौ-बहुराजे-बहुराजानौ –**

बहुराजन् शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायामौप्रत्यये "ऋन्नेभ्योङीप्" इति प्राप्तं ङीपं प्रबाध्य "अन उपधालोपिनोऽन्यतरस्याम्" इति विकल्पेन ङीपि, भसञ्ज्ञायामल्लोपोऽनः इति अनः अल्लोपे "स्तोः श्चुना श्चुः" इति नस्य श्चुत्वे ञकारे बहुराज्ञी+औ इति जाते "इको यणचि" इति ईकारस्य यणादेशे बहुराज्ञ्यौ इति रूपं भवति।

पक्षे "डाबुभाभ्यामन्यतरस्याम्" इति डापि टेर्लोपे "औङ आपः" इति औङः श्यादेशे बहुराजा+ई इति जाते "आद्गुणः" इति सूत्रेण आकारेकारयोः गुणे एत्वे बहुराजे इति रूपं भवति डाबभावे पक्षे-बहुराजन् शब्दात् "ऋन्नेभ्यो ङीप्" इति प्राप्तं ङीपं "अनोबहुव्रीहेः" इति निषेधे सर्वनामस्थानेचाऽसम्बुद्धौ इति उपधादीर्घे बहुराजानौ इति रूपं भवति।

## ४६३ प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ७/३/४४

**प्रत्ययस्थात् ककारात् पूर्वस्याकारस्येकारः स्यादापि परे, स आप् सुपः परो न चेत्। सर्विका। कारिका। अतः किम्? नौका। प्रत्ययस्थात् किम्? शक्नोतीति शका। असुपः किम्? बहुपरिव्राजका नगरी। कात् किम्? नन्दना। पूर्वस्य किम्? परस्य मा भूत्। कटुका। अत इति तपरः किम्? राका। आपि किम्? कारकः।**

**सूत्रप्रकारः**-विधिसूत्रमिदम्।

**सूत्रार्थः** – प्रत्ययस्थात्ककारात्पूर्वस्याकारस्य इत्वं स्यादापि स आप् सुपः परो न चेत्।

**व्याख्या** – प्रत्ययस्थात् कात् पूर्वस्य अतः इत् आपि असुपः इति पदच्छेदः। प्रत्यये तिष्ठति इति प्रत्ययस्थः, तस्मात् प्रत्ययस्थात् इति पदं कात् इत्यस्य विशेषणम्। पूर्वस्य-पूर्ववर्तिनः, अतः-अवर्णस्य इत्-इकारः। 'आपि' इत्यत्र निमित्तसप्तमी। 'असुपः' इति पञ्चम्यन्तं पदम्। असमर्थसमासः। न सुप् असुप्, तस्मात् असुपः। असुपः आपि-इत्युक्ते सुपः परस्मिन् आपि न इत्यर्थः। कात्-ककारात् पूर्वस्य।

अतः सूत्रान्वयो भवति-प्रत्यये विघमानात् कवर्णात् पूर्वस्याकारस्य इकारः स्यादापि (टापि, डापि, चापि) परे, सुपः परस्मिन् आपि सति न।

**उदाहरणानि –**

**सर्विका** – सर्व शब्दात् "अजाद्यतष्टाप्" इति सूत्रेण टापि सवर्णदीर्घे सर्वा इति जाते "अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यकचि सर्वका इति जाते "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" इति ककारात् पूर्वस्याकारस्य इत्वे सु प्रत्यये सोर्हल्ङ्यादिलोपे सर्विका इति रूपं भवति।

**कारिका** – कृ धातोः 'ण्वुल्तृचौ' इति ण्वुल् प्रत्यये अनु.लोपे 'युवोरनाकौ" इति वु स्थाने अकादेशे "अचो ञ्णिति" इति ऋकारस्य वृद्धौ रपरत्वे च कृते कारक इत्यस्मात् "अजाद्यतष्टाप्" इति टाप् प्रत्यये अनु.लोपे सवर्णदीर्घे कारका इति जाते "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" इति सूत्रेण रेफादुत्तरस्य ककारात्पूर्वस्याकारस्य इत्वे कारिका इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे कारिका इति रूपं भवति।

अतः किम्? नौका- "प्रत्ययस्थात्." इति सूत्रे अतः इति पदं न स्यात्तदा का हानिः? इति चेदुच्यते-नौ शब्दात् स्वार्थे क प्रत्यये टापि नौका इत्यत्र "औकारस्यापि" इत्वं प्राप्नोति तन्न भवेत्। अतः सूत्रे अतः इति पदस्य ग्रहणमस्ति।

प्रत्ययस्थात् किम्? शक्नोतीति शका – 'प्रत्ययस्थात्॰' इति सूत्रे प्रत्ययस्थात् इति पदं न स्यात्तदा शका इत्यत्र धातोः ककारात्पूर्वकम् अपि इत्वस्य प्राप्तिर्भवति तन्न भवेत्।

असुपः किम्? बहुपरिव्राजका-यदि सूत्रे 'असुपः इति प्रसज्यप्रतिषेध नञ्सहितः सुपः ग्रहणं न स्यात्तदा बहवः परिव्राजकाः यस्यामिति विग्रहे बहुव्रीहिसमासे प्रातिपदिकत्वात् सुब्लुकि टापि बहुपरिव्राजकाः इत्यत्र प्रत्ययलक्षणत्वात् आप् सुपः परोऽस्ति। अत इत्वं न स्यात् अतः असुपः इति ग्रहणं सूत्रे कृतमस्ति।

कात् किम्? नन्दना - यदि प्रत्ययस्थात् इति सूत्रे 'कात्' इति पदं न स्यात् तदा का हानिः? इति चेदुच्यते नन्दि+ल्यु-अन+टाप् = नन्दना इति जाते अत्र इत्वस्य प्रातिर्भवति तन्न भवेत्।

पूर्वस्य किम्? परस्य भूत् - कटुका इत्यत्र कटु+क+टाप् इत्यत्र क प्रत्यये ''वर्णादाङ्गं बलीयः इति सवर्णदीर्घं बाधित्वा इत्वस्य प्रातिर्भवति तन्न भवेत्।

अतः इति तपरः किम्? राका-रा शब्दात् औणादिकप्रत्यये टाप् प्रत्यये च राका इत्यत्र आकारस्यापि इत्वस्यापि प्राप्तिर्भवति तन्न भवेत्।

आपि किम्? कारकः- यदि सूत्रे आपि इति पदं न स्यात् तदा कृ धातोः ण्वुलप्रत्यये कारकः इत्यत्रापि इत्वस्य प्राप्तिर्भवति तन्नभवेत्।

**'मामकनरकयोरुपसंख्यानम्' ( वा. ४५२४ )**। मामिका। नरान् कायतीति नरिका।

**वार्तिकार्थः** - मामकनरकयोः शब्दयोः ककारात्पूर्वस्याकारस्य इत्वं स्यादापि।

**उदाहरणानि** -

**मामिका** - मम इयमित्यर्थे ''युष्मदस्मदोरन्यतरस्यामिति अणि 'तवकममकावेकवचने' इति मम स्थाने ममकादेशे आदिवृद्धौमामक इत्यस्मात् ''अजाघतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे ''मामकनरकयोरुपसङ्ख्यानम्'' इत्यकारस्येत्वे मामिका इति जाते सुप्रत्यये सोर्हल्ङ्याादिलोपे मामिका इति रूपं भवति।

**नरिका** - नरोपपदपूर्वकात् कै धातोः ''आदेच उपदेशेऽशिति'' इत्यात्वे क प्रत्यये ''आतोलोप इटि च'' इत्याकारलोपे उपपदसमासे सुब्लुकि नरक इति जाते ''अजाघतष्टाप्'' इति टापि सवर्णदीर्घे नरका इत्यत्र ''मामकनरकयोरुपसङ्ख्यानम्'' इति वार्तिकेन सुप्रत्यये सोर्हल्ङ्याादिलोपे नरिका इति रूपं भवति।

**'त्यक्त्यपोश्च' ( वा. ४५२५ )। दाक्षिणात्यिका। इहत्यिका।**

**वार्तिकार्थः** - त्यकृत्यपोः प्रत्ययान्तयोः प्रत्ययस्थात् ककारात्पूर्वस्यकारस्य इत्वं स्यात् ''वार्तिकमिदम्'' उदीचामातः स्थाने यकपूर्वायाः इति सूत्रे भाष्ये स्थितम दाक्षिणात्मिका- 'दक्षिणस्यां दिशि अदूरे वा' इत्यर्थेदक्षिण शब्दात् ''दक्षिणादाच्'' इत्याच्प्रत्यये ''तद्धितश्चासर्वविभक्तिः'' इत्यव्ययत्वम्। दक्षिणा शब्दात् ''दक्षिणापुरसस्त्यक्'' इति त्यकि ''किति च'' इत्यादिवृद्धौ। दाक्षिणात्यक इत्यस्मात् ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये सवर्णदीर्घे स्वार्थे कप्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे त्यकृत्यपोश्च इति वार्तिकेन अकारस्येत्वे स्वादिकार्ये च कृते दाक्षिणात्मिका इति रूपं सिध्यति।

**इहत्यिका** - इह इत्यव्ययात् ''अव्ययात्त्यप्'' इति त्यपि टापि सवर्णदीर्घे इहत्या इति जाते स्वार्थे क प्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे पुनः ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे इहत्यका इति जाते 'त्यकृत्यपोश्च' इति यकारादुत्तरस्याकारस्य इत्वे सुप्रत्यये सोर्हल्ङ्याादिलोपे इहत्यिका इति रूपं भवति।

**४६४ न यासयोः ७/३/४५**

**यत्तदोरस्येन्न स्यात्। यका। सका। यकाम्। तकाम्।**

**सूत्रप्रकारः - विधिनिषेधसूत्रम्।**

**पदच्छेदः** - ''प्रत्ययस्थात्.'' इत्यतः अत इति इदिति चानुवर्तते।

**सूत्रार्थः**- प्रत्ययस्थात्ककारात्पूर्वयोः यत्तदोरस्य इत्वें न स्यादापि।

**व्याख्या** - यासयोः-यत्तदोः स्त्रीलिङ्गे प्रथमैकवचनान्तयोः या, सा इत्यनयोः षष्ठी द्विवचने रूपं भवति। यासयोः

इत्युक्ते यत्त दौ विवक्षितौ न तु कृतटाप्रत्ययान्तयोः इति भाष्यकारस्य कथनम्। प्रत्ययस्थात् इत्यतः आपि इत्यप्यनुवर्तते। अतः सूत्रान्वयो भवतियत्तदोः प्रत्ययस्थात् ककारात्पूर्वस्याकारस्य इत्वं न स्यादिापि परे।

**यका** – यत् शब्दात् सु प्रत्यये ''अव्ययसर्वनाम्नामकच् प्राक् टेः'' इत्यकच्प्रत्यये यकद् स इति जाते ''त्यदादीनामः'' इत्यत्वे ''अतो गुणे'' इति पररूपे यक स् इति जाते स्त्रीत्वविवक्षायाम् ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे सुलोपे यका इति जाते ''प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः'' इत्यनेन इत्वे प्राप्ते ''न यासयोः'' इति तन्निषेधे यका इति रूपं भवति।

**सका** – तद् शब्दादकचि तकद् इत्यस्मात् स्त्रीत्वे द्योत्ये सुप्रत्यये ''त्यदादीनामः'' इत्यत्वे 'अतो गुणे' इति पररूपे तद स् इति जाते ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये सवर्णदीर्घे ''तदोः सः सावनन्त्ययोः'' इति तकारस्य सकारे सका स् इति जाते। प्रत्ययस्थादिति प्राप्तस्य इत्वस्य ''न यासयोः'' इति निषेधे सोर्हल्ङ्यादिलोपे सका इति रूपं भवति।

**'त्यकनश्च निषेधः' ( वा. ४५२६ ) उपत्यका। अधित्यका।**

**वार्तिकार्थः** – त्यकन्प्रत्ययान्तात् ककारात्पूर्वस्याकारस्येत्वं न स्यात्।

**उदाहरणानि –**

**उपत्यका** – अधित्यका–उप अधि इत्याभ्याम् ''उपाधिभ्यां त्यकन्नासन्नारूढयोः'' इति त्यकन् प्रत्यये स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे च उपत्यका, अधित्यका इति। प्रत्ययस्थादिति प्राप्तस्येत्वस्य ''त्यकनश्च निषेधः'' इति निषेधे स्वादिकार्ये च उपत्यका अधित्यका इति रूपम् भवति।

उपत्यका – पर्वतसमीपस्थ भूमिः। अधित्यका–पर्वतस्योर्ध्वभूमिः।

**'आशिषि वुनश्च न' ( वा. ४५२८ )। जीवका। भवका।**

**वार्तिकार्थः** – आशिषि अर्थे वुनोऽकः अकारस्येत्वं न स्यात्।

**जीवका-भवका**– जीव् धातोः भूधातोश्च ''आशिषि च'' इति वुन्प्रत्यये 'युवोरनाकौ' इति वु स्थाने अकादेशे, भू धातोरूकारस्य ''सार्वधातुकार्थधातुकयोः'' इति गुणे ''एचोऽयवायावः'' इति अवादेशे जीवक् भवक इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये सवर्णदीर्घे जीवका भवका इति जाते ''प्रत्ययस्थात्.'' इति प्राप्तस्येत्वस्य ''आशिषि वुनश्च न'' इति वार्तिकेन निषेधे स्वादिकार्ये च कृते जीवका–भवका इति रूपं सिद्धम्।

**'उत्तरपदलोपे न' ( वा. ४५२९ )। देवदत्तिका, देवका।**

**वार्तिकार्थः** – उत्तरपदलोपे प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येत्वं न स्यात्।

**देवदत्तिका-देवका**– देवदत्त शब्दात् स्वार्थे क प्रत्यये ''अनजादौ च विभाषालोपो वक्तव्यः'' इति दत्तशब्दास्य लोपे देवक इत्यस्मात् टापि सवर्णदीर्घे ''प्रत्यस्थात्.'' इति प्राप्तस्येत्वस्य ''उत्तरपदलोपेनं इति वार्तिकेन तन्निषेधे सुप्रत्यये सोर्हल्ङ्यादिलोपे देवका इति रूपं भवति।

उत्तरपद (दत्त) लोपविकल्पपक्षे ''प्रत्ययस्थात्.'' इतीत्वे देवदत्तिका इति रूपं भवति।

**'क्षिपकादीनां च' ( वा. ४५३० )। क्षिपका। ध्रुवका। कन्यका। चटका।**

**वार्तिकार्थः** – क्षिपकादिगणपठितशब्दानां कात्पूर्वस्येत्वं न स्यादापि।

**क्षिपका** –क्षिप् धातोः क प्रत्यये क्षिप इति जाते स्त्रीत्वेद्योत्ये टाप् प्रत्यये स्वार्थे क प्रत्यये 'केऽणः' इति ह्रस्वे पुनष्टापि सवर्ण दीर्घे ''प्रत्ययस्थात्.'' इति प्राप्तस्येत्वस्य ''क्षिपकादीनां च'' इति निषेधे सुप्रत्यये सोहल्ङ्यादिलोपे क्षिपका इति रूपं सिद्धम्।

**ध्रुवका** –ध्रुव् धातोः क प्रत्यये, ध्रुधातोर्वा अचि गाङकुटादिभ्यो कित् ङित् इति गुणनिषेधे उवङि ध्रुव शब्दात् टापि सवर्णदीर्घे स्वार्थे क प्रत्यये केऽणः इति ह्रस्वे पुनष्टापि सवर्णदीर्घे प्रत्ययस्थादिति प्राप्तस्येत्वस्य ''क्षिपकादीनां च'' इति निषेधे सोर्हल्ङ्यादिलोपे रूपं भवति।

**कन्यका** – कन्या शब्दात् स्वार्थे क प्रत्यये 'केऽण:' इति ह्रस्वे पुनश्चापि सवर्णदीर्घे "कन्यका इति जाते" प्रत्ययस्थात्कात्." इति सूत्रेण प्राप्तस्येत्वस्य "क्षिपकादीनाञ्च" इति निषेधे स्वादिकार्ये च रूपं भवति।

**चटका** – चट् धातोरच्, टापि, सवर्णदीर्घे क प्रत्यये, केऽण:' इति ह्रस्वे पुनश्चापि सवर्णदीर्घे चटका इति जाते "प्रत्ययस्थात्." इतीत्वे प्राप्ते "क्षिपकादीनाञ्च" इति वार्तिकेन तन्निषेधे चटका इति रूपं सिद्धम्।

**'तारका ज्योतिषि' ( वा. ४५३१ )। अन्यत्र तारिका।**

**वार्तिकार्थ:** – ज्योतिषि (नक्षत्रे) अर्थे विद्यमानात् तारका इत्यस्मात् इत्वं न स्यात्।

**तारका** – तृ धातो: ण्वुलि वोरकादेशे ऋकारस्य वृद्धौ आकारे रपरत्वे च तारक इत्यस्मात् स्त्रीत्वे द्योत्ये नक्षत्रे अर्थे टापि सवर्णदीर्घे तारका इति जाते "प्रत्ययस्थात्कात्पूर्वस्यात." इति प्राप्तस्य इत्वस्य "तारका ज्योतिषि" इति निषेधे सुप्रत्यये सोर्हल्ङ्याभ्योदीर्घात्." इति सुलोपे तारका इति रूपं सिद्धम्। अन्यत्रार्थे प्रत्ययस्थादिति अस्य इत्वे 'तारिका' इति रूपं भवति।

**'वर्णका तान्तवे' ( वा. ४५३२ )। अन्यत्र वर्णिका।**

**वार्तिकार्थ:** – तान्तवेऽर्थे विद्यमानात् वर्णका इत्यस्मात् इत्वं न भवति। तान्तव:–तन्तुविकार:।

उदाहरणम् –

**वर्णका** – (वर्णिधातोर्ण्वुल्, वोरकादेश:, 'णेरनिटि' इति णिलोपे) वर्णक शब्दात् तन्तुविकारे अर्थे स्त्रीत्वे अजाद्यतष्टाप् इति टापि सवर्णदीर्घे वर्णका इति जाते प्रत्ययस्थादिति प्राप्तस्येत्वस्य 'वर्णका तान्तवे' इति निषेधे स्वादिकार्ये च रूपं भवति।

अन्यत्र 'स्तोत्री' इत्याद्यर्थे प्रत्ययस्थादिति इत्वम् वर्णिका इति भवति।

**'वर्तका शकुनौ प्राचाम्' ( वा. ४५३३ )। उदीचां तु वर्तिका।**

**वार्तिकार्थ:** – प्राचां शकुन्यर्थे (पक्षी विशेषार्थे) विद्यमानात् वर्तका इत्यस्मात् इत्वं न स्यादापि।

उदाहरणम् –

**वर्तका** – ण्यन्तात् वर्तिधातोर्ण्वुलि वोरकि वर्तक इत्यस्मात् स्त्रियां द्योत्यायां शकुनौ अर्थे टापि सवर्णदीर्घे वर्तका इति जाते प्रत्ययस्थात् "इति प्राप्तस्येत्वस्य" वर्तका शकुनौ प्राचाम् इति निषेधे स्वादिकार्ये च वर्तका इति रूपं भवति।

उदीचां मते शकुनौ एव अर्थे 'प्रत्ययस्थात्' इति इत्वे वर्तिका इति रूपं भवति।

**'अष्टका पितृदेवत्ये' ( वा. ४५३४ )। अष्टिकान्या।**

**वार्तिकार्थ:** – पितृदेवत्ये अर्थे विद्यमानात् अष्टका इत्यस्मात् इत्वं न स्यात्।

उदाहरणम् –

**अष्टका** – अश्नन्ति ब्राह्मणा: पित्रर्थे यस्याम् इत्यर्थे अश् भोजने धातो: तकन् प्रत्यये "व्रश्चभ्रस्ज." इति सूत्रेण शस्य षत्वे, ष्टुत्वे अष्टक इत्यस्मात् टापि सवर्णदीर्घे सुप्रत्यये "प्रत्ययस्थात्." इति प्राप्तस्येत्वस्य "अष्टका पितृदेवत्ये" इति वार्तिकेन निषेधे सोर्हल्ङ्यादिलोपे अष्टका इति रूपं सिद्धम्।

अन्यार्थे – अष्टिका इति रूपं भवति।

**'सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्' ( वा. ४५३५ )। इह वा अ इतिच्छेद:। कात्पूर्वस्याकारादेशो वेत्यर्थ:। तेन पुत्रिकाशब्दे ङीन: इवर्णस्य पक्षेऽकार:। अन्यत्रेत्त्वबाधनार्थ – मकारस्यैव पक्षेऽकार:। सूतिका, सूतका इत्यादि।**

**वार्तिकार्थ:** – सूतका, पुत्रिका वृन्दारका शब्दानां कात्पूर्वकस्यावर्णस्य अत्वं वा स्यात्।

**व्याख्या** – वार्तिकेऽस्मिन् 'वेति' पदे 'वा अ = वा' इति प्रश्लेष:। वा+इति वेति। "प्रत्ययस्थात् कात्" इति सूत्रत: 'कात्पूर्वस्य' इत्यनुवर्तते। अति इति निवृत्तम् यतोहि पुत्रिका शब्दे कात्पूर्वम् अत्वं नास्ति। इह वा अ इति छेद:।

कात्पूर्वस्याकारादेशो वेत्यर्थः।

**उदाहरणानि –**

**सूतका** – षू धातोः ''धात्वादेः षः सः'' इति सत्वे सू धातोः क्त प्रत्यये सूत शब्दाट्टापि सूता इति जाते स्वार्थे क प्रत्यये 'केऽणः' इति ह्रस्वे सूतक शब्दात् पुनः ''अजाद्यतष्टाप्'' इति प्राप्तमित्वं प्रबाध्य ''सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्'' इति वार्तिकेन विकल्पेन कात्पूर्वस्याकारस्य अत्वे सूतका इति रूपं भवति।

अत्वविकल्पपक्षे-प्रत्ययस्थात् कात् पूर्वस्यात इति इत्वं भवति सूतिका इति सिध्यति।

**पुत्रका** – पुत्र शब्दात् ''शार्ङ्गरवाद्यञो ङीन्'' इति ङीन् प्रत्यये पुत्री इति जाते स्वार्थे कप्रत्यये पुत्री क इति जाते 'केऽणः' इति ह्रस्वे पुत्रिक इति जाते टापि सवर्णदीर्घे पुत्रिका इति जाते ''सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्'' इति वार्तिकेन ककारात्पूर्वस्येकारस्य अत्वे पुत्रका इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे पुत्रका इति रूपं भवति।

विकल्पपक्षे – ''प्रत्ययस्थात्'' इत्यनेन इत्वे कृते पुत्रिका इति रूपं भवति।

**वृन्दारका – वृन्दारिका** – वृन्दमस्ति अस्य इति विग्रहे ''भृङ्गवृन्दाभ्यामारकन्'' इति आरकन् प्रत्यये अनु.लोपे वृन्दारक इत्यस्मात् स्त्रीत्वे द्योत्ये अजाद्यतष्टाप् इति टाप् प्रत्यये सवर्णदीर्घे प्रत्ययस्थात्कात्. इति प्राप्तमित्वं प्रबाध्य ''सुतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्'' इति विकल्पेन रकारोत्तरस्याकारस्य विकल्पेनात्वे वृन्दारका इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे वृन्दारका इति रूपं सिद्धम्।

विकल्पपक्षे – ''प्रत्ययस्थात्'' इति इत्वे वृन्दारिका इति रूपं भवति।

**पङ्क्ति विवेचनम् –**

**इह वा अ छेद..............................................सूतिका सूतका इत्यादि।**

सूतका पुत्रिका वृन्दारकाणां वेति वक्तव्यम् इति वार्तिके 'वा इति' इत्यत्र 'वा अ इति' इति पदच्छेदोऽस्ति। अतः ककारात् पूर्वस्य वर्णस्य 'अ' इत्येव भवति इत्वं प्रबाध्य। तस्मात् पुत्रिका इत्यत्र ङीनः इकारस्यापि अत्वे पुत्रका इति भवति। पक्षे पुत्रिका इत्येव। तथैव-सूतका इत्यत्र प्रत्ययस्थादिति प्राप्तस्येत्वस्य पक्षे निषेधात् सूतका इति, विकल्पे च इत्वे कृते सूतिका इति भवति।

## ४६५ उदीचामातः स्थाने यकपूर्वायाः ७/३/४६

**यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। 'केऽणः' ( सू. ८३४ ) इति ह्रस्वः। आर्यका, आर्यिका। चटकका, चटकिका। आतः किम्? साङ्काश्ये भवा साङ्काश्यिका। यक इति किम्? अश्विका। स्त्रीप्रत्यय इति किम्? शुभं यातीति शुभंयाः। अज्ञाता शुभंयाः शुभंयिका।**

**सूत्रप्रकार-विधिसूत्रमिदम्।**

**पदच्छेदः –** उदीचाम्, आतः, स्थाने, यकपूर्वायाः इति। ''प्रत्ययस्थात्.'' इति सूत्रमनुवर्तते।

**सूत्रार्थः –** यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने यः अकारस्तस्य कात्पूर्वस्येद् वा स्यात्।

**व्याख्या –** 'उदीचामातः स्थाने यकपूर्वायाः' इति सूत्रे ''प्रत्ययस्थात्.'' इति सूत्रमनुवर्तते। 'उदीचाम्' इति पदं विकल्पार्थम्। यः च कः च इति यकौ (द्वन्द्वसमासः) यकौ पूर्वौ यस्याः इति विग्रहे बहुव्रीहौ समासे यकपूर्वा इति जातेषष्ठीविभक्तौ एकवचने यकपूर्वायाः इति पदम् ''आतः'' इत्यस्य विशेषणत्वेनास्ति। य्, क च् इति वर्णौ अकारः उच्चारणार्थः। आतः इत्यत्र स्त्रीत्वस्यारोपे ''यकपूर्वायाः'' इति स्त्रीलिङ्गनिर्देशः। अतः सूत्रान्वयो भवति-

यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने यः अकारस्तस्य प्रत्ययस्थात् ककारात्पूर्वस्य अकारस्य इत् स्यादापि परे उदीचां मतेन।

**उदाहरणानि –**

**आर्यका-आर्यिका** – आर्य शब्दात् ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे स्वार्थे क प्रत्यये 'केऽण' इत्याकारस्य ह्रस्वे

आर्यक इत्यस्मात् पुनष्टापि सवर्णदीर्घे आर्यका इति जाते ''प्रत्ययस्थात्.'' इति इत्वं प्रबाध्य ''उदीचामातः स्थाने यकपूर्वायाः'' इति सूत्रेण विकल्पेन इत्वे आर्यिका इति जाते सु प्रत्यये सोर्हल्ङ्यादिलोपे आर्यिका इति रूपं सिद्ध्यति। इत्वविकल्पपक्षे–आर्यका इति रूपं भवति।

**चटकिका-चटकका**– चटका शब्दात् स्वार्थे क प्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे चटकक इति जाते पुनः ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घेचटकका इति जाते ''प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः'' इति प्राप्तमित्वं प्रबाध्य ''उदीचामातः स्थाने यकपूर्वायाः'' इति विकल्पेन इत्वे चटकिका इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे चटकिका इति रूपं भवति।

विकल्पपक्षे – चटकका इति रूपं भवति।

**पङ्क्ति विवेचनम् –**

**आतः किम्? साङ्काश्यिका।**

ननु सङ्काशेन निर्वृत्तं नगरम् इत्यर्थे ण्यप्रत्यये आदिवृद्धौ 'यस्येति च' इति अकारस्यलोपे साङ्काश्य इति जाते वुञ्प्रत्यये वोरकि साङ्काश्य अक इति जाते ''यस्येति चेति अकारलोपे साङ्काश्यक इत्यस्मात् टापि सवर्णदीर्घे साङ्काश्यका इति जाते इत्यत्र ''प्रत्ययस्थात्.'' इति नित्यमित्वं भवति साङ्काश्यिका इति रूपं भवति। अत्र प्रश्नः समुदेति यत् ''उदीचामातः.'' इति सूत्रेण विकल्पेनेत्वं कथं न भवति इति चेदुच्यते – प्रकृतसूत्रे आतः इत्यस्यग्रहणमस्ति। अर्थात् स्त्रीप्रत्ययाकारस्य ह्रस्वे कृते योऽकारस्तस्यैव विकल्पेनेत्वं भवति। अत्र स्त्रीप्रत्ययस्य अकारः नास्ति।

यक इति किम्? अश्विका।

यदि ''उदीचामातः.'' इति सूत्रे यकपूर्वायाः इति पदं न स्यात् तदा का हानिः? इति प्रश्नः समुदेति तत्रोच्यते–सूत्रे 'यकपूर्वायाः' इति पदाभावे अश्विका इति प्रयोगे–अश्वा शब्दात् स्वार्थे क प्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे अश्वक इति जाते पुनष्टापि सवर्णदीर्घे प्रत्ययस्थात्. इति इत्वे अश्विका इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे अश्विकका इति रूपं भवति। अत्राकारस्थानिकस्य अकारत्पूर्वं यकौ न स्तः। अत नित्यमेव इत्वं भवति।

स्त्रीप्रत्यय इति किम्? शुभं यातीति शुभंयाः अज्ञाताशुभंयाः शुभंयिका यदि ''स्त्रीप्रत्ययाकारस्य इति पदं नानुवर्तते तदा –शुभंयिका इत्यत्र शुभं याति इति विग्रहे शुभम् इत्यव्ययपूर्वकात् या प्रापणे धातोः विच् प्रत्यये सर्वापहारिलोपे शुभंया इति जाते स्वार्थे क प्रत्यये ''केऽणः'' इत्याकारस्य ह्रस्वे पुष्टापि शुभंयका इत्यत्र आकारस्थानिकः अकारः स्त्रीप्रत्ययस्य नास्ति अपितु धातोरेव। अतः ''उदीचामत.'' इति इत्वविकल्पस्य प्राप्तिर्नभवति। ''प्रत्ययस्थात्.'' इति नित्यमित्वं भवति। शुभंयिका इति रूपं सिद्ध्यति।

**'धात्वन्तयकोस्तु नित्यम्' ( वा. ४५३६ )। सुनयिका। सुपाकिका।**

**वार्तिकार्थः** – धात्वन्तयकपूर्वस्यस्त्रीप्रत्ययाकारस्य स्थाने योऽकारः तस्य नित्यमित्वं स्यात् स्त्रीत्वे।

**सुनयिका** – णीञ् प्रापणे धातोः नीधातोः पचाद्यच् नयः इति जाते सु शोभनः नयः यस्याः इति विग्रहे बहुव्रीहौ समासे स्त्रीत्वे ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे सुनया इति जाते स्वार्थे क प्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे सुनयक इत्यस्मात् पुनष्टापि सवर्णदीर्घे सुनयका इति जाते ''प्रत्ययस्थात्.'' इति प्राप्तमित्वं प्रबाध्य ''उदीचामातः स्थाने यकपूर्वायाः'' इति विकल्पेन इत्वे प्राप्ते तदपि प्रबाध्य ''धात्वन्तयकोस्तुनित्यम्'' इति वार्तिकेन नित्यमित्वं सुनयिका इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे सुनयिका इति रूपं भवति।

**सुपाकिका** – पच् धातोः ''भावे'' इति सूत्रेण घञ् प्रत्यये अनु.लोपे ''अत उपधायाः'' इति वृद्धौ ''चजोः कु: घिण्ण्यतोः'' इति कुत्वे पाकः इति जाते सु शोभनः पाकः यस्याः इति विग्रहे बहुव्रीहौ समासे स्त्रीत्वे ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे सुपाका इति जाते स्वार्थे क प्रत्यये 'केऽणः' इत्याकारस्य ह्रस्वे सुपाकक इत्यस्मात् पुनष्टापि सवर्णदीर्घे सुपाकका इति जाते ''प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः'' इति प्राप्तमित्वं प्रबाध्य ''उदीचामातः स्थाने

यकपूर्वायाः'' इत्यनेन विकल्पेनेत्वे प्राप्ते तमपि प्रबाध्य ''धात्वन्तयकोस्तुनित्यम्'' इति वार्तिकेन नित्यमित्वे सुपाकिका इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे सुपाकिका इति रूपं सिध्यति।

### ४६६ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ७/३/४७

**स्वेत्यन्तं लुप्तषष्ठीकं पदम्। एषामत इद्वा स्यात्।**

**तदन्तविधिनैव सिद्धे अञ्पूर्वाणामपीति स्पष्टार्थम्। भस्त्राग्रहणमुपसर्जनार्थम्, अन्यस्य तूत्तरसूत्रेण सिद्धम्। एषा द्वा एतयोस्तु सपूर्वयोर्नेत्त्वम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात्। अनेषका। परमैषका। अद्वके। परमद्वके। स्वशब्दग्रहणं सञ्ज्ञोपसर्जनार्थम्। इह हि 'आतः स्थाने' इत्यनुवृत्तं स्वशब्दस्यातो विशेषणम्। न तु द्वैषयोरसम्भवात्। नाप्यन्येषाम्, अव्यभिचारात्। स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः। अर्थान्तरे तु न स्त्री। सञ्ज्ञोपसर्जनीभूतस्तु कप्रत्ययान्तत्वाद्धवत्युदाहरणम्। एवं चात्मीयायां स्विका, परमस्विकेति नित्यमेवेत्त्वम्। निर्भस्त्रका, निर्भस्त्रिका। एषका, एषिका। कृतषत्वनिर्देशान्नेह विकल्पः-एतिके। एतिकाः। अजका, अजिका। ज्ञका, ज्ञिका। द्वके, द्विके। निःस्वका, निःस्विका।**

सूत्रप्रकारः- **विधिसूत्रमिदम्।**

पदच्छेदः - भस्त्रा, एषा, अजा, ज्ञा, द्वा, स्वा, एषां षण्णां द्वन्द्वः। ततः षष्ठ्या आर्षो लुक्। ''उदीचामातः स्थाने यकपूर्वायाः'' इत्यतः 'उदीचाम्' इत्यस्य ग्रहणम्। ''प्रत्ययस्थात्.'' इत्यतः इदिति अनुवर्तते।

सूत्रार्थः - भस्त्रैषाजाज्ञाद्वास्वा एषां नञ्पूर्वकाणामपि अत इद्वा स्यात्।

व्याख्या - भस्त्रा च एषा च अजा च ज्ञा च द्वा च स्वा च इति विग्रहे द्वन्द्वसमासे षष्ठी बहुवचने-भस्त्रैषाजाज्ञाद्वास्वा इति भवति। षष्ठया आर्षत्वात् लुकि। नञ्पूर्वः येषां ते नञ्पूर्वाः तेषां नञ्पूर्वाणाम्। ''उदीचामात स्थाने यकपूर्वायाः'' ''प्रत्ययस्थात्.'' इत्यतः इदिति अनुवर्तेते।

अङ्गाधिकारत्वात् तदन्तविधिना नञ्पूर्वकाणामित्वे सिद्धे व्यपदेशिवद्भावेन भस्त्रादीनामित्वे सिद्धे ''नञ्पूर्वाणामपि'' इति पदं सूत्रे स्पष्टार्थम्। भस्त्राग्रहणमुपसर्जनार्थम् यतोहि प्रधानार्थके भस्त्रा शब्दे ''अभाषितपुंस्काच्च'' इत्यनेन वैकल्पिकमित्वं भवत्येवा किन्तु ''निर्भस्त्रिका'' भस्त्रा इत्यस्य ''भाषितपुंस्कत्वात्'' इत्वरस्याप्राप्तौ भस्त्राग्रहणं कृतमस्ति।

उदाहरणानि -

**निर्भस्त्रिका - निर्भस्त्रका** - भस्त्रायाः निष्क्रान्ता निर्गता वेति विग्रहे ''निरादयः क्रान्ताद्यर्थे पञ्चम्याः'' इति समासे प्रातिपदिकत्वात् सुब्लुकि ''गोस्त्रियोरुपसर्जनस्य'' इति ह्रस्वे निर्भस्त्र इत्यस्मात् टापि सवर्णदीर्घे स्वार्थे क प्रत्यये 'केऽणः' इति ह्रस्वे निर्भस्त्रक इति जाते पुनष्टापि सवर्णदीर्घे निर्भस्त्रका इति जाते ''प्रत्ययस्थात्.'' इति सूत्रेण प्राप्तमित्वं प्रबाध्य ''भस्त्रैषाजाज्ञाद्वा स्वानञ्पूर्वाणामपि'' इति विकल्पेन इत्वे निर्भस्त्रिका इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे निर्भस्त्रिका इति रूपं सिद्ध्यति।

इत्वविकल्पपक्षे निर्भस्त्रका इति रूपं भवति।

**एषिका-एषका** - एतद् शब्दात् ''अव्ययसर्वनाम्नामकच्प्राक् टेः'' इत्यकचि एतकद् इति जाते स्त्रीत्वे सु प्रत्यये ''त्यदादीनामः'' इति दस्यात्वे पररूपे ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे ''तदोः सः सावनन्त्ययोः'' इति तकारस्य सकारे ''आदेशप्रत्यययोः'' इति षत्वे एषका स् इति जाते ''प्रत्ययस्थात्'' इति प्राप्तमित्वं प्रबाध्य भस्त्रैषाज्ञाद्वास्वानञ्पूर्वाणामपि इति विकल्पेन इत्वे एषिका इति रूपं भवति।

इत्वविकल्पपक्षे एषका इति रूपं भवति।

**अजिका-अजका** - अजा शब्दात् सौस्वार्थे क प्रत्यये ''केऽणः'' इति ह्रस्वे पुनष्टापि सवर्णदीर्घे अजका स् इति जाते ''प्रत्ययस्थात्.'' इति प्राप्तमित्वं प्रबाध्य ''भस्त्रैपाजाज्ञाद्वास्वानञ्पूर्वामपि'' इति विकल्पेनेत्वे सोर्हल्ङ्यादिलोपे अजिका

इति रूपं भवति।

इत्वविकल्पपक्षे – अजका इति रूपं भवति।

एवमेव ज्ञिका-ज्ञका, द्विके-द्वके, निःस्विका-निःस्वका इत्यादि रूपाणि।

**पङ्क्ति विवेचनम् –**

**एषा द्वाएतयोस्तु सपूर्वयोर्नेत्वम्।**

एषा द्वा एतयोः शब्दयोः समासपूर्वकत्वात् ''प्रत्ययस्थात्.'' इति सूत्रात् अनुवृत्तः ''असुपः'' इति प्रतिषेधात् इत्वं न भवति।

अतः अनेषका, परमैषका इत्यत्र इत्वं न भवति। अद्वके, परमद्वके अपि नेत्वम्।

स्वशब्दग्रहणं सञ्ज्ञोपसर्जनाम्। इह हि 'आतः स्थाने' इत्यनुवृत्ते स्वशब्दस्यातो विशेषणम् न तु द्वा, एषा इत्यस्य असम्भवात्। नाप्यन्येषाम्, अव्यभिचारात्। स्व शब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः। अर्थान्तरे तु न स्त्री। सञ्ज्ञोपसर्जनीभूतस्तु कप्रत्ययान्त द्भवत्युदाहरणम्। एवमात्मीये अर्थे स्विका, परमस्विकेति नित्यमेवेत्वम्।

## ४६७ अभाषितपुंस्काच्च ७/३/४८

एतस्माद्विहितस्य आतः स्थाने अत इद्वा स्यात्।

गङ्गका, गङ्गिका। बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यम्।

अज्ञाता अखट्वा अखट्विका। शैषिके कपि तु विकल्प एव।

**सूत्रप्रकार-विधिसूत्रम्।**

**पदच्छेदः** – अभाषितपुंस्कात्, च इति।''उदीचामातः स्थाने'' इत्यनुवर्तते ''प्रत्ययस्थात्'' इत्यतः अत इत् इत्यनुवर्तते। विहितस्येत्यध्याहारः।

**सूत्रार्थः** – अभाषितपुंस्काद्विहितस्य आतः स्थाने इद्वा स्यात्।

**व्याख्या** – अभाषितः पुमान् येन सः, तस्मात् अभाषितपुंस्कात् अतः सूत्रान्वयो भवति-अभाषितपुंस्कात् विहितस्य आतः स्थाने यः प्रत्ययस्थात् कात् पूर्वः अत् तस्य इद् भवति उदीचां मतेन।

**उदाहरणानि** – गङ्गिका, गङ्गका।

**रूपलेखनप्रकारः** –

गङ्गिका-गङ्गका-गङ्गा शब्दात् स्वार्थे क प्रत्यये ''केऽणः'' इति ह्रस्वे गङ्गक इत्यस्मात् ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे गङ्गका इति जाते ''प्रत्ययस्थात्.'' इति प्राप्तमित्वं प्रबाध्य ''अभाषितपुंस्काच्च'' इति विकल्पेन अकारस्य इत्वे गङ्गिका इति रूपं भवति।

इत्वविकल्पपक्षे-गङ्गका इति रूपं भवति।

**पङ्क्तिविवेचनम् –**

**बहुव्रीहेर्भाषितपुंस्कत्वात्.....................................अखट्विका।**

बहुव्रीहौ समासे भाषितपुंस्कशब्दकारणात् प्रत्ययस्थादिति नित्यमित्वं भवति। तथाहि-अविद्यमाना खट्वा यस्याः इति विग्रहे ''नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः'' इति समासे 'विद्यमान' इत्यस्य लोपे ''च कृते नलोपो नञः'' इति नकारस्य लोपे अखट्वा इति जाते ''गोस्त्रियोरूपसर्जनस्य'' इति ह्रस्वे अखट्व शब्दात् टाप् प्रत्यये सवर्णदीर्घे तस्मात् सौ अखट्वा स् इत्यस्मात् अज्ञाताद्यर्थे क प्रत्यये तद्धितान्तत्वात् प्रातिपदिकसञ्ज्ञायां सुपो लुकि 'केऽणः' इति आकारस्य ह्रस्वे अखट्वक इत्यस्मात् पुनष्टापि अभाषितपुंस्कात् विहितस्य आतः स्थाने अतः अभावेन नात्र इत्वविकल्पो भवति अपितु प्रत्ययस्थात् कादिति नित्यमित्वे अखट्विका इति रूपं भवति।

**शैषिके कपि तु विकल्प एव**

शेषाद्विभाषा इति सूत्रेण विहितस्य कपि विकल्पेनेत्वं भवति। अखट्विका, अखट्वाका इति भवति।

## ४६८ आदाचार्याणाम् ७/३/४९

पूर्वसूत्रविषये आद्वा। गङ्गाका। उक्तपुंस्कात्तु शुभ्रिका।

सूत्रप्रकारः-**विधिसूत्रम्।**

पदच्छेदः - आत्, आचार्याणाम्। अभाषितपुंस्कात् इत्यस्य, ''उदीचामाताः'', इत्यतः आतः स्थाने, प्रत्ययस्थत् कात् पूर्वस्य अतः आपि इति चानुवर्तते। विहितस्य इत्यस्याध्याहारः।

सूत्रार्थः - अभाषितपुंस्काद्विहितस्य आत् स्थानिकस्य प्रत्ययस्थात् कात् पूर्वस्याकारस्य आत् भवति आपि परे आचार्याणां मतेन।

व्याख्या - न भाषितः पुमान् येन सः अभाषितपुंस्कः तस्मात् अभाषितपुंस्कात् विहितस्येध्याहृत्य सूत्रान्वयो भवति- अभाषितपुंस्काद्विहितस्य आत्स्थानिकस्य प्रत्ययस्थात् कात् पूर्वस्याकारस्य आत् स्यादापि परे उदीच्यभिन्नाचार्याणां मतेन।

उदाहरणम् -

**गङ्गाका** - गङ्गा शब्दात् स्वार्थे क प्रत्यये 'केऽणः' इति ह्रस्वे गङ्गक इति जाते गङ्गक शब्दात् 'अजाद्यतष्टाप्' इति टापि सवर्णदीर्घे गङ्गका इति जाते ''प्रत्ययस्थात्.'' इति प्राप्तमित्वं प्रबाध्य ''आदाचार्याणाम्'' इति विकल्पेनात्वे गङ्गाका इति रूपं भवति।

आत्वविकल्पपक्षे ''अभाषितपुंस्काच्च'' इत्यनेन गङ्गिका इति रूपं भवति। आत्वेत्वविकल्पपक्षे गङ्गका इति रूपं भवति।

**उक्तपुंस्कात्तु शुभ्रिका** -

भाषितपुंस्कात् विहितः टाप् स्थानिकस्य अकारस्य नित्यमित्वं ''प्रत्ययस्थात्.'' इत्यनेन भवति यथा - शुभ्रिका इत्यत्र शुभ्रशब्दात् टापि सवर्णदीर्घे शुभ्रा इत्यस्मात् स्वार्थे क प्रत्यये 'केऽणः' इति ह्रस्वे शुभ्रक इति जाते ''पुनष्टापि सवर्ण दीर्घे सु प्रत्यये'' हल्ङ्याभ्यो. इति सु लोपे प्रत्ययस्थात्कात् इत्यकारस्य इत्वे शुभ्रिका इति सिद्ध्यति।

## ४६९ अनुपसर्जनात् ४/१/

अधिकारोऽयम्। '**यूनस्तिः**' ( **सू. ५३१** ) इत्यभिव्याप्य।

अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।

सूत्रप्रकारः- **इदमधिकारसूत्रम्।**

सूत्रार्थः - अनुपसर्जनात् इत्यस्याधिकारः यूनस्ति-४/१/७७ सूत्रपर्यन्तमस्ति। अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।

व्याख्या - अनुपसर्जनात् अर्थात् प्रधानात् इत्यर्थः स्वीक्रियते। अनुपसर्जनात् - ४/१/१४ तः यूनस्तिः-४/१/७७ पर्यन्तसूत्रैः विधीयमानाः स्त्रीप्रत्ययाः टाब्डीपादयः अनुपसर्जनात् प्रातिपदिकात् भवन्ति इति। इदमधिकारसूत्रम्। उत्तरोत्तरगमनमधिकारः।

पङ्क्तिविवेचनम् -

**अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।**

ननु बहवः कुरुचराः यस्याः इति विग्रहे समासे प्रातिपदिकत्वात् सुब्लुकि बहुकुरुचर इत्यस्मात् टापि बहुकुरुचरा इति रूपं भवति। नदमतिक्रान्ता अतिनदा इति भवति। अत्रोपसर्जन कुरुचरनदशब्दौ। आभ्यां शब्दाभ्याम् ''समासप्रत्ययविधौ प्रतिषेधः'' इति नियमात् तदन्तविधेः निषेधो भवति। अतः ''टिड्ढाणञ.'' इत्यादिना विधीयमानस्य

ङीपः प्राप्तिरेव न भवति। अतः जिज्ञासा भवति यत् ''अनुपसर्जनात्'' इति सूत्रं व्यर्थमिति चेत् उच्यते–

**अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।**

अर्थात् 'अनुपसर्जनात्' इत्यधिकारः व्यर्थो भूत्वा ज्ञापयति यत् – स्त्रीप्रत्ययेषु तदन्तविधिः भवति। अत एव– वनोरच इति सूत्रे वन् प्रत्ययेन तदन्तविधिना वन्नन्तस्य पुनः तदन्तविधिना वन्नन्तान्तस्य च अर्थो भवति। अतिधीवरी इत्यादयः सिद्ध्यति।

### ४७० टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४/१/१५

**अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्।**

**कुरुचरी। नदट्-नदी। उपसर्जनत्वान्नेह- बहुकुरुचरा। वक्ष्यमाणेत्यत्र टित्वादुगित्वाच्च ङीप्प्राप्तः। यासुटो ङित्त्वेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' ( प. ७० ) इति ज्ञापनान्न भवति। श्नः शानचः शित्त्वेन क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधज्ञापनाद्वा। सौपर्णेयी। ऐन्द्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पञ्चतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी।**

**सूत्रप्रकारः–** **ङीप्प्रत्ययविधायकं सूत्रम्।**

**पदच्छेदः –** टित्, ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ् क्वरप् एषां द्वादशानां समाहारद्वन्द्वात् पञ्चम्येकवचनम्। ढादयः एकादशप्रत्ययाः। ''अजाद्यतष्टाप्'' इत्यतः ''अतः'' इत्यनुवर्तते। स्त्रियामित्यधिकृतम्। ''अनुपसर्जनात्'' इत्यस्याधिकारः।

**सूत्रार्थः –** अनुपसर्जनं यद्विदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्।

**व्याख्या –** टित् च ढश्च अण् च अञ् च द्वयसच् च दघ्नच् च मात्रच् च तयप् च ढक् च ढञ् च कञ् च क्वरप् चेति विग्रहे समाहारद्वन्द्वे पञ्चम्येकवचने टिड्ढाणञ्द्वयसज्दघ्नमात्रच्तयष्ठक्ठञ्कञ्क्वरपः ढादयः एकादश प्रत्ययाः।''प्रत्ययग्रहणे तदन्ताः ग्राह्याः'' इति नियमात् तदन्तविधिः प्रातिपदिकात् इत्यस्याधिकारः टिदादेः विशेष्यं भवति। विशेषणटिदादिना तदन्तविधिर्भवति। ''अजाघतष्टाप्'' इत्यतः अतः इत्यनुवर्तते। अनुपसर्जनात् इत्यस्याधिकारः टिदादिनान्वितो भवति। ''ऋन्नेभ्योङीप्'' इत्यतः ङीप् अनुवर्तते। अतः सूत्रान्वयो भवति– अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकम्, तस्माददन्तात् प्रातिपदिकात् स्त्रियां ङीप्स्यात्।

**उदाहरणानि –** कुरुचरी, नदी, सौपर्णेयी, ऐन्द्री, औत्सी, उरुद्वयसी, उरुमात्री, पञ्चतयी, आक्षिकी, लावणिकी। यादृशी, इत्वरी।

**रूपलेखनप्रकारः –**

कुरुचरी–कुरुषु चरतीत्यर्थे कुरु सुप् इत्युपपदात् चर् धातोः''चरेष्टः''इति टप्रत्यये अनुबन्धलोपे उपपदसमासे प्रातिपदिकसंज्ञायां ''सुपो धातु.'' इति सुब्लुकि कुरुचर इति जाते स्त्रीत्वविवक्षायां ''टिड्ढाणञ्द्वयसज्दध्नज्.'' इत्यादिना ङीपि अनुबन्धलोपे ''यचि भम्'' इति भसंज्ञायां ''यस्येति च'' इत्यकारलोपे कुरुचरी इत्यस्मात् सुप्रत्यये सोर्हल्ङ्याादिलोपे कुरुचरी इति रूपं भवति।

**नदी** – नदट् इति प्रातिपदिकस्य टस्येत्सञ्ज्ञायां नद इत्यस्मात् स्त्रीत्वे द्योत्ये ''टिड्ढाणञ्.'' इत्यादिना ङीप् प्रत्यये ''लशक्वतद्धिते'' इति ङस्येत्संज्ञायां हलन्त्यमिति पस्येत्संज्ञायाम् नद+ई इति जाते ''यचि भम्'' इति भसञ्ज्ञायाम् यस्येति चेति अकारलोपे नदी इत्यस्मात् सुप्रत्यये सोर्हल्ङ्यादिलोपे नदी इति रूपं भवति।

**सौपर्णेयी** – सुपर्ण्या अपत्यमित्यर्थे ''स्त्रीभ्यो ढक्'' इति सूत्रेण ढकि आयनेयीनीयियः इति ढस्य एयादेशे ''किति च'' इत्यादिवृद्धौ भत्वादीकारस्य लोपे सौपर्णेय इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''टिड्ढाणञ् द्वयसज्दघ्नञ्मात्रच्तयप्ठक्.'' इति सूत्रेण ङीपि अनुबन्धलोपे यचि भमिति भसंज्ञायां यस्येति चेति अलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे सौपर्णेयी इति रूपं भवति।

**ऐन्द्री** – इन्द्र:देवता अस्या इत्यर्थे अणि आदिवृद्धौ भत्वादलोपे ऐन्द्र इत्यस्मात् ''टिड्ढाणञ्.'' इति ङीपि अनुबन्धलोपे भसंज्ञायां यस्येति चेति अलोपे स्वादिकार्ये च ऐन्द्री इति रूपं सिद्धम्।

**औत्सी** – उत्सस्येयम् इत्यर्थे ''उत्सादिभ्योऽञ्'' इति अञ्प्रत्यये आदिवृद्धौ भत्वादलोपे औत्सशब्दात् ''टिड्ढाणञ्.'' इति ङीपि अनुबन्धलोपे औत्स+ई इति जाते ''यचि भम्'' इति भत्वादलोपे औत्सी इति जाते पुन: प्रातिपदिकत्वात् च कृते औत्सी इति रूपं सिद्धम्।

**ऊरुद्वयसी-उरुदघ्नी-ऊरुमात्री** –

उरु प्रमाणमस्या: इत्यर्थे ''प्रमाणे द्वयसज्दध्नञ्मात्रच:'' इति ऊरु शब्दात् द्वयसचि, दध्नञि, मात्रचि च प्रत्ययेऽनुबन्धलोपे प्रातिपदिकत्वात् सुपो लुकि उरुद्वयस, उरुदध्न, ऊरुमात्र इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्.'' इत्यादीना ङीपि अनुबन्धलोपे भत्वादलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे च ऊरुद्वयसी, ऊरुदध्नी, ऊरुमात्री च सिद्ध्यति।

**पञ्चतयी** – पञ्च अवयवा: अस्या: इत्यर्थे ''संख्याया अवयवे तयप्'' इति तयपि प्रत्यये प्रातिपदिकत्वात् सुपो लुकि ''नलोप: प्रातिपदिकान्तस्य'' इति नलोपे पञ्चतय इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''टिड्ढाणञ्.'' इति ङीपि भसंज्ञायाम् अलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे पञ्चतयी इति रूपं भवति।

**आक्षिकी** – अक्षैर्दीव्यति इत्यर्थे ''तेन दीव्यति खनति जयति जितम्'' इति सूत्रेण ठकि ''ठस्येक:'' इति सूत्रेण इकादेशे किति चेत्यादिवृद्धौ प्रातिपदिकत्वात्सुपो लुकि भत्वादलोपे आक्षिक इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''टिड्ढाणञ्.'' इति ङीपि यचि भमिति भसञ्ज्ञायाम् ''यस्येति च'' इत्यकारस्य लोपे आक्षिकी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे आक्षिकी इति रूपं सिद्धम्।

**पङ्क्तिविवेचनम् –**

**''वक्ष्यमाणा''इत्यत्र...............................इति ज्ञापनान्न भवति।**

ननु वच् परिभाषणे धातो: कर्मणि लृट्लकारे ''लृट: सद्वा'' इति लृट: स्थाने शानजादेशे अनु. लोपे ''स्यतासीलृलुटो:'' इति सूत्रेण स्यप्रत्यये वच् स्य आन इति जाते कुत्वषत्वे ''आनेमुक्'' इति मुगागमे क्षत्वे णत्वे पररूपे च कृते वक्ष्यमाण इति जाते प्रातिपदिकत्वात् स्त्रीत्वविवक्षायां ''टिड्ढाणञ्.'' इति ङीप् प्रत्ययो कथं न भवति? इति जिज्ञासायामुच्यते ''लाश्रयमनुबन्धकार्यं नादेशानाम्''।

अर्थात् ''लिङ्लकारे'' यासुट् परस्मैपदेषूदात्तो ङिच्च इति सूत्रे यासुट: ङिकरणं व्यर्थं भूत्वा ज्ञापयति यत् लकाराश्रितमनुबन्धकार्यम् आदेशानां न भवति। अत: उगित्त्वाभावात् टित्वाभावात् ङीप् न भवति अपितु अजाद्यतष्टाप् इति टाबेव भवति। वक्ष्यमाणा इति सिद्ध्यति। श्न: शानच: क्वचिदनुबन्धकार्येऽप्यनल्विधौ इति निषेधज्ञापनाद्वा।

ननु ''हल: श्न: शानज्झौ'' इति सूत्रे भाष्ये – ''ङिच्च पिन्न पिच्च ङिन्न'' उक्तम्। अर्थात् श्ना स्थाने शानजादेशस्य शित्करणं व्यर्थ भूत्वा ज्ञापयति यत् लकाराश्रितमनुबन्धकार्यम् आदेशां न भवति।

**'ताच्छीलिके णेऽपि' ( प. ६८ ) चौरी।**

**वार्तिकार्थ:** – ताच्छीलके अर्थे णप्रत्ययान्ताददन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् स्यात्।

**उदाहरणम् –**

**चौरी** – चुरा शीलमस्या: इत्यर्थे ''छत्रादिभ्यो ण:'' इति णप्रत्यये अनुबन्धलोपे आदिवृद्धौ भत्वादालोपे चौर इत्यस्मात् प्रातिपदिकात् ''ताच्छीलिके णेऽपि'' इति वार्तिकेन ङीपि भत्वादलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे चौरी इति रूपं सिद्धम्।

**'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' ( वा. २४२५ )। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यङ्करणी। तरुणी, तलुनी।**

**पदच्छेदः** – नञ्, स्नञ्, ईकक्, ख्युन्, तरुण, तलुन एषां नञ्स्नीकक्ख्युंस्तरुणतलुनानाम् इति, उपसङ्ख्यानम् इति च। नञादिचत्वारः प्रत्ययाः प्रत्ययग्रहणे तदन्ताः ग्राह्याः।

**वार्तिकार्थः** – नञ्, स्नञ्, ईकक्, ख्युन् प्रत्ययान्तेभ्यः अदन्तेभ्यः, तरुण तलुनाभ्यां शब्दाभ्यां च ङीप् स्यात्।

**उदाहरणानि** – स्त्रैणी, पौंस्नी, शाक्तीकी, आढ्यङ्करणी, तरुणी, तलुनी। स्त्रैणी –स्त्री शब्दात् ''स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्'' इति सूत्रेण नञ् प्रत्यये ''तद्धितेष्वचामादेः'' इति आदिवृद्धौ ''अट्कुप्वाङ्'' इति णत्वे स्त्रैण इति जाते प्रातिपदिकत्वात् स्त्रीत्व विवक्षायाम् नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम् इति वार्तिकेन ङीप् प्रत्यये अनुबन्धलोपे ''यचि भम्'' इति भसञ्ज्ञायाम् ''यस्येति च'' इत्यकारलोपे स्त्रैणी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे स्त्रैणी इति रूपं सिद्धम्।

**पौंस्नी** – पुंस् शब्दात् ''स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्'' इति सूत्रेण स्नञ्प्रत्यये ''कृत्तद्धितेति प्रातिपादिकसञ्ज्ञायाम् सुपोलुकि ञित्वात्'' तद्धितेष्वचामादेः इति आदिवृद्धौ पौंस्न इति जाते स्कोः संयोगाद्योरन्ते च इति संयोगान्त सलोपे पौंस्न इत्यस्मात् नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम् इति ङीपि भत्वात् ''यस्येति च'' इत्यलोपे स्वादिकार्ये च पौंस्नी इति रूपं सिद्धम्।

**शाक्तीकी** – शक्तिः प्रहरणमस्याः इति विग्रहे ''शक्तियष्ट्योरीकक्'' इति ईकक् प्रत्यये ''किति च'' इत्यादिवृद्धौ भत्वात् 'यस्येति च' इतीलोपे शाक्तीक इत्यस्मात् स्त्रीत्वे ''नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम्'' इति ङीपि भत्वादलोपे स्वादिकार्ये च कृते शाक्तीकी इति भवति रूपम्।

**आढ्यङ्करणी** – अनाढ्यः आढ्यः क्रियते अनया इति विग्रहे आढ्यपूर्वकात् कृ धातोः ''आढ्यसुभग.'' इत्यनेन ख्युन् प्रत्यये अनुबन्धलोपे ''युवोरनाकौ'' इति योरनादेशे आर्धधातुकत्वात् ''सार्वधातुकार्धधातुकयोः'' इति ऋकारस्य गुणे, रपरत्वे च कृते उपपदसमासे प्रातिपदिकसञ्ज्ञायां ''सुपो धातु प्रातिपदिकयोः'' इति सुब्लुकि ''अरुर्द्विषदजन्तस्य मुम्'' इति मुमागमे आढ्यम् करन इति जाते मस्यानुस्वारपरसवर्णयोः नस्य णत्वे आढ्यङ्करण इत्यस्मात् स्त्रीत्वे अर्थे ''नञ्स्नञीकक्ख्युंस्तरुण तलुनानामुपसङ्ख्यानम्'' इति ङीपि अनुबन्धलोपे भत्वात् यस्येति चेति अलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे च आढ्यङ्करणी इति रूपं सिद्धदम्।

**तरुणी – तलुनी** – तरुणतलुन शब्दाभ्यां ''वयसि प्रथमे'' इति प्राप्तं ङीपं प्रबाध्य ''षिद्गौरादिभ्यश्च'' इति ङीषि प्राप्ते तमपि प्रबाध्य ''नञ्स्नञीकक्ख्युंस्तरुणतलुनामुपसङ्ख्यानम्'' इति ङीपि अनुबन्धलोपे यचि भमिति भसञ्ज्ञायां यस्येति चेत्यलोपे स्वादिकार्ये च तरुणी–तलुनी इति रूपं सिद्धम्।

## ४७१ यञश्च ४/१/१६

**यञन्तात् स्त्रियां ङीप् स्यात्। अकारलोपे कृते।**

**सूत्रप्रकारः** – ङीप् विधायकं सूत्रम्।

**पदच्छेदः** – यञः, च इति ऋन्नेभ्यो ङीप् इत्यतः ङीप् इत्यनुवर्तते।

**सूत्रार्थः** – यञन्तात् ङीप् स्यात् स्त्रियाम्।

**व्याख्या** – यञ् इतिप्रत्ययः प्रत्ययग्रहणे तदन्ताः ग्राह्याः इति तदन्तविधिः ''प्राचाष्फः तद्धिताः'' इति सूत्रे यञ् इत्यस्यानुवृत्यर्थम् यञ् इत्यस्य सूत्रे ग्रहणं कृतमस्ति।

## ४७२ हलस्तद्धितस्य ६/४/१५०

**हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीति परे। गार्गी।**

**'अनपत्याधिकारस्थान्न ङीप्' ( वा. २४२६ )। द्वीपे भवा द्वैप्या। अधिकारग्रहणान्नेह देवस्यापत्यं दैव्या। 'देवाद्यञञौ' इति हि यञ् प्राग्दीव्यतीयः, न त्वपत्याधिकारपठितः।**

**सूत्रप्रकारः – यलोपविधायकमिदं सूत्रम्।**

**पदच्छेदः** – हलः, तद्धितस्य इति सूत्रे पदद्वयम्।
**सूत्रार्थः** – हलः परस्य तद्धितस्य उपधायाः यस्य लोपो भवति इति परे।
**व्याख्या** – ''हलः'' इति दिग्योगलक्षणापञ्चमी। परस्य इत्यध्याहारः ''यस्येति च'' इत्यतः ''ईति'' इत्यनुवर्तते ''सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः'' इति सूत्रात् ''उपधायाः'' ''यः'' इति चानुवर्त्तते ''ढेलोपोऽकद्र्वाः'' इति सूत्रात् ''लोपः'' इत्यनुवर्तते। अतः सूत्रान्वयो भवति– हलः परस्य तद्धितस्य उपधायाः यकारस्य लोपो भवति ईति परे।
**उदाहरणम्** – गार्गी
**रूपलेखनप्रकारः** –

**गार्गी**–गर्गस्य गोत्रापत्यं स्त्री इति विग्रहे गर्ग शब्दात् ''गर्गादिभ्यो यञ्'' इति सूत्रात् यञ् प्रत्यये आदिवृद्धौ गार्ग्य इत्यस्मात् स्त्रीत्वे ''यञश्च'' इति ङीपि अनुबन्धलोपे ''यचि भम्'' इति भसञ्ज्ञायाम् ''यस्येति च'' इत्यलोपे ''असिद्धवदत्राभात्'' इति आभीयत्वेनालोपस्यासिद्धत्वात् ''हलस्तद्धितस्य'' इति यकारस्यलोपे गार्गी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे गार्गी इति रूपं सिद्धम्।
**वार्तिकार्थः** – अपत्याधिकारभिन्नयञन्तात् प्रातिपदिकात् स्त्रियां ङीप् न स्यात्।
**उदाहरणम्** –
**द्वैप्या** – द्वीपे भवा इति विग्रहे ''द्वीपादनुसमुद्रं यञ्'' इति यञ्प्रत्यये प्रातिपदिकसञ्ज्ञायां सुपो लुकि आदिवृद्धौ ''यचि भम्'' इति सूत्रेण भत्वादलोपे द्वैप्य इत्यस्मात् स्त्रीत्वे द्योत्ये ''यञश्च'' इति ङीप् प्रत्यये प्राप्ते ''अनपत्याधिकारस्यात्र ङीप्'' इति वार्तिकेन तन्निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च द्वैप्या इति रूपं सिद्धम्।
**पङ्क्तिविवेचनम्** –

**अधिकारग्रहणात्** – **देवस्यापत्यं दैव्या।**

ननु ''अनपत्याधिकारस्थात्र ङीप्'' इति वार्तिके अधिकारग्रहणस्य किं प्रयोजनम्? इति जिज्ञासायामुच्यते यत्– अपत्याधिकारग्रहणस्य फलमिदं यत् देवस्यापत्यम् इति विग्रहे ''देवाद्यञञौ'' इति सूत्रेण प्राग्दीव्यतीययञ्प्रत्ययोऽस्ति अतः अपत्यार्थके यञ्प्रत्ययेऽपि अपत्याधिकाराभावात् ङीपाभावे ''अजाद्यतष्टाप्'' इत्यनेन टाबेव भवति इति दिक्।

### ४७३ प्राचां ष्फ तद्धितः ४/१/१७

**यञन्तात् ष्फो वा स्यात् स्त्रियाम्, स च तद्धितः।**

**सूत्रकारः**– **ष्फप्रत्ययविधायकमिदं सूत्रम्।**
**पदच्छेदः** – प्राचाम्, ष्फः, तद्धितः। ''यञश्च'' इत्यतः यञ इत्यनुवर्तते। स्त्रियामित्यधिकृतम्।
**सूत्रार्थः** – यञन्तात् ष्फः प्रत्ययः वा स्यात् स्त्रीत्वे स च तद्धितः।
**व्याख्या** – प्राचाम् इति षष्ठ्यन्तं पदं विकल्पार्थम् अर्थात् प्राचां मतेन। 'ष्फ' इति लुप्तप्रथमान्तः विधेयो प्रत्ययः। 'तद्धिताः' इति प्रथमान्तं पदम् ष्फ प्रत्ययः तद्धितः स्यात् इति स्फुटति। 'स्त्रियाम्' इत्यस्याधिकारः। यञश्च इति सूत्रात् यञ इत्यनुवर्तते। ''प्रत्ययग्रहणे तदन्ताः ग्राह्याः'' इति नियमात् यञन्तात् इत्यर्थः स्वीक्रियते।

### ४७४ षः प्रत्ययस्य १/३/६

**प्रत्ययस्यादिः ष इत् स्यात्।**

**सूत्रप्रकारः** – सञ्ज्ञासूत्रमिदम्।
**पदच्छेदः** – षः, प्रत्ययस्य इति। ''आदिर्ञिटुडवः'' इति सूत्रात् आदिः ''उपदेशेऽजनुनासिक इत्'' इत्यतः इदनुवर्तते।
**सूत्रार्थः** – प्रत्ययस्यादिः ष इत् भवति।

**व्याख्या** – 'षः' इति प्रथमान्तं पदम्। अकारः उच्चारणार्थकः। प्रत्ययस्य इति प्रत्ययावयवस्य। अतः सूत्रान्वयो भवति–प्रत्ययावयवः आदिः षः इत् स्यात्।

### ४७५ आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७/१/२

**प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।**

**तद्धितान्तत्वात् प्रातिपदिकत्वम्। षित्त्वसामर्थ्यात् ष्फेणोक्तेऽपि स्त्रीत्वे 'षिद्गौरा–' ( सू. ४९८ ) इति वक्ष्यमाणो ङीष्। गार्ग्यायणी।**

**सूत्रप्रकारः**– विधिसूत्रमिदम्।

**पदच्छेदः** – आयन्, एय्, ईन्, ईय्, इय् एषां द्वन्द्वात् प्रथमा बहुवचनम्। फ, ढ, ख, छ, घ एषां द्वन्द्वात् षष्ठी बहुवचनम्। फादिष्वकार उच्चारणार्थः।

**सूत्रार्थः** – प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

**व्याख्या** – आयन् च एय् च ईन् च ईय् च इय् च इति विग्रहे द्वन्द्वसमासे प्रथमाबहुवचने आयनेयीनीमियः इति विधेयादेशाः। फढखछघाम् इति षष्ठ्यन्तं समस्तपदम्। प्रत्ययादिः इति पदं फढखछघाम् इत्यस्य विशेषणत्वात् षष्ठीबहुवचने। यथासङ्ख्यमनुदेशः समानाम् इति क्रमेणान्वयः भवति– प्रत्ययादीनां फढखछघां स्थाने क्रमशः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य च इय् इत्येते आदेशा भवन्ति।

**उदाहरणानि** –

**गार्ग्यायणी** – यञन्तात् गार्ग्य शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''प्राचां ष्फ तद्धितः'' इति सूत्रेण ष्फ प्रत्यये ''षः प्रत्ययस्य'' इति सूत्रेण षकारस्येत्सञ्ज्ञायाम् ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति सूत्रेण फस्यायन्नादेशे गार्ग्य आयन इति जाते ''यचि भम्'' इति भत्वाद् यस्येति चेति अलोपे गार्ग्यायन इत्यस्य प्रातिपदिकसञ्ज्ञायाम् षित्वात् ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे च 'यचि भम्' इति भत्वात् ''यस्येति च'' इत्यकारलोपे ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे गार्ग्यायणी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे गार्ग्यायणी इति रूपं सिद्धम्।

**पङ्क्तिविवेचनम्** –

**तद्धितान्तत्वात् प्रातिपदिकत्वम्।**

ष्फप्रत्ययान्त शब्दस्य तद्धितान्तत्वात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञा भवति।

**षित्वसामर्थ्यात् ष्फेणोक्तेऽपि..............................वक्ष्यमाणो ङीष्।**

''उक्तार्थानामप्रयोगः'' इति नियमात् ष्फप्रत्ययेन स्त्रीत्वार्थे घोत्ये ष्फ इत्यस्य उच्चारणः व्यर्थः इति चेत् न। षित्वसामर्थ्यात् ''षिद्गौरादिभ्यश्चः'' इत्यनेन ङीष् प्रत्ययो भवति।

### ४७६ सर्वत्र लोहितादिकतन्तेभ्यः ४/१/१८

**लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी।**

**पदच्छेदः** – सर्वत्र सर्व शब्दस्य सप्तम्यन्तं रूपम्। लोहितादिः गर्गाद्यन्तर्गणः। लोहितः आदिः येषामिति, कतः अन्तो येषामिति च विग्रहः। कतन्तेत्यत्र शकन्ध्वदित्वात् पररूपम्।

**सूत्रार्थः** – लोहितादिभ्यः कतशब्दान्तेभ्यः यञन्तेभ्यः प्रातिपदिकेभ्यः नित्यं ष्फः स्यात्।

**व्याख्या** – सर्वत्र – सर्वेषांमतेन, नित्यार्थं बोधयति। ''यञश्च'' इति सूत्रात् यञः इत्यनुवर्तते। प्राचां ष्फः तद्धितः इत्यतः ष्फः तद्धितः च अनुवर्तते।

**उदाहरणानि** –

**लौहित्यायनी** – लोहितस्य अपत्यं स्त्री इत्यर्थे ''गर्गादिभ्यो यञ्'' इति यञ् प्रत्यये ञित्वात् आदिवृद्धौ भत्वादलोपे

लौहित्य इति जाते प्रातिपदिकसञ्ज्ञायाम् ''सर्वत्रलोहितादिकतन्तेभ्यः'' इति ष्फ प्रत्ययेऽनुबन्धलोपे फस्यायन्नादेशे भत्वादलोपे लौहित्यायन इत्यस्मात् प्रातिपदिकत्वात् ''षिद्गौरादिभ्यः'' इति ङीषि भत्वादलोपे स्वादिकार्ये लौहित्यायनी इति रूपं सिद्धम्।

**कात्यायनी** – कतस्य गोत्रापत्यं स्त्रीत्यर्थे गर्गादित्वात् यञि आदिवृद्धौ भत्वादलोपे ''सर्वत्र लोहितादिकतन्तेभ्यः'' इति ष्फ प्रत्यये अनुबन्धलोपे ''आयनेयीनीयियः.'' इति फस्यायन्नादेशे भत्वादलोपे प्रातिपदिकत्वात् ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे भत्वादलोपे सोर्हल्ङ्यादिलोपे कात्यायनी इति रूपं भवति।

### ४७७ कौरव्यमाण्डूकाभ्यां च ४/१/११

**आभ्यां ष्फः स्यात्। क्रमेण टाब्ङीषोरपवादः। 'कुर्वादिभ्यो ण्यः' ( सू. ११७५ )। कौरव्यायणी। 'ढक्च मण्डूकात्' ( सू. ११२२ ) इत्यण्। माण्डूकायनी। '**

**पदच्छेदः** – कौरव्याश्च माण्डूकाश्च इति विग्रहे द्वन्द्वसमासे पञ्चमीद्विवचने कौरव्यमाण्डूकाभ्याम्। चकारबलेन ''प्राचां ष्फः तद्धितः'' इति सूत्रात् ष्फः, तद्धितः इत्यनुर्वेते।

**सूत्रार्थः** – कौरव्यमाण्डूकशब्दाभ्यां स्त्रियां ष्फप्रत्ययो भवति स च तद्धितः।

**व्याख्या** – स्त्रियाम् इस्यस्याधिकारः। कौरव्य शब्दात् प्राप्तं टापं माण्डूक शब्दाच्च प्राप्तं ङीपमपवादत्वेन बाधते।

**उदाहरणानि** –

**कौरव्यायणी** – कुरोः अपत्यं स्त्रीत्यर्थे ''कुर्वादिभ्योण्यः'' इति ण्यप्रत्यये ''ओर्गुणः'' इति गुणे 'वान्तो यि प्रत्यये' इति अवादेशे आद्यचो वृद्धौ कौरव्य इत्यस्मात् प्राप्तं टापं प्रबाध्य ''कौरव्यमाण्डूकाभ्यां च'' इति सूत्रेण ष्फ प्रत्यये फस्यायन्नादेशे भत्वादलोपे प्रातिपदिकत्वात् सौ ''षिद्गौरादिभ्यश्च'' इति ङीषि भत्वादलोपे सोर्हल्ङ्यादिलोपे कौरव्यायनी इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे कौरव्यायणी इति रूपं सिद्धम्।

**माण्डूकायनी** – मण्डूकस्यापत्यं स्त्रीत्यर्थे ''ढक् च मण्डूकात्'' इति सूत्रेण अणि आद्यचो वृद्धौ अलोपे माण्डूक इति प्रातिपदिकात् 'टिड्ढाणञ्.' इति ङीपं प्रबाध्य ''कौरव्यमाण्डूकाभ्यां च'' इति ष्फ प्रत्ययेऽनुबन्धलोपे फस्यायन्नादेशे भत्वादलोपे माण्डूकायन इत्यस्मात् ''षिद्गौरादिभ्यश्च'' इति ङीषि भत्वादलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे माण्डूकायनी इति रूपं भवति।

**आसुरेरुपसंख्यानम्' ( वा. २४३३ )। आसुरायणी।**

**पदच्छेदः** – आसुरेः, उपसङ्ख्यानम्।

**वार्तिकार्थः** – आसुरिशब्दस्य ष्फः स्यात् स्त्रीत्वे घोत्ये।

**उदाहरणम्** –

**आसुरायणी** – असुरस्य अपत्यं स्त्रीत्यर्थे 'अत इञ्' इति इञि प्रत्यये प्रातिपदिकत्वात् सुब्लुकि आघचः वृद्धौ भत्वादलोपे आसुरि इत्यस्मात् स्त्रीत्वविवक्षायाम् ''आसुरेरूपसङ्ख्यानम्'' इति वार्तिकेन ष्फ प्रत्यये अनु.लोपे फस्यायन्नादेशे भसञ्ज्ञायाम् यस्येति चेतीकारलोपे नस्य णत्वे प्रातिपदिकत्वात् ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे भत्वाद् ''यस्येति च'' इत्यकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे आसुरायणी इति रूपं सिद्धम्।

### ४७८ वयसि प्रथमे ४/१/२०

**प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। कुमारी।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – वयसि, प्रथमे इति। 'अजाद्यतष्टाप्' इति सूत्रात् 'अतः' इत्यनुवर्तते प्रातिपदिकात् इत्यधिकृतं विशेष्यते च। तदन्तविधिः। ऋन्नेभ्यो ङीप् इत्यतः ङीबनुवर्तते।

**सूत्रार्थः** – प्रथमे वयसि अर्थे विद्यमानात् अदन्तप्रातिपदिकात् स्त्रियां ङीप् स्यात्।

**व्याख्या** – प्राणिनां कालकृतावस्थाविशेषो वय:। तच्च कौमारं यौवनं वार्धकं चेति त्रिधा भवति। मनुना उक्तम् –

**पिता रक्षति कौमारे भर्ता रक्षति यौवने।**
**पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति।।**

चतुर्विधं वय: इति केचन वदन्ति –

**आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।**
**तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।।**

**उदाहरणम्** –

**कुमारी** – कुमार शब्दात् स्त्रीत्वे द्योत्ये ''वयसि प्रथमे'' इति ङीपि अनुबन्धलोपे ''यचि भम्'' इति भसञ्ज्ञायाम् ''यस्येति च'' इत्यलोपे कुमारी इति जाते ङ्याप्प्रातिपदिकात् इति सु प्रत्यये सोर्हल्ङ्यादिलोपे कुमारी इति रूपं भवति।

**'वयस्यचरम इति वाच्यम्' ( वा. २४३५ )। वधूटी। चिरण्टी। वधूटचिरण्टशब्दौ यौवनवाचिनौ। अत: किम्? शिशु:। कन्याया न, 'कन्याया: कनीन च' ( सू. ११११ ) इति निर्देशात्।**

**पदच्छेद:** – वयसि, अचरमे, इति वाच्यम्।

**वार्तिकार्थ:** – अन्त्यवयभिन्नवयोवाचिनोऽदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् स्यात्।

**उदाहरणानि** –

**वधूटी** – वधूटशब्दात् ''वयस्यचरमे इति वाच्यम्'' इति ङीपि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च वधूटी इति रूपं सिद्धम्। एवमेव – चिरण्टी (चिरेण अटति) इति रूपं सिद्ध्यति।

वधूटचिरण्टशब्दौ यौवनवाचिनौ अत: 'वयसि प्रथमे' इत्यनेन ङीप् न भवति।

अत: किम्? शिशु:–ननु 'वयसि प्रथमे' इति सूत्रे अत: 'इति पदं नानुवर्तेत तदा' शिशु: इति उकारान्तात् प्रथमवचोवाचिन: शब्दात् अपि ङीप: प्राप्तिर्भवति तन्नभवेत्।

### ४७९ द्विगो: ४/१/२१

**अदन्ताद् द्विगोर्ङीप् स्यात् त्रिलोकी। अजादित्वात्–त्रिफला। त्र्यनीका। ( सेना )।**

**सूत्रप्रकार:** – ङीब्विधायकं सूत्रम्।

**पदच्छेद:** – 'द्विगो:' इति द्विगुसमासबोधकं पञ्चम्यन्तं पदम्।

**अनुवृत्ति:** – ''अजाद्यतष्टाप्'' इति सूत्रात् अत:, ऋन्नेभ्योङीप् इत्यत: ङीप् इति चानुवर्तते।

**सूत्रार्थ:** – अदन्तात् द्विगो: स्त्रियाम् ङीप् स्यात्।

**व्याख्या** – 'स्त्रियाम्' इत्यस्य सूत्रेऽधिकार:।''अत:'' इति ''द्विगो:'' इत्यस्य विशेषणम्, तत: ''येनविधिस्तदन्तस्य'' इति तदन्तविधि: भवति।

**उदाहरणम्** –

**त्रिलोकी** – त्रयाणां लोकानां समाहार: इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारेच'' इति समासे ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसञ्ज्ञायाम् सुपो लुकि 'अकारान्तोत्तरपदो द्विगु: स्त्रियामिष्ट:' इति वचनात् त्रिलोक इत्यस्य स्त्रीत्वे 'द्विगो:' इति ङीपि अनुबन्धलोपे च भसञ्ज्ञायाम् 'यस्येति च' इति अलोपे त्रिलोकी इति जाते सु प्रत्यये सोहल्ङ्यादिलोपे त्रिलोकी इति रूपं भवति।

**त्रिफला–त्र्यनीका** – त्रयाणां फलानां समाहार:, त्रयाणाम् अनीकानां समाहार: इति विग्रहे तद्धितार्थोत्तरपदसमाहारे च इति द्विगुसमासे प्रातिपदिकत्वात् सुपो लुकि त्रिफल–त्र्यनीक इति शब्दाभ्यां ''द्विगो:'' इति ङीपि प्राप्ते तं प्रबाध्य अजादिगणे पाठात् ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे स्वादिकार्ये च त्रिफला त्र्यनीका इति भवति।

## ४८० अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ४/१/२२

**अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोर्ङीब्न स्यात् तद्धितलुकि सति। पञ्चभिरश्वैः क्रीता पञ्चाश्वा। आर्हीयष्ठक्। तस्य 'अध्यर्ध-' ( सू. १६९३ ) इति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचिता। द्विकम्बल्या। परिमाणान्तात्तु द्व्याढकी। तद्धितलुकि किम्? समाहारे पञ्चाश्वी।**

सूत्रप्रकारः - ङीब्निषेधकं विधिसूत्रम्।

पदच्छेदः - अपरिमाणञ्च बिस्तश्च आचितश्च कम्बल्यञ्चेति विग्रहे द्वन्द्वे समासे पञ्चमी बहुवचने अपरिमाण बिस्ताचितकम्बल्येभ्यः इति। "द्विगोः" इति 'ऋन्नेभ्योङीप्' इति सूत्रात् ङीबनुवर्तते। प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

सूत्रार्थः - अपरिमाणान्ताद् बिस्तान्तात् आचितान्तात् कम्बल्यन्ताच्च द्विगोः प्रातिपदिकात् स्त्रियां ङीप् न भवति तद्धितलुकि सति।

उदाहरणानि -

**पञ्चाश्वा** - पञ्चभिः अश्वैः क्रीता इति विग्रहे "तद्धितार्थोत्तरपदसमाहारेस्य" इति समासे तेन क्रीतम् इति ठकि "अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम्" इति ढकः लुकि पञ्चाश्व इत्यस्मात् प्रातिपदिकात् "द्विगोः" इति सूत्रेण ङीपि प्राप्ते "अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि" इति तन्निषेधे अजाद्यतष्टाप् इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते पञ्चाश्वा इति रूपं सिद्धम्।

**द्विबिस्ता** - द्वौ बिस्तौ पचति इत्यर्थे "तद्धितार्थोत्तरपदसमाहारे च" इति समासे "सम्भवत्यवहरतिपचति" इति ठकि "अध्यर्धपूर्वाद्." इति सूत्रेण ठको लुकि द्विबिस्त इत्यस्मात् "द्विगोः" इति प्राप्तं ङीपं प्रबाध्य अपरिमाण बिस्ताचित कम्बल्येभ्यो न तद्धि न लुकि इति तन्निषेधे अजाद्यतष्टाप् इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते द्विबिस्ता इति रूपं सिद्धम्।

**द्व्याचिता** - द्वौ आचितौ वहति इत्यर्थे "तद्धितार्थोत्तरपदसमाहारे च" इति समासे "आढकाचितपात्रात् खोऽन्यतरस्याम्" इति ठञि "अध्यर्धपूर्वाद् इति ठञः लुकि "इको यणचि" इति इकारस्य यणादेशे द्व्याचित इत्यस्मात् "द्विगोः" इति ङीप् प्रत्यये प्राप्ते "अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धित लुकि" इति तन्निषेधे अजाद्यतष्टाप् इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते द्व्याचिता इति रूपं सिद्धम्।

**द्विकम्बल्या** - द्वाभ्यां कम्बलाभ्यां क्रीता इत्यर्थे "तद्धितार्थोत्तरपदसमाहारे च" इति समासे "तेन क्रीतम्" इति ठकि "अध्यर्धपूर्वाद्" इति ठको लुकि द्विकम्बल्य इत्यस्मात् द्विगोः इति ङीपि प्राप्ते "अपरिमाणबिस्ताचित." इति निषेधे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कृते द्विकम्बल्या इति रूपं सिद्धम्।

**परिमाणान्तात्तु द्व्याढकी** -

यदि "अपरिमाणबिस्ताचित॰" इति सूत्रे "नतद्धितलुकि" इति पदं न स्यात् तदा द्वौ आढकौ पचति इत्यर्थे समासे "अढाकाचि तपात्रात्." इति ठञि "अध्यर्धपूर्वाद्." इति ठञो लुकि द्व्याढक इत्यस्मात् "द्विगोः" इति ङीपि द्व्यढकी इति रूपं भवति। सूत्रे द्विबिस्ता इत्यादिषु परिमाणान्तात् शब्दात् ङीप् वारणार्थम् बिस्तादि ग्रहणमस्ति।

**तद्धितलुकि किम् - पञ्चाश्वी** -

सूत्रे तद्धितलुकि अर्थात् तद्धितप्रत्ययस्य लुकि सत्येव ङीब्निषेधो भवति। पञ्चाश्वी इत्यत्र पञ्चानामश्वानां समाहारः इत्यर्थे समासे "द्विगोः" इत्यनेन ङीप् भवत्येव।

ध्यातव्यः - परिमाणवाचकपारिभाषिक शब्दाः -

**गुञ्जाः पञ्च तु माषः स्यात्ते सुवर्णस्तु षोडश।**
**पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम्।।**

**पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम्।**

**चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः।।** इति स्मृतिः।

**४८१ काण्डान्तात् क्षेत्रे ४/१/२३**

**क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि। द्वे काण्डे प्रमाणस्या द्विकाण्डा क्षेत्रभक्तिः। 'प्रमाणे द्वयसच-' ( सू. २८३८ ) इति विहितस्य मात्रचः 'प्रमाणे लः, द्विगोर्नित्यम्' ( वा. ३१२९-३० ) इति लुक्। क्षेत्रे किम्? द्विकाण्डी रज्जुः।**

**सूत्रप्रकारः** - निषेधविधिसूत्रमिदम्।

**पदच्छेदः** - काण्डान्तात्, क्षेत्रे इति। 'द्विगोः' इति सूत्रमनुवर्तते ''अपरिमाणबिस्ताचित.'' इति सूत्रात् 'न तद्धितलुकि' इत्यनुवर्तते। 'अजाद्यतष्टाप्' इति सूत्रात् अतः इत्यनुवर्तते।

**सूत्रार्थः** - क्षेत्रेऽर्थे काण्डान्तात् द्विगोः अदन्तात् प्रातिपदिकात् स्त्रियां तद्धितलुकि सति ङीप् न भवति।

**व्याख्या** - काण्डः अन्तः यस्य, तस्मात् काण्डान्तात्। क्षेत्रे-क्षेत्रविषये 'द्विगोः' इति सूत्रेण प्राप्तस्य ङीपः निषेधो भवति तद्धितलुकि सति। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।

**उदाहरणम्** -

**द्विकाण्डा** - द्वे काण्डे प्रमाणस्याः इति विग्रहे ''तद्धितार्थोत्तरपद समाहारे च इति समासे'' प्रमाणे द्वयसज्दध्नञ्मात्रचः इति सूत्रेण मात्रच्प्रत्यये ''प्रमाणे लः द्विगोर्नित्यम्'' इति मात्रचो लुकि प्रातिपदिकत्वात् सुपो लुकि द्विकाण्ड शब्दात् 'द्विगोः' इति ङीप् प्रत्यये प्राप्ते ''काण्डान्तात् क्षेत्रे'' इति सूत्रेण तन्निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे सु प्रत्यये सोर्हल्ङ्यादिलोपे द्विकाण्डा (क्षेत्रभक्तिः) इति रूपं सिद्धम्।

**पङ्क्तिविवेचनम्** -

**क्षेत्रे किम्? द्विकाण्डी रज्जुः**

ननु सूत्रे ''क्षेत्रे'' इति पदं न स्यात् तदा का हानिः? इति जिज्ञासायाम् उच्यते यत् - द्विकाण्डी रज्जुः इत्यत्र रज्जुविषयके अर्थेऽपि ङीपः निषेधो भवति तन्न भवेत्।

**४८२ पुरुषात् प्रमाणेऽन्यतरस्याम् ४/१/२४**

**प्रमाणे यः पुरुषस्तदन्ताद् द्विगोर्ङीब्वा स्यात् तद्धितलुकि।**

**द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी, द्विपुरुषा वा परिखा।**

**सूत्रप्रकारः** - ङीप्विकल्पविधायकं सूत्रम्।

**पदच्छेदः** - पुरुषात्, प्रमाणे, अन्यतरस्याम् इति त्रीणि पदानि।

**अनुवृत्तिः** - ''द्विगोः'' इति सूत्रमनुवर्तते। ''अपरिमाणबिस्ताचित.'' इति सूत्रात् 'तद्धितलुकि' इति 'ऋन्नेभ्योङीप्' इत्यतः ङीबनुवर्तते।

**सूत्रार्थः** - प्रमाणेऽर्थे द्विगुसञ्ज्ञकात् पुरुषान्तात् प्रातिपदिकात् स्त्रियां ङीप् विकल्पेन भवति तद्धितलुकि सति।

**व्याख्या** - 'प्रातिपदिकात्' 'स्त्रियाम्' इत्यस्य चाधिकारः। 'पुरुषात्' इति पदम् प्रातिपदिकात् इत्यस्य विशेषणम् तदन्तविधिना पुरुषान्तात् इत्यर्थो भवति। अन्यतरस्याम् विकल्पेन भवति इत्यर्थः।

**उदाहरणानि** -

**द्विपुरुषी** - द्विपुरुषा वा परिखा- द्वौ पुरुषौ प्रमाणमस्याः इत्यर्थे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासे ''प्रमाणे द्वयसज्दध्नञ्मात्रचः'' इति मात्रचि ''प्रमाणे लः द्विगोर्नित्यम्'' इत्यनेन मात्रचः लुकि प्रातिपदिकत्वात् सुब्लुकि द्विपुरुष शब्दात् ''द्विगोः'' इति ङीपि प्राप्ते ''अपरिमाणबिस्ताचित.'' इति तन्निषेधे प्राप्ते तमपि प्रबाध्य पुरुषात्प्रमाणेऽन्यतरस्याम् इत्यनेन विकल्पेन ङीपि अनुबन्धलोपे द्विपुरुष+ई इति 'यचि भम्' इति भसञ्ज्ञायाम्

'यस्येति च' इत्यकारलोपे स्वादिकार्ये स द्विपुरुषी इति रूपं ङीप् विकल्पपक्षे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च द्विपुरुषा इति रूपं भवति।

**ध्यातव्यः -**

**परिखा** - दुर्गं परितः तत्संरक्षणार्थो जलाशयः परिखा।

**४८३. ऊधसोऽनङ् ५/४/१३१॥ ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियाम्। इत्यनङि कृते डाब्ङीब्निषेधेषु प्राप्तेषु।**

**सूत्रप्रकारः** - अनङ्विधायकमिदं सूत्रम्।

**पदच्छेदः** - ऊधसः, अनङ् इति।

**अनुवृत्तिः** - "बहुव्रीहौ सक्थ्यक्ष्णोः" इति सूत्रात् 'बहुव्रीहौ' इत्यनुवृत्य षष्ठ्या विपरिणम्यते, ऊधसः इत्यनेन विशेष्यते। "येन विधिस्तदन्तस्य" इति विशेषणात् तदन्तविधिः। अनङ् इत्यस्य ङित्वात् "ङिच्च" इति ऊधस् इत्यस्य सकारस्यानङ् स्यात्। 'स्त्रियाम्' "प्रातिपदिकात्" इत्यस्य चाधिकारः।

**सूत्रार्थः** - ऊधश्शब्दान्तस्य बहुव्रीहेः स्त्रियाम् अनङादेशो भवति।

## ४८४ बहुव्रीहेरूधसो ङीष् ४/१/२५

ऊधोऽन्ताद् बहुव्रीहेर्ङीष् स्यात् स्त्रियाम्। कुण्डोध्नी। स्त्रियाम् किम्? कुण्डोधो धैनुकम्। इहानङ्ङपि न, तद्विधौ '**स्त्रियाम्**' (**वा. ३३६७**) इत्युपसंख्यानात्।

**सूत्रप्रकारः** - विधिसूत्रमिदम्।

**पदच्छेदः** - बहुव्रीहेः, ऊधसः, ङीष् इति। स्त्रियाम् इत्यस्याधिकारः।

**सूत्रार्थः** - ऊधोऽन्ताद् बहुव्रीहेः स्त्रियां ङीष् स्यात्।

**रूपलेखनप्रकारः -**

**कुण्डोध्नी** - कुण्डमिव ऊधो यस्याः इति विग्रहे बहुव्रीहौ समासे "ऊधसोऽनङ्" इति ऊधस् इत्यस्य सस्य अनङादेशे कुण्ड सु ऊध अन् स् "अतो गुणे" इति पररूपे प्रातिपदिकत्वात् सुपोलुकि "आद्गुणः" इति गुणे कुण्डोधन् इत्यस्मात् अन उप धालोपिनोऽन्यतरस्याम् इति विकल्पेन ङीपि प्राप्ते तं प्रबाध्य डाबुभाभ्यामन्यतरस्याम् इति विकल्पेन डाप् प्रत्यये प्राप्ते तं प्रबाध्य "बहुव्रीहेरूधसो ङीष्" इति ङीषि अनुबन्धलोपे कुण्डोधन्+ई इति जाते "यचि भम्" इति भत्वात् "अल्लोपोऽनः" इति अनोऽकारस्य लोपे सु प्रत्यये सोर्हल्ङ्यादिलोपे कुण्डोध्नी इति रूपं सिद्धम्।

**पङ्क्तिविवेचनम् -**

**स्त्रियाम् किम्? कुण्डोधो धैनुकम्**

ननु ऊधसोऽनङ् इति सूत्रे स्त्रियाम् इत्यस्याधिकारः न स्यात् तदा कुण्डमिव ऊधः यस्य तत् कुण्डोधः धेनुकम् इत्यत्र नपुंसकलिङ्गेऽपि अनङः प्राप्तिर्भवति तन्न भवेत्।

## ४८५ सङ्ख्याव्ययादेर्ङीप् ४/१/२६

ङीषोऽपवादः। द्व्यूध्नी। अत्यूध्नी। बहुव्रीहेरित्येव। ऊधोऽतिक्रान्ता अत्यूधाः।

**पदच्छेदः** - संख्याव्ययादेः, ङीप्।

**अनुवृत्तिः** - बहुव्रीहेरूधसो ङीष् इत्यतः बहुव्रीहेः ऊधसः इत्यनुवर्तेते।

**सूत्रार्थः** - संख्यादेः अव्ययादेः च ऊधोऽन्ताद् बहुव्रीहेः स्त्रियां ङीप् स्यात्।

**व्याख्या** - संख्या च अव्ययञ्चेति संख्याव्यये। संख्याव्यये आदिनी यस्य सः तस्य संख्याव्ययादेः। ङीप् इति विधेयः प्रत्ययः। ङीषोऽपवादः। स्त्रियाम् प्रातिपदिकात् इत्यस्य चाधिकारः।

**रूपलेखनप्रकारः –**

**द्व्यूध्नी** – द्वे ऊधसी यस्याः इति विग्रहे बहुव्रीहिसमासे 'ऊधसोऽनङ्' इति ऊधसः सस्यानङि प्रातिपदिकत्वात् सुपो लुकि द्वि ऊधन् इति जाते 'इको यणचि' इतीकारस्य यणि द्व्यूधन् इत्यस्मात् स्त्रीत्वे ''बहुव्रीहेरूधसोङीष् इति प्राप्तं ङीषं प्रबाध्य संख्याव्ययादेर्ङीप् इति ङीपि अनुबन्धलोपे भत्वात्''अल्लोपोऽनः'' इति अकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे द्व्यूध्नी इति रूपं सिद्धम्।

**अत्यूध्नी** – अतिशयितमूधो यस्या इति विग्रहे बहुव्रीहौ समासे ''ऊधसोऽनङ्'' इति सस्यानङि प्रातिपदिकत्वात् सुपो लुकि अति ऊधन् इति जाते ''इको यणचीति यणि'' बहुव्रीहेरूधसो ङीष् इति प्राप्तं ङीषं प्रबाध्य ''संख्याव्ययादेर्ङीप्'' इति ङीपि अनुबन्धलोपे भसंज्ञायामल्लोपोऽनः इति अलोपे अत्यूध्नी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे अत्यूध्नी इति रूपं सिद्धम्।

### ४८६ दामहायनान्ताच्च ४/१/२७

**सङ्ख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च ङीप् स्यात्। दामान्ते डाप्प्रतिषेधयोः प्राप्तयोर्हायनान्ते टापि प्राप्ते वचनम्। द्विदाम्नी। अव्ययग्रहणाननुवृत्तेरुद्दामा वडवेत्यत्र डाब्निषेधावपि पक्षे स्तः। द्विहायनी बाला।**

**सूत्रप्रकारः –** विधिसूत्रमिदम्।

**पदच्छेदः –** दामहायनान्तात् च। 'सङ्ख्याव्ययादेर्ङीप्' इति सूत्रात् संख्यादेः ङीप् चानुवर्तते। बहुव्रीहेरुधसोङीष् इत्यतः बहुव्रीहेः इत्यनुवर्तते।

**सूत्रार्थः –** संख्यादेः दामान्ताद् हायनान्ताच्च बहुव्रीहेः ङीप् स्यात्।

**व्याख्या –** दाम च हायनश्च इति दामहायनौ तौ अन्तौ यस्य तस्मात् दामहायनान्तात्। 'बहुव्रीहेः' इत्यस्य विशेषणौ दामहायनौ। विशेषणात् तदन्तविधेः सिद्धत्वे अन्तग्रहणं स्पष्टार्थम्।

**रूपलेखनप्रकारः –**

**द्विदाम्नी** – द्वे दामनी यस्याः इति विग्रहे बहुव्रीहौ समासे प्रातिपदिकत्वात् सुब्लुकि द्विदामन् इत्यस्मात् स्त्रीत्वे द्योत्ये डाबुभाभ्यामन्यतरस्याम् इति विकल्पेन डापि प्राप्ते तं प्रबाध्य ''अन उपधालोपिनोऽन्यतरस्याम्'' इति प्राप्तस्य ङीपः 'अनो बहुव्रीहेः' इति निषेधं च प्रबाध्य दामहायनान्ताच्चेति ङीपि अनुबन्धलोपे भत्वात्''अल्लोपोऽनः'' इति अनोऽकारस्य लोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे द्विदाम्नी इति रूपं सिद्धम्।

**द्विहायनी बाला** – द्वौ हायनौ यस्याः इति विग्रहे समासे प्रातिपदिकत्वात् सुब्लुकि द्विहायन इत्यस्मात् स्त्रीत्वे द्योत्ये ''अजाद्यतष्टाप्'' इति टापि प्राप्ते तं प्रबाध्य ''दामहायनान्ताच्च'' इति ङीपि अनुबन्धलोपे भत्वादल्लोपे द्विहायनी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे द्विहायनी इति रूपं सिद्धम्।

**पङ्क्तिविवेचनम् –**

**अव्ययग्रहणाननुवृत्ते.........................................पक्षे स्तः**

अस्मिन् सूत्रे ''संख्याव्ययादेर्ङीप्'' इति सूत्रात् अव्ययादेः अनुवृत्तिः किमर्थम् न इति चेत्– उत्क्रान्तं दाम यस्याः इति विग्रहे उद्दाम शब्दात् स्त्रीत्वे डाबुभाभ्यामन्यतरस्याम् इति प्राप्तस्य डापः अन उपधालोपिनोऽन्यतरस्याम् पाक्षिक ङीपः निषेधो न भवति। अत्र ङीब्निषेधार्थम् अव्ययादेः ग्रहणं न कृतम्।

**'त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्' ( वा. ५०३८ )।**

**'वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते' ( वा. २४४१ )। त्रिहायणी। चतुर्हायणी। वयसोऽन्यत्र द्विहायना, त्रिहायना, चतुर्हायना शाला।**

**वार्तिकार्थः ( ५०३८ )** – त्रिचतुर्भ्यां शब्दाभ्यां परस्य हायनस्य नस्य णत्वं स्यात्।

**वार्तिकार्थः ( २४२१ )** – वयोवाचकस्यैव हायनशब्दस्य नस्य णत्वं स्यात्।

**रूपलेखनप्रकारः –**

**त्रिहायणी-चतुर्हायणी** – त्रयो हायनाः यस्याः, चत्वारोहायनाः यस्याः इति विग्रहे बहुव्रीहौ समासे प्रातिपदिकत्वात् सुपो लुकि त्रिहायन चतुर्हायन इति शब्दाभ्याम् ''दामहायनान्ताच्च'' इति ङीपि भत्वात् यस्येति चेति अकारलोपे त्रिहायनी, चतुर्हायनी इति। ''त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्'' इति नस्य णत्वे सु प्रत्यये सोर्हल्ङ्यादिलोपे त्रिहायणी, चतुर्हायणी इति सिद्धम्।

**द्विहायना - त्रिहायना - चतुर्हायना** – इत्यत्र हायन शब्दः वयोवाचको नास्ति अपितु कक्षवाचकः वर्तते। अतः बहुव्रीहौ समासे अपि ''वयोवाचकस्यैवहायनस्य ङीब्णत्वं चेष्यते इति वार्तिकेन निषेधात् ''दामहायनान्ताच्च'' इत्यस्य प्रवृत्तिर्न भवति। ''अजाघतष्टाप्'' इति टापि सवर्णदीर्घे स्वादिकार्ये च द्विहायना, त्रिहायना चतुर्हायना इत्येव रूपं भवति।

### ४८७ नित्यं सञ्ज्ञाच्छन्दसोः ४/१/२९

**अन्नन्ताद् बहुव्रीहेरुपधालोपिनो ङीप् स्यात् सञ्ज्ञाच्छन्दसोः।**

**सुराज्ञी नाम नगरी। अन्यत्र पूर्वेण विकल्प एव। वेदे तु शतमूर्ध्नी।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – नित्यम्, सञ्ज्ञाछन्दसोः इति पदद्वयम्।

**अनुवृत्तिः** – ''अन उपधालोपिनोऽन्यतरस्याम्'' इति सूत्रात् अन, उपधालोपिनः इत्यनुवर्तेते। ''बहुव्रीहेरुधसो ङीष्'' इति सूत्रात् बहुव्रीहेः इत्यनुवर्तते। ''संख्याव्ययादेर्ङीप्'' इति सूत्रात् ङीप् इत्यनुवर्तते। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः। अनः इति पदं ''बहुव्रीहेः'' इत्यस्य विशेषणम्। विशेषणात् तदन्तविधिः।

**सूत्रार्थः** – उपधालोपिनः अन्नन्ताद् बहुव्रीहेः संज्ञायां छन्दसि च स्त्रीत्वे द्योत्ये ङीप् स्यात्।

**रूपलेखनप्रकारः –**

**सुराज्ञी नाम नगरी** – सु – शोभनः राजा यस्याः इति विग्रहे बहुव्रीहौ समासे प्रातिपदिकत्वात् सुपो लुकि सुराजन् इत्यस्मात् स्त्रीत्वे धोत्ये ''अन उपधालोपिनोऽन्यतरस्याम्'' इति विकल्पेन ङीपि प्राप्ते तं प्रबाध्य नित्यं सञ्ज्ञाछन्दसोः इति ङीपि अनुबन्धलोपे ''यचि भम्'' इति भत्वाद् ''अल्लोपोऽनः'' इति अनोऽकारस्य लोपे सुराज्न्+ई इति जाते ''स्तोः श्चुना श्चुः'' इति श्चुत्वे सुराज्ञी इति जाते सु प्रत्यये ''हल्ङ्याभ्यो दीर्घात्.'' इति सुलोपे सुराज्ञी इति रूपं सिद्धम्।

सञ्ज्ञाभिन्नार्थे ''अन उपधालोपिनोऽन्यतर स्याम्'' इत्यनेन विकल्पेन ङीप् भवति सुराज्ञी-सुराजा इति रूपं भवति।

**शतमूर्ध्नी** – शतं मूर्धानो यस्याः इति विग्रहे बहुव्रीहौ समासे शतमूर्धन् शब्दात् वेदे स्त्रीत्वे द्योत्ये ''नित्यं सञ्ज्ञाछन्दसोः'' इति सूत्रेण ङीपि अनुबन्धलोपे भत्वादनोऽकारस्य लोपे शतमूर्ध्नी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे शतमूर्ध्नी इति रूपं भवति।

### ४८८ केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ४/१/३०

**एभ्यो नवभ्यो नित्यं ङीप् स्यात् सञ्ज्ञाछन्दसोः। 'अथो त इन्द्रः केवलीर्विशः' 'मामकी तनू'। भागधेयी। पापी। अपरी। समानी। आर्यकृती। सुमङ्गली। भेषजी। अन्यत्र केवला इत्यादि। मामकग्रहणं नियमार्थम्, अण्यन्तत्वादेव सिद्धेः। तेन लोकेऽसञ्ज्ञायां च मामिका।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्

**पदच्छेदः** – केवल, मामक, भागधेय, पाप, अपर, समान, आर्यकृत, सुमङ्गल, भेषज-इत्येतेभ्य नवभ्यः इत्यर्थः।

**अनुवृत्तिः** – नित्यं सञ्ज्ञाछन्दसोः इति सूत्रमनुवर्तते।

**सूत्रार्थः** - एभ्यो नवप्रातिपदिकेभ्यः स्त्रीत्वे द्योत्ये संज्ञायां छन्दसि च स्त्रीत्वे द्योत्ये ङीप् स्यात्।

**रूपलेखनप्रकारः** -

**अथोत इन्द्र केवलीः विशः** - इत्यत्र केवल शब्दात् प्रातिपदिकात् वेदे स्त्रीत्वे द्योत्ये ''केवलमामक भागधेयपापापरसमानार्य कृत सुमङ्गल भेषजाच्च'' इति ङीपि अनुबन्धलोपे भत्वादलोपे केवली इति जाते शस् प्रत्यये अनु.लोपे पूर्वसवर्णदीर्घे सस्य रुत्वेविसर्गे च कृते केवलीः इति रूपं सिद्धम्।

**मामकी तनू** - 'मम' इयमित्यर्थे ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इत्यणि ''तवकममकावेकवचने'' इति ममकादेशे ''तद्धितेष्वचामादेः'' इति आदिवृद्धौ मामक इत्यस्मात् ''केवलमामक भागधेय.'' इति ङीपि अनुबन्धलोपे भत्वादलोपे मामकी इत्यस्मात् ङिविभक्तौ ''सुपां सुलुक्.'' इति सूत्रेण ङेर्लुकि मामकी इति रूपं सिद्धम्।

**भागधेयी** - भाग शब्दात् धेयप्रत्यये भागधेय इत्यस्मात् ''केवलमामक.'' इति ङीपि भत्वादलोपे स्वादिकार्ये च भागधेयी इति रूपं सिद्धम्।

**पापी** - पापमस्ति अस्य इत्यर्थे ''अर्श आदिभ्योऽच्'' इति अच्प्रत्यये पाप शब्दात् स्त्रीत्वे ''केवलमामकभागधेय.'' इति सूत्रेण ङीपि अनु.लोपे स्वादिकार्ये च पापी इति रूपं सिद्धम्। लोके-पापा इति रूपं भवति।

**सुमङ्गली** - वध्वाः इयं सञ्ज्ञा। सुमङ्गल शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''केवलमामक'' इति सूत्रेण ङीपि भत्वादलोपे स्वादिकार्ये च सुमङ्गली इति रूपं भवति।

वेदे तु सुमङ्गल शब्दात् ''छन्दसी वनिपौ'' इति ई प्रत्यये सुमङ्गली इति जाते सु प्रत्यये अङ्चन्तत्वात् सुलोपाभावे सस्य रुत्वविसर्गौ सुमङ्गलीः इति भवति। वेदे प्रयोगः - सुमङ्गलीरियं वधूः।

**भेषजी** - भेषज शब्दात् वेदेऽर्थे ''केवल मामक.'' इति ङीपि भत्वादलोपे स्वादिकार्ये च भेषजी इति रूपं भवति।

**पङ्क्तिविवेचनम्** -

**मामकग्रहणं नियमार्थम्, अणणन्तत्वादेवसिद्धेः।**

मामकशब्दः अण्णन्तः वर्तते ''टिड्ढाणञ्.'' इत्यनेन ङीपि सिद्धे केवलमामक. इति सूत्रे किमर्थं ग्रहणम् इति प्रश्ने? उच्यते भाष्येनियमार्थोऽयम् आरम्भः। मामक शब्दात् सञ्ज्ञाछन्दसोरेव। क्व माभूत्? मामिका बुद्धिरिति अर्थात् लोके असञ्ज्ञायाञ्च ङीप्प्रत्ययो न भवति।

## ४८९ अन्तर्वत्पतिवतोर्नुक् ४/१/३२

**एतयोः स्त्रियां नुक् स्यात्। 'ऋन्नेभ्यो ङीप्' ( सू. ३०६ )। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते। तत्रान्तरस्त्यस्यां गर्भ इति विग्रहे अन्तश्शब्दस्याधिकरणशक्तिप्रधानतयास्तिसामानाधिकरण्याभावादप्राप्तो मतुब्निपात्यते। 'पतिवत्नी' इत्यत्र तु वत्वं निपात्यते। अन्तर्वत्नी। पतिवत्नी। प्रत्युदाहरणं तु - अन्तरस्त्यस्यां शालायां घटः। पतिमती पृथिवी।**

**सूत्रप्रकारः** - विधिसूत्रमिदम्।

**पदच्छेदः** - अन्तर्वत्पतिवतः, नुक्।

**सूत्रार्थः** - अन्तर्वत्-पतिवत् प्रातिपदिकयोः स्त्रियां नुक् स्यात्।

**व्याख्या** - अन्तर्वत्-पतिवत्-शब्दौ निपातनात् सिद्धौ। षष्ठीद्विवचने अन्तर्वत्पतिवतोः इति। कित्वसामर्थ्याद् नुगागमः, न तु प्रत्ययः। कित्वादन्त्यावयवः। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।

**उदाहरणानि** -

**अन्तर्वत्नी**- गर्भिण्यामर्थे अन्तःशब्दात् ''अन्तर्वत्पतिवतोर्नुक्'' इति मतुपि नुकि आगमे च निपातिते अन्तर्वत्न् इति जाते ''ऋन्नेभ्योङीप्'' इति ङीप् प्रत्ययेऽनुबन्धलोपे सु प्रत्यये सोर्हल्ङ्यादिलोपे अन्तर्वत्नी इति रूपं भवति।

**पतिवत्नी** - सधवायां स्त्रियामर्थे पतिशब्दात् मतुपि पतिमत् इति जाते ''अन्तर्वत्पतिवतोर्नुक्'' इति मस्य वत्वे नुकि

चान्ते निपातिते पतिवन् इति जाते ''ऋन्नेभ्योङीप्'' इति ङीपि अनुबन्धलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे पतिवत्नी इति रूपं सिद्धम्।

**प्रत्युदाहरणम् –**

**पतिमती पृथ्वी** – अत्र पति शब्दस्य राजनि अर्थे विद्यमानत्वात् ''अन्तर्वत्पतिवतोर्नुक्'' इति सूत्रस्य प्रवृत्तिर्न भवति। ''उगितश्च'' इति सूत्रेण ङीप् भवति। भत्वादलोपे पतिमती इति रूपं भवति।

### ४९० पत्युर्नो यज्ञसंयोगे ४/१/३३

**पतिशब्दस्य नकारादेशः स्याद्यज्ञेन सम्बन्धे।**

**वशिष्ठस्य पत्नी। तत्कर्तृकस्य यज्ञस्य फलभोक्त्रीत्यर्थः। दम्पत्योः सहाधिकारात्।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – पत्युः, नः यज्ञसंयोगे इति च्छेदः।

**सूत्रार्थः** – अनुपसर्जनपतिशब्दस्य स्त्रियां नकारादेशः स्यात् यज्ञेन सम्बन्धे सति।

**व्याख्या** – 'पत्युः' इति षष्ठ्यन्तं पदम्। नः प्रथमान्तः विधेयः आदेशः। 'न' इत्यकार उच्चरणार्थः। यज्ञसम्बन्धे-यज्ञेन (सहस्वामितया) सम्बन्धः। स्त्रियाम्, प्रातिपदिकात्, अनुपसर्जनात् इत्यस्य चाधिकारः।

**रूपलेखनप्रकारः –**

**वसिष्ठस्य पत्नी** – अत्र पति शब्दात् स्त्रीत्वे द्योत्ये ''पत्युर्नो यज्ञसंयोगे'' इति सूत्रेण पति शब्दस्य इकारस्य नकारादेशे पत्न् इति जाते ''ऋन्नेभ्यो ङीप्'' इति ङीपि सुप्रत्यये सोर्हल्ङ्यादिलोपे पत्नी इति रूपं भवति।

### ४९१ विभाषा सपूर्वस्य ४/१/३४

**पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्।**

**गृहस्य पतिः गृहपतिः, गृहपत्नी। 'अनुपसर्जनस्य' इतीहोत्तरार्थमनुवृत्तमपि न पत्युर्विशेषणम्, किं तु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी, दृढपतिः। वृषलपत्नी, वृषपतिः। अथ 'वृषलस्य पत्नी' इति व्यस्ते कथमिति चेन्न, पत्नीव पत्नीत्युपचारात्। यद्वा, आचारक्विबन्तात् कर्तरि क्विप्। अस्मिंश्च पक्षे- पत्नियौ, पत्नियः, इतीयङ्विषये विशेषः। सपूर्वस्य किम्? गवां पतिः स्त्री।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – विभाषा, सपूर्वस्य।

**अनुवृत्तिः** – ''पत्युर्नो यज्ञसंयोगे'' इति सूत्रात् पत्युर्नः इत्यनुवर्तते।

**सूत्रार्थः** – पूर्वावयवसहितस्य अनुपसर्जनस्य पति शब्दान्त प्रातिपदिकस्य स्त्रियां नकारादेशः स्यात् विकल्पेन।

**व्याख्या** – विद्यमानः पूर्वः यस्य सः तस्य। प्रातिपदिकात्, अनुपसर्जनात् स्त्रियाम् इत्यस्य चाधिकारः। प्रातिपदिकात् इति पदं षष्ठ्यां विपरिणमते पत्युः इत्यनेन विशेष्यते। विशेषणात् तदन्तविधिः।

**उदाहरणानि –**

**गृहपतिः-गृहपत्नी** – गृहस्य पतिः स्वामिनीत्यर्थे षष्ठीतत्पुरुषे कृते गृहपति शब्दे यज्ञसंयोगाभावात् पूर्वसूत्रस्य अप्राप्तौ सत्यां ''विभाषा सपूर्वस्य'' इति पति शब्दान्तस्य विकल्पेन नकारादेशे गृहपत्न् इति जाते ''ऋन्नेभ्यो ङीप्'' इति ङीपि सुप्रत्यये सोर्हल्ङ्यादिलोपे गृहपत्नी इति रूपं भवति।

ङीब्नत्वयोरभावे गृहपतिः इति रूपं भवति।

**दृढपत्नी-दृढपतिः** – सूत्रे अनुपसर्जनात् इति पतिशब्दान्तस्य विशेषणम्। अतः दृढः पतिः यस्याः इति विग्रहे बहुव्रीहौ अपि दृढपति शब्दात् ''विभाषासपूर्वस्य'' इति विकल्पेन ङीब्नत्वयोः कृतयोः दृढपत्नी-दृढपतिः इति रूपद्वयं भवति।

**वृषलपत्नी-वृषपतिः** – वृषलस्य पतिः इति विग्रहे समासे यज्ञसंयोगाभावे रक्षिका इत्यर्थे वृषलपति शब्दात् स्त्रीत्वे

"विभाषा सपूर्वस्य" इति पति शब्दान्तस्य नत्वे 'ऋन्नेभ्यो ङीप्' इति ङीपि अनुबन्धलोपे स्वादिकार्ये च कृते वृषलपत्नी-वृषलपतिः इति रूपं द्वयं भवति।

**पङ्क्तिविवेचनम् -**

**अथ वृषलस्य पत्नी..........................................कर्तरि क्विप्।**

"विभाषा सपूर्वस्य" इति सूत्रं समस्ते एव ङीब्नत्व विधानाय प्रवर्तते। अत्र प्रश्नो भवति यत् व्यस्ते-असमस्ते 'वृषलस्य पत्नी' इत्यत्र वृषलस्य यज्ञसंयोगाभावात् पत्युर्नो यज्ञसंयोगे इत्यस्याप्रवृत्या सपूर्वत्वाभावाच्च अस्य सूत्रस्याप्रवृत्याः "वृषलस्य पत्नी" इति प्रयोगः कथं भवति? अत्रोच्यते - यज्ञसंयुक्तायां द्विजादिभार्यायां यः पत्नी शब्दः व्युत्पाद्यते तस्यैव अयज्ञसंयुक्तायां पाणिग्रहणादिधर्मपुरस्कारेण लक्षणावृत्या प्रयोगः क्रियते।

अथवा पत्नी इवाचरति इत्यर्थे क्विप् प्रत्यये, आचारक्विबन्तात् पुनः कर्तरि अर्थे क्विप् प्रत्यये कृते पत्नी शब्दो व्युत्पाद्यते, तस्यैवात्र प्रयोगो बोध्यः।

**सपूर्वस्य किम्? गवां पतिः स्त्री**

सूत्रे यदि 'सपूर्वस्य' इति पदं न स्यात् तदा गवां पतिः इति वाक्ये असमस्ते अपि ङीब्नत्वयोः प्राप्तिर्भवति तन्न भवेत् इति।

## ४९२ नित्यं सपत्न्यादिषु ४/१/३५

**पूर्वविकल्पापवादः। समानस्य सभावोऽपि निपात्यते।**

**समानः पतिर्यस्याः सा सपत्नी। एकपत्नी। वीरपत्नी।**

**सूत्रप्रकारः -** विधिसूत्रमिदम्।

**पदच्छेदः -** नित्यम्, सपत्नी, आदिषु इति च्छेदः।

**अनुवृत्तिः -** पत्युर्नोयज्ञसंयोगे इति सूत्रात् पत्युर्नः इत्यनुवर्तते।

**सूत्रार्थः -** सपत्न्यादिगणपठितपति शब्दान्तस्रू नकारादेशः स्यात्।

**व्याख्या -** "नित्यं सपत्न्यादिषु" इति सूत्रे "सपत्न्यादिषु इति विषये सप्तमी।

**उदाहरणानि -** सपत्नी, एकपत्नी, वीरपत्नी इति।

**रूपलेखनप्रकारः -**

**सपत्नी** - समानः पतिः यस्याः इति विग्रहे बहुव्रीहिसमासे समानस्य निपातनात् स इत्यादेशे सपति इत्यस्मात् प्रातिपदिकात् स्त्रीत्वे "नित्यं सपत्न्यादिषु" इति नकारान्तादेशे सपत्न् इति जाते ऋन्नेभ्यो ङीप् इति ङीपि अनुबन्धलोपे, सुप्रत्यये सोर्हल्ङ्याब्दिलोपे सपत्नी इति रूपं सिद्धम्।

**एकपत्नी** - एकः (समानः) पतिर्यस्याः इति बहुव्रीहौ समासे प्रातिपदिकत्वात् सुपोलुकि एकपति इत्यस्मात् नित्यं सपत्न्यादिषु इति नकारान्तादेशे "ऋन्नेभ्यो ङीप्" इति ङीपि स्वादिकार्ये च एकपत्नी इति रूपं सिद्धम्।

**वीरपत्नी** - वीरः पतिर्यस्याः इति बहुव्रीहौ प्रातिपदिकत्वात् सुपो लुकि वीरपति इत्यस्मात् "नित्यं सपत्न्यादिषु" इति नकारान्तादेशे "ऋन्नेभ्यो ङीप्" इति ङीपि स्वादिकार्ये कृते वीरपत्नी इति रूपं सिद्धम्।

## ४९३ पूतक्रतौरै च ४/१/३६

**अस्य स्त्रियाम् ऐ आदेशो ङीप् च।**

**'इयं त्रिसूत्री पुंयोग एवेष्यते' ( वा. २४४९ )**

**सूत्रप्रकारः -** विधिसूत्रमिदम्।

**पदच्छेदः -** पूतक्रतोः, ऐ, च इति च्छेदः।

**सूत्रार्थः -** पूतक्रतुप्रातिपदिकात् अनुपसर्जनात् स्त्रियां ङीप् पूतक्रतोः ऐकारश्चान्तादेशः स्यात्।

**व्याख्या** – 'पूतक्रतोः' इति षष्ठ्यन्तं पदम्। 'ए' इति लुप्तप्रथमान्तम् आदेशपदम्। 'संख्याव्ययादेर्ङीप्' इति डीबनुवर्तते। स्त्रियाम् प्रातिपदिकात्, अनुपसर्जनात् इत्यस्य चाधिकारः। च समुच्चयार्थकः। अलोऽन्त्यस्य इति परिभाषासूत्रसहायता ऐ आदेशः पूतक्रतु इत्यस्य अन्त्ये वर्णे भवति।

**रूपलेखनप्रकारः** –

**पूतक्रतायी** – पूतक्रतोः स्त्री इत्यर्थे ''पूतक्रतोरैच'' इति ङीप् प्रत्यये उकारस्य ऐकारादेशे च पूतक्रतै+ई इति जाते 'एचोऽयवायावः' इति ऐकारस्य आयादेशे पूतक्रतायी जाते सु प्रत्यये सोर्हल्ङ्याादिलोपे पूतक्रतायी इति रूपं सिद्धम्।

**वा. – इयं त्रिसूत्री पुंयोग एवेष्यते ( वा. २४४९ )**

**वार्तिकार्थः** – पूतक्रतोरै च, वृषाकप्यग्निकुसितकुसिदानामुदात्तः, मनोरौ वा इति सूत्रत्रयी पुंयोगे एव विधानं करोति। यया तु क्रतवः पूताः स्यात् पूतक्रतुरेव सा –

इत्यर्थे पूतक्रतु शब्दात् पुंयोगाभावात् ङीप् ऐकारादेशश्च न भवति पूतक्रतुः इति रूपं भवति।

### ४९४ वृषाकप्यग्निकुसितकुसिदानामुदात्तः ४/१/३७

**एषामुदात्त ऐ आदेशः स्यान्ङीप् च।**

**वृषाकपेः स्त्री वृषाकपायी। 'हरिविष्णू वृषाकपी' इत्यमरः। 'वृषाकपायी श्रीगौर्योः' इति च। अग्नायी। कुसितायी, कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – वृषाकपिश्च, अग्निश्च, कुसितश्च कुसिदश्च इति तेषाम् वृषाकप्यग्निकुसितकुसिदानाम्, उदात्तः इति पदच्छेदः।

**अनुवृत्तिः** – 'पूतक्रतोरैच' इति सूत्रात् ऐ च इत्यनुवर्तते। संख्याव्ययादेर्ङीप् इति सूत्रात् ङीबनुवर्तते।

**सूत्रार्थः** – एषां शब्दानामुदात्त ऐ आदेशः स्यान्ङीप् च।

**व्याख्या** – प्रातिपदिकात्, अनुपसर्जनात्, स्त्रियाम् इत्यस्य च अधिकारः सूत्रे उदात्तः इति पदम् 'ऐ' इत्यस्य विशेषणपदम्। इदं सूत्रं पुंयोग एव प्रवर्तते।

**उदाहरणानि** –

**वृषाकपायी** – वृषाकपेः स्त्री इत्यर्थे वृषाकपि शब्दात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ''वृषाकप्यग्निकुसितकुसिदानामुदात्तः'' इति सूत्रेण ङीप् प्रत्यये कपि इत्यस्य इकारस्य उदात्ते ऐकारे अनुबन्धलोपे वृषाकपै+ई इति जाते ''एचोऽयवायावः'' इत्यैकारस्य आयादेशे स्वादिकार्ये च वृषाकपायी इति रूपं सिद्धम्।

**अग्नायी** – अग्नेः स्त्रीत्यर्थे 'वृषाकप्यग्नि.' इति सूत्रेण इकारस्य उदात्ते ऐकारे ङीपि प्रत्यये च अग्नै+ई इति जाते ''एचोऽयवायावः'' इति आयादेशे सु प्रत्यये सोर्हल्ङ्याादिलोपे अग्नायी इति रूपं सिद्धम्।

**कुसितायी-कुसिदायी** – कुसितस्य स्त्री, कुसिदस्य स्त्री इति अर्थे ''वृषाकप्यग्निकुसित कुसिदानाम्.'' इति अन्त्यस्य अकारस्य ऐत्वे ङीपि प्रत्यये च कृते अनुबन्धलोपे ''एचोऽयवायावः'' इति आयादेशे स्वादिकार्ये च कृते कुसितायी-कुसिदायी इति रूपम्।

### ४९५ मनोरौ वा ४/१/३८

**मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा, ताभ्यां सन्नियोगशिष्टो ङीप् च।**

**मनोः स्त्री मनायी, मनावी, मनुः।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – मनोः, औ, वा इति च्छेदः।

**अनुवृत्तिः** – 'पूतक्रतोरैच' इत्यतः ऐ, ''वृषाकप्यग्नि.'' इति सूत्रात् उदात्तः, ''संख्यात्ययादे र्ङीप्'' इत्यतः ङीप् चानुवर्तते।

**सूत्रार्थः** - अनुपसर्जनात् मनु शब्दात् स्त्रियां पुंयोगे ङीप् वा भवति, मनु शब्दान्तस्य औकारः उदात्तश्च ऐकारोऽन्तादेशः वा भवति।

**व्याख्या** - अनुपसर्जनात्, प्रातिपदिकात्, स्त्रियाम् इत्यस्य अधिकारोऽत्र वर्तते। मनोः इत्यत्र षष्ठ्या विभक्तौ अलोऽन्त्यस्य इत्यस्योपस्थितौ मनु इत्यस्यान्तस्य उवर्णस्य औ, ऐ च भवति।

**रूपलेखनप्रकारः** -

**मनावी-मनायी-मनुः**- मनोः स्त्रीत्यर्थे 'मनोरौ वा' इत्यनेन विकल्पेन मनु शब्दान्तस्य उकारस्य औकारे ङीप् प्रत्यये च पक्षे अनेनैव सूत्रेण उकारस्य ऐकारे ङीपि च मनै+ई इति जाते "एचोऽयवायावः" इति क्रमशः औकारस्य आवादेशे ऐकारस्य च आयादेशे मनावी, मनायी इत्यस्मात् सु प्रत्यये सोर्हल्ङ्यादिलोपे मनावी, मनायी इति रूपं भवति।

सूत्रस्य विकल्पपक्षे 'मनुः' इति रूपं भवति।

## ४९६ वर्णादनुदात्तात्तोपधात्तो नः ४/१/३९

**वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात् प्रातिपदिकाद्वा ङीप् स्यात्, तकारस्य नकारादेशश्च। एनी, एता। रोहिणी, रोहिता। 'वर्णानां तणतिनितान्तानाम्( फि.सू. ३३ ) इति फिट्सूत्रेणाद्युदात्तः। 'त्र्येण्या च शलल्या' इति गृह्यसूत्रम्। त्रीण्येतान्यस्य इति बहुव्रीहिः। अनुदात्तात् किम्? श्वेता। 'घृतादीनां च' ( फि.सू. २१ ) इत्यन्तोदात्तोऽयम्। अत इत्येव। शितिः स्त्री।**

**सूत्रप्रकारः**- विधिसूत्रमिदम्।

**पदच्छेदः**- वर्णात्, अनुदात्तात्, तोपधात्, तः नः इतिच्छेदः।

**अनुवृत्तिः** - 'मनोरौ वा' इत्यतः वेत्यनुवर्तते। 'संख्याव्ययादेर्ङीप्' इति ङीबनुवर्तते।

**सूत्रार्थः** - अनुदात्तान्तः तोपधः यः वर्णवाचकः तदन्तात् अनुपसर्जनात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः तकारस्य नकारश्चादेशो वा भवति।

**व्याख्या** - अनुदात्तात् इति पदं "वर्णात्" इत्यस्य विशेषणम्। विशेषणात् तदन्तविधिः अनुदात्तान्तात् इति पदं भवति। 'तोपधात्' इति पदमपि वर्णात् इत्यत्रान्वितो भवति। वर्णवाचकात् तोपधात् इत्यर्थो भवति। 'नः' इत्यकारोच्चारणार्थः।

**उदाहरणानि** - एनी-एता, रोहिणी-रोहिता।

**रूपलेखनप्रकारः**-

**एनी-एता**- वर्णवाचकात् एत शब्दात् स्त्रीत्वे द्योत्ये वर्णादनुदात्तातोपधात्तो नः इति सूत्रेण विकल्पेन ङीपि तकारस्य नकारादेशे च इत्यकारलोपे स्वादिकार्ये च एनी इति रूपं भवति तकारङीप्विकल्पपक्षे-एता इति रूपं भवति।

**रोहणी-रोहिता** - रक्तवर्णवाचकात् रोहित शब्दात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये "वर्णादनुदात्तात्." इति सूत्रेण विकल्पेन ङीपि तकारस्य नत्वे च रोहिन+ई इति जाते भत्वादलोपे अट्कुप्वाङ्म्व्यवायेऽपि इति नस्य णत्वे स्वादिकार्ये रोहिणी इति रूपम्।

विकल्पपक्षे "अजाद्यतष्टाप्" इति टापि सवर्णदीर्घे रोहिता इति रूपं भवति।

**पङ्क्तिविवेचनम्** -

**अनुदात्तात् किम्? श्वेता**

ननु सूत्रे 'अनुदात्तात्' इति पदं न स्यात् तदा श्वेता इत्यत्र श्वेत शब्दात् अपि ङीपः नत्वस्य च प्राप्तिर्भवति तन्न भवेत्।

**'पिशङ्गादुपसंख्यानम्' ( वा. २४५५ )। पिशङ्गी, पिशङ्गा।**

**वार्तिकार्थः** - पिशङ्गशब्दात् स्त्रीत्वे द्योत्ये ङीप् वा स्यात्।

**रूपलेखनप्रकारः -**

**पिशङ्गी** - पिशङ्ग शब्दात् वर्णवाचकात् स्त्रीत्वे द्योत्ये ''अन्यतो ङीष्'' इति सूत्रेण ङीषि प्राप्ते तं प्रबाध्य ''पिशङ्गादुपसंख्यानम्'' इति वार्तिकेन विकल्पेन ङीपि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च पिशङ्गी इति रूपं सिद्धम्।

**पक्षे** - अजाद्यतष्टाप् इति टापि सवर्णदीर्घे पिशङ्गा इति रूपम्।

**'असितपलितयोर्न' ( वा. २४५३ )। असिता। पलिता।**

**वार्तिकार्थः**:- असितपलितशब्दाभ्यां ङीब्नत्वं न भवति।

**रूपलेखनप्रकारः -**

**असिता-पलिता**- असित इति कृष्णवर्णवाचकात् पलित इति श्वेतवर्णवाचकात् ''वर्णादनुदात्तात्.'' इति प्राप्तस्य ङीपः ''असितपलितयोर्न'' इति निषेधे 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च असिता इति पलिता इति रूपम्।

**'छन्दसि क्नमेके' ( वा. २४५४ )। असिक्नी। पलिक्नी। अवदातशब्दस्तु न वर्णवाची, किन्तु विशुद्धवाची। तेन अवदाता इत्येव।**

**वार्तिकार्थः** - असितपलित शब्दयोः छन्दसि स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः तकारस्य क्नादेशश्च भवति।

**उदाहरणम् -**

**असिक्नी-पलिक्नी**- छन्दसि स्त्रीत्वे द्योत्ये असित-पलित शब्दाभ्यां ''छन्दसि क्नमेके'' इति ङीपि तकारस्य क्नादेशे असिक्न ई, पलिक्न ई इति जाते भत्वादलोपे स्वादिकार्ये च असिक्नी, पलिक्नी इति रूपं भवति।

अवदात शब्दस्तु न वर्णवाची अपितु विशुद्धवाची। अतः अवदाता इत्यत्र टाबेव भवति।

## ४९७ अन्यतो ङीष् ४/१/४०

**तोपधभिन्नाद् वर्णवाचिनोऽनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्। कल्माषी। सारङ्गी। 'लघावन्ते द्वयोश्च बह्वषो गुरुः' ( फि.सू. ४२ ) इति मध्योदात्तावेतौ। अनुदात्तान्तात् किम्? कृष्णा, कपिला।**

**सूत्रप्रकारः** - विधिसूत्रमिदम्।

**पदच्छेदः**- अन्यतः ङीष् इति सूत्रे पदद्वयम्।

**अनुवृत्तिः** - वर्णादनुदात्तात्तोपधान्तो नः इति सूत्रात् वर्णात्, अनुदात्तात्, तोपधात् चानुवर्तते। 'अजाद्यतष्टाप्' इति अतः इत्यनुवर्तते। अनुपसर्जनात् प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः** - तोपधात् अन्यतः वर्णवाचकात् अनुदात्तान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्।

**रूपलेखनप्रकारः -**

**कल्माषी**- कल्माष शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''अन्यतो ङीष्'' इति सूत्रात् ङीषि अनुबन्धलोपे भत्वात् ''यस्येति च'' इत्यकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे कल्माषी इति रूपं सिद्धम्।

**सारङ्गी**- सारङ्ग इत्यस्मात् ''अन्यतो ङीष्'' इति ङीषि अनुबन्धलोपे भत्वादिलोपे स्वादिकार्ये सारङ्गी इति रूपं भवति।

**अनुदात्तान्तात् किम्? कृष्णा**

अस्मिन् सूत्रे ''अनुदात्तान्तात्'' इत्यस्यानुवृत्तिः न स्यात् तदा कृष्णा, कपिला इत्यादिषु अपि उदात्तात् ङीष् प्रत्ययस्य प्राप्तिर्भवति तन्न भवेत् इति।

## ४९८ षिद्गौरादिभ्यश्च ४/१/४१

**षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्। नर्तकी। गौरी।**

सूत्रप्रकारः – विधिसूत्रमिदम्।

पदच्छेदः – षित्, गौरादिभ्यः, च इति।

अनुवृत्तिः – ''अन्यतो ङीष्'' इति सूत्रात् ङीषनुवर्तते।

सूत्रार्थः – षिद्भ्यो गौरादिभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीष् स्यात्।

व्याख्या – षित् च गौरादिभ्यश्चेति विग्रहे द्वन्द्वसमासे पञ्चमी बहुवचने षिद्गौरादिभ्यः इति। च इति पृथक्पदम्। प्रातिपदिकात्, अनुपसर्जनात्, स्त्रियाम् इत्यस्य चाधिकारः।

रूपलेखनप्रकारः –

**नर्तकी** – नृत् धातोः ''शिल्पिनि ष्वुन्'' इति ष्वुन्प्रत्यये अनुबन्धलोपे वोरकादेशे ऋकारस्य गुणे नर्तक इत्यस्मात् स्त्रीत्व विवक्षायां षित्वात् ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे 'यचि भम्' इति भत्वादलोपे स्वादिकार्ये च कृते नर्तकी इति रूपं सिद्धम्।

**गौरी** – गौर शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''षिद्गौरादिभ्यः॰'' इति ङीषि भत्वादलोपे स्वादिकार्ये च गौरी इति रूपं सिद्धम्।

**'आमनडुहः स्त्रियां वा' ( वा. ४३७८ )। अनड्वाही, अनडुही।**

**वार्तिकार्थः** – अनडुह् शब्दात् स्त्रीत्वे आमागमः वा स्यात्।

रूपलेखनप्रकारः –

**अनड्वाही-अनडुही** – अनडुह् शब्दात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे अनडुह्+ई इति जाते ''आमनडुहः स्त्रियां वा'' इत्यामागमे अनडु आह्+ई इति जाते ''इको यणचि'' इति उकारस्य यणादेशे वकारे स्वादिकार्ये अनड्वाही इति रूपं सिद्धम्। आमागमविकल्पपक्षे अनडुही इति रूपं सिद्धम्।

**'पिप्पल्यादयश्च' ( ग.सू. ४७ )। आकृतिगणोऽयम्।**

**सूत्रार्थः** – पिप्पल्यादिगणपठितेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वे ङीष् स्यात्।

उदाहरणम् –

**पिप्पली** – पिप्पल शब्दात् प्रातिपदिकात् स्त्रीत्वे नियतस्त्रीलिङ्गत्वात् ''जातेरस्त्रीविषयादयोपधात्'' इत्यस्याप्राप्तौ पिप्पल्यादयश्च इति गणसूत्रेण ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च पिप्पली इति रूपं सिद्धम्।

## ४९९ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ६/४/१४९

**अङ्गस्योपधाया यस्य लोपः स्यात् स चेद्यः सूर्याद्यवयवः।**

**'मत्स्यस्य ङ्याम्' ( वा. ४१९८ )। 'सूर्यागस्त्ययोश्छे च ङ्यां च' ( वा. ४१९९ )। 'तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्' ( वा. ४२०० )। मत्सी। 'मातरि षिच्च' ( वा. २७१० ) इति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठाद् अनित्यः षितां ङीष्। दंष्ट्रा।**

सूत्रप्रकारः – लोपविधायकं सूत्रम्।

पदच्छेदः – सूर्यश्च तिष्यश्च अगस्त्यश्च मत्स्यश्चेति विग्रहे द्वन्द्वसमासे षष्ठी बहुवचने सूर्यतिष्यागस्त्यमत्स्यानाम्, यः, उपधायाः इति।

अनुवृत्तिः – ''ढे लोपोऽकद्र्वाः'' इत्यतः लोपः इत्यनुवर्तते। भस्य इत्यस्याधिकारः। ''यस्येति च'' इति सूत्रात् ईति इत्यनुवर्तते ''नस्तद्धिते'' इत्यतः तद्धिते इत्यनुवर्तते।

सूत्रार्थः – भस्याङ्गस्योपधायाः यस्य लोपः ईति, तद्धिते च परे, यदि सः यकारः सूर्यतिष्यादीनामवयवः स्यात्।

**वा. मत्स्यस्य ङ्याम् ( वा. ४२९८ )**

**वार्तिकार्थः**– मत्स्यस्य यकारस्य लोपः स्यात् ङौ परे।

रूपलेखनप्रकारः –

**मत्सी**– मत्स्य शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''षिद्गौरादिभ्यश्च'' इति ङीषि अनुबन्धलोपे ''यचि भम्'' इति भसञ्ज्ञायाम् ''मत्स्यस्य ङ्याम्'' इति निर्देशात् ''सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः'' इति सूत्रेण यकारस्य लोपे ''यस्येति च'' इति सूत्रेण अकारस्य लोपे मत्सी इति रूपं सिद्धम्।

**वा. सूर्यागस्त्ययोश्छे च ङ्यां च ( वा. ४२९९ )**

**वार्तिकार्थः** – सूर्यागस्त्ययोः भस्याङ्गस्योपधाया यस्य लोपः स्यात् छे ङौ च परे।

**सूरी** – सूर्यस्य स्त्री इत्यर्थे सूर्य शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''पुंयोगादाख्यायाम्'' इति ङीष् प्रत्यये अनुबन्धलोपे भसञ्ज्ञायामल्लोपे ''सूर्यागस्त्ययोश्छे च ङ्याञ्च'' इति निर्देशात् ''सूर्यतिष्यागस्त्य.'' इति यकारस्य लोपे ''यस्येति च'' इत्यकारलोपे स्वादिकार्ये च कृते सूरी इति रूपम्।

**वा. तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्।**

**वार्तिकार्थः** – तिष्यपुष्ययोरुपधाभूतस्य भसञ्ज्ञकयकारस्य लोपः स्यात् नक्षत्रवाचकशब्दे परे।

उदाहरणानि –

**तैषः-पौषः** – तिष्येण युक्तः पौर्णमासः, पुष्येण युक्तः पौर्णमासः इत्यर्थे 'नक्षत्रेण युक्तः कालः' इति अण् प्रत्यये अनुबन्धलोपे ''तिष्यपुष्ययोः नक्षत्राणि यलोप इति वाच्यम्'' इति निर्देशात् ''सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः'' इति यलोपे आदिवृद्धौ स्वादिकार्ये तैषः-पौषः इति रूपं सिद्धम्। स्त्रीत्वे अण्णन्तत्वात् ''टिड्ढाणञ्.'' इति ङीपि भत्वादल्लोपे स्वादिकार्ये च तैषी, पौषी इति रूपं भवति।

**पंक्तिविवेचनम् – मातरि षिच्च......................षितां ङीष्। दंष्ट्रा।** मातुः माता इत्यर्थे मातृ शब्दात् डामहच् प्रत्यये टिलोपे मातामह इत्यत्र आमह इत्यस्य ''मातरि षिच्च'' इति षित्वादेव ''षिद्गौरादिभ्यश्च'' इति ङीषि प्राप्तौ पुनः गौरादिगणे मातामही शब्दपाठस्य किं प्रयोजनम्? इति जिज्ञासायामुच्यते– षितां ङीष् अनित्यः वर्तते। फलतः – दंष्ट्रा– दंश् धातोः ''दाम्नीशस्युयुजस्तुतुदसिसिच्मिहपतदशनहः करणे'' इति ष्ट्रन् प्रत्यये दंष्ट्रा इति प्रयोगे षित्वेऽपि ङीष् न भवति अपितु ''अजाद्यतष्टाप्'' इत्यनेन टाबेव भवति।

## ५०० जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुक-कबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायो-विकारमैथुनेच्छाकेशवेशेषु ४/१/४२

एभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्त्यादिष्वर्थेषु ङीष् स्यात्।

जानपदी वृत्तिश्चेत्, अन्या तु जापनदी। उत्सादित्वादञन्तत्वेन **'टिड्ढ-' ( सू. ४७० )** इति ङीप्याद्युदात्तः। कुण्डी अमत्रं चेत्, कुण्डान्या। **'कुडि दाहे'। 'गुरोश्च हलः' ( सू. ३२८० )** इत्यप्रत्ययः। यस्तु 'अमृते जारजः कुण्डः' इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव। अमत्रे हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते, न तु नियम्यते। गोणी आवपनं चेत्, गोणान्या। स्थली अकृत्रिमा चेत्, स्थलाऽन्या। भाजी श्राणा चेत्, भाजान्या। नागी स्थूला चेत्, नागाऽन्या। गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणम्। सर्ववाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम्। काली वर्णश्चेत्, कालान्या। नीली अनाच्छादनं चेत्, नीलाऽन्या। नील्या रक्ता शाटीत्यर्थः। **'नील्या अन् वक्तव्यः' ( वा. २६८० )** इत्यन्। अनाच्छादनेऽपि न सर्वत्र, किन्तु –

**'नीलादोषधौ' ( वा. २४५६ )**। नीली। **'प्राणिनि च' ( वा. २४५८ )**। नीली गौः।

**'सञ्ज्ञायां वा' ( वा. २४५७ )**। नीली, नीला। कुशी अयोविकारश्चेत्, कुशाऽन्या। कामुकी मैथुनेच्छा चेत्, कामुकाऽन्या।

कबरी केशानां सन्निवेशश्चेत्, कबराऽन्या चित्रेत्यर्थः।

**सूत्रप्रकारः –** ङीष्विधायकमिदं सूत्रम्।

**पदच्छेदः–** जानपदशब्दतः कबरपर्यन्तं जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् इत्येकं पदम्, वृत्तितः केशवेशपर्यन्तं द्वन्द्वे समासे वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु इत्यपरं पदम्।

**अनुवृत्तिः –** ''अन्यतो ङीष्'' इति सूत्रात् ङीष् इत्यनुवर्तते। अनुपसर्जनात्, प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः –** एभ्यः एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्त्यादिषु अर्थेषु ङीष् स्यात्।

**रूपलेखनप्रकारः –**

**जानपदी** – जानपद शब्दात् प्रातिपदिकात् वृत्त्यर्थे ''जानपदकुण्डगोण.'' इति ङीषि भत्वादलोपे स्वादिकार्ये जानपदी इति रूपं भवति।

अन्यार्थे जनपदे भवा इति विग्रहे ''उत्सादिभ्योऽञ्'' इति अञि जानपद शब्दात् ''टिड्ढाणञ्.'' इति ङीपि 'अनुदात्तौ सुप्पितौ' इति आद्युदात्तो भवति। ङीषि तु अन्तोदात्तः प्रत्ययस्वरेण भवतीति ज्ञेयः।

**कुण्डी** – कुण्ड शब्दात् अमत्रेऽर्थे (भाजनार्थे) ङीष् प्रत्यये अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये कुण्डी इति रूपं भवति।

**गोणी** – गोण शब्दात् प्रातिपदिकात् आवपनेऽर्थे ''जानपदकुण्डगोण.'' इति सूत्रेण ङीष् प्रत्यये अनुबन्धलोपे भत्वादल्लोपे स्वादिकार्ये गोणी इति रूपं भवति। आवपनभिन्नेऽर्थे गोणा इति रूपं भवति।

**स्थली** – अपरिष्कृतायाम् अकृत्रिमायां भूमौ अर्थे ''जानपदकुण्डगोण.'' इति ङीषि भत्वादलोपे स्वादिकार्ये स्थली इति रूपं भवति। कृत्रिमायां तु टाबेव स्थला इति रूपं भवति।

**भाजी** – भाज शब्दात् श्राणार्थे (पक्वान्नार्थे) ''जानपदकुण्डगोण.'' इति ङीषि भत्वादलोपे स्वादिकार्ये भाजी इति रूपं सिद्धम्। अपक्वायाम् श्राणार्थे टापि 'भाजा' इति भवति।

**नागी** – नागशब्दात् स्थौल्यगुणयुक्तार्थे स्त्रियां ''जानपदकुण्डगोण.'' इति ङीषि भत्वादलोपे स्वादिकार्ये च नागी इति रूपं सिद्धम्। अन्यार्थे टापि सवर्णदीर्घे नागा इति रूपं भवति।

**काली** – काल शब्दात् प्रातिपदिकात् कृष्णवर्णेऽर्थे ''जानपदकुण्डगोण.'' इति सूत्रेण ङीषि भत्वादल्लोपे स्वादिकार्ये काली इति रूपं सिद्धम्। अन्यार्थे काला इत्यत्र टाबेव भवति।

**नीली** – नील शब्दात् प्रातिपदिकात् अनाच्छादनार्थे ''जानपदकुण्ड.'' इति ङीषि भत्वादलोपे स्वादिकार्ये नीली इति रूपं सिद्धम्। अन्यत्र नीलवर्णरञ्जितायां शाटिकायां 'नीला' इति टापि भवति।

अनाच्छादनेऽपि सर्वत्र ङीष् न भवति अपि तु औषधौ अर्थे प्राणिनि नित्यं ङीष् भवति। सञ्ज्ञायां च विकल्पेन भवति – नीली नीला इति भवति।

**कुशी** – कुश शब्दात् अयोविकारेऽर्थे ''जानपद.'' इति ङीषि भत्वादलोपे स्वादिकार्ये कुशी इति रूपं भवति। काष्ठनिर्मित शङ्कौ तु टापि कुशा इति रूपं भवति।

**कामुकी** – कामुक शब्दात् प्रातिपदिकात् स्त्रियां मैथुनेच्छावत्यां ''जानपद.'' इति ङीषि भत्वादल्लोपे स्वादिकार्ये कामुकी इति रूपम्। अन्यत्र धनादीनामिच्छावत्यां 'कामुका' इति टापि सिद्ध्यति।

**कबरी** – कबर शब्दात् प्रातिपदिकात् केशविन्यासार्थे ''जानपद.'' इति ङीषि भत्वादल्लोपे स्वादिकार्ये कबरी रूपं सिद्धम्। केशविन्यासान्यार्थे चित्रायामर्थे वा टापि सवर्णदीर्घे कबरा इति रूपं भवति।

## ५०१ शोणात् प्राचाम् ४/१/४३

**शोणी, शोणा।**

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः**– शोणात्, प्राचाम् इति।

**अनुवृत्तिः** – अन्यतो ङीष् इति सूत्रात् ङीष् अनुवर्तते। अनुपसर्जनात्, प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः** – अनुपसर्जनात् शोणप्रातिपदिकात् स्त्रियां ङीष् स्यात् प्राचां मतेन।

**रूपलेखनप्रकारः** –

**शोणी-शोणा**– शोण शब्दात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''अन्यतो ङीष्'' इति सूत्रेण ङीषि प्रत्यये प्राप्ते तं प्रबाध्य ''शोणात्प्राचाम्'' इति विकल्पेन ङीषि भत्वादलोपे शोणी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे शोणी इति रूपं सिद्धम्।

विकल्पपक्षे 'अजाद्यतष्टाप्' इति टापि सवर्णदीर्घे स्वादिकार्ये शोणा इति रूपं सिद्धम्।

## ५०२ वोतो गुणवचनात् ४/१/४४

उदन्ताद् गुणवाचिनो वा ङीष् स्यात्।

मृद्वी, मृदुः। उतः किम्? शुचिः। गुण इति किम्? आखुः।

**'खरुसंयोगोपधान्न' ( वा. २४६० )।** 'खरुः पतिंवरा कन्या'। पाण्डुः।

**सूत्रप्रकारः** – विधिसूत्रमिदम्।

**पदच्छेदः** – वा, उतः, गुणवचनात् इति।

**अनुवृत्तिः**– ''अन्यतो ङीष्'' इत्यतः ङीष् अनुवर्तते। अनुपसर्जनात्, प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः** – उदन्तात् गुणवाचिनः प्रातिपदिकात् स्त्रियां वा ङीष् स्यात्।

**व्याख्या** – उतः इति पदं प्रातिपदिकात् गुणवचनात् इत्यस्य विशेषणम् विशेषणात् तदन्तविधिः उदन्तात् इत्यर्थो भवति। गुणम् उक्तवान् इति गुणवचनः तस्मात् गुणवचनात् इति।

**गुणस्य परिभाषा-महाभाष्ये-**

**सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।**
**आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः।।**

**अन्वयः** – सत्वे निविशते, अपैति, पृथक् जातिषु दृश्यते। आधेयः च अक्रियाजश्च (यः) सः असत्वप्रकृतिर्गुणः।

**उदाहरणम्** –

**मृद्वी-मृदुः** – मृदु शब्दात् प्रातिपदिकात् गुणवाचकात् ''वोतो गुणवचनात्'' इति सूत्रेण विकल्पेन ङीषि अनुबन्धलोपे मृदु+ई इति जाते 'इको यणचि' इति यणि स्वादिकार्ये च मृद्वी इति रूपं सिद्धम्। पक्षे 'मृदुः' इति रूपं भवति।

**प्रत्युदाहरणम्** –

उतः किम्? शुचिः– सूत्रे 'उतः' इति पदं न स्यात् तदा 'शुचिः' इत्यत्र इकारान्तात् अपि ङीषः प्राप्तिर्भवति तन्न भवेत्।

गुण इति किम्? – सूत्रे ''गुणवचनात्'' इति पदं न स्यात् तदा ''आखुः'' इति जातिविशिष्ट द्रव्यवाचकात् उदन्तात् अपि ङीषः प्राप्तिर्भवति तन्न भवेत्।

**वा. – खरुसंयोगोपधान्न ( वा. २४६० )**

**वार्तिकार्थः** – खरु शब्दात् संयोगोपधात् च उदन्तात् गुणवाचिनो ङीष् न स्यात्।

**उदाहरणम्** – खरुः पतिंवरा कन्या– इत्यत्र औत्कण्ठ्यगुणद्रव्यवाचकात् पतिंवरा इत्यर्थवाचकात् खरु शब्दात् प्रातिपदिकात्

''वोतो गुणवचनात्'' इति प्राप्तस्य ङीष: 'खरुसंयोगोपधान्न' इति वार्तिकेन निषेधे स्वादिकार्ये खरु: इति रूपं सिद्धम्।
**पाण्डु:**- पाण्डु शब्दात् संयोगोपधात् स्त्रीत्वे ''वोतो गुणवचनात्'' इति प्राप्तस्य ङीष: ''खरुसंयोगोपधान्न'' इति निषेधो भवति। स्वादिकार्ये च पाण्डु: इति रूपम्।

## ५०३ बह्वादिभ्यश्च ४/१/४५

**एभ्यो वा ङीष् स्यात्। बह्वी, बहु:।**

**'कृदिकारादक्तिन:' ( ग.सू. ५० )। रात्रि:, रात्री। 'सर्वतोऽक्तिन्नर्थादित्येके' ( ग.सू. ५१ )। शकटि:। अक्तिन्नर्थात् किम्? अजननि:। क्तिन्नन्तत्वादप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते। 'हिमकाषिहतिषु च' ( सू. ९९२ ) इति पद्भाव:। पद्धति:, पद्धती।**

**सूत्रप्रकार: -** विधिसूत्रम्।
**पदच्छेद:-** बह्वादिभ्य: च।
**अनुवृत्ति: -** ''वोतो गुणवचनात्'' इति सूत्रात् वा इत्यनुवर्तते। अन्यतो ङीष् इत्यत: ङीष् अनुवर्तते। अनुपसर्जनात्, प्रातिपदिकात् स्त्रियाम् इत्यस्य चाधिकार:।
**सूत्रार्थ: -** अनुपसर्जनेभ्य: बह्वादिगणपठितेभ्य: स्त्रियां ङीष् स्यात्।
**उदाहरणम् -** बह्वी-बहु:।
**रूपलेखनप्रकार: -**
**बह्वी-बहु:**- बहुशब्दात् स्त्रीत्वेद्योत्ये ''बह्वादिभ्यश्च'' इति विकल्पेन ङीष् प्रत्यये अनुबन्धलोपे 'इको यणचि' इति यणि सुप्रत्यये सोर्हल्ङ्यादिलोपे च बह्वी इति रूपं सिद्ध्यति।

पक्षे-बहु: इति रूपं भवति।

**कृदिकारादक्तिन: ( ग. ५० )**
**सूत्रार्थ: -** क्तिनप्रत्ययान्तभिन्नात् इदन्तात् कृदन्तात् प्रातिपदिकात् स्त्रीत्वे वा ङीष् स्यात्।
**उदाहरणम् -** रात्री, रात्रि:।
**रूपलेखनप्रकार: -**
**रात्री-रात्रि: -** रात्रि शब्दात् स्त्रीत्वे ''कृदिकारादक्तिन:'' इति गणसूत्रेण ङीषि भत्वादिलोपे स्वादिकार्ये रात्री इति रूपं सिद्धम्। पक्षे रात्रि: इति भवति।
**सर्वतोऽक्तिन्नर्थादित्येके ( गणसूत्र ५१ )**
**सूत्रार्थ: -** क्तिन्प्रत्ययान्तकृदकृदिदन्तात् प्रातिपदिकात् ङीष् वा स्यात्।
**उदाहरणम् -**
**शकटी-शकटि: -** शकटि शब्दात् ''सर्वतोऽक्तिन्नर्थादित्येके'' इति गणसूत्रेण ङीषि भत्वाद इलोपे स्वादिकार्ये शकटी इति रूपम्। पक्षे शकटि: इति भवति।
**पङ्क्तिविवेचनम् -**

**अक्तिन्नर्थात् किम्? अजननि:।**

अस्मिन् गणसूत्रे अक्तिन्नर्थात् इतिपदं न स्यात् तदा अजननि: इत्यत्र नञुपपदपूर्वकात् जन् धातो: ''आक्रोशे नञ्यनि:'' इति अनिप्रत्यये अजननि: इति भवति। अनिप्रत्यय क्तिन् प्रत्ययाधिकारेऽस्ति। अत: अक्तिन्नर्थात् इति पदेन अत्र प्राप्तिरेव न भवति इति।
**हिमकाषिहतिषु च ( सू. ९९२ )**

पादशब्दस्य पदादेश भवति।

**पद्धती-पद्धतिः** – पादाभ्यां हतिः इति विग्रहे तृतीयासमासे पद्धति इत्यस्मात् ''बह्वादिभ्यश्च'' इति विकल्पेन ङीषि प्रत्यये अनुबन्धलोपे भत्वात् ''यस्येति च'' इतीकारलोपे पद्धती इति जाते स्वादिकार्ये च कृते पद्धती इति रूपं सिद्धम्।

पक्षे पद्धतिः सोः रुत्वविसर्गौ।

**५०४ पुंयोगादाख्यायाम् ४/१/४८**

**या पुमाख्या पुंयोगात् स्त्रियां वर्तते, ततो ङीष् स्यात्। गोपस्य स्त्री गोपी।**
**'पालकान्तान्न' ( वा. २४६१ )। गोपालिका। अश्वपालिका।**
**'सूर्याद्देवतायां चाब्वाच्यः' ( वा. २४७१ )। सूर्यस्य स्त्री देवता सूर्या। देवतायां किम्? सूरी कुन्ती, मानुषीयम्।**

**सूत्रप्रकारः** – विधिसूत्रम्।

**पदच्छेदः**– पुंयोगात्, आख्यायाम्।

**अनुवृत्तिः**– ''अन्यतो ङीष्'' इत्यतः ङीष् अनुवर्तते। अतः इत्यनुवर्तते।

**सूत्रार्थः** – यः पुंवाचकः शब्दः पुंसः योगात् स्त्रियां विद्यते तस्मात् पुंवाचकात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् ङीष् स्यात्।

**व्याख्या** – पुंसा योगः पुंयोगः तस्मात् पुंयोगात् हेत्वर्थे पञ्चमी। आख्यायाम् इत्यत्र सप्तमी। पुंयोगात् इति पदम् 'स्त्रियाम्' इति अन्वितः भवति। पुंयोगात् स्त्रीत्वे वर्तमानप्रातिपदिकस्य ग्रहणं भवति।

**उदाहरणम् – गोपी**

**रूपलेखनप्रकारः –**

**गोपी** – गोपस्य स्त्री इत्यर्थे गोप शब्दात् ''पुंयोगादाख्यायाम्'' इति ङीषि अनुबन्धलोपे भसञ्ज्ञायाम् ''यस्येति च'' इत्यकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे गोपी इति रूपं भवति।

या तु स्वयं गाः पालयतिः सा गोपा भवति पुंयोगाभावात्।

**पालकान्तान्न ( वा. २४३१ )**

**वार्तिकार्थः** – पालकान्तेभ्यः प्रातिपदिकेभ्यः पुंयोगात् ङीष् न स्यात्।

**गोपालिका** – गोपालकस्य स्त्री इत्यर्थे गोपालक प्रातिपदिकात् ''पुंयोगादाख्यायाम्'' इति प्राप्तस्य ङीषः ''पालकान्तान्न'' इति वार्तिकेन निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे गोपालका इति जाते ''प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः'' इति अकारस्येत्वे स्वादिकार्ये गोपालिका इति रूपं भवति।

एवमेव अश्वपालकस्य स्त्री इत्यर्थे अश्वपालिका इति रूपम्।

**वा. सूर्याद्देवतायां चाब्वाच्यः ( वा. २४७१ )**

**वार्तिकार्थः** – सूर्यशब्दात् पुंयोगात् देवतार्थे चाप् स्यात् स्त्रीत्वे द्योत्ये।

**उदाहरणम् –**

**सूर्या** – सूर्यस्य स्त्री देवता इत्यर्थे सूर्यशब्दात् ''पुंयोगादाख्यायाम्'' इति प्राप्तं ङीषं प्रबाध्य ''सूर्याद् देवतायां चाब्वाच्यः'' इति वार्तिकेन चाप् प्रत्यये अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च सूर्या इति रूपं भवति।

**पङ्क्तिविवेचनम् –**

**देवतायां किम्? सूरी-कुन्ती मानुषीयम्।**

ननु ''सूर्याद्देवतायां चाब्वाच्यः'' इति वार्तिके देवतायामिति पदं न स्यात् तदा सूर्यस्य स्त्री मानुषी (कुन्ती) इत्यर्थेऽपि चापः प्राप्तिर्भवति तन्न भवेत् अपितु ''पुंयोगादाख्याम्'' इति ङीषि ''सूर्यतिष्यागस्त्य.'' इति यलोपे

''यस्येति चेति अलोपे स्वादिकार्ये सूरी इति रूपं भवति।

### ५०५ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामनुक् ४/१/४९

**एषामानुगागमः स्यान्ङीष् च। इन्द्रादीनां षण्णां मालुलाचार्ययोश्च पुंयोग एवेष्यते, तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते। इतरेषां चतुर्णामुभयम्। इन्द्राणी।**

**'हिमारण्ययोर्महत्त्वे' ( वा. २४७२ )। महद्धिमं हिमानी। महदरण्यम् अरण्यानी।**

**'यवाद्दोषे' ( वा. २४७३ )। दुष्टो यवो यवानी।**

**'यवनाल्लिप्याम्' ( वा. २४७४ )। यवनानां लिपिर्यवनानी।**

**मातुलोपाध्याययोरानुग् वा। मातुलानी, मातुली। उपाध्यायानी, उपाध्यायी।**

**'या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः'। उपाध्यायी, उपाध्याया।**

**'आचार्यादणत्वं च' ( वा. २४७७ )। आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्येव, आचार्या स्वयं व्याख्यात्री।**

**'अर्यक्षत्रियाभ्यां वा स्वार्थे' ( वा. २४७८ )। अर्याणी, अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी, क्षत्रिया। पुंयोगे तु - क्षत्रियी। कथं 'ब्रह्माणी' इति। ब्रह्माणमानयति जीवयतीति 'कर्मण्यण्' ( सू. २९१३ ) विधिसूत्रमिदम्।**

**पदच्छेदः -** इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवन मातुलाचार्याणाम्, आनुक्।

**अनुवृत्तिः -** 'पुंयोगादाख्यायाम्' इति सूत्रात् पुंयोगात् 'अन्यतो ङीष्' इति ङीष् अनुवर्तते। प्रातिपदिकात्, अनुपसर्जनात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः -** इन्द्रादिशब्दानामानुगागमः स्यात् ङीष् च। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोगे एव इष्यते तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते इतरेषां (हिमारण्ययवयवनानां) चतुर्ण्णामुभयम् (ङीषानुक्) भवति इति।

**व्याख्या -** इन्द्रश्च वरुणश्च भवश्च शर्वश्च रुद्रश्च मृडश्च हिमञ्च अरण्यञ्च यवश्च यवनश्च मातुलश्च आचार्यश्च इति समाहारद्वन्द्वः षष्ठी बहुवचने इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुललाचार्याणाम् इति। आनुगागमः। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोगे एव इष्यते तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते।

**रूपलेखनप्रकारः -**

**इन्द्राणी** - इन्दस्य स्त्री इत्यर्थे ''इन्द्रवरुणभवशर्वरुद्रमृड.'' इति सूत्रेण ङीष् प्रत्यये आनुगागमे च इन्द्र आन् ई इति जाते 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे स्वादिकार्ये च इन्द्राणी इति रूपं भवति।

**वरुणानी** - वरुणस्य स्त्री इत्यर्थे इन्द्रवरुण. इति ङीषानुकौ वरुणानी इति सिद्धम्।

**भवानी** - भवस्य स्त्री इत्यर्थे ङीषानुकौ।

**शर्वाणी** - शर्वस्य स्त्री इत्यर्थे ङीषानुकौ। रुद्राणी-रुद्रस्य स्त्री इत्यर्थे ङीषानुकौ मृडानी-मृडस्य स्त्री इत्यर्थे स्त्री इत्यर्थे ङीषानुकौ।

**हिमारण्ययोर्महत्वे ( वा. २४७२ )**

**वार्तिकार्थः** - हिमारण्ययोः शब्दयोः महदर्थे ङीषानुकौ भवतः।

**रूपेलेखनप्रकारः -**

**हिमानी** - महद्धिमम् इत्यर्थे हिम शब्दात् 'हिमारण्ययोर्महत्वे' इति वार्तिकनिर्देशात् ''इन्द्रवरुण.'' इति ङीष् प्रत्यये आनुगाममे च कृते अनुबन्धलोपे स्वादिकार्ये च हिमानी इति रूपं सिद्धम्।

**अरण्यानी** - महत् अरण्यम् इति विग्रहे ङीषि आनुगागमे च कृते रूपम्।

**यवाद्दोषे ( वा. २४७३ )**

**वार्तिकार्थः** - यव शब्दात् दोषे अर्थे ङीषानुकौ स्त्रीत्वे भवतः।

उदाहरणम् -

**यवानी** - दुष्टो यवः इत्यर्थे ''यवाद्दोषे'' इति निर्देशात् ''इन्द्रवरुण.'' इति सूत्रेण ङीष् प्रत्यये आनुगागमे च अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये यवानी इति रूपं सिद्धम्।

**यवनाल्लिप्याम् ( वा. २४७४ )**

**वार्तिकार्थः** - यवन शब्दात् लिप्यर्थे ङीषानुकौ भवतः स्त्रियाम्।

उदाहरणम् -

**यवनानी** - यवनानां लिपिः इत्यर्थे यवन शब्दात् ''यवनाल्लिप्याम्'' इति निर्देशात् ''इन्द्रवरुणभव.'' इति ङीष् प्रत्यये आनुगागमे अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये यवनानी इति रूपं सिद्धम्।

**वा. मातुलोपाध्याययोरानुग्वा।**

**वार्तिकार्थः** - मातुलोपाध्याययोः प्रातिपदिकयोः पुंयोगाद् आनुग्वा स्यात्।

**उदाहरणम्** - मातुलानी-मातुली, उपध्यायानी-उपाध्यायी।

रूपलेखनप्रकारः -

**मातुलानी-मातुली-** मातुलस्य स्त्रीत्यर्थे मातुल शब्दात् स्त्रीत्वे ''मातुलोपाध्याययोरानुग्वा'' इति वार्तिकनिर्देशात् ''इन्द्रवरुण.'' इति सूत्रेण नित्यं ङीषि विकल्पेन आनुगागमे अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये मातुलानी इति रूपं सिद्ध्यति।

आनुक्विकल्पपक्षे भत्वात् यस्येति चेत्यकारलोपे मातुली इति रूपं भवति।

एवमेव उपाध्यायानी-उपाध्यायी इत्यपि सिद्ध्यति। ''या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः'' (वार्तिकम्)

**वार्तिकार्थः** - या स्वयमध्यापयति इत्यर्थे उपाध्याय शब्दात् ङीष् वा स्यात्।

उदाहरणम् -

**उपाध्यायी-उपध्याया** - स्वयमध्यापिका इत्यर्थे ''उपाध्याय शब्दात्'' या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः इति वार्तिकेन विकल्पेन ङीषि भत्वादलोपे उपाध्यायी इति रूपं भवति। पक्षे ''अजाद्यतष्टाप्'' इति टापि सवर्णदीर्घे स्वादिकार्ये च उपाध्याया इति रूपं भवति।

**आचार्यादणत्वञ्च ( वा. २४७७ )**

**वार्तिकार्थः** - आचार्य शब्दात् परस्य आनः नस्य णत्वं न स्यात्।

उदाहरणम् -

**आचार्यानी-** आचार्यस्य स्त्रीत्यर्थे ''इन्द्रवरुणभव.'' इति सूत्रेण ङीषि, आनुकि, अनुबन्धलोपे च सवर्णदीर्घे आचार्यानी इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे प्राप्ते ''आचार्यादणत्वञ्च'' इति तन्निषेधे आचार्यानी इति रूपं सिद्ध्यति।

**आचार्या** - या तु स्वयमेवाध्यापयति तस्मिन्नर्थे पुंयोगाभावात् आचार्यशब्दात् ''अजाद्यष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च आचार्या इति रूपं भवति।

**अर्य क्षत्रियाभ्यां वा स्वार्थे ( वा. २४७८ )**

**वार्तिकार्थः** - अर्यक्षत्रियशब्दयोः स्त्रीत्वेद्योत्ये स्वार्थे ङीषानुकौ वा भवतः।

**उदाहरणम्** - अर्याणी-अर्या, क्षत्रियाणी-क्षत्रिया।

**रूपलेखनप्रकारः -**

**अर्याणी-अर्या-** अर्य शब्दात् स्वार्थे स्त्रीत्वे द्योत्ये "अर्यक्षत्रियाभ्यां वा स्वार्थे" इति वार्तिकेन ङीषि आनुकि अनुबन्धलोपे सवर्णदीर्घे च "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति नस्य णत्वे स्वादिकार्ये च अर्याणी इति रूपं सिद्ध्यति। पक्षे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च अर्या इति रूपं भवति।

पुंयोगे अर्यस्य स्त्री इति अर्थे "पुंयोगादाख्यायाम्" इति ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये 'अर्यी' इति रूपं भवति।

एवमेव - क्षत्रियाणी-क्षत्रिया-क्षत्रियी इति सिद्ध्यन्ति।

**पङ्क्तिविवेचनम् -**

**कथं तर्हि? ब्रह्माणी इति।**

ननु "इन्द्रवरुण." इति सूत्रे ब्रह्मन् शब्दस्य पाठाभावात् ङीष् कथम् इति प्रश्ने उच्यते - ब्रह्माणमानयति जीवयति वा इत्यर्थे ब्रह्मन् इत्युपपदात् ण्यन्तात् आनि धातोः 'कर्मण्यण्' इति अणि समासे प्रातिपदिकत्वात् सुब्लुकि नलोपे 'णेरनिटि' इति णेर्लोपे सवर्णदीर्घे अणन्तात् "टिड्ढाणञ्." इति ङीपि भत्वादलापे "पूर्वपदात् संज्ञायामगः" इति नस्य णत्वे स्वादिकार्ये ब्रह्माणी इति रूपं भवति।

## ५०६ क्रीतात् करणपूर्वात् ४/१/५०

क्रीतान्ताददन्तात्करणादेः स्त्रियां ङीष्स्यात्। वस्त्रक्रीती। क्वचिन्न, धनक्रीता।

**सूत्रप्रकारः -** विधिसूत्रमिदम्।

**पदच्छेदः-** क्रीतात्, करणपूर्वात्।

**अनुवृत्तिः -** "अजाद्यतष्टाप्" इति सूत्रात् अतः इत्यनुवर्तते। अन्यतो ङीष् इत्यतः ङीषनुवर्तते।

**सूत्रार्थः -** करणपूर्वकात् क्रीतान्तात् अदन्तात् अनुपसर्जनप्रातिपदिकात् स्त्रियां ङीष् स्यात्।

**व्याख्या -** करणं पूर्वम्-आदिः यस्मिन् तस्मात् करणपूर्वात् प्रातिपदिकात्, स्त्रियाम्, अनुपसर्जनात् इत्यस्य चाधिकारः। 'कीतात्' 'अतः' इति पदे "प्रातिपदिकात् इत्यस्य विशेषणे विशेषणात् तदन्तविधेः।

**रूपलेखनप्रकारः -**

**वस्त्रक्रीती-** वस्त्रैः क्रीता इत्यर्थे वस्त्र भिस् क्रीत इत्यनयोः "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषानियमात् "कर्तृकरणे कृता बहुलम्" इति समासे वस्त्रक्रीत इत्यस्मात् स्त्रीत्वे द्योत्ये "क्रीतात् करणपूर्वात्" इति ङीषि अनुबन्धलोपे भत्वादलोपे वस्त्रक्रीती इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे वस्त्रक्रीती इति रूपं सिद्धम्।

**क्वचिन्न -धनक्रीता-** कर्तृकरणे कृता बहुलम् "इति सूत्रे बहुलग्रहणात्" गतिकारकोपदानाम् इति परिभाषा क्वचिन्न प्रवर्तते। अतः धनेन क्रीता इति विग्रहे अन्तरङ्गत्वात् टापि धनक्रीता इति आकारान्तः न तु अदन्तः अतः "क्रीतात् करणपूर्वात्" इति ङीष् न भवति।

## ५०७ क्तादल्पाख्यायाम् ४/१/५१

**करणादेः क्तान्ताददन्तात् स्त्रियां ङीष् स्यादल्पत्वे द्योत्ये।**

**अभ्रलिप्ती द्यौः। अल्पाख्यायाम् किम्? चन्दनलिप्ता अङ्गना।**

**सूत्रप्रकारः -** विधिसूत्रम्।

**पदच्छेदः -** क्तात्, अल्पाख्यायाम्।

**अनुवृत्तिः -** "अन्यतो ङीष्" इति ङीष् अनुवर्तते। "अजाद्यतष्टाप्" इति अतः अनुवर्तते "कीतात्करणपूर्वात्" इत्यतः क्रीतात् इत्यनुवर्तते।

**सूत्रार्थः**- करणपूर्वात् क्तान्तात् अदन्तात् अनुपसर्जनप्रातिपदिकात् स्त्रियां ङीष् स्यात् अल्पत्वे द्योत्ये।

**व्याख्या** - क्तात् इति "प्रत्ययग्रहणे तदन्ताः ग्राह्याः" इति नियमात् क्तान्तात्, प्रातिपदिकात् इत्यस्य विशेषणञ्च अल्पाख्यायाम्-अल्पत्वे द्योत्ये।

**उदाहरणम्** - अभ्रलिप्ती द्यौः।

**रूपलेखनप्रकारः** -

**अभ्रलिप्ती**- अभ्रैः लिप्ता इत्यर्थे समासे अभ्रलिप्त इत्यस्मात् स्त्रियाम् अल्पत्वे च द्योत्ये "क्तादल्पाख्यायाम्" इति ङीषि अनुबन्धलोपे "यचि भम्" इति भसञ्ज्ञायाम् "यस्येति च" इति अलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे अभ्रलिप्ती इति रूपं भवति।

अल्पत्वे न द्योत्ये चन्दनलिप्ता (अङ्गना) इत्यत्र अस्य सूत्रस्य प्रवृत्तिः न भवति। तेन टाबेवात्र भवति।

## ५०८ बहुव्रीहेश्चान्तोदात्तात् ४/१/५२

**बहुव्रीहेः क्तान्तादन्तोदात्ताददन्तात् स्त्रियां ङीष् स्यात्।**

**'जातिपूर्वादिति वक्तव्यम्' (वा. २४८४)। तेन बहुनञ्सुकालसुखादिपूर्वान्न। उरुभिन्नी।**

**नेह - बहुक्रीता। 'जातान्तान्न' (वा् २४७९)। दन्तजाता।**

**'पाणिगृहीती भार्यायाम्' (वा. २४८०)। पाणिगृहीता अन्या।**

**सूत्रप्रकारः** - विधिसूत्रमिदम्।

**पदच्छेदः** - बहुव्रीहेः, च, अन्तोदात्तात्।

**अनुवृत्तिः** - "क्तादल्पाख्यायाम्" इति क्तात् इत्यनुवर्तते। "अजाद्यत." इति अतः अनुवर्तते "अन्यतो ङीष्" इति ङीष् अनुवर्तते।

**सूत्रार्थः** - बहुव्रीहेः क्तान्तात् अदन्तात् अन्तोदात्तात् स्त्रीत्वे ङीष् स्यात्।

**व्याख्या** - क्तात् इति क्तप्रत्ययात् तदन्तविधिः क्तान्तात् इत्यर्थो भवति। अनुपसर्जनात् प्रातिपदिकात्, स्त्रियाम् इत्यस्य चाधिकारः।

**जातिपूर्वादिति वक्तव्यम् (वा. २४८४)**

**वार्तिकार्थः** - अन्तोदात्तक्तान्ताद दन्तात् बहुव्रीहौ जातिवाचकपूर्वपदात् एव ङीष् स्यात्।

**रूपलेखनप्रकारः** -

**उरुभिन्नी** - उरु भिन्नौ यस्याः इत्यर्थे बहुव्रीहौ "जातिकालसुखादिभ्यः परा निष्ठा वाच्या" इति भिन्न इत्यस्य परप्रयोगे उरुभिन्न इति जाते "जातिकालसुखादिभ्योनाच्छादनात् क्तोऽकृतमितप्रतिपन्ना" इति अन्तोदात्ते कृते "जातिपूर्वादिति वक्तव्यम्" इति वार्तिकनिर्देशात् बहुव्रीहेश्चान्तोदात्तात् इति ङीषि भत्वादलोपे स्वादिकार्ये उरुभिन्नी इति रूपं सिद्धम्।

**प्रत्युदाहरणम्** -

बहुक्रीता-बहवः क्रीताः यया सा इति विग्रहे बहुव्रीहौ "बहोर्नञ्वदुत्तरपदभूम्नि" इति अन्तोदात्ते बहुक्रीत शब्दात् जातिपूर्वपदत्वाभावात् न ङीष्, अपितु तु टाबेव।

**जातान्तान्न (वा. २४७९)**

**वार्तिकार्थः** - जातान्तात् अन्तोदात्तात् बहुव्रीहेः ङीष् न स्यात्।

**उदाहरणम्** -

**दन्तजाता** - दन्ताः जाताः यस्याः सा इत्यर्थे बहुव्रीहौ अन्तोदात्ते च कृते दन्तजात इत्यस्मात् "बहुव्रीहेश्चान्तोदात्तात्" इति ङीषि प्राप्ते "जातान्तान्न" इति निषेधे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च दन्तजाता इति रूपं भवति।

**पाणिगृहीती भार्यायाम् ( वा. २४८० )**

**वार्तिकार्थः** - भार्यायामर्थे विद्यमानात् पाणिगृहीतप्रातिपदिकात् स्त्रियां ङीष् स्यात्।

पाणिगृहीती (विधिवत् ऊढा) - पाणिः गृहीतः यया सा इति विग्रहे पाणिगृहीत शब्दात् ''पाणिगृहीती भार्यायाम्'' इति ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च पाणिगृहीती इति रूपं सिद्ध्यति।

या विधिवदूढा नास्ति तस्यां पाणिगृहीत शब्दात् टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च पाणिगृहीता इत्येव भवति।

**अस्वाङ्गपूर्वपदाद्वा ४/१/५३**

**पूर्वेण नित्ये प्राप्ते विकल्पोऽयम्। सुरापीती, सुरापीता। 'अन्तोदात्तात्' किम्? वस्त्रच्छन्ना। 'अनाच्छादनात्' इत्युदात्तनिषेधः, अत एव पूर्वेणापि न ङीष्।**

**पदच्छेदः** - अस्वाङ्गपूर्वपदात्, वा।

**अनुवृत्तिः** - ''क्तादल्पाख्यायाम्'' इति क्तात् इत्यनुवर्तते। बहुव्रीहेश्चान्तोदात्तात् इति सूत्रमनुवर्तते। अतः ''ङीष्'' इत्यनुवर्तते।

**सूत्रार्थः** - अन्तोदात्तात् क्तान्तात् अस्वाङ्गपूर्वपदात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् बहुव्रीहेः स्त्रियां ङीष् वा स्यात्।

**व्याख्या** - अस्वाङ्गं च पूर्वपदम्, अस्वाङ्गपूर्वपदम् (कर्मधारयः) तस्मात् अस्वाङ्गपूर्वपदात्।''जातिपूर्वात्'' इत्यस्यात्र सम्बन्धः।

**रूपलेखनप्रकारः** -

**सुरापीती-सुरापीता**- सुरापीता यया इति विग्रहे सुबुत्पत्तेः प्राक् बहुव्रीहिसमासे सुरापीत शब्दस्य 'जातिकालसुखादिभ्य.' इत्यन्तोदात्तत्वे कृते ''बहुव्रीहेश्चान्तोदात्तात्'' इति ङीष् प्रत्यये प्राप्ते तं प्रबाध्य ''अस्वाङ्गपूर्वपदाद्वा'' इति विकल्पेन ङीषि भत्वादलोपे स्वादिकार्ये च सुरापीती इति रूपं सिद्धम्।

पक्षे टापि सवर्णदीर्घे स्वादिकार्ये च सुरापीता इति रूपं भवति।

**पङ्क्तिविवेचनम्** -

**अन्तोदात्तात् किम्? वस्त्रच्छन्ना।**

सूत्रेऽस्मिन् ''अन्तोदातात्'' इति पदं नानुवर्तेत तदा वस्त्रं छन्नं यया इति विग्रहे वस्त्रच्छन्न इत्यस्मात् अनुदात्तान्तात् अदन्तादपि ङीषः प्राप्तिर्भवति तन्न भवेत् अतः अन्तोदात्तात् इति पदस्य ग्रहणं कृतमस्ति।

**५१० स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ४/१/५४**

**असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्तादृदन्तात् प्रातिपदिकाद् वा ङीष्। केशानतिक्रान्ता अतिकेशी, अतिकेशा। चन्द्रमुखी, चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। उपसर्जनात् किम्? शिखा। स्वाङ्गं त्रिधा -**

**'अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्।'**

**सुस्वेदा, द्रवत्वात्। सुज्ञाना, अमूर्तत्वात्। सुमुखा शाला, अप्राणिस्थत्वात्। सुशोफा, विकारजत्वात्।**

**'अतत्स्थं तत्र दृष्टं च'**

**सुकेशी, सुकेशा वा रथ्या, अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्।**

**'तेन चेत्तत्तथायुतम्।।''**

**सुस्तनी, सुस्तना वा प्रतिमा, प्राणिवत्प्राणिसदृशे स्थितत्वात्।**

**पदच्छेदः** - स्वाङ्गात्, च, उपसर्जनात्, असंयोगोपधात्।

**अनुवृत्तिः** - ''अजाद्यतष्टाप्'' इति 'अतः' अनुवर्तते। ''अन्यतोङीष्'' इति ङीषनुवर्तते। अतः इति प्रातिपदिकात्

इत्यस्य विशेषणपदम् विशेषणात् तदन्तविधिः। ''अस्वाङ्गपूर्वपदाद्वा'' इत्यतः वा इत्यनुवर्तते।

**सूत्रार्थः** – असंयोगोपधात् उपसर्जनात् स्वाङ्गवाचिनः अदन्तात् प्रातिपदिकात् स्त्रियां वा ङीष् स्यात्।

**उदाहरणानि** – अतिकेशी-अतिकेशा, चन्द्रमुखी-चन्द्रमुखा।

**रूपलेखनप्रकारः** –

**अतिकेशी-अतिकेशा**– केशानतिक्रान्ता इति विग्रहे ''अत्यादयः क्रान्ताद्यर्थे द्वितीयया'' इति समासे अतिकेश शब्दात् ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्.'' इति विकल्पेन ङीषि भत्वादलोपे स्वादिकार्ये च अतिकेशी इति रूपं सिद्ध्यति।

पक्षे टापि सवर्णदीर्घे स्वादिकार्ये च अतिकेशा इति रूपं भवति।

एवमेव चन्द्रमुखी-चन्द्रमुखा इति सिद्ध्यति।

**संयोगोपधातु सुगुल्फा**

सु शोभनौ गुल्फौ यस्याः इति विग्रहे सुगुल्फ इत्यस्मात् संयोगोपधत्वात् ङीष् प्रत्ययो न भवति अपि तु टाबेव भवति।

**उपसर्जनात् किम्? शिखा**

सूत्रे ''उपसर्जनात्'' इति पदं न स्यात् तदा शिख इत्यनुपसर्जनात् अदन्तात् अपि ङीषः प्राप्तिर्भवति तन्न भवेत् अपितु टाबेव भवति।

**स्वाङ्गं त्रिधा भवति** –

अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टञ्च तेन चेत्तथायुतम्।

**अन्वयः** – अद्रवं मूर्तिमत् प्राणिस्थम् अविकारजम् (स्वाङ्गम्)। च अतत्स्थं तत्र दृष्टं (स्वाङ्गम्), तेन चेत् तथा युतम्।

**प्रसङ्गः** – स्वस्य अङ्गीभूतस्य अङ्गं स्वाङ्गमिति लक्षणे सुमुखा शाला इत्यादौ अनिष्टापत्तिः। सुकेशी रथ्या इत्यादौ लक्षणस्य अप्राप्तिश्च भवति। अतः भाष्ये सूत्रे स्वाङ्गं त्रिधा परिभाषितम्।

**प्रत्युदाहरणानि** –

**सुस्वेदा** – सु शोभनः स्वेदः यस्याः सुस्वेद इत्यस्मात् स्वेदस्य द्रवत्वात् स्वाङ्गलक्षणे नान्तर्भूतत्वात् ङीष् न भवति अपि तु टाबेव।

**सुज्ञाना** – सु शोभनं ज्ञानं यस्याः इत्यर्थे सुज्ञान शब्दात् ज्ञानस्य अमूर्तत्वात् स्वाङ्गभावात् ङीष् न भवति अपि तु टाबेव।

**सुमुखा शाला** – इत्यत्र मुखस्य अप्राणिस्थत्वान्न ङीष्।

**सुशोफा** – इत्यत्र शोफ इत्यस्य रोगजन्यत्वात्-अविकारजत्वाभावात् ङीष् न भवति।

**सुकेशी रथ्या** – सुकेश शब्दात् अतस्थं तत्र दृष्टञ्च इति स्वाङ्गलक्षणात् ''स्वाङ्गच्चोपसर्जनादसंयोगोपधात्'' इति ङीषि भत्वादलोपे स्वादिकार्ये सुकेशी इति रूपं सिद्धम्।

**सुस्तनी प्रतिमा** – सु-शोभनौ स्तनौ यस्याः इति विग्रहे सुस्तन शब्दात् तेन चेत्तथा युतम् इति स्वाङ्गलक्षणात् ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'' इति ङीषि भत्वादलोपे स्वादिकार्ये च सुस्तनी इति रूपं सिद्धम्।

## ५११ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ४/१/५५

**एभ्यो वा ङीष् स्यात्। आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते, पुरस्तादपवादन्यायात्। ओष्ठादीनां पञ्चानां तु 'असंयोगोपधात्' इति पर्युदासे प्राप्ते वचनम्, मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः। तुङ्गनासिकी, तुङ्गनासिकेत्यादि। नेह – सहनासिका, अनासिका। अत्र वृत्तिः – 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्'। स्वङ्गी, स्वङ्गेत्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। 'भाष्याद्यनुक्तत्वात् अप्रमाणम्' इति प्रामाणिकाः। अत्र वार्तिकानि –**

**'पुच्छाच्च' (वा. २४८९)। सुपुच्छी, सुपुच्छा। 'कबरमणिविषशरेभ्यो नित्यम्' (वा. २४९०)। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरीत्यादि। 'उपमानात्पक्षाच्च पुच्छाच्च' (वा. २४९१)। नित्यमित्येव। उलूकपक्षी शाला। उलूकपुच्छी सेना।**

**पदच्छेदः** - नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गात्, च।

**अनुवृत्तिः** - 'अन्यतो ङीष्' इति ङीष् अनुवर्तते। ''अस्वाङ्गपूर्वपदाद्वा'' इति वेति अनुवर्तते। ''स्वाङ्गाच्चोपसर्जनात्.'' इत्यतः स्वाङ्गात्, उपसर्जनात् इत्यनुवर्तेते।

**सूत्रार्थः** - स्वाङ्गवाचिनः उपसर्जनात् नासिकान्तात्, उदरान्तात् ओष्ठान्तात् जङ्घान्तात् दन्तान्तात् कर्णान्तात् शृङ्गान्ताच्च प्रातिपदिकात् स्त्रियां वा ङीष् स्यात्।

**व्याख्या** - नासिकादिशृङ्गान्तपर्यन्तं द्वन्द्वसमासे सौत्रत्वात् पञ्चम्येकवचने नासिकोदरोष्ठ....................शृङ्गात्। च इति अनुक्त समुच्चयार्थकः। प्रातिपदिकात् इत्यस्य विशेषणात् नासिकादिभ्यः तदन्तविधिः। आद्ययोः नासिकोदरशब्दयोः बह्वज्त्वात् पुरस्ताद् अपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान् इति नियमात् स्वाङ्गच्चोपसर्जनात् इति प्राप्तस्य ङीषः ''न क्रोडादिबह्वचः'' इत्यनेन निषेधो भवति। ओष्ठादीनां पञ्चानां संयोगोपधत्वात् ''स्वाङ्गाच्चोपसर्जनात्.'' इत्यस्य प्राप्तिरेव नास्ति। ''मध्येऽपवादा पूर्वान् विधीन् बाधन्ते नोत्तरान्'' इति परिभाषा बलेन ''नासिकोदरौष्ठ.'' इत्यनेन ङीष् भवति।

सहनञ्लक्षणप्रतिषेधस्तु परत्वात् ''नासिकोदरोष्ठ.'' इति सूत्रस्य बाधकः वर्तते।

**रूपलेखनप्रकारः** -

**तुङ्गनासिकी-तुङ्गनासिका**- तुङ्गानासिका यस्याः इति विग्रहे समासे पुंवद्भावे उपसर्जनह्रस्वे च तुङ्गनासिक इत्यस्मात् ''स्वाङ्गाच्चोपसर्जनात्.'' इति सूत्रेण ङीषि प्राप्ते ''न क्रोडादिबह्वचः'' इत्यनेन तन्निषेधे तं प्रबाध्य ''नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च'' इति विकल्पेन ङीषि भत्वादलोपे स्वादिकार्ये च तुङ्गनासिकी इति रूपं भवति। पक्षे टापि सवर्णदीर्घे स्वादिकार्ये च तुङ्गनासिका इति रूपं भवति।

एवं प्रकारेण बिम्बोष्ठी- बिम्बोष्ठा, कुम्भोदरी-कुम्भोदरा, सुजङ्घी-सुजङ्घा, शुभ्रदन्ती-शुभ्रदन्ता, सुकर्णी-सुकर्णा सुशृङ्गी-सुशृङ्गा इत्यादयः सिद्ध्यन्ति।

**वा. उपमानात् पक्षाच्च पुच्छाच्च (वा. २४९१)**

**वार्तिकार्थः**- उपमानात् परयोः पक्षान्तपुच्छान्तयोः प्रातिपदिकयोः स्त्रियां नित्यं ङीष् स्यात्।

**रूपलेखनप्रकारः** -

**उलूकपक्षी**- उलूकपक्षौ इव पक्षौ यस्याः सा इत्यर्थे उपमानबहुव्रीहौ उत्तरपदपक्षशब्दस्यलोपे उलूकपक्ष शब्दात् स्त्रीत्वे उपमानात् पक्षाच्चपुच्छाच्च इति ङीषि भत्वादलोपे स्वादिकार्ये च उलूकपक्षी इति रूपं सिद्धम्। एवमेव उलूकपुच्छी इति रूपमपि सिद्ध्यति।

**न क्रोडादिबह्वचः ४/१/५६**

**क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्।**

**कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोऽयम्। सुजघना।**

**सूत्रप्रकारः** - विधिनिषेधसूत्रम्।

**पदच्छेदः** - न, क्रोडादिबह्वचः।

**अनुवृत्तिः** - स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रात् स्वाङ्गोच्चोपसर्जनात् ''अन्यतो ङीष्'' इत्यतः ङीष् अनुवर्तते, 'अजाद्यतष्टाप्' इति अतः अनुवर्तते। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।

**सूत्रार्थः** - स्वाङ्गवाचकात् क्रोडादेः बह्वचश्च न ङीष् स्यात्।

**व्याख्या** – क्रोडा आदिर्यस्य इति क्रोडादि:, बहव: अच: यस्येति विग्रहे क्रोडादिश्च बह्वच् च इति समाहारद्वन्द्व: पञ्चम्येकवचने रूपम्।

**उदाहरणानि** – कल्याणक्रोडा।

**रूपलेखनप्रकार: –**

**कल्याणक्रोडा**– कल्याणी क्रोडा यस्या: इति विग्रहे बहुव्रीहौ समासे पुंवद्भावे कल्याणक्रोड इत्यस्मात् स्त्रीत्वे ''स्वाङ्गाच्चोपसर्जनात्.'' इति ङीषि प्राप्ते ''न क्रोडादिबह्वच:'' इति तन्निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च कल्याणक्रोडा इति रूपं सिद्धम्।

**विशेष:**– अश्वानामुर: क्रोडा। क्रोडादि आकृतिगण:।

**नेह** – सहनासिका–अनासिका–सह नासिका यस्या:, अविद्यमाना नासिका यस्या: इति विग्रहे सहनासिक, अनासिकशब्दात् ''स्वाङ्गाच्चोपसर्जनात्.'' इति प्राप्तस्य ङीष: ''न क्रोडादिबह्वच:'' इति निषेधे ''नासिकोदरोष्ठ.'' इति सूत्रेण ङीषि प्राप्ते ''सहनञ्विद्यमानपूर्वाच्च'' इति तन्निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये सहनासिका, अनासिका इति रूपं भवति।

**अङ्गगात्रकण्ठेभ्यो वक्तव्यम् ( वृत्ति: )**

**वृत्यर्थ:** – संयोगोपधेभ्य: अङ्गगात्रकण्ठ–इत्येभ्य: वा ङीष् स्यात्।

**स्वङ्गी–स्वङ्गा**– शोभनानि अङ्गानि यस्या: इति विग्रहे बहुव्रीहौ समासे स्वङ्ग इत्यस्मात् 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' इति ङीषि भत्वादलोपे स्वादिकार्ये च स्वङ्गी इति रूपं भवति। पक्षे टापि सवर्णदीर्घे स्वादिकार्ये च स्वङ्गा इति रूपं भवति।

**वा–पुच्छाच्च ( वा. २४८९ )**

**वार्तिकार्थ:**– संयोगोपधात् पुच्छान्तात् प्रातिपदिकात् स्त्रीत्वे ङीष् वा स्यात्।

**रूपलेखनप्रकार: –**

**सुपुच्छी–सुपुच्छा**– सुपुच्छ शब्दात् स्त्रीत्वेद्योत्ये ''पुच्छाच्च'' इति वार्तिकेन विकल्पेन ङीषि भत्वात् ''यस्येति च'' इत्यकारलोपे स्वादिकार्ये च सुपुच्छी इति रूपं भवति। पक्षे टापि सवर्णदीर्घे स्वादिकार्ये च सुपुच्छी इति रूपं सिद्धम्।

**वा. कबरमणिविषशरेभ्यो नित्यम् ( वा. २४९० )**

**वार्तिकार्थ:** – कबरमणिविषशरेभ्य: परस्य पुच्छान्तात् प्रातिपदिकात् स्त्रियां नित्यं ङीष् स्यात्।

**कबरपुच्छी**– कबरं पुच्छं यस्या: इति विग्रहे समासे कबरपुच्छ शब्दात् स्त्रीत्वे ''कबरमणिविषशरेभ्यो नित्यम्'' इति वार्तिकेन ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च कबरपुच्छी इति रूपं सिद्धम्।

**सुजघना** – सु–शोभनं जघनं यस्या: इति विग्रहे सुजघन शब्दात् स्त्रीत्वे ''स्वाङ्गाच्चोपसर्जनात्.'' इति प्राप्तस्य ङीष: ''न क्रोडादिबह्वच:'' इति निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे सवर्णदीर्घे सुजघना इति जाते स्वादिकार्ये च सुजघना इति रूपं सिद्धम्।

## ५१३ सहनञ्विद्यमानपूर्वाच्च ४/१/५७

**सहेत्यादित्रिकपूर्वान्न ङीष्। सकेशा। अकेशा। विद्यमाननासिका।**

**पदच्छेद:** – सहनञ्विद्यमानपूर्वात्, च।

**सूत्रार्थ:**– सहनञ्विद्यमानपूर्वकात् असर्जनात् स्वाङ्गवाचिन: अदन्तात् प्रातिपदिकात् स्त्रीत्वे ङीष्।

**व्याख्या** – सह नञ् विद्यमानम् पूर्वं यस्य, तस्मात् सहनञ्विद्यमानपूर्वात्। च इति पृथक्पदम्। सहशब्द: विद्यमानवाचक:। 'न क्रोडादिबह्वच:' इति सूत्रात् न इति, ''स्वाङ्गाच्चोपसर्जनात्.'' इत्यत: स्वाङ्गाच्चोपसर्जनात् इत्यनुवर्तते। 'अन्यतो ङीष्'' इति सूत्रात् ङीषनुवर्तते। प्रातिपदिकात् स्त्रियाम् इत्यस्य चाधिकार:।

**रूपलेखनप्रकारः -**

**सकेशा** - सह (विद्यमानाः) केशाः यस्याः इति विग्रहे बहुव्रीहौ "वोपसर्जनस्य" इति सहस्य सादेशे सकेश शब्दात् स्त्रियां "स्वाङ्गाच्चोपसर्जनात्" इति प्राप्तस्य ङीषः "सहनञ्विद्यमानपूर्वाच्च" इति निषेधे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च सकेशा इति रूपं सिद्धम्।

**अकेशा** - अविद्यमानाः केशाः यस्याः इति विग्रहे 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति समासे विद्यमानपदस्य लोपे अकेश इत्यस्मात् "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति प्राप्तस्य ङीषः 'सहनञ्विद्यमानपूर्वाच्च' इति निषेधे "अजाद्यतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये अकेशा इति रूपं सिद्धम्।

**विद्यमाननासिका**- विद्यमाना नासिका यस्याः सा इति विग्रहे समासे स्त्रीत्वे "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च" इति प्राप्तङीषः "सहनञ्विद्यमानपूर्वाच्च" इति निषेधे "अजाद्यतष्टाप्" इति टापि सवर्णदीर्घे स्वादिकार्ये विद्यमाननासिका इति रूपं सिद्धम्।

## ५१४ नखमुखात् सञ्ज्ञायाम् ४/१/५८

**ङीष् न स्यात्। शूर्पणखा। गौरमुखा। संज्ञायाम् किम्? ताम्रमुखी कन्या।**

**पदच्छेदः**- नखमुखात्, संज्ञायाम्।

**अनुवृत्तिः** - 'न क्रोडादिबह्वचः' इत्यतः न इत्यनुवर्तते। स्वाङ्गाच्चोपसर्जनात् इत्यनुवर्तते "अन्यतो ङीष्" इत्यतः ङीषनुवर्तते।

**सूत्रार्थः** - स्वाङ्गात् उपसर्जनात् नखमुखात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष् न स्यात् संज्ञायाम् द्योत्यायाम्।

**व्याख्या** - नखं च मुखञ्च तयोः समाहारः, पञ्चम्येकवचने नखमुखात् इति भवति। 'न क्रोडादिबह्वचः' इति सूत्रात् न इति अनुवर्तते। अजाद्यतष्टाप् इति अतः अनुवर्तते। सूत्रमिदं स्वाङ्गाच्चोपसर्जनात् इत्यस्य निषेधकमस्ति।

**रूपलेखनप्रकारः -**

**शूर्पणखा** - शूर्पाणीव नखानि यस्याः इति विग्रहे बहुव्रीहि समासे "पूर्वपदात् संज्ञायामगः" इति नस्य णत्वे शूर्पणख इत्यस्मात् स्त्रीत्वे द्योत्ये "स्वाङ्गाच्चोपसर्जनात्" इति प्राप्तस्य ङीषः "नखमुखात्संज्ञायाम्" इति निषेधे 'अजाद्यतष्टाप्' इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च शूर्पणखा इति रूपं भवति। राक्षसीविशेषस्य नामकरणम्।

**गौरमुखा** - गौरं मुखं यस्याः इति विग्रहे बहुव्रीहौ समासे गौरमुख शब्दात् स्त्रीत्वे "स्वाङ्गाच्चोपसर्जनात्." इति प्राप्तस्य ङीषः नखमुखात्सञ्ज्ञायाम् इति सूत्रेण निषेधे "अजाघतष्टाप्" इति टापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च गौरमुखा इति रूपं भवति। संज्ञायाम् किम्? ताम्रमुखीकन्या यदि प्रकृत सूत्रे "सञ्ज्ञायाम्" इति पदं स्यात् तदा ताम्रमुखी इत्यत्रापि ङीष् निषेधः प्राप्नोति तन्न भवेत्।

## ५१५ दिक्पूर्वपदान्ङीप् ४/१/६०

**दिक्पूर्वपदात् स्वाङ्गान्तात् प्रातिपदिकात् परस्य ङीषो ङीबादेशः स्यात्।**

**प्राङ्मुखी। आद्युदात्तं पदम्।**

**पदच्छेदः** -दिक्पूर्वपदात्, ङीप्।

**अनुवृत्तिः** - स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रात् स्वाङ्गात् इति पदमनुवर्तते अन्यतो ङीष् इत्यतः ङीषनुवर्तते षष्ठ्याञ्च विपरिणमते ङीषः स्थाने ङीप् इति विधेयम् आदेश पदम्।

**सूत्रार्थः** - स्वाङ्गवाचिनः दिक्पूर्वपदात् प्रातिपदिकात् परस्य ङीषः ङीप् आदेशो भवति।

**रूपलेखनप्रकारः -**

**प्राङ्मुखी**- प्राक् मुखं यस्याः इति विग्रहे बहुव्रीहौ प्राङ्मुख शब्दात् स्त्रीत्वे द्योत्ये "स्वाङ्गाच्चोपसर्जनादिति ङीषि" दिक्पूर्वपदान्ङीप् इति ङीषो ङीबादेशे भत्वादलोपे स्वादिकार्ये च प्राङ्मुखी इत्यत्र पित्वात् "अनुदात्तौ सुप्पितौ" इति

ईकारस्यानुदात्तत्वे 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति प्रकृतिस्वरविधानात् आद्युदात्तमिदं पदमस्ति। केवलं ङीषि प्रत्यये तु अनिष्टं अन्तोदात्तपदं स्यात्।

## ५१६ वाहः ४/१/६१

**वाहन्तात् प्रातिपदिकान्ङीष् स्यात्।**

**ङीषेवानुवर्तते न ङीप्। 'दित्यवाट् च मे दित्यौही च मे'।**

**पदच्छेदः** - वाहः।

**अनुवृत्तिः** - ''दीर्घजिह्वी च छन्दसि'' इति सूत्रात् छन्दसि, अन्यतो ङीष् इति ङीष् च अनुवर्तते।

**सूत्रार्थः** - अनुपसर्जनात् वाहन्तात् प्रातिपदिकात् स्त्रियां छन्दसि ङीष् भवति।

**व्याख्या** - प्रातिपदिकात्, अनुपसर्जनात्, स्त्रियाम् इत्यस्य चाधिकारः। वाहः इति प्रातिपदिकात् इत्यस्य विशेषणपदम्। विशेषणात् येन विधिः तदन्तस्य इति तदन्तविधिः वाहन्तात् इति भवति।

**रूपलेखनप्रकारः** -

दित्यवाट् च मे दित्यौही च मे- दित्यं वहतीत्यर्थे दित्योपपदात् वह्धातोः ''वहश्च'' इति ण्विप्रत्यये ''अत उपधायाः'' इति आदिवृद्धौ ण्वेः सर्वापहारिलोपे उपपदसमासे च दित्यवाह् शब्दात् ''वाहः'' इति ङीषि अनुबन्धलोपे यचि भमिति भत्वात् ''वाह ऊठ्'' इत्यूठि दित्य ऊ आह् ई इति जाते ''सम्प्रसारणाच्च'' इति पूर्वरूपे दित्य ऊह् ई इति जाते ''एत्येधत्यूठ्सु'' इति अकारोकारयोः वृद्धौ दित्यौही इति जाते स्वादिकार्ये दित्यौही इति रूपं भवति।

## ५१७ सख्यशिश्वीति भाषायाम् ४/१/६२

**इतिशब्दः प्रकारे भाषायाम् इत्यस्यानन्तरं द्रष्टवः। तेन छन्दस्यपि क्वचित्। सखी। अशिश्वी। 'आधेनवो धुनयन्तामशिश्वीः'।**

**पदच्छेदः**- सखी, अशिश्वी, इति, भाषायाम्।

**अनुवृत्तिः**- अन्यतो ङीष् इति सूत्रात् ङीषनुवर्तते।

**सूत्रार्थः** - सखि-अशिश्वीशब्दयोः भाषायां ङीष् स्यात् स्त्रीत्वे द्योत्ये।

**व्याख्या** - इति शब्दः प्रकारार्थकः, भाषायामन्वितो भवति। भाषायाम् सखी, अशिश्वी इति द्रष्टव्यम्। वेदेऽपि क्वचित् सखी, अशिश्वी इति भवति। प्रातिपदिकात्, स्त्रियाम् इत्यस्याधिकारः।

**रूपलेखनप्रकारः** -

**सखी**- सखि शब्दात् स्त्रियां ''सख्यशिश्वीति भाषायाम्'' इति ङीषि अनुबन्धलोपे भत्वात् यस्येति चेतीकारलोपे सुप्रत्यये सोः लोपे सखी इति रूपं भवति।

**अशिश्वी**- अविद्यमानः शिशुर्यस्याः इति विग्रहे ''नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः'' इति समासे विद्यमानस्य लोपे च अशिशु इति जाते। तस्मात् ''सख्यशिश्वीति भाषायाम्'' इति ङीषि अनुबन्धलोपे ''इको यणचि'' इति उकारस्य यणि सुप्रत्यये सोर्हल्ङ्याब्भ्यादिलोपे अशिश्वी इति रूपं सिद्धम्।

## ५१८ जातेरस्त्रीविषयादयोपधात् ४/१/६३

**जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्।**

**'आकृतिग्रहणा जातिः-' अनुगतसंस्थानव्यङ्ग्येत्यर्थः। तटी।**

**-'लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या-'।'असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यरन्तरे कथनं विनापि सुग्रहा जातिः' इति लक्षणान्तरम्। वृषली। सत्यन्तम् किम्? शुक्ला। सकृदित्यादि किम्? देवदत्ता।**

**-'गोत्रं च चरणैः सह।' अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। कलापी। बह्वृची। ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठान्ङीना ङीष्बाध्यते। जातेः किम्? मुण्डा। अस्त्रीविषयात्**

**किम्? बलाका। अयोपधात् किम्? क्षत्रिया।**

**'योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः' ( वा. २४९५ )।**

**हयी। गवयी। मुकयी। 'हलस्तद्धितस्य' ( सू. ४७२ ) इति यलोपः। 'मनोर्जातावञ्यतौ षुक्' ( सू. ११८५ )। मानुषी। 'मत्स्यस्य ङ्याम्' ( वा. ४१९८ )। मत्सी।**

**पदच्छेदः-** जातेः, अस्त्रीविषयात्, अयोपधात्।

**अनुवृत्तिः-** ''अन्यतो ङीष्'' इति ङीषनुवर्तते। अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् इत्यस्य च अधिकारः।

**सूत्रार्थः -** नियत स्त्रीलिङ्गरहितात् यकारोपधरहितात् जातिवाचकात् अनुपसर्जनात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्।

**व्याख्या -** जातेः- जातिवाचकात्, अस्त्रीविषयात्-स्त्रीविषयः नियमेन वाच्यः यस्य सः स्त्रीविषयः न स्त्रीविषयः- अस्त्रीविषयः तस्मात् अस्त्रीविषयात्, अयोपधात् = यः उपधायां यस्य सः योपधः न योपधः, अयोपधः तस्मात् अयोपधात्।

**भाष्ये जातिलक्षणम् -**

**आकृतिग्रहणाजातिः लिङ्गानां च न सर्वभाक्।**
**सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह।।**

**नैयायिकाः-** 'नित्यमेकमनेकानुगतं सामान्यम्' इति जातिलक्षणं स्वीकुर्वन्ति एतत् लक्षणं स्वीक्रियते चेत् शुक्लादिगुणस्य नित्यत्वैकत्वपक्षे शुक्लादिगुणेषु अतिव्याप्तिः, औपगवी, कठी इत्यादौ अव्याप्तिश्च भवति। जननेन यत् प्राप्यते सा जातिश्चेत् युवत्वादौ अव्याप्तिः भवति। तेन ''युवतितर'' इत्यत्र 'जातेश्च' इति पुंवद्भावनिषेधो न स्यात्।

**आकृतिग्रहणा जातिः-** अनुगतसंस्थानव्यङ्ग्या इत्यर्थः। तटी। लिङ्गानां च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्या। सर्वाणि लिङ्गानि यः न भजते सः तथा सकृत्-एकवारम् आख्यातेन-कथितेन निर्ग्राह्या-निःशेषेण बोध्या जातिः। वृषली।

गोत्रं च चरणैः सह- गोत्र प्रत्ययान्ताः शाखाध्येतृवाचकाश्च शब्दाः जातिवाचकाः भवन्ति। गोत्रेण अपत्यप्रत्ययान्ताः शब्दाः गृह्यन्ते न तु पारिभाषिक पौत्रप्रभृतयः शब्दा इति।

**तटी-** तट शब्दात् (तटत्व जातिवाचकात्) ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण स्त्रीत्वे द्योत्ये ङीषि प्रत्यये भत्वात् यस्येति च इत्यकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे तटी इति रूपं सिद्धम्।

**वृषली-** वृषलजातेः स्त्रीत्यर्थे ''जातेरस्त्रीविषयादयोपधात्'' इति ङीषि भसंज्ञायाम् 'यस्येति च' इत्यलोपे स्वादिकार्ये च वृषली इति रूपं सिद्धम्।

**औपगवी -** उपगोरपत्यं स्त्रीत्यर्थे ''तस्यापत्यम्'' इत्यणि आदिवृद्धौ'' ओर्गुणः इति गुणे अवादेशे च औपगव इत्यस्मात् स्त्रीत्वे अण्णन्तत्वात् ''टिड्ढाणञ्द्वयसच्.'' इति ङीपि प्राप्ते तं प्रबाध्य ''जातेरस्त्रीविषयाद्.'' इति ङीपि भत्वादलोपे स्वादिकार्ये च औपगवी इति रूपं सिद्धम्।

**कठी-** कठेन प्रोक्तमधीयाना इत्यर्थे ''कलापिवैशम्पायनान्तेवासिभ्यश्च'' इति णिनि ''कठचरकाल्लुक्'' इति णिनेः लुकि कठ शाखाध्येतृवाचित्वात् जातित्वात् ''जातेरस्त्रीविषयादयोपधात्'' इति ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये च कठी इति रूपं सिद्धम्।

**प्रत्युदाहरणम्-** जातेः किम्? मुण्डा ''सूत्रे जातेः इति पदं न स्यात् तदा सर्वालिङ्गान्वयित्वे अजातित्वे मुण्ड शब्दात् अपि ङीषः प्राप्तिर्भवति तन्न भवेत्।

**कलापी -** कलापेन प्रोक्तमधीयाना इत्यर्थे कलाप शब्दात् ''जातेरस्त्रीविषयादयोपधात्'' इति ङीषि ''ङीषि'' यचिभम् इति भसञ्ज्ञायाम् यस्येति च इत्यलोपे स्वादिकार्ये च कलापी इति रूपं सिद्धम्।

**बह्वृची-** बहवः ऋचः अध्येतव्याः यस्याः इत्यर्थे बहुव्रीहौ ऋक्पूरब्धूः पथामानक्षे इति समासान्तेऽचि उकारस्य यणि

बह्वृच इत्यस्मात् चरणवाचित्वेन जातित्वात् जातेरस्त्रीविषयादयोपधात् इति ङीषि भत्वादलोपे स्वादिकार्ये च बह्वृची इति रूपं सिद्धम्।

**वा. योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः ( वा. २४९५ )**

**वार्तिकार्थः** – योपधात् हयगवयमुकयमनुष्यमत्स्यानां प्रातिपदिकानां ङीष् निषेधो न स्यात् ( अर्थात् ङीषः अप्रतिषेधः )।

**उदाहरणानि** –

हयी–हय शब्दात् स्त्रीत्वविवक्षायां ''योपधप्रतिषेधे हयगवय मुकयमनुष्यमत्स्यानामप्रतिषेधः'' इति वार्तिकेन ङीषि अनुबन्धलोपे भत्वादलोपे स्वादिकार्ये हयी इति रूपं सिद्धम्।

एवमेव गवयी, मुकयी इत्यपि सिद्ध्यन्ति।

**वा. मनोर्जातावञ्यतौ षुक् च ( वा. २२८५ )**

**वार्तिकार्थः**– मनु शब्दात् जातिवाच्ये अञ्यतौ प्रत्ययौ षुगागमश्च स्यात्।

**रूपलेखनप्रकारः**–

**मनुषी** – मनोः अपत्यं स्त्रीत्यर्थे ''मनोर्जातावञ्यतौ षुक् च'' इति यत् प्रत्यये षुगागमे च कृते मनुष्य शब्दात् प्रातिपदिकात् ''योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः'' इति वार्तिकेन ङीषि भसञ्ज्ञायाम् 'यस्येति च' इत्यलोपे ''हलस्तद्धितस्य'' इति यकारस्यलोपे मनुषी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे मनुषी इति रूपं सिद्धम्।

**वा. मत्स्यस्य ङ्याम् ( वा. ४१९८ )**

**वार्तिकार्थः**– मत्स्य शब्दस्य भसञ्ज्ञकस्योपधाभूतस्य यकारस्य लोपः स्यात्।

**उदाहरणम्** – मत्सी–मत्स्य शब्दात् स्त्रीत्वेऽर्थे ''योपधप्रतिषेधेहयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः'' इति ङीष् प्रत्यये अनुबन्धलोपे भसञ्ज्ञायां ''मत्स्यस्य ङ्याम्'' इति यलोपे 'यस्येति च' इत्यलोपे स्वादिकार्ये च मत्सी इति रूपं सिद्धम्।

## ५१९ पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ४/१/६४

**पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात्। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषे रूढा एते।**

**पदच्छेदः**– पाककर्णपर्णपुष्पफलमूलवालोत्तरपदात्, च।

**अनुवृत्तिः**– ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रात् जातेः'' इत्यनुवर्तते। ''अन्यतो ङीष्'' इति ङीष् अनुवर्तते। स्त्रियाम् इत्यस्याधिकारः।

**सूत्रार्थः**– जातिवाचकात् पाककर्णपर्णपुष्पफलमूलवालोत्तरपदात् प्रातिपदिकात् नियतस्त्रीलिङ्गादपि स्त्रियां ङीष् स्यात्।

**व्याख्या** – जातेरस्त्रीविषयादयोपधात् इत्येव ङीषि सिद्धे इदं सूत्रं नियतस्त्रीलिङ्गादपि ङीष्विधानार्थमस्ति। पाकश्च कर्णश्च पर्णञ्च पुष्पञ्च फलञ्च मूलञ्च वालञ्च इति विग्रहे द्वन्द्वसमासे पाककर्णपर्णपुष्पफलमूलवालानि। एतानि उत्तरपदानि यस्य सः, तस्मात् पाककर्णपर्णपुष्पफलमूलवालोत्तरपदात् इति भवति।

**उदाहरणानि** –

**ओदनपाकी** – ओषधिविशेषे रूढात् नित्यस्त्रीविषयात् ''पाककर्णपर्ण पुष्पफलमूलवालोत्तरपदाच्च'' इति ङीषि भत्वादलोपे स्वादिकार्ये च ओदनपाकी इति रूपं सिद्धम्।

एवमेव शङ्कुकर्णी, शालपर्णी, शङ्खपुष्पी, दासीफली, दर्भमूली, गोवाली इत्यपि सिद्ध्यन्ति।

## ५२० इतो मनुष्यजातेः ४/१/६५

**ङीष् स्यात्। दाक्षी। योपधादपि–उदमेयस्यापत्यं स्त्री औदमेयी।**

**मनुष्यजातेः किम्? तित्तिरिः।**

**पदच्छेदः-** इतः, मनुष्यजातेः।

**अनुवृत्तिः-** 'अन्यतो ङीष्' इति ङीषनुवर्तते।

**सूत्रार्थः-** मनुष्यजातिवाचिनः इकारान्तात् अनुपसर्जनात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्।

**व्याख्या -** सूत्रस्थम् 'इतः' इति पदम् अनुवृत्तं 'प्रातिपदिकात्' इत्यस्य विशेषणम्, विशेषणात् तदन्तविधिः। पूर्वसूत्रादेव 'जातेः' इत्यनुवृत्तेः सूत्रे पुनः जातेः ग्रहणे प्रयोजनमस्ति यत्-योपधजातिवाचकादपि ङीष् स्यात्।

**उदाहरणम्-** दाक्षी

**रूपलेखनप्रकारः-**

**दाक्षी-** दक्षस्यापत्यं स्त्रीत्यर्थे 'अत इञ्' इति इञि आदिवृद्धौ भत्वादलोपे दाक्षि इति जाते। दाक्षि इत्यस्मात् ''इतो मनुष्यजातेः'' इति ङीषि अनुबन्धलोपे 'यचि भम्' इति भसंज्ञायाम् यस्येति चेतीकारलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे दाक्षी इति रूपं भवति।

**औदमेयिः-** उदमेयस्य अपत्यं स्त्रीत्यर्थे 'अत इञ्' इति इञि ''तद्धितेष्वचामादेः'' इति आदिवृद्धौ भत्वादलोपे औदमेयि इति जाते औदमेयि इत्यस्मात् ''इतो मनुष्यजातेः'' इति ङीषि अनुबन्धलोपे भत्वादिलोपे स्वादिकार्ये च औदमेयिः इति रूपं सिद्धम्।

**प्रत्युदाहरणम् -** मनुष्य इति किम्? तित्तिरिः। ननु ''इतोमनुष्यजातेः'' इति सूत्रे जातेः इत्यनेन सह मनुष्य शब्दः न युज्यते चेत् तित्तिरिः इत्यत्र पक्षीविशेष-जातित्वे इकारान्तात् जातिवाचकात् ङीषः प्राप्तिर्भवति तन्न भवेत्। अतः मनुष्य शब्दस्य योगः वर्तते।

## ५२१ ऊङुतः ४/१/६६

**उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरु। 'कुरुनादिभ्यो ण्यः' ( सू. ११९० )। तस्य 'स्त्रियामवन्ति-' ( सू. ११९५ ) इत्यादिना लुक्। अयोपधात् किम्? अध्वर्युः।**

**अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् ( वा. २५०२ )। रज्ज्वादिपर्युदासाद् उवर्णान्तेभ्य एव। अलाब्वा। कर्कन्ध्वा। अनयोदीर्घान्तत्वेऽपि 'नोङ्धात्वोः' ( सू. ३७२१ ) इति विभक्त्युदात्तत्वप्रतिषेध ऊडः फलम्। प्राणिजातेस्तु कृकवाकुः। रज्ज्वादेस्तु रज्जुः, हनुः।**

**पदच्छेदः-** - ऊङ्, उतः। विधिसूत्रमिदम्।

**अनुवृत्तिः-** 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रात् अयोपधात् इति, 'इतो मनुष्यजातेः' इति सूत्रात् मनुष्यजातेः इति चानुवर्तते। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।

**सूत्रार्थः-** उदन्तात् मनुष्यजातिवाचकात् अयोपधात् प्रातिपदिकात् स्त्रियाम् ऊङ् स्यात्।

**व्याख्या-** सूत्रे 'उतः' इति 'मनुष्यजातेः' इत्यस्य विशेषणपदम् 'येन विधिस्त.' इति तदन्तविधिःउदन्तात् प्रातिपदिकात् इति भवति।

**रूपलेखनप्रकारः-**

**कुरुः-** कुरोः राज्ञः अपत्यं स्त्रीत्यर्थे ''कुरुनादिभ्योण्यः'' इति ण्यप्रत्यये ''स्त्रियामवन्तिकुरुभ्यश्च'' इति ण्यप्रत्ययस्य लुकि कुरु इत्यस्मात् ''ऊङुतः'' इति ऊङ् प्रत्यये अनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे सु प्रत्यये सस्य रुत्वे विसर्गे च कुरुः इति रूपं भवति।

**प्रत्युदाहरणम् -** अयोपधात् किम्? अध्वर्युः- ननु 'ऊङुतः' इति सूत्रे अयोपधात् इत्यस्यानुवृत्तिः न स्यात् तदा का हानिः? इति चेदुच्यते प्रकृतसूत्रे अयोपधात् इत्यनुवृत्ति न स्यात्तर्हि अध्वर्युः इत्यत्रापि ऊङ् प्रत्ययस्य प्राप्तिर्भवति तन्न भवेत्।

**वा. अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम् ( वा. २५०२ )**

**वार्तिकार्थः**- रज्ज्वादिभिन्नात् प्राणिभिन्नजातिवाचिनः उदन्तात् प्रातिपदिकात् ऊङ् स्यात्। अरज्ज्वादि इति पर्युदासनञ्त्वात् रज्जुभिन्ने रज्जुसदृशे उवर्णान्तात् ऊङ् भवति एव।

**उदाहरणम्** - अलाब्वा, कर्कन्ध्वा।

**रूपलेखनप्रकारः**-

**अलाब्वा** - अलाबू शब्दात् स्त्रीत्वे द्योत्ये "अप्राणिजातेश्चारज्ज्वादीनाम् उपसङ्ख्यानम्" इति ऊङि प्रत्यये अनुबन्धलोपे सवर्णदीर्घे अलाबू शब्दात् प्रातिपदिकात् टा विभक्तौ 'इको यणचीति यणि' अलाब्वा इति रूपं भवति। अत्र ऊङ्प्रत्ययस्य फलं "नोङ्धात्वोः" इति विभक्तेरुदात्ततायाः निषेधो भवति।

**कर्कन्ध्वा** - कर्कन्धू शब्दात् 'अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम्' इति ऊङि सवर्णदीर्घे टा विभक्तौ "इको यणचि" इति सूत्रेण यणि कर्कन्ध्वा इति रूपं सिद्धम्। अस्मिन् प्रयोगेऽपि 'नोङ् धात्वोः' इति विभक्तेरुदात्तताया निषेधः भवति।

**प्रत्युदाहरणम्** -

**प्राणिजातेस्तु कृकवाकुः** - अस्मिन् वार्तिके "अप्राणिजातेः" इति निषेधात् प्राणिजातिवाचकात् कृकवाकुः इत्यत्र उदन्तात् ऊङ्प्रत्ययः न भवति।

**रज्ज्वादेस्तु - रज्जुः - हनुः** - अत्र वार्तिके "अरज्ज्वादीनाम्" इत्युक्ते रज्जु हनु इत्यादि उकारान्तात् ऊङ् प्रत्ययस्य निषेधो भवति। तेन स्त्रीत्वेऽपि रज्जुः, हनुः इत्येव रूपं भवति।

## ५२२ बाह्वन्तात् सञ्ज्ञायाम् ४/१/६७

**स्त्रियामूङ् स्यात्। भद्रबाहूः। सञ्ज्ञायां किम्? वृत्तबाहुः।**

**सूत्रप्रकारः**- विधिसूत्रमिदम्।

**पदच्छेदः**- बाह्वन्तात्, संज्ञायाम्।

**अनुवृत्तिः**- 'ऊङुतः' इति सूत्रात् ऊङ् इत्यनुवर्तते। स्त्रियाम् प्रातिपदिकात् इत्यस्य चाधिकारः।

**सूत्रार्थः**- बाहुशब्दान्तात् प्रातिपदिकात् संज्ञायाम् स्त्रीत्वे च द्योत्ये ऊङ् स्यात्।

**व्याख्या**- बाहुः अन्तः यस्य, तस्मात्-बाह्वन्तात् संज्ञायां गम्यमाने अर्थे ऊङ् भवति।

**रूपलेखनप्रकारः**-

**भद्रबाहूः**- भद्रबाहु शब्दात् प्रातिपदिकात् संज्ञावाचकात् स्त्रियां बाह्वन्तात् संज्ञायाम् इति ऊङि अनुबन्धलोपे सवर्णदीर्घे भद्रबाहू इत्यस्मात् सुप्रत्यये सस्य रुत्वे विसर्गे च भद्रबाहूः इति रूपं सिद्धम्।

**प्रत्युदाहरणम्**-

**संज्ञायां किम्? वृत्तबाहुः।**

ननु सूत्रे 'संज्ञायाम्' इति पदं न स्यात् तदा वृत्तौ बाहू यस्याः इत्यर्थे वृत्तबाहु इत्यस्मादपि ऊङ्प्रत्ययस्य प्राप्तिर्भवति तत्र भवेत्।

## ५२३ पङ्गोश्च ४/१/६८

**पङ्गूः।**

**'श्वशुरस्योकाराकारलोपश्च' ( वा. ५०३९ )। चादूङ्। पुंयोगलक्षणस्य ङीषोऽपवादः। लिङ्गविशिष्टपरिभाषया स्वादयः। श्वश्रूः।**

**सूत्रप्रकारः**- विधिसूत्रम्।

**पदच्छेदः**- पङ्गोः, च।

**अनुवृत्तिः**- 'ऊङुतः' इति सूत्रात् ऊङ् इत्यनुवर्तते। अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।
**सूत्रार्थः**- पङ्गुशब्दत् स्त्रीत्वे ऊङ् स्यात्।
**व्याख्या** - पङ्गु इति शब्दे जातित्वाभावात् 'ऊङुतः' इति ऊङः अप्राप्तौ 'पङ्गोश्च' इति पृथक् सूत्रम्।
**उदाहरणम्**-
**पङ्गूः**- पङ्गु शब्दात् स्त्रीत्वविवक्षायां "पङ्गोश्च" इति ऊङि प्रत्यये अनुबन्धलोपे सवर्णदीर्घे प्रातिपदिकत्वात् सुप्रत्यये सस्य रुत्वे विसर्गे च कृते पङ्गूः इति रूपं सिद्धम्।
**वा. श्वशुरस्योकाराकारलोपश्च**
**वार्तिकार्थः**- श्वशुरशब्दात् स्त्रीत्वेऽर्थे ऊङ् स्यात् उकाराकारयोर्लोपश्च।
**रूपलेखनप्रकारः**-
**श्वश्रूः**- श्वशुरस्य स्त्रीत्यर्थे "श्वशुरस्योकाराकारलोपश्च" इति वार्तिकेन ऊङि उकाराकारयोर्लोपे श्वश्रू इत्यस्मात् प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषया सु प्रत्यये सस्य रुत्वे विसर्गे च श्वश्रूः इति रूपं सिद्धम्।

### ५२४ ऊरूत्तरपदादौपम्ये ४/१/६९

**उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः।**

**सूत्रप्रकारः** - विधिसूत्रमिदम्।
**पदच्छेदः** - उरूत्तरपदात्, औपम्ये।
**अनुवृत्तिः** - "ऊङुतः" इति सूत्रात् ऊङ् अनुवर्तते।
**सूत्रार्थः** - औपम्ये पूर्वपदे ऊरूत्तरपदात् प्रातिपदिकात् स्त्रियाम् ऊङ् स्यात्।
**व्याख्या** - ऊरुः उत्तरपदं यस्य, तस्मात् (बहुव्रीहौ समासे) ऊरूत्तरपदात् इति पदं प्रातिपदिकात् इत्यस्य विशेषणपदम् उत्तरपद श्रुत्या पूर्वपदस्य आक्षेपः भवति। अतः उत्तरपदात् इत्यस्य औपम्ये इति पदेन सहान्वयो भवति। उपमीयते अनया इति उपमा, 'उपमा एव' इत्यर्थे ष्यञि सप्तम्येकवचने औपम्ये इति भवति। स्त्रियाम् इत्यस्याधिकारः।
**रूपलेखनप्रकारः**-
**करभोरूः** - करभौ इव ऊरू यस्याः इति विग्रहे उपमानवाचि बहुव्रीहौ प्रातिपदिकत्वात् सुब्लुकि गुणेकृते करभोरु इत्यस्मात् स्त्रीत्वे द्योत्ये "ऊरूत्तरपदादौपम्ये" इति ऊङि प्रत्यये, अनुबन्धलोपे, सवर्णदीर्घे च करभोरू इति जाते पूर्वान्तवत्वात् "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकत्वात् सु प्रत्यये सस्य रुत्वे विसर्गे च करभोरूः इति रूपं सिद्धम्।
**विशेषः**- 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः।

### ५२५ संहितशफलक्षणवामादेश्च ४/१/७०

**अनौपम्यार्थं सूत्रम्। संहितोरूः। सैव शफोरूः, शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षणशब्दादर्शआद्यच् लक्षणोरूः। वामोरूः।**

**'सहितसहाभ्यां चेति वक्तव्यम्' (वा. २५०३)। हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः। सहेते इति सहौ ऊरू यस्याः सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः।**

**सूत्रप्रकारः**- विधिसूत्रम्।
**पदच्छेदः**- संहितशफलक्षणवामादेः, च।
**अनुवृत्तिः**- "ऊरूत्तरपदादौपम्ये" इति सूत्रात् ऊरूत्तरपदात्, 'ऊङुतः' इति सूत्रात् ऊङ् चानुवर्तते। स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाधिकारः।
**सूत्रार्थः**- संहितशफलक्षणवामादेः पूर्वपदात् ऊरूत्तरपदात् प्रातिपदिकात् स्त्रियाम् ऊङ् भवति।

**रूपलेखनप्रकारः-**

**संहितोरूः**- संहितौ ऊरू यस्याः इति विग्रहे समासे प्रातिपदिकत्वात् सुब्लुकि संहितोरू इत्यस्मात् स्त्रीत्वविवक्षायां ''संहितशफलक्षणवामादेश्च'' इति ऊङि अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सस्य रुत्वे विसर्गे च संहितोरूः इति रूपं सिद्धम्।

**शफोरूः**- शफौ ऊरू यस्याः इति विग्रहे समासे शफोरु इत्यस्मात् ''संहितशफलक्षणवामादेश्च'' इति ऊङि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च शफोरूः इति रूपं सिद्धम्।

**वामोरूः**- वामौ ऊरू यस्याः इति बहुव्रीहौ समासे वामोरू इत्यस्मात् स्त्रीत्वे ''संहित शफलक्षणवामादेश्च'' इति ऊङि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च वामोरूः इति रूपं भवति।

**वा. सहितसहाभ्यां चेति वक्तव्यम् ( वा. २५०३ )**

**वार्तिकार्थः**- सहितसहाभ्यां शब्दाभ्यां परस्य ऊरूशब्दात् ऊङ् स्यात् स्त्रीत्वे।

**रूपलेखनप्रकारः-**

**सहितोरूः**- सहितौ = हितयुक्तौ ऊरू यस्याः इति बहुव्रीहौ समासे प्रातिपदिकत्वात् सुब्लुकि सहितोरु इत्यस्मात् ''सहितसहाभ्यां चेति वक्तव्यम्'' इति वार्तिकेन ऊङि अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सस्य रुत्वे विसर्गे च सहितोरूः इति रूपं सिद्धम्।

**सहोरूः**- सहौ-सहनशीलौ ऊरू यस्याः इति बहुव्रीहौ सहितसहाभ्यां चेति वक्तव्यम् इति ऊङि अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सस्य रुत्वे विसर्गे च सहोरुः इति रूपं सिद्धम्।

## ५२६ सञ्ज्ञायाम् ४/१/७२

**कद्रुकमण्डल्वोः सञ्ज्ञायां स्त्रियामूङ स्यात्।**

**कद्रूः। कमण्डलूः। सञ्ज्ञायाम् किम्? कद्रुः। कमण्डलुः। अच्छन्दोऽर्थं वचनम्।**

**सूत्रप्रकारः-** विधिसूत्रमिदम्।

**पदच्छेदः-** संज्ञायाम्।

**अनुवृत्तिः-** ''ऊङुतः'' इति सूत्रात् ऊङनुवर्तते। ''कद्रुकमण्डल्वोश्छन्दसि'' इति सूत्रात् कद्रुकमण्डल्वोः इत्यनुवर्तते। प्रातिपदिकात्, अनुपसर्जनात्, स्त्रियाम् इत्यस्य चाधिकारः।

**सूत्रार्थः-** कद्रुकमण्डलुभ्यां प्रातिपदिकाभ्यामनुपसर्जनाभ्यां स्त्रियाम् ऊङ् प्रत्ययः स्यात्।

**रूपलेखनप्रकारः-**

**कद्रूः**- कद्रु शब्दात् (विनतापुत्र्यां) ''संज्ञायाम्'' इति सूत्रेण स्त्रीत्वे ऊङि प्रत्यये अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सस्य रुत्वविसर्गो कद्रूः इति रूपं सिद्धम्।

**कमण्डलूः**- कमण्डलु शब्दात् स्त्रीत्वे (मृगविशेषसंज्ञायाम्) - ''संज्ञायाम्'' इति सूत्रेण ऊङ् प्रत्यये सवर्णदीर्घे सुप्रत्यये सस्य रुत्वविसर्गौ कमण्डलूः इति रूपं भवति।

**प्रत्युदाहरणम्** - संज्ञायाम् किम्? कद्रुः, कमण्डलुः।

अस्मिन् सूत्रे संज्ञायामिति पदाभावे अनामकरणे कद्रुः, कमण्डलुः इत्यत्रापि ऊङः प्राप्तिर्भवति। तद्वारणार्थमिदं पदम्।

**विशेषः**- अच्छन्दसोऽर्थं वचनम्- लौकिकप्रयोगे ऊङ्विधानार्थमिदं सूत्रम्।

## ५२७ शार्ङ्गरवाद्यञो ङीन् ४/१/७३

**शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्।**

**शार्ङ्गरवी। बैदी। 'जातेः' इत्यनुवृत्तेः पुंयोगे ङीषेव।**

**'नृनरयोर्वृद्धिश्च' ( ग. ५४ ) इति गणसूत्रम्। नारी।**

**सूत्रप्रकारः-** विधिसूत्रमिदम्।

**पदच्छेदः-** शार्ङ्गरवाद्यञः, ङीन्।

**अनुवृत्तिः-** अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् इत्यस्याधिकारः। ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रात् 'जातेः' इत्यनुवर्तते। 'अजाद्यतष्टाप्' इति 'अतः' अनुवर्तते।

**सूत्रार्थः-** शार्ङ्गरवादेः जातिवाचकात् अञोऽकारान्तात् अनुपसर्जनात् प्रातिपदिकात् स्त्रियां ङीन् स्यात्।

**व्याख्या -** शार्ङ्गरवादि इति लुप्तपञ्चम्यन्तं पदम्। अञः इति षष्ठ्यन्तम्। अतः इति पदम् अञः इत्यनेनान्वितो भवति। अतः इति जातेः इत्यस्य विशेषणम्, विशेषणात् तदन्तविधिः।

**रूपलेखनप्रकारः-**

**शार्ङ्गरवी-** शृङ्गरोः (मुनेः) अपत्यं स्त्रीत्यर्थे अणि आदिवृद्धौ ओर्गुणेऽवादेशे शार्ङ्गरव इत्यस्मात् जातिवाचकात् (गोत्रं च चरणैः सह) ''जातेरस्त्रीविषयादयोपधात्'' इति प्राप्तंङीषं प्रबाध्य ''शार्ङ्गरवाद्यञो ङीन्'' इति ङीन् प्रत्यये अनुबन्धलोपे भत्वादलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे शार्ङ्गरवी इति रूपं सिद्ध्यति।

पुंयोगे शार्ङ्गरवस्य स्त्रीत्यर्थे ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण ङीषि इत्येव भवति। अत्र स्वरे भेदो दृश्यते।

**बैदी-** बिदस्य गोत्रापत्यं स्त्रीत्यर्थे ''अनृष्यानन्तर्ये बिदादिभ्योऽञ्'' इति अञि ''तद्धितेष्वचामादेः'' इति आदिवृद्धौ बैद इत्यस्मात् जातिवाचकात् ''जातेरस्त्रीविषयादयोपधात्'' इति ङीषि प्राप्ते तं प्रबाध्य ''शार्ङ्गरवाद्यञो ङीन्'' इति ङीनि अनुबन्धलोपे भत्वाद् अलोपे स्वादिकार्ये च कृते बैदी इति रूपं सिद्धम्।

**विशेषः-** ङीनि नस्येत्सञ्ज्ञायाम् ''ञ्नित्यादिर्नित्यम्'' इत्याद्युदात्तः।

**नृनरयोर्वृद्धिश्च ( गण-५४ )**

**गणसूत्रार्थः-** नृनरयोः शब्दयोः ङीन् स्यात् स्त्रीत्वे वृद्धिश्च।

**रूपलेखनप्रकारः-**

**नारी -** नृ शब्दात् नरशब्दात् च ''नृनरयोर्वृद्धिश्च'' इति गणसूत्रेण ङीनि ऋकारस्य वृद्धौ आकारे रपरत्वे च कृते नार् ई इति। नर शब्दे ङीनि नकारोत्तरस्य अकारस्य वृद्धौ नार ई इति जाते भत्वादलोपे नार्+ई नारी इति जाते सुप्रत्यये सोर्हल्ङ्यादिलोपे नारी इति रूपं सिद्धम्।

### ५२८यङश्चाप् ४/१/७४

**यङन्तात् स्त्रियां चाप् स्यात्।**

**यङिति ञ्यङ्ष्यङोः सामान्यग्रहणम्। आम्बष्ठ्या। कारीषगन्ध्या।**

**'षाद्यञश्चाब्वाच्यः' ( वा. २५०५ )। शार्कराक्ष्या। पौतिमाष्या।**

**सूत्रप्रकारः-** विधिसूत्रमिदम्।

**पदच्छेदः-** यङः, चाप्।

**अनुवृत्तिः-** स्त्रियाम्, अनुपसर्जनात्, प्रातिपदिकात् इत्यस्य चाधिकारः।

**सूत्रार्थः-** यङन्तात् प्रातिपदिकात् स्त्रियां चाप् स्यात्।

**व्याख्या -** यङ् इति ञ्यङ् प्रत्ययस्य, ष्यङ्प्रत्ययस्य च सामान्यग्रहणं भवति। ''प्रत्ययग्रहणे तदन्ताः ग्राह्याः'' इति नियमात् यङः इति यङन्तात् इत्यर्थो भवति। 'चाप' इत्यस्मिन् पकारः ''हल्ङ्याप्.'' इति सूत्रे आब्ग्रहणार्थः। चकारः 'चितः' इति अन्तोदात्तार्थः।

रूपलेखनप्रकारः-

**आम्बष्ठ्या** - 'अम्बष्ठस्य अपत्यं स्त्री' इत्यर्थे ''वृद्धेत् कोसलाजादाञ्ञ्यङ् गोत्रे'' इति ञ्यङ् प्रत्यये ''तद्धितष्वचामादेः'' इति आदिवृद्धौ भत्वादलोपे आम्बष्ठ्य इत्यस्मात् प्रातिपदिकात् स्त्रीत्वे ''यङश्चाप्'' इति चापि अनुबन्धलोपे सवर्णदीर्घे स्वादिकार्ये च आम्बष्ठ्या इति रूपं सिद्ध्यति।

**कारीषगन्ध्या** - करीषस्येवगन्धो यस्य सः - करीषगन्ध इत्यत्र ''उपमानाच्च'' इति इकारान्तादेशे करीषगन्धि इति जाते करीषगन्धेरपत्यं स्त्रीत्यर्थे अणि ''अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे'' इति अणो ष्यङादेशे भत्वादिकारस्यलोपे आदिवृद्धौ कारीषगन्ध्य इत्यस्मात् ''यङश्चाप्'' इति चापि अनुबन्धलोपे ''अकः सवर्णे दीर्घः'' इति सवर्णदीर्घे सुप्रत्यये सोर्हल्ङ्यादिलोपे कारीषगन्ध्या इति रूपं सिद्धम्।

**षाद्यञश्चाब्वाच्यः ( वा. २५०५ )**

**वार्तिकार्थः**:- षकारात् परस्य यङन्तात् चाप् स्यात्।

रूपलेखनप्रकारः-

**शार्कराक्ष्या**- शर्कराक्षस्यापत्यं स्त्रीत्यर्थे ''गर्गादिभ्यो यञ्'' इति यञि तद्धितष्वचामादेः ''इति आदिवृद्धौ'' ''यचि भम्'' इति भत्वादलोपे शार्कराक्ष्य इत्यस्मात् ''यञश्च'' इति प्राप्तं ङीपं प्रबाध्य ''षाद्यञश्चाब्वाच्यः'' इति चाप्प्रत्ययेऽनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सोर्हल्ङ्यादिलोपे शार्कराक्ष्या इति रूपं सिद्ध्यति।

**पौतिमाष्या**- पूतिमाषस्यापत्यं स्त्रीत्यर्थे ''गगादिभ्यो. यञि आदिवृद्धौ भत्वादलोपे पौतिमाष्य इत्यस्मात् ''यञश्च'' इति प्राप्तं ङीपं प्रबाध्य ''षाद् यञश्चाब्वाच्यः'' इति चापि अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सोर्हल्ङ्यादिलोपे पौतिमाष्या इति रूपं सिद्धम्।

### ५२९ आवट्याच्च ४/१/७५

**अस्माच्चाप् स्यात्। 'यञश्च' ( सू. ४७१ ) इति ङीपोऽपवादः।**

**अवटशब्दो गर्गादिः, आवट्या।**

सूत्रप्रकारः- विधिसूत्रमिदम्।

पदच्छेदः- आवट्यात्, च।

अनुवृत्तिः- चकार सामर्थ्यात् ''यङश्चाप्'' इत्यतः चाबनुवर्तते।

सूत्रार्थः- आवट्य शब्दात् स्त्रीत्वे चाप् स्यात्।

रूपलेखनप्रकारः-

**आवट्या** - अवटस्यापत्यं स्त्रीत्यर्थे ''गर्गादिभ्यो यञ्'' इति यञि ''तद्धितेष्वचामादेः'' इति आदिवृद्धौ भत्वादलोपे आवट्य इत्यस्मात् ''यञश्च'' इति प्राप्तं ङीपं प्रबाध्य ''आवट्याच्च'' इति चापि अनुबन्धलोपे सवर्णदीर्घे सुप्रत्यये सोर्हल्ङ्यादिलोपे आवट्या इति रूपं सिद्धयति।

### ५३० तद्धिताः ४/१/७६

**आपञ्चमसमाप्तेरधिकारोऽम्।**

सूत्रप्रकारः- अधिकारसूत्रमिदम्।

सूत्रार्थः- पञ्चमाध्यायपर्यन्तमस्य सूत्रस्याधिकारः। ''तद्धिताः'' इति सूत्रतः पञ्चमाध्यायपर्यन्तविधीयमानाः प्रत्ययाः तद्धितसञ्ज्ञका स्युः।

### ५३१ यूनस्तिः ४/१/७७

**युवन्शब्दात् ति-प्रत्ययः स्यात्, स च तद्धितः।**

**लिङ्गविशिष्टपरिभाषया सिद्धे तद्धिताधिकार उत्तरार्थः। युवतिः।**

**अनुपसर्जनादित्येव बहवो युवानो यस्यां सा बहुयुवा।**
**युवतीति तु यौतेः शत्रन्तन्ङीपि बोध्यम्।**

**सूत्रप्रकारः-** विधिसूत्रमिदम्।

**पदच्छेदः-** यूनः, तिः।

**अनुवृत्तिः-** तद्धिताः इत्यस्याधिकारः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् इत्यस्य चाप्यधिकारः।

**सूत्रार्थः-** अनुपसर्जनात् युवन् शब्दात् स्त्रियां ति प्रत्ययः स्यात् स च तद्धितः।

**व्याख्या -** युवन् शब्दस्य पञ्चम्येकवचने यूनः इति। तद्धिताः इत्यधिकारः एकवचने विपरिणमते। 'ऋन्नेभ्यो ङीप्' इत्यस्यापवादरूपम्। तद्धिताधिकारः उत्तरसूत्रार्थः वर्तते।

**रूपलेखनप्रकारः-**

**युवतिः-** युवन् शब्दात् स्त्रीत्वविवक्षायां "यूनस्तिः" इति सूत्रेण तद्धितसंज्ञक 'ति' प्रत्यये युवन्+ति इति जाते 'स्वादिष्वसर्वनामस्थाने' इति युवन् इत्यस्य पदसंज्ञायां "नलोपः प्रातिपदिकान्तस्य" इति नकारस्यलोपे युवति इत्यस्य कृत्तद्धितसमासाश्च इति प्रातिपदिकसञ्ज्ञायाम् सुप्रत्यये सस्य रुत्वे विसर्गे च युवतिः इति रूपं सिद्ध्यति।

**अनुपसर्जनादित्येव** - अनुपसर्जनात् इत्यधिकारत्वात् अनुपसर्जन युवन् शब्दादेव ति प्रत्ययो भवति।

**बहुयुवा** - बहवो युवानो यस्यां नगर्यामित्यर्थे बहुव्रीहौ बहुयुवन् शब्दात् "ऋन्नेभ्योङीप्" इति प्राप्तस्य ङीपः "अनोबहुव्रीहेः" इति निषेधे डाबुभाभ्यामन्यतरस्यामिति डापि प्रत्यये डित्वात् टिलोपे सुप्रत्यये सोर्हल्ङ्यादिलोपे बहुयुवा इति रूपं सिद्धम्।

युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यम् -

**युवति** - यु मिश्रणे धातोः "वर्तमाने लट्" इति लटि लटः स्थाने शतृप्रत्यये सार्वधातुकत्वात् शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि यु अत् इति जाते "अचिश्नुधातुभ्रुवाम्." इति उवङि अनु.लोपे युवत् इत्यस्य कृत्तद्धितसमासाश्च इति प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां च "उगितश्च" इति ङीपि स्वादिकार्ये च युवती इति रूपं सिद्धम्।

अथवा यु धातोः औणदिके कतु प्रत्यये कित्वात् क्ङिति च इति गुणाभावे 'अचि श्नुधातु.' इति उवङि 'उगितश्च' इति ङीपि स्वादिकार्ये च युवती इति भवति।

**।। इति वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययप्रकरणं समाप्तम्।।**

## स्त्रीप्रत्ययप्रकरणे प्रश्नाः

**(क) वस्तुनिष्ठप्रश्नाः -**

(१) 'भवती' इत्यत्र ङीप् प्रत्ययः केन सूत्रेण भवति?

(क) वयसि प्रथमे (ख) उगितश्च
(ग) ऋन्नेभ्योङीप् (घ) टिड्ढाणञ्.

(२) द्विपदा ऋक् इत्यत्र प्रत्ययः वर्तते -

(क) चाप् (ख) डाप् (ग) टाप् (घ) ङीप्

(३) जानपद शब्दात् वृत्त्यर्थे प्रत्ययो भवति -

(क) ङीप् (ख) ङीष् (ग) ङीन् (घ) टाप्

(४) सारङ्गी इत्यत्र कः प्रत्ययः वर्तते?

(क) ङीन् (ख) टाप् (ग) ङीष् (घ) ङीप्

**(ख) अतिलघूत्तरात्मक प्रश्नाः -**

(१) सूर्यस्य स्त्री देवता इति विग्रहे स्त्रीप्रत्यये किं रूपं भवति?

(२) आचार्यस्य स्त्री इति विग्रहे स्त्रीप्रत्यये किं रूपं भवति?

(३) सुज्ञानेत्यत्र ङीष् प्रत्ययो कथं न भवति?

(४) वामोरुः इत्यत्र कः प्रत्ययः भवति?

(५) शार्कराक्ष्या इत्यत्र कः प्रत्ययः भवति?

**(ग) लघूत्तरात्मक प्रश्नाः -**

(१) किं स्त्रीत्वम्? तच्च व्याख्यायत।

(२) 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' इति सूत्रं व्याख्यायत।

(३) 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रं व्याख्यायत।

(४) 'वयसि प्रथमे' इति सूत्रं व्याख्यायत।

(५) स्वाङ्गं कतिविधम्? व्याख्यायत।

(६) 'वोतो गुणवचनात्' इति सूत्रं व्याख्यायत।

(७) 'अजाद्यतष्टाप्' इति सूत्रं व्याख्यायत।

(८) पुंयोगादाख्यायाम् इति सूत्रं व्याख्यायत।

**(घ) निबन्धात्मकप्रश्नाः -**

(१) निम्नलिखितप्रयोगाः साधनीयाः।
अजा, सम्फला, कुमारी, कौरव्यायणी, तटी, गार्गी, अरण्यानी, चन्द्रमुखी, दित्यौही, मत्सी, सहोरुः, आम्बष्ठ्या, मृद्वी, नारी, कुण्डेघ्नी।

**(ङ) पंक्ति-विवेचनम् -**

(१) अजादिभिः स्त्रीत्वस्य विशेषणान्नेह-पञ्चाजी।

(२) मामकग्रहणं नियमार्थम्, अण्णन्तत्वादेव सिद्धेः। तेन लोकेऽसंज्ञायां च मासिका।

(३) 'मातरि षिच्च' इति षित्वादेव सिद्धे गौरादिषु मातामही शब्दपाठात् अनित्यः षितां ङीष्। द्रष्ट्रा।

## अथ कारकप्रकरणम्

## ( विभक्त्यर्थाः )

**अथ विभक्त्यर्थाः इति** – 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य 'स्वौजसमौट्.' इत्यादिसूत्रेण ङ्यन्तेभ्यः आबन्तेभ्यः प्रातिपदिकेभ्यश्च सुबन्तप्रकरणे षड्लिङ्गेषु स्वादिप्रत्ययाः (प्रथमाविभक्तेरारभ्य सप्तमीं यावत्) पूर्वमुक्ताः। तासां विभक्तीनां विशिष्टार्थप्रतिपादनाय विभक्त्यर्थप्रकरणं प्रारभ्यते। कारकाधिकारात् इदमेव कारकप्रकरणमप्युच्यते।

### कारकम्

### ( क्रियाजनकत्वं कारकत्वम् )

क्रियां करोति निवर्तयतीति कारकम्, क्रियान्वयित्वं कारकत्वं वा अर्थात् यस्य क्रियया सह अन्वयः (सम्बन्धः) स्यात् तत् कारकमित्युच्यते। यथा –

१. बालकः पठति। अत्र बालकः पठनक्रियायाम् अन्वेति। अतः बालकः कारकम्। तच्च 'स्वतन्त्रः कर्ता' इति सूत्रेण नाम्ना कर्तृकारकम् इत्यभिधीयते।

२. पुस्तकं पठति। अत्र पुस्तकं पठनक्रियायाम् अन्वेति। अतः पुस्तकं कारकम्। तच्च ''कर्तुरीप्सिततमं कर्म'' इति सूत्रेण नाम्ना कर्मकारकम् इत्यभिधीयते।

३. कलमेन लिखति। अत्र कलमः लेखनक्रियायाम् अन्वेति। अतः कलमः कारकम्। तच्च ''साधकतमं करणम्'' इति सूत्रेण नाम्ना करणकारकम् इत्यभिधीयते।

४. भिक्षुकाय भिक्षां ददाति। अत्र भिक्षुकः दानक्रियायाम् अन्वेति। अतः भिक्षुकः कारकम्। तच्च ''कर्मणा यमभिप्रैति स सम्प्रदानम्'' इति सूत्रेण नाम्ना सम्प्रदानकारकम् इत्यभिधीयते।

५. अश्वात् पतति।अत्र अश्वः पतनक्रियायाम् अन्वेति। अतः अश्वः कारकम्। तच्च ''ध्रुवमपायेऽपादानम्'' इति सूत्रेण नाम्ना अपादानकारकम् इत्यभिधीयते।

६. कटे उपविशति। अत्र कटः उपवेशनक्रियायाम् अन्वेति। अतः कटः कारकम्। तच्च ''आधारोऽधिकरणम्'' इति सूत्रेण नाम्ना अधिकरणकारकम् इत्यभिधीयते।

यद्यपि साक्षात् क्रियायामन्वयस्तु कर्तृकारकस्यैव भवति, अन्यानि कारकाणि तु सहायकानि एव भवन्ति परं केनापि प्रकारेण क्रियया सह अन्वयात् कारकत्वं भवति। अत एव उक्तम् –

**निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।**
**षोढा कर्तृत्वमेवाहुस्तत् प्रवृत्तेर्निबन्धनम्।।**
**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**

वस्तुतः क्रियायाः निष्पत्त्यर्थं प्रयुक्ता एषा द्रव्यशक्तिः वर्तते। तस्या एव अपरं नाम कारकम्। सा शक्तिः मूलरूपेण 'कर्तृत्वशक्तिः' वर्तते। सा एव अवान्तरव्यापारविवक्षया करणसम्प्रदानादिनामभिः षोढा। अत्रापि कर्तुः प्राधान्यं, करणसम्प्रदानादीनां प्रवृत्तिनिवृत्ती तदधीना भवति।

विभक्तिषु सम्बन्धे कारकत्वं नास्ति क्रियया सहअन्वयाभावात्। यथा – 'देवदत्तस्य पुत्रः गां आनयति' वाक्येऽस्मिन् '**देदत्तस्य**' इति षष्ठ्यन्तपदस्य 'आनयति' इति क्रियापदेन सह साक्षात् अन्वयः (सम्बन्धः) नास्ति। अतः '**देवदत्तस्य**' पदेऽस्मिन् कारकत्वं नास्ति।

एवं कर्ताकर्मकरणादीनां नामभिः विभक्तयः एव प्रयुक्ताः भवन्ति तथा च विभक्तिभिः कारकार्थाः अभिव्यक्ताः भवन्ति। अत एव अस्य प्रकरणस्य नाम कारकप्रकरणम्। अत्र विभक्तिषु आदौ प्रथमाविधायकं सूत्रमत्र प्रस्तूयते।

## ५३२ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।। २/३/४६

**नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम् । अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य । तटः, तटी, तटम् । परिमाणमात्रे द्रोणो व्रीहिः । द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः । प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः । वचनं संख्या । एकः । द्वौ । बहवः । इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम् ।**

**पदच्छेदः** – प्रातिपदिकार्थ–लिङ्ग–परिमाण–वचनमात्रे, प्रथमा । विधिसूत्रम् ।

**सूत्रार्थः** – यस्मिन् प्रातिपदिके उच्चारिते सति यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः । यथा – 'घटः' इत्यस्योच्चारणेन सह कम्बुग्रीवादिमत्वरूपस्यार्थस्योपस्थितिरेव 'घट' शब्दस्यार्थः । अत एव घट शब्दात् प्रथमा भवति, परिणामतया केनापि शब्देन सह विभक्तिसंयोजनात् प्राक् तस्मिन् शब्दे अर्थप्रकाशनस्य योग्यता अनिवार्यैव ।

अवधारणार्थकमात्रशब्दः प्रातिपदिकार्थ लिङ्गपरिमाणवचनैः सह प्रत्येकं सम्बध्यते । अत एव प्रातिपदिकार्थमात्रे, लिङ्गमात्राधिक्ये, परिमाणमात्रे, संख्यामात्रे च प्रथमा स्यादित्यर्थो लभ्यते ।

**प्रातिपदिकार्थमात्रस्योदाहरणानि** –

(अ) अलिङ्गाः शब्दाः (अव्ययाः)
उच्चैः । नीचैः ।

(ब) नियतलिङ्गाः शब्दाः
कृष्णः (पु.) श्रीः (स्त्री.) ज्ञानम् (नपु.)

**लिङ्गमात्राधिक्यस्योदाहरणनि** –

तटः – तटी – तटम् (अनियतलिङ्गाः शब्दाः)
(पु.) (स्त्री.) (नपु.)

**परिमाणमात्रस्योदाहरणम्** – द्रोणो व्रीहिः

**सङ्ख्यामात्रस्योदाहरणानि** – एकः । द्वौ । बहवः ।

**ध्यातव्यः** – 'लिङ्गमात्राद्याधिक्ये' इति पाठेनैव परिमाणमात्रस्यापि ग्रहणं क्रियते, अतः पृथक् रूपेण सूत्रस्य वृत्तौ परिमाणमात्रस्य पाठो न विहितः ।

**व्याख्या** – (१) **प्रातिपदिकार्थः** – पदं पदमिति प्रतिपदम् प्रतिपदे भवं प्रातिपदिकम्, प्रातिपदिकस्य अर्थः = प्रातिपदिकार्थः (ष. त. स.) । यावत् शब्देन सह सुप् अथवा तिङ् विभक्तीनां संयोजनं न भवति तावत् शब्दे पदत्वं नायाति । अतः '**अपदं न प्रयुञ्जीत**' इति नियमेन 'सुप्तिङन्तं पदम्' सूत्रमिदमनुसृत्य पदत्वं विधीयते । अत एव प्रातिपदिकस्यार्थं विवेचयन् भट्टोजिदीक्षितेनोक्तम् "**नियतोपस्थितिकः प्रातिपदिकार्थः**" इति । अतः 'कृष्णः' इत्यत्र कृष्णपदोत्तर सु प्रत्ययः कृष्णपदस्य नियतार्थमेव प्रकटयति ।

(२) **मात्रशब्दस्य योगः** – प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च = प्रातिपदिकार्थलिङ्गपरिमाणवचनानि (इतरेतरद्वन्द्वः) प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाण वचनमात्रे । "द्वन्द्वान्ते द्वन्द्वादौ च श्रूयमाणं पदं प्रत्येकमभिसम्बद्धयते" इति नियमेन मात्रशब्दस्य प्रत्येकं योगः ।

(३) **लिङ्गमात्राधिक्ये** – केवलानां लिङ्गादीनां कुत्रापि उपस्थितेरभावात् लिङ्गविशिष्टप्रातिपदिकार्थस्यैव ग्रहणं भवति । यथा – 'बालकः गच्छति' इत्यत्र बालकशब्दः पुंस्त्वविशिष्टं बालकरूपप्रातिपदिकार्थम्, 'बालिका गच्छति'

इत्यत्र बालिकाशब्द: स्त्रीत्वविशिष्टं प्रातिपदिकार्थम्, 'फलं पतति' इत्यत्र फलशब्द: नपुंसकत्वविशिष्टं प्रातिपदिकार्थञ्च बोधयति। अत: प्रातिपदिकार्थे एव लिङ्गस्यापि ग्रहणं स्वत एव पुन: पृथक्रूपेण लिङ्गमात्रे प्रथमाया: विधानं किमर्थम्?

अत्र समाधानं प्रस्तूयते यत् केचन शब्दा: त्रिलिङ्गय: अपि भवन्ति, अत: यथा तटशब्दस्योच्चारणे तटरूपप्रातिपदिकार्थस्य प्रतीतिस्तु नियतरूपेण भवति परं तेन सह कस्यापि नियतलिङ्गस्य प्रतीति: न भवति। अत: लिङ्गस्याधिकप्रतीतये पुन: प्रथमाया: विधानं क्रियते। अत्र लिङ्गमात्रस्य ग्रहणं प्रातिपदिकार्थादपि अतिरिक्ततया लिङ्गमात्रस्याधिक्याय। तत्र अनियतलिङ्गा: – तट:, तटी, तटम्। इत्यादय: शब्दा उदाहरणानि भवन्ति।

**परिमाणमात्रे** – परिमाणमात्रे प्रथमा स्यात्। द्रोणो व्रीहि:। अत्र द्रोणशब्द: परिमाणविशेषवाचक:, व्रीहिश्च धान्यविशेषवाचक:। द्रोणशब्दात् सु प्रत्ययस्यार्थो वर्तते सामान्यपरिमाण:, द्रोणस्यार्थो वर्तते विशेषपरिमाण:। 'सामान्यविशेषयोरमेदान्वय:' इति नियमात् सामान्यपरिमाणे द्रोणरूपार्थपरिमाण: अभेदसम्बन्धेन विशेषणं वर्तते। एवं द्रोणोत्तर सु प्रत्ययार्थ: सामान्यपरिमाण: परिच्छेद्य परिच्छेदक (माप्यमापक) भावेन व्रीहौ विशेषणं भवति। एवं द्रोणो व्रीहि: इत्यस्यार्थो लभ्यते द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहि:।

**वचनमात्रे** – वचनं सङ्ख्या। इह वचनशब्दस्यार्थो वर्तते सङ्ख्या। एक:। द्वौ। बहव:। इत्यत्र एकशब्देन एकत्वस्य, द्विशब्देन द्वित्वस्य, बहुशब्देन बहुत्वस्य उक्तार्थत्वात् प्रथमा अलभ्या भवति। अत्र हि नियामक: ''**उक्तार्थानामप्रयोग:**'' इति। अत: प्रथमाया: विधानार्थं वचनग्रहणं कृतम्।

**रूपलेखनप्रकार: – प्रातिपदिकार्थमात्रे –**

**उच्चै:**– इत्यत्र उच्चैस् शब्दात् ''स्वरादिनिपातमव्ययम्'' इति सूत्रेण अव्ययसंज्ञायां अलिङ्गत्वात् ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमा विधानं क्रियते। 'स्वौजस्.' इत्यादिना सु विभक्तौ ''अव्ययादाप्सुप:'' इति सुलोपे कृते, सस्य रूत्वे विसर्गे च उच्चै: इति रूपं सिद्धम्। एवमेव नीचै:, प्रातर्, दिवा, रात्रौ, शनै: इत्यादय: सिद्धा: भवन्ति।

**कृष्ण:** – अत्र कृष्ण शब्दात् नियतलिङ्गत्वात् ''प्रातिपदिकार्थलिङ्ग–'' इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमाविभक्तौ सु प्रत्यये उकारेत्संज्ञायां लोपे च कृते सस्य रूत्वे विसर्गे च कृष्ण: इति सिद्धम्।

**श्री:** – अत्र श्रिञ् धातो: क्विपि प्रत्यये सर्वापहारेलोप 'क्विप् च' इति सूत्रेण दीर्घे ईकारान्तत्वात् स्त्रीलिङ्गे ''प्रातिपदिकार्थ॰'' इति सूत्रेण प्रथमायां सु विभक्तौ श्री: इति सिद्धम्।

**ज्ञानम्** – अत्र ज्ञान शब्दात् 'प्रातिपदिकार्थ.' इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमाविभक्ति: भवति। तदनुरोधात् एकवचने सु प्रत्यये नपुंसकत्वविशिष्टे 'अतोऽम्' इत्यनेन अमादेशे कृते 'अमिपूर्व:' इति पूर्वरूपे कृते ज्ञानम् इति जायते।

**रूपलेखनप्रकार: – लिङ्गमात्राधिक्ये –**

**तट:, तटी, तटम्** – इत्यत्र अनियतलिङ्गत्वात् कस्यापि एकस्य नियतलिङ्गस्योपस्थित्यभावात् लिङ्गमात्राधिक्येऽर्थे प्रातिपदिकार्थलिङ्ग – इति सूत्रेण प्रथमाविभक्ति: भवति।

**तट:** – प्रथमायां सु विभक्तौ कृष्णशब्दवत् सिद्धि: भवति।

**तटी** – प्रथमायां सु विभक्तौ उकारेत्संज्ञायां लोपे च कृते अपृक्तसस्य 'हलङ्ब्योदीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रेण स् लोपे कृते तटी इति सिद्धम्।

**तटम्** – प्रथमायां सु विभक्तौ नपुंसकत्वविशिष्टे सिद्धि: भवति।

**रूपलेखनप्रकार: – परिमाणमात्रे –**

**द्रोणो व्रीहि:** – अत्र द्रोणशब्दात् परिमाणसमान्येऽर्थे 'प्रातिपदकार्थ–' इति सूत्रेण प्रथमाविभक्ति: भवति द्रोण: इति जायते। अत्र प्रत्ययार्थस्य परिमाणस्य द्रोणप्रकृत्यर्थ: परिमाण: अभेदसम्बन्धेन विशेषणं भवति। प्रत्ययार्थ: परिच्छेद्य

परिच्छेदकभावेन व्रीहौ विशेषणं भवति। द्रोणो व्रीहिरिति जायते। व्रीहिरपि प्रथमाया: एकवचनान्तं रूपम्।

**रूपलेखनप्रकार: – संख्यामात्रे –**

**एक:, द्वौ, बहव:** – इत्यत्र संख्यामात्रेऽर्थे 'प्रातिपदिकार्थलिङ्ग–' इति सूत्रेण प्रथमा विभक्ति: भवति।

**एक:** – एक शब्दात् प्रथमाया: एकवचने सु विभक्तौ कृष्णशब्दवत् सिद्धि: भवति। (एकसंख्याक: इत्यर्थ:)

**द्वौ** – अत्र द्वि शब्दात् प्रथमाया: द्विवचने औ विभक्तौ 'त्यदादीनाम:' इति सूत्रेण अत्वे कृते 'अतो गुणे' इति पररूपे कृते द्व+औ इत्यावस्थायां 'वृद्धिरेचि' इत्यनेन वृद्धौ कृते द्वौ इति सिद्धम्। (द्विसंख्याकौ इत्यर्थ:)

**बहव:** – बहु शब्दात् प्रथमाया: बहुवचने जस् विभक्तौ अनुबन्धलोपे च कृते बहु+अस् इति स्थिते 'जसिच' इत्यनेन गुणे कृते 'एचोऽयवायाव:' इत्यनेन अवादेशे सस्य रूत्वे विसर्गे च बहव: इति सिद्धम्। (बहुसंख्याका: इत्यर्थ:)

## ५३३ सम्बोधने च २/३/४७

**इह प्रथमा स्यात्। हे राम!**

**पदच्छेद:** – सम्बोधने, च

**सूत्रप्रकार:** – विधिसूत्रम्।

**सूत्रार्थ:** – सम्बोधने अधिकेऽर्थे गम्यमाने प्रथमा स्यात्।

**सम्बोधनम्** – सम्यक् बोधनम् इति सम्बोधनम्। सम्बोधनं नाम अभिमुखीकरणम् अर्थात् अभिमुखीकृत्य ज्ञापनमिति। यथा – हे राम। इत्यत्र मां पाहि इति अध्याहृत्य रामं प्रति मद्रक्षणं ज्ञाप्यं भवति। इत्यत्र सु प्रत्ययस्यार्थो विद्यते सम्बोधनम्। अभिमुखीकरणरूपार्थस्य आधिक्यात् प्रातिपदिकार्थमात्रे प्रथमा अलभ्या अत: सम्बोधने अधिके अर्थे प्रथमाविधानार्थं सूत्रस्य प्रणयनं विहितम्।

**रूपलेखनप्रकार: –**

**हे राम!** अत्र राम शब्दात् प्रातिपदिकसंज्ञायां सम्बोधने विवक्षिते 'सम्बोधने च' इति सूत्रेण सम्बोधनेऽर्थे प्रथमा विभक्ति: भवति। तदनुसारेण एकवचने सु प्रत्यये हे राम! इति सिद्धम् भवति।

**।। इति प्रथमा ।।**

## अथ द्वितीयाविभक्ति:

**कारके १/४/२३ – इत्यधिकृत्य।**

**सूत्रार्थ:** – अधिकारसूत्रमिदम्।

**व्याख्या** – 'कारके' इति सप्तम्यन्तपदमस्ति। भाष्यकारेण पदमिदं प्रथमार्थे प्रयुक्तं तत्र लिखितं 'प्रथमार्थेऽत्र सप्तमी अस्ति इति। अत एव प्रथमान्तत्वेन विपरिणम्य अग्रे वक्ष्यमाणेषु सूत्रेषु अस्याधिकारो: प्रचलिष्यति। 'कारके' इति अधिकारसूत्रमस्ति, अधिकारश्च – ''स्वदेशे वाक्यार्थबोधशून्यत्वे सति परदेशे वाक्यार्थबोधकत्वम्''। एतस्मात् अपादानादि संज्ञाविधायकेषु सूत्रेषु प्रभावत्वात् कर्मकर्ताकरणादय: 'कारकम्' इति महतीसंज्ञयाभिधीयन्ते। तत्र कारकसंज्ञां विधाय अपादानादिसंज्ञा: क्रियन्ते, तथा द्वयो: संज्ञयोरेकत्र समावेशो भवति। यथा – ध्रुवमपायेऽपादानम् इत्यत्र प्रथमे तु 'ध्रुवमपाये कारकम्'। द्वितीये ''अपादानम्''। सूत्रार्थो लभ्यते अपाये सति ध्रुवं कारकसंज्ञं भवति, तच्च कारकसंज्ञम्, अपादानसंज्ञं भवति। कारकशब्दस्यार्थे – करोति क्रियां निवर्तयति इति कारकम्। अर्थात् क्रियासम्पादने यानि कारणानि भवन्ति तानि सर्वाण्येव ''कारकम्'' इति संज्ञत्वादभिधीयन्ते परं अन्यथासिद्धत्वाभावादेव। अन्यथासिद्धत्वे तु ''ब्राह्मणस्य पितरं पन्थानं पृच्छति'' इत्यत्र पृच्छक्रियाया: जनकता ब्राह्मणे नास्ति अत: पृच्छक्रियायां तस्यान्यथासिद्धत्वात् न ब्राह्मणस्य कारकत्वम्।

**कर्तुरीप्सिततमं कर्म १/४/४९ ।। कर्तु: क्रियया आप्तुमिष्टतमं कारकं कर्म संज्ञं स्यात्। कुर्तु: किम्? माषेष्वश्वं**

**बध्नाति। कर्मण ईप्सिता माषाः न तु कर्तुः। तमब्ग्रहणं किम्? पयसा ओदनं भुंक्ते। कर्म इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्।**

**पदविभागः** – कर्तुः, ईप्सिततमम्, कर्म

**सूत्रप्रकारः** – संज्ञासूत्रम्

**सूत्रार्थः** – कर्ता क्रियाद्वारा यं कमपि पदार्थं सर्वोत्कृष्टत्वेन प्राप्तुमिच्छति, तत् कारकं कर्म इति संज्ञयाभिधीयते।

**व्याख्या** – कर्तुः इति कर्तृपदस्य षष्ठ्यन्तं पदमस्ति। ईप्सिततमम्, इति प्रथमान्तपदम्। कर्म इति प्रथमान्तं पदम्। ''कारके'' इत्यस्याधिकारो वर्तते। आप्तुमिष्यत इति ईप्सितम्। अतिशयेन ईप्सितम् इति ''ईप्सिततमम्'' इत्यत्र ''अतिशायने तमनिष्ठनौ'' इत्यनेन तमप् प्रत्ययो भवति। ''क्तस्य च वर्तमाने'' इत्यनेन ''कर्तुः'' इत्यत्र षष्ठी भवति। कर्ता यं प्राप्तुं विशिष्टरूपेण इच्छति तदिप्सिततमम्। कया प्राप्तुमिच्छति? क्रियया इति। अत एव कर्ता क्रियया यं विशिष्टरूपेण इच्छति तद् भवति कर्म कारकम्। इत्यत्र कर्म तथा च कारकम् अनयोः एकवाक्यता भवति। यथा – ''कटं करोति'' इत्यत्र कर्ता करणक्रियया कट इत्यस्य कृते विशेषरूपेण उत्सुको भवति अतः कट इत्यस्य कर्मसंज्ञा भवति। ''देवदत्तः ओदनं पचति'' इत्यत्र पच् क्रियया देवदत्तः ओदनं विशिष्टतया इच्छति अत एव ओदनस्य कर्मसंज्ञा भवति।

**प्रत्युदाहरणम् – कर्तुः किम्? माषेष्वश्वं बघ्नाति** – ननु 'कर्तुरीप्सिततमं कर्म' सूत्रेऽस्मिन् 'कर्तुः' इति पदं कर्तुरेव इष्टतमस्य कर्मसंज्ञाविधानार्थं प्रयुक्तं न तु अन्यस्येष्टतमस्य। यथा – माषेष्वश्वं बध्नाति (माषस्य क्षेत्रे विचरन् अश्वं वीक्ष्य तस्य स्वामी चिन्तयन् भय वशाद् अन्यत्र बध्नाति। भयञ्च माषभक्षणेन अश्वः रूग्णः न स्यात् कदाचिदिति) अत्र बध्नाति क्रियया इष्टतमं ''अश्वः'' अस्ति न तु माषाः, माषास्तु अश्वस्य ईप्सिततमा अत एव मूले लिखितम् – ''कर्मणः ईप्सिता माषाः न तु कर्तुः। तस्मादत्र माषशब्दस्य कर्मसंज्ञा न भवति। पुनश्च ''कर्तुः'' इति पदस्याभावे सूत्रार्थो भविष्यति–कर्ताकर्मकरणादिषु कस्यापि इष्टतमस्य कर्मसंज्ञा इति। अत्रापि अश्वशब्दस्य कर्मसंज्ञाविधाने तु अनापत्तिः परं कर्मपदं ''अश्वः'' तस्येष्टतमं माषोऽस्ति, तस्यापि कर्मसंज्ञा प्राप्ता भवति तेन द्वितीयायाम् अनिष्टरूपापत्तिः भवति ''माषान् अश्वं बध्नाति'' इति, तन्न स्यात् एतदर्थं कर्तुः पदस्य सूत्रे नितान्तमावश्यकता इति।

**प्रत्युदाहरणम्** – तमप् ग्रहणं किम्? पयसा ओदनं भुङ्क्ते – ननु ''कर्तुरीप्सिततमं कर्म'' अत्र तमब्ग्रहणं ईप्सितमात्रस्य कर्मसंज्ञा वारणार्थमस्ति। यथा– पयसा ओदनं भुङ्क्ते इत्यत्र कर्ता भुज् क्रियया पयः ओदनञ्च उभयोरेव ग्रहणं करोति, उभावेव ईप्सितौ स्तः। परमत्र सः कर्ता न केवलं पयसः पानेन सन्तुष्टो भवति अपितु पयसा मिश्रितोदनस्य भक्षणेन सन्तुष्टो भवति, अतः प्राधान्यस्य ओदनस्य पयस्तु संस्कारद्रव्यमात्रमस्ति, अतः ईप्सिततमत्वात् ओदनस्येव कर्मसंज्ञा न तु पयः इत्यस्य। अतएव तमब्ग्रहणमावश्यकम्।

**पङ्क्तिविवेचनम् – कर्म इत्यनुवृत्तौ पुनः कर्मग्रहणमाधार निवृत्यर्थम् । अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्।** ननु 'कर्तुरीप्सिततमं कर्म' इत्यत्र 'अधिशीङ्स्थासां कर्म' इति सूत्रात् कर्मपदस्यानुवृत्तिलाभो स्वत एव पुनः प्रकृतसूत्रे कर्मग्रहणं किमर्थम्? एतस्य समाधाने मूले लिखितम् – ''आधारनिवृत्यर्थम्'' इति। अर्थात् पूर्वशास्त्रेण कर्मपदस्यात्र अनुवृत्तिः गृह्यते तदा कर्मपदेन सह आधारशब्दस्यापि अनुवृत्तिरायाति। अतः तन्निवारणार्थमेवात्र कर्म पदस्य ग्रहणम्। अन्यथा तु ''गेहं प्रविशति'' इत्यत्र तु कर्मसंज्ञा लब्धा भवति यतो हि प्रवेशक्रियायाः आधारः गेहमेवास्ति तच्च कर्तुः ईप्सिततमममपि। परं ''देवदत्तः ओदनं'' पचति इत्यत्र कर्तुः ईप्सिततमन्तु ओदनमस्ति परं पचन क्रियायाः आधारः ओदनं नास्ति, अतः अत्र कर्मसंज्ञा न लब्धा भवति। अत एव सार्वत्रिकलाभार्थं सूत्रे पृथक् रूपेण कर्मग्रहणं उचितमेव इति।

## ४३६ अनभिहिते २/३/१

**इत्यधिकृत्य**

न अभिहितमिति अनभिहितं, तस्मिन् अनभिहिते (नञ्तत्पुरुषसमासः)। अनभिहिते-इति सप्तम्यन्तं पदम्। अधिकारसूत्रमिदम्। अभि पूर्वकात् धा धातोः क्त प्रत्यये 'दधातेर्हिः' इति सूत्रेण 'हि' आदेशे कृते 'अभिहितम्' इत्यस्य निष्पत्तिर्जायते। द्वितीयाध्याययस्य तृतीयपादावसानपर्यन्तमस्याधिकारो वर्तते, परं तत्रापि कारकविभक्तिष्वेव न तु उपपदविभक्तिषु। ''स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थबोधकत्वम् अधिकारत्वम्। एतेन अधिकारोऽयं तत्तत्सूत्रेषु स्वप्रभावोत्पादकेन ''अनुक्तकर्मादिषु कारकेषु एव वक्ष्यमाणाः विभक्तयः भविष्यन्ति'' इत्यर्थं प्रकाशयति। अभिहितमित्यस्यार्थो भवति उक्तम्, तद्वैपरीत्ये अनुक्तं भवति अनभिहितम्। उक्तम् इत्यस्य सामान्यलक्षणमस्ति – यस्मिन् (अर्थे) प्रत्ययः, स उक्तः। यथा देवदत्तः ओदनं पचति इत्यत्र पच् धातोः लट् लकारः (तिप् प्रत्ययः) कर्त्रर्थे भवति अतः कर्ता उक्तोऽस्ति। अवशिष्टानि कर्मकरणादीनि अनुक्तानि भवन्ति। अत एव तत्तत्सूत्रैः तानि तानि अनुक्तानि कर्मकरणादीनिः अनभिहिते इत्यस्याधिकारे प्रयुक्तानि भवन्ति। यथा –

'कर्मणि द्वितीया' – अनभिहिते कर्मणि द्वितीया स्यात्।

कर्तृकरणयोस्तृतीया – अनभिहिते कर्तरि करणे च तृतीया स्यात्।

चतुर्थी सम्प्रदाने – अनभिहिते सम्प्रदाने चतुर्थी स्यात्।

अपादाने पञ्चमी – अनभिहिते अपादाने पञ्चमी स्यात्।

## ५३७ कर्मणि द्वितीया २/३/२

**अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति।**

**अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ्-हरिः सेव्यते। कृत्-लक्ष्म्या सेवितः। तद्धित-शतेन क्रीतः शत्यः। समास- प्राप्त आनन्दो यं स प्राप्तानन्दः। क्वचिन्निपातेनाभिधानम्। यथा – 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।' साम्प्रतमित्यस्य हि युज्यत इत्यर्थः।**

**पद-विभागः –** कर्मणि, द्वितीया।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** कर्मणि तत्रैव द्वितीया भवति यत्र कर्म केनापि अभिहितम् = उक्तं न स्यात्।

**व्याख्या –** कर्मणि – इति सप्तम्यन्तं पदम्, द्वितीया इति प्रथमान्तं पदम्। अनभिहिते – इत्यस्याधिकारो वर्तते। अत एव सूत्रस्यार्थो भवति अनुक्ते कर्मणि द्वितीया विभक्तिर्जायते। ''यस्मिन् प्रत्ययः स उक्तः'' इति सामान्यलक्षणेन 'हरिं भजति' इत्यत्र भज् क्रियया भक्तः हरिं प्राप्तुमिच्छति, अतः कर्तुः ईप्सिततमत्वात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण हरिशब्दस्य कर्मसंज्ञा भवति। 'हरि' इत्यस्य कर्मत्वं तिङ्कृन्तद्धितसमासादिषु केनापि नोक्तम्। 'भजति' इत्यत्र प्रयुक्तोऽयं लट् लकारः (तिप्) कर्त्रर्थे प्रयुक्तोऽस्ति अतः कर्ता एव उक्तोऽस्ति कर्म तु तत्र अनुक्तमेव तस्मादनुक्तत्वात् 'कर्मणि द्वितीया' इति सूत्रेण हरिशब्दात् द्वितीया विभक्तिः प्रयुक्ता भवति। भक्तः हरिं भजति इति वाक्ये कर्तृपदस्याध्याहारं कृत्वा प्रयोगोऽयं युज्यते।

**रूपलेखनप्रकारः – हरिं भजति** – इत्यत्र प्रातिपदिकात् हरिशब्दात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण हरिशब्दस्य कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति सूत्रेण अनुक्तत्वात् कर्मणः हरिशब्दात् द्वितीयाविभक्तौ एकवचने अम् प्रत्यये ''अमिपूर्वः'' इत्यनेन पूर्वरूपे कृते हरिं भजति इति रूपं सिद्धम्।

**विशेषः – अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः।**

**(१) तिङ्द्वाराऽभिधानम्** – 'हरिः सेव्यते' इत्यत्र ''लक्ष्म्या'' इति कर्तृपदस्याध्याहारं कृत्वा लक्ष्म्या हरिः सेव्यते इति वाक्यप्रयोगोऽवलोकनीयः। अत्र सेवनक्रियायाः कर्ता 'लक्ष्मीः' अस्ति। क्रियया कर्तुरीप्सिततममस्ति हरिः। अतः

'कर्तुरीप्सिततमं कर्म' इत्यनुसारेण 'हरिः' कर्म अस्ति। परं कर्मत्वेऽपि तिङ्द्वारा उक्तमस्ति। अतः उक्तत्वात् प्रातिपदिकार्थमात्रे प्रथमा भवति।

**हरिः सेव्यते** – इत्यत्र सेव् धातोः "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण लकारः कर्मण्यर्थे विहितः। अतः "हरिः सेव्यते" अस्य वाक्यस्य कर्म लकारेण (तिङ्द्वारा) उक्तं जातम्। "भावकर्मणोः" इति सूत्रेण आत्मनेपदविधानमपि कृतं तेन 'सेव्यते' प्रयोगोऽयं भवति। अस्मिन् वाक्ये कर्तुः अध्याहारं कृत्वा "भक्तेन हरिः सेव्यते" प्रयोगोऽयं क्रियते। अस्य वाक्यस्य कर्ता भक्तोऽस्ति। = "**यस्मिन् प्रत्ययः स उक्तः**" इति नियमेन कर्म उक्तं भवति अन्यानि अनुक्तानि भवन्ति, अत एव कर्ता अपि अनुक्तोऽभवत्। कर्तुः अनुक्तत्वात् "कर्तृकरणयोस्तृतीया" इत्यनेन तृतीया भवति 'भक्तेन' इति जायते। एवं कर्मवाच्यस्य प्रयोगोऽयमुपपन्नो भवति।

**लक्ष्म्या सेवितः (हरिः)** – इत्यत्र सेव् धातोः 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रनियमेन 'निष्ठा' इति सूत्रेण कर्मणि क्तप्रत्यये इडागमे कृते सेवितः इति सिद्धो भवति। अत्र 'लक्ष्म्या सेवितः' वाक्यस्यास्य कर्म कृत्संज्ञकेन क्तप्रत्ययेन उक्तं जातम्। अनुक्ते कर्मणि द्वितीया भवति परं कर्मणि उक्ते सति तु 'प्रातिपदिकार्थमात्रे प्रथमा एव भवति। अतः कः सेवितः? इति प्रश्नस्योत्तरे हरिः सेवितः इति प्राप्यते। समानाधिकरण्यत्वात् उभयत्रैव प्रथमा भवति। अत्रापि यस्मिन् प्रत्ययः स उक्तः इति नियमेन कर्म उक्तमस्ति तस्मात् उक्तत्वात् कर्म–अतिरिक्तं सर्वाणि अनुक्तानि सन्ति अतः कर्ता अपि अनुक्त एव तस्मात् "कर्तृकरणयोस्तृतीया" इति सूत्रेण तृतीया भवति लक्ष्म्या इति जायते। सम्पूर्ण वाक्ये लक्ष्म्या सेवितः हरिः इति सिद्धं भवति।

**तद्धितान्तेनापि कारकं उक्तं भवति- तदनुसारेण शतेन क्रीतः शत्यः** – इत्यत्र 'तेन क्रीतम्' इत्यर्थे 'शताच्च ठन्यतावशते' इति सूत्रेण तृतीयान्तशतशब्देन 'क्रीतः' इत्यर्थे यत् प्रत्ययो भवति शत्यः इति जायते। इत्यत्र '**शत्यः**', '**क्रीतः**' इति क्रियापदस्य कर्म अस्ति तथापि यत् प्रत्ययेन तस्य कर्मत्वं उक्तमस्ति। अतः कर्मण उक्तत्वात् अत्र द्वितीया न भवति अपितु प्रातिपदिकार्थमात्रे प्रथमैव जायते।

**समासेनापि कारकं उक्तं भवति** – तदनुसारेण प्राप्त आनन्दो यम् स प्राप्तानन्दो जनः इत्यत्र 'अनेकमन्यपदार्थे' इति सूत्रेण प्राप्तः, आनन्दः इत्यनयोः सुबन्तयोः अन्यपदार्थे अर्थात् द्वितीयाविभक्त्यर्थे कर्मणि बहुव्रीहिसमासो विहितः। अनेन समासेन कर्म उक्तं भवति, अतः उक्तत्वात् न द्वितीया। अपितु प्रातिपदिकार्थमात्रे प्रथमा एव भवति प्राप्तानन्दो जनः। एवमेव प्राप्तोदको ग्रामः इति भवति।

**क्वचिन्निपातेनाभिधानम्** – अर्थात् तिङ्कृत्तद्धितसमासातिरिक्तं निपातेनापि कर्म उक्तं भवति। यथा – 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' न साम्प्रतम् असाम्प्रतम्, न युज्यते इत्यर्थः। अत्र 'असाम्प्रतम्' इति निपातस्य योगात् "विषवृक्षः" यो हि वर्धनछेदनक्रिययोः कर्म अस्ति, उक्तं भवति। तस्मात् तस्मिन् द्वितीया न भवति, उक्तत्वात्। प्रातिपदिकार्थमात्रे प्रथमा एव भवति। एवमेव क्रमादमुं नारद इत्यबोधि सः इत्यत्र 'इति' इति निपातस्य प्रयोगात् बोधनक्रियायाः कर्म 'नारदः' इत्यत्र द्वितीया न भवति।

**तथायुक्तं चानीप्सितम् १/४/५०।। ईप्सिततमवत क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छंस्तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।**

**पदविभागः** – तथायुक्तम्, च, अनीप्सितम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – कर्तुः ईप्सिततमं वस्तुजातं क्रियया युक्तं भवति तथैव अनीप्सितमपि वस्तुजातं युक्तं स्यात् तदा अनीप्सितकारकस्यापि कर्मसंज्ञा भवति।

**व्याख्या** – तथायुक्तं चानीप्सितम्। तथायुक्तम् – इति प्रथमान्तपदमस्ति, 'तथा' शब्दः सादृश्यवाचकोऽस्ति। चानीप्सितम्

– इत्यत्र चकारः समुच्चयार्थकः। अनीप्सितम् – न ईप्सितमिति अनीप्सितम् (नञ् त.स.) 'कर्तुरीप्सिततमं कर्म' इति सम्पूर्णसूत्रस्यानुवृत्तिरत्र भवति। 'कारके' इत्यस्याधिकारो वर्तते। अत एव यथा कर्तुः क्रियया युक्तस्येप्सिततमस्य कारकस्य कर्मसञ्ज्ञा भवति तथैव कर्तुः क्रियया युक्तस्यानीप्सितमस्यापि कारकस्य कर्म संज्ञा भवति इत्यर्थो लभ्यते। अनीप्सितं कर्म द्विविधं भवति – द्वेष्यमुपेक्ष्यञ्च। द्वेष्योपेक्ष्यसंग्रहार्थमेवास्य सूत्रस्यावतरणमत्र कृतमस्ति।

**रूपलेखनप्रकारः –**

**उपेक्ष्यकर्मणि** – ग्रामं गच्छन् तृणं स्पृशति – अत्र कर्तुः क्रिययायुक्तमनीप्सितमस्ति 'तृणम्' एतस्य ''तथायुक्तं चानीप्सितम्'' इति सूत्रेण कर्मसंज्ञा भवति ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ अम् प्रत्यये तृणम् इति जायते। ग्रामं गच्छन् तृणं स्पृशति इति सिद्धम्।

**द्वेष्यकर्मणि** – ओदनं भुञ्जानो विषं भुङ्क्ते – इत्यत्र कर्तुः क्रिययायुक्तमनीप्सितमस्ति 'विषम्' एतस्य ''तथायुक्तं चानीप्सितम्'' इति सूत्रेण कर्मसंज्ञा भवति ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ अम् प्रत्यये विषम् इति जायते। ओदनं भुञ्जानो विषं भुङ्क्ते इति सिद्धम्।

**विशेषः**– सामान्यतया कर्म द्विविधं भवति ईप्सितानीप्सितभेदात्। तत्रापि ईप्सितकर्म त्रिविधं भवति– निर्वर्त्यं विकार्यं, प्राप्यञ्च। ईप्सिततमं कर्म ईप्सितकर्मण्येव अन्तर्भूतमस्ति।

**निर्वर्त्यकर्म** – यस्योपादानकारणं नास्ति तन्निर्वर्त्यम्। यथा – घटं करोति। अत्र स्वोपस्थितेः प्राक् घटस्याभाव आसीत्। अतः 'घटः' निर्वर्त्यं = सम्पाद्यं = उत्पाद्यं वा कर्म अस्ति।

**विकार्यकर्म** – एतत् द्विविधं भवति। प्रथमं तावत् – यत्र प्रकृतेः सर्वात्मना नाशे कर्मणः उत्पत्तिर्भवति तत् कर्म। यथा – काष्ठं भस्म करोति। अत्र काष्ठरूपस्य कारणस्य सर्वात्मना नाशे हि भस्मरूप कर्मोत्पद्यते। द्वितीयं तु यत्र कारणात् कार्ये गुणान्तरोत्पत्तिर्विवक्ष्यते तत्र गुणान्तरोत्पत्त्या कर्म भवति। यथा – सुवर्णं कुण्डलं करोति सुवर्णस्य कुण्डलरूपे परिणमति।

**प्राप्यकर्म** – यस्मिन्कर्मणि क्रियाकृतविशेषः प्रत्यक्षेणानुमानप्रमाणेन वा नोपलक्ष्यते तत् प्राप्यकर्म भवति। यथा – 'ग्रामं गच्छति' अत्र गमनकृतक्रियाविशेषो ग्रामे न दृश्यते।

**अनीप्सितं चतुर्विधम्** – उदासीनं, द्वेष्यं, संज्ञातैरनाख्यातम्, अन्यपूर्वकञ्चेति।

**तत्र उदासीनम्** – ग्रामं गच्छन् तृणं स्पृशति, अत्र तृणरूपकर्मणः औदासीन्यं प्रतीयते।

**द्वेष्यम्** – ओदनं भुञ्जानो विषं भुङ्क्ते अत्र कर्तुः विषमद्व्यापारजन्य गलविलाधः संयोगाश्रयो भवतु, इति इच्छाया अभावात् विषस्य कर्तुः अनीप्सितत्वमनुदिष्टत्वं वाऽस्त्येव।

**संज्ञातैरनाख्यातम्** – गां दोग्धि पयः। अत्र अपादानादिविशेषैरविवक्षा भवति। 'अकथितं च' इत्यनेन कर्मसंज्ञा विधीयते।

**अन्यपूर्वकम्** – 'क्रूरमभिक्रुध्यति' इत्यत्र 'क्रुध द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इत्यनेन प्राप्तां सम्प्रदानसंज्ञां बाधित्वा ''क्रुधद्रुहोरूपसृष्टयोः कर्म'' इत्यनेन कर्मसंज्ञा विधीयते। एवमेव ''अधितिष्ठति बैकुण्ठं हरिः'' इत्यत्रापि अधिकरणसंज्ञां बाधित्वा ''अधिशीङ्स्थासां कर्म'' इत्यनेन कर्मसंज्ञा विधीयते। एषु विषयेषु भर्तृहरिकारिकामाध्यमेन कौण्डभट्टः प्रतिपादयति – क्रियाजन्यफलाश्रयः कर्म तच्च सप्तविधम्।

**भर्तृहरि कारिका: –**

**निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधामतम्।**
**तच्चेप्सिततमं कर्म चतुर्द्धाऽन्यत्तु कल्पितम्।।**
**औदसीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।**
**संज्ञातैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।**
**यदसज्जायते सद्वा जन्मना यत्प्रकाशते।**

**तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।**
**प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।**
**किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।**
**क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।**
**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।**

**५३९ अकथितं च १/४/५१।। अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात्।**

**दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।**

**'दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म' इति परिगणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गाञ्छतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति, वहति वा। अर्थनिबन्धनेयं सञ्ज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। कारकं किम्? माणवकस्य पितरं पन्थानं पृच्छति। वा.'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसञ्ज्ञक इति वाच्यम्'। कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।**

**पदविभागः** – अकथितम् च।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – यदा अपादानादिकारकाणां तत्तद्रूपेषु विवक्षा न भवति तदा कारकत्वमात्रविवक्षायां तेषां कर्मसंज्ञा भवति।

**व्याख्या** – अकथितम् – कथितम् = अभिहितम् = उक्तम्। न कथितम् = अकथितम्। नञ्तत्पुरुषसमासः। प्रथमान्तं पदम्। च इति अव्ययपदम्। कारके इत्यस्याधिकारो वर्तते। विभक्तिविपरिणामेन कारकम् इति प्रयुक्तम्। ''कर्तुरीप्सिततमं कर्म'' इत्यनेन कर्म इत्यस्यानुवृत्तिरायाति। तथा हि कारके इत्यस्याधिकारे अपादानसम्प्रदानकरणाधिकरणसंज्ञाः विहिताः। यदा तादृशी विवक्षान स्यात् तदा कारकत्वमात्रविवक्षायां कर्मसंज्ञा भवति, परं न सर्वत्रापितु दुहादीनां षोडशधातूनां तत्समानार्थकधातूनां योगे च भवति। अत एव मूले उक्तम् – अर्थनिबन्धनेयं संज्ञा। अत एव बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते वक्तीत्यादिष्वपि कर्मसंज्ञा प्राप्ता भवति। एते षोडश धातवः द्विकर्मकधातवः सन्ति। द्विकर्मक इत्यनेन मुख्यकर्म, गौणकर्म चानयोः ग्रहणम्। मुख्य कर्मणि तु 'कर्तुरीप्सिततमं कर्म' इति सूत्रेणैव कर्मसंज्ञा भवति। गौणकर्मणि तु अकथितं च इति सूत्रेण कर्मसंज्ञा भवति। कर्मद्वयमेव अनुक्तमस्ति, एतस्मात् ''कर्मणिद्वितीया'' इति सूत्रेण उभयत्रैव द्वितीयाविभक्तिः भवति। षोडशधातूनां विषये मूले श्लोकः पठितः।

**रूपलेखनप्रकारः** –

**गां दोग्धि पयः** – ''गोर्दोग्धि पयः'' इत्यत्र 'गोः' इति अपादानत्वरूपे प्रयुक्तमस्ति, पयः ईप्सिततमं कर्म अस्ति। अत्रापादानस्याविवक्षायां 'गोः' इत्यस्य कर्मसंज्ञा ''अकथितं च'' इति सूत्रेण भवति। ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ अम् प्रत्यये गां दोग्धिपयः इति जायते।

**बलिं याचते वसुधाम्** – ''बलेः याचते वसुधाम्'' इत्यत्र अवधिभूतः 'बलिः' अपादानत्वेनास्ति परम् अपादानस्याविवक्षायां याच् धातुयोगे 'बलि' इत्यस्य ''अकथितं च'' इति सूत्रेण कर्मसंज्ञा भवति। ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ ''बलिं याचते वसुधाम्'' इति सिद्धम्।

**तण्डुलानोदनं पचति** – तण्डुलैरोदनं पचति इत्यर्थे करणस्याविवक्षायां पच् धातुयोगे तण्डुलशब्दस्य कर्मसंज्ञा भवति, ''कर्मणि द्वितीया'' इत्यनेन द्वितीयाविभक्तौ बहुवचने शस् प्रत्यये तण्डुलानोदनं पचति इति सिद्धम्।

**गर्गान् शतं दण्डयति** - गर्गेभ्य: शतं दण्डयति इत्यर्थे अवधिभूतत्वात् गर्गशब्दस्यापादानसंज्ञा प्राप्ता भवति परं अपादानस्याविवक्षायाम् ''अकथितं च'' इति सूत्रेण कर्मसंज्ञा भवति। ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ बहुवचने शस् प्रत्यये गर्गान् शतं दण्डयति इति सिद्धम्।

**व्रजमवरुणद्धि गाम्** - व्रजे अवरुणद्धि गाम् इत्यर्थे आधारत्वेन व्रजशब्दोऽयं अधिकरणसंज्ञकोऽस्ति परं अधिकरणस्याविवक्षायां ''अकथितं च'' इति सूत्रेण कर्मसंज्ञायां ''कर्मणिद्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ एवकचने अम् प्रत्यये व्रजमवरुणद्धि गाम् इति सिद्धम्।

**माणवकं पन्थानं पृच्छति** - इत्यत्र अपादानस्याविवक्षायां माणवकशब्दस्य कर्मसंज्ञायां द्वितीयाविभक्तौ च माणवकं पन्थानं पृच्छति इति सिद्धम्।

**वृक्षमवचिनोति फलानि** - वृक्षाद् अवचिनोति फलानि इत्यर्थे अपादानस्याविक्षायाम् ''अकथितं च'' इति सूत्रेण वृक्षशब्दस्य कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयायाम् एकवचने अम् विभक्तौ वृक्षमवचिनोति फलानि इति सिद्धम्।

**माणवकं धर्मं ब्रूते शास्ति वा** - माणवकाय धर्मं ब्रूते शास्ति वा इत्यर्थे सम्प्रदानस्याविवक्षायां माणवकशब्दस्य कर्मसंज्ञा भवति। ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयायां अम् विभक्तौ माणवकं धर्मं ब्रूते शस्तिवा इति जायते। अत्र प्रधानकर्मत्वेन ''धर्मम्'' इति गौणकर्मत्वेन ''मावणकम्'' इत्यस्ति च। प्रधान कर्मणि तु यथाप्राप्त पूर्वानुसारेण कर्मसंज्ञा तथा द्वितीया जायते।

**शतं जयति देवदत्तम्** - ''शतं जयति देवदत्तात्'' इत्यर्थे देवदत्ते अपादानत्वमस्ति परं तस्याविवक्षायां ''अकथितञ्च'' इति सूत्रेण कर्मसंज्ञा भवति ''कर्मणि द्वितीया'' इत्यनेन देवदत्तात् द्वितीयाविभक्तिर्जायते ''शतं जयति देवदत्तमि''ति सिद्धम्। अत्र 'जि' धातु: द्विकर्मकोऽस्ति। शतम् प्रधानकर्मत्वेनास्ति, माणवकम् गौणकर्मत्वेनास्ति च।

**सुधां क्षीरनिधिं मथ्नाति** - ''क्षीरनिधे: सकाशात् सुधां प्राप्नोति'' इत्यर्थके वाक्ये 'क्षीरनिधि' शब्दे अपादानत्वमस्ति, परं तस्याविवक्षायां पूर्वानुसारेणैव कर्मसंज्ञायां द्वितीयायाञ्च सुधां क्षीरनिधिं मथ्नाति इति जायते। अत्र मथ् धातु: द्विकर्मकोऽस्ति। 'सुधाम्' प्रधानकर्मत्वेन ''क्षीरनिधिम्'' गौणकर्मत्वेनास्ति च।

**देवदत्तं शतं मुष्णाति** - ''देवदत्तात् शतं मुष्णाति'' इत्यर्थे देवदत्ते अपादानत्वमस्ति, परं तस्याविवक्षायां 'अकथितञ्च' इति सूत्रेण कर्मसंज्ञायां द्वितीयायाञ्च देवदत्तं शतं मुष्णाति इति जायते। अत्र 'मुष्' द्विकर्मक धातुअस्ति प्रधानकर्मत्वेन शतम् अप्रधानकर्मत्वेन देवदत्तम् अस्ति च।

**ग्रामम् अजां नयति, हरति, कर्षति, वहति वा** इत्यत्र ग्रामे अजां नयति, हरति कर्षति वहति वा इत्यर्थे 'ग्राम' शब्दे अधिकरणत्वमस्ति, परं तस्याविवक्षायां कर्मसंज्ञायां द्वितीयाञ्च प्रयोगोऽयं सिद्धो भवति। अत्र नी, हृ, कृष् वह् इत्येते द्विकर्मकधातव: सन्ति। 'अजाम्' इति प्रधानकर्मत्वेन, 'गामम्' इति गौणकर्मत्वेन च प्रयुक्तमस्ति।

**अर्थनिबन्धनेयं सञ्ज्ञा** - अर्थ: निबन्धनं = मूलं यस्या सा इति अर्थनिबन्धना। अर्थनिबन्धना इत्यस्य तात्पर्योऽयं विद्यते यत् ''अकथितं च'' इति सूत्रेण विधीययाना कर्मसंज्ञा न केवल दुहादीनां षोडशधातूनां योगे एव अपितु तेषां धातूनां समानार्थकानां योगेऽपि भवति अत एव बलिं भिक्षते वसुधाम्, माणवकं धर्मं भाषते - वक्ति-अभिधत्ते वा इत्यादिष्वपि कर्मसंज्ञा 'अकथितं च' इत्यनेनैव भवति। याच् धातो: समानर्थकमस्ति भिक्ष् इति। ब्रू धातो: समानार्थकत्वेन प्रयुक्ता: सन्ति - भाष्, वच्, अभि+धा इत्येते।

**कारकं किम् - माणवकस्य पितरं पन्थानं पृच्छति** ननु 'अकथितञ्च' सूत्रेऽस्मिन् कारकम् इत्यस्यानुवृत्ति: किमर्थम्? तर्हि अत्र समाधीयते यत् यदि 'कारकम्' इत्यस्यानुवृत्ति: न भवति तदा तु द्विकर्मक प्रच्छ धातुयोगे 'माणवक' शब्दादपि कर्मसंज्ञायामनापत्ति:। तदा माणवकस्य स्थाने 'माणवकम्' इति पाठो भविष्यति तन्नोचितम्। 'कारकम्' इत्यस्यानुवृत्तिना 'अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं भवति इत्यर्थो सूत्रस्य। तदनुसारेण माणवकस्य पितरं

पन्थानं पृच्छति इत्यत्र माणवके सम्बन्धत्वात् षष्ठ्यस्ति। षष्ठ्या: कारकत्वं नास्ति च। अतएव कारकत्वाभावे अविवक्षाऽपि न भविष्यति अत: कर्मसंज्ञापत्ति: निराकृता एव।

**वा. अकर्मकधातुभिर्योगे देश: कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्।**

**वार्तिकार्थ:** – अकर्मकधातुभि: सह योगे सति देशवाचकस्य, कालवाचकस्य, भाववाचकस्य, मार्गवाचकस्य च अपादानदिवेशेषैरविवक्षायां कर्मसंज्ञा भवति इत्याशय:।

**रूपलेखनप्रकार:** – कुरुन् स्वपिति – इत्यत्र कुरुषु स्वपिति इत्यर्थे अधिकरणस्याविवक्षायां ''अकर्मक.'' इति वार्तिकेन कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ च सिद्धोऽयं प्रयोग: कुरुन् स्वपिति इति। देशवाचकस्योदाहरणम्।

**मासम् आस्ते** – इत्यत्र 'मासे आस्ते' इत्यर्थे अधिकरणस्याविवक्षायां कर्मसंज्ञायां द्वितीयाविभक्तौ पूर्णानुसारेणैव सिद्धोऽयं भवति। कालवाचकस्योदाहरणम्।

**गोदोहमास्ते** – इत्यत्र भाववाचकात् गोदोहशब्दात् अधिकरणस्याविवक्षायां कर्मसंज्ञा भवति। गोदोहमास्ते इति जायते।

**क्रोशमास्ते** – इत्यत्र मार्गवाचकात् क्रोशशब्दात् अधिकरणस्याविवक्षायां कर्मसंज्ञा भवति। क्रोशमास्ते इति जायते।

एषु चतुर्षु प्रयोगेष्वेव कर्मसंज्ञा ''अकर्मक.'' – इति वार्तिकेन भवति। कर्मणि द्वितीया इत्यनेन द्वितीयाविभक्तिश्च जायते।

## योग्यता विस्तार:

| | अपादानादिविशेषै: विवक्षा | अपादानादिविशेषैरविवक्षा |
|---|---|---|
| १. | कृष्ण: गो: पय: दोग्धि: | कृष्ण: गां पय: दोग्धि |
| २. | वामन: बले: वसुधां याचते | वामन: बलिं वसुधां याचते |
| ३. | पाचक: तण्डुलै: ओदनं पचति | पाचक: तण्डुलान् ओदनं पचति |
| ४. | राजा गर्गेभ्य: शतं दण्डयति | राजा गर्गान् शतं दण्डयति |
| ५. | गोप: गां वज्रे अवरूणाद्धि | गोप: गां व्रजमवरूणद्धि |
| ६. | पान्थ: माणवकात् पन्थान् पृच्छति | पान्थ: माणवकं पन्थानं पृच्छति |
| ७. | देवदत्त: वृक्षात् फलानि अवचिनोति | देवदत्त: वृक्षं फलानि अवचिनोति |
| ८. | पिता माणवकाय धर्मं ब्रूते | पिता माणवकं धर्मं ब्रूते |
| ९. | गुरु: माणवकाय धर्मं शास्ति | गुरु माणवकं धर्मं शास्ति |
| १०. | चैत्र: देवदत्तात् शतं जयति | चैत्र: देवदत्तं शतं जयति |
| ११. | सुरगण: सुधां क्षीरनिधे: मथ्नाति | सुरगण: सुधां क्षीरनिधिं मथ्नाति |
| १२. | मैत्र: देवदत्तात् शतं मुष्वाति | मैत्र: देवदत्तं शतं मुष्णाति |
| १३. | कृषिक: ग्रामे अजां नयति हरति, कर्षति, वहति वा। | कृषिक: ग्रामं अजां नयति, हरति, कर्षति वहति वा। |

## द्विकर्मस्थले कर्मवाच्ये प्रयोग:

| कर्तृवाच्य: | कर्मवाच्य: |
|---|---|
| गां दोग्धि पय: | गौर्दुह्यते पय: |
| बलिं याचते वसुधाम् | बलिर्याच्यते वसुधाम् |
| तण्डुलानोदनं पचति | तण्डुला: पच्यन्ते ओदनम् |
| गर्गान् शतं दण्डयति | गर्गा: शतं दण्ड्यन्ते |

| | |
|---|---|
| व्रजम् अवरूणद्धि गाम् | व्रजोऽवरुध्यते गाम् |
| माणवकं पन्थानं पृच्छति | माणवकः पन्थानं पृच्छ्यते |
| वृक्षम् अवचिनोति फलानि | वृक्षोऽवचीयते फलानि |
| माणवकं धर्मं ब्रूते | माणवको धर्मम् उच्यते |
| माणवकं धर्मं शास्ति | माणवको धर्मम् शिष्यते। |
| शतं जयति देवदत्तम् | शतं जीयते देवदत्तः |
| सुधां क्षीरनिधिं मध्नाति | सुधां क्षीरनिधिर्मथ्यते |
| देवदत्तं शतं मुष्णाति | देवदत्तः शतं मुष्यते |

**महाभाष्यकारेणोक्तम् -**

"**गौणे कर्मणि दुह्यादेः, प्रधाने नी-हृकृष् वहाम्**" इत्यनुसारेण उपर्युक्तेषु गौणकर्मणि कर्मवाच्ये परिवर्तनं भवति अवशिष्टासु चतुर्षु निम्नानुसारेण प्रधानकर्मण्येत परिवर्तनं भवति।

| | |
|---|---|
| ग्राममजां नयति | ग्रामम् अजा नीयते |
| हरति | ह्रियते |
| कर्षति | कृष्यते |
| वहति | उह्यते |

**५४० गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ १/४/५२।। गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्।**

**शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्।**
**आशयच्चामृतं देवान् वेदमध्यापयद् विधिम्।।**
**आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।।**

**गतीत्यादि किम्? पाचयत्योदनं देवदत्तेन। अण्यन्तानाम् किम्? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः।**

**'नीवह्योर्न' (वा. ११०९)। नाययति वाहयति वा भारं भृत्येन।**

**'नियन्तृकर्तृकस्य वहेरनिषेधः' (वा. १११०) वाहयति रथं वाहान् सूतः।**

**'आदिखाद्योर्न' (वा. ११०१)। आदयति खादयति वान्नं बटुना।**

**'भक्षेरहिंसार्थस्य न' (वा. ११११)। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किम्? भक्षयति बलीवर्दान् सस्यम्।**

**'जल्पतिप्रभृतीनामुपसंख्यानम्' (वा. ११०७)। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। 'दृशेश्च' (वा. ११०८)। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थनामेव ग्रहणम्, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां न। स्मारयति घ्रापयति वा देवदत्तेन।**

**'शब्दायतेर्न (वा. ११०५)। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात् प्राप्तिः। येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः, न त्वविवक्षितकर्माणोऽपि। तेन 'मासमासयति देवदत्तम्' इत्यादौ कर्मत्वं भवति, 'देवदत्तेन पाचयति' इत्यादौ तु न।**

**सूत्रार्थः -** गत्यर्थक, बुद्ध्यर्थक, भक्षणार्थक, शब्दकर्मक, अकर्मक एतेषां धातूनामण्यन्तावस्थायां यः कर्ता स ण्यन्तावस्थायां कर्मसंज्ञको भवति।

**व्याख्या -** गतिश्च बुद्धिश्च प्रत्यवसानञ्च गतिबुद्धिप्रत्यवसानानि (द्वन्द्वसमासः)। तानि अर्थाः येषां ते गतिबुद्धिप्रत्ययवसानार्थाः (बहुव्रीहिः) शब्दः कर्म येषां ते शब्दकर्माणः (बहुव्रीहिः)। अविद्यमानं कर्म येषां ते

अकर्मका: (बहुव्रीहि:) पुन: गतिबुद्धिप्रत्यवसानाश्च शब्दकर्मणश्च अकर्मकाश्च (द्वन्द्वसमास:) गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकास्तेषाम् गतिबुद्धिप्रत्यतीसानार्थशब्दकर्माकर्मकाणामिति। षष्ठ्यन्तपदम्। न णि: अणि, अणौ कर्ता अणिकर्ता। प्रथमान्तं पदम्। = स प्रथमान्तं, णौ सप्तम्यन्तम् एवं अनेकपदमिदं सूत्रम्। = अत्र कारके इत्यस्याधिकारो वर्तते। ''कर्तुरीप्सिततमं कर्म'' इति सूत्रात् कर्म इत्यस्यानुवृत्तिरायति।

**रूपलेखनप्रकार: –**

**( १ ) शत्रून् अगमयत् स्वर्गम्** – शत्रव: स्वर्गम् अगच्छन् इत्यर्थे अण्यन्तावस्थाया: कर्ता ''शत्रव:'' इति अस्ति ण्यन्तावस्थायां ''गतिबुद्धि.'' इति सूत्रेण कर्मसंज्ञा भवति ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ शत्रु शब्दात् बहुवचने शस् प्रत्यये शत्रून् इति जायते। शत्रून अगमयत् स्वर्गमिति सिद्धं भवति। गत्यर्थकस्योदाहरणम्।

**वेदार्थम् स्वान् अवेदयत्** – स्वे वेदार्थम् अविदु: इत्यर्थे अण्यन्तावस्थाया: कर्ता ''स्वे'' इति पदमस्ति। ण्यन्तावस्थायां तस्य कर्मसंज्ञाभवति। द्वितीयाविभक्तौ बहुवचने शस् प्रत्यये वेदार्थम् स्वान् अवेदयत् इति जायते। बुद्ध्यर्थकस्योदाहरणम्।

**देवान् अमृतम् आशयत्** – देवा: अमृतम् आश्नन् इत्यर्थे अव्यन्तावस्थाया: कर्ता ''देवा:'' इति पदमस्ति। व्यन्तावस्थायां पूर्वानुसारेण परिवर्तनं भवति ''देवान् अमृतम् आशयत्'' इति प्रत्यवसानर्थे सिद्धं भवति।

**वेदमध्यापयद् विधिम्** – विधि: वेदम् अध्यैत इति अण्यन्तावस्था। अत्र ण्यन्तावस्थायां विधिमिति जायते। शब्दकर्मकस्येदमुदाहरणम्।

**सलिले पृथ्वीम् आसयत** – सलिले पृथ्वी आस्ते इति अण्यन्तावस्था। अत्र ण्यन्तावस्थायां पृथ्वीमिति जायते। अकर्मकस्योदाहरणमिति। **य: श्रीहरि: स: मे गति: ( शरणम् ) इति प्रत्येकवाक्यमन्वयो विधेय:।**

**गतीत्यादिकिम्? पाचयत्योदनं देवदत्तेन।** ननु ''गतिबुद्धि.'' – सूत्रेऽस्मिन् गति, बुद्धि, प्रत्यवसान, शब्दकर्मक, अकर्मक, इत्येतेषां ग्रहणं न स्यात् तदा को दोषस्तर्हि उच्यते यत् सूत्रे गत्यादीनां पञ्चानां ग्रहणाभावे यस्य कस्यापि धातो: अण्यन्तावस्थाया: कर्तु: ण्यन्तावस्थायां कर्मसंज्ञा स्यात्। तदा तु पचति ओदनं देवदत्त: तम् अन्य: प्रेरयति पाचयति ओदनं देवदत्तेन अत्रापि पच् धातुप्रयोगे अण्यन्तावस्थाया: कर्तु: ''देवदत्त'' इत्यस्य कर्मसंज्ञा भवेत्। तदा तु देवदत्तम् इति पदमुपयुक्तमेव परं न, तद्वारणार्थमेव गतिबुद्धीति उच्यते तस्मात् पच् धातु: सूत्रनिर्दिष्टेषु नास्ति अत: तत्र अण्यन्तावस्थाया: कर्तु: ण्यन्तावस्थायां कर्मसंज्ञा न भवति अपितु अनुक्तत्वात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयाविभक्ति: प्रयुज्यते।

**अण्यन्तानां किम्? गमयति देवदत्तो यज्ञदत्तम् तमपर: प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्र:।**

अण्यन्तानां किम्? इत्यस्य समाधानमत्र

प्रथमावस्था – यज्ञदत्तो गच्छति

द्वितीयावस्था – देवदत्तो यज्ञदत्तं गमयति।

तृतीयावस्था – विष्णुमित्र: देवदत्तेन यज्ञदत्तं गमयति।

सूत्रे अण्यन्तानाम् इत्यस्यार्थस्याभावे गमयति देवदत्तो यज्ञदत्तम्, इत्यत्र ण्यन्तावस्थाया: कर्तु: देवदत्त: इत्यस्य पुन: णिचि सति अनेन सूत्रेण कर्म संज्ञा स्यात्। सति तु अण्यन्तानामिति पदे गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्र: इति वाक्ये ''देवदत्तेन'' इत्यस्य स्थाने देवदत्तम् इति अनिष्टं रूपं न भवति।

**विशेष:**

| **क्रम:** | **अर्थ:** | **सामान्यार्थ: ( अण्यन्तावस्था )** | **प्रेरणार्थ: ( ण्यन्तावस्था )** | **प्रयोज्य कर्ता** | **प्रेरणार्थे कर्म** |
|---|---|---|---|---|---|
| १. | गत्यर्थक: | शत्रव: स्वर्गम् अगच्छन् | हरि: शत्रून् स्वर्गम् अगमयत् | शत्रव: | शत्रून् |

| | | | | | |
|---|---|---|---|---|---|
| २. | बुद्ध्यर्थकः | स्वे वेदार्थम् अविदुः | हरिः स्वान् वेदार्थम् अवेदयत् | स्वे | स्वान् |
| ३. | भक्षणार्थकः | देवाः अमृतम् आश्नन् | हरिः देवान् अमृतम् आशयत् | देवाः | देवान् |
| ४. | शब्दार्थकः | विधिः वेदम् अध्यैत | हरिः विधिं वेदम् अध्यापयत | विधिः | विधिम् |
| ५. | अकर्मकः | पृथ्वी सलिले आस्ते | हरिः पृथ्वीं सलिले आसयत् | पृथ्वी | पृथ्वीम् |

**नीवह्योर्न ( वा. )** नाययति वाह्यति वा भारं भृत्येन।

**वार्तिकार्थः** – णीञ् प्रापणे वह् प्रापणे इत्यनयोः अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न भवति।

**रूपलेखनप्रकारः** – (१) नाययति भारं भृत्येन – ''भृत्यो भारं नयति'' अण्यन्तावस्थायामित्यर्थे तमपरः प्रयुङ्क्ते ण्यन्तावस्थायां नाययति इति जाते नी धातोः गत्यर्थकत्वात् अण्यन्तावस्थायाः प्रयोज्य कर्तुः 'भृत्य' इति शब्दस्य ''गतिबुद्धि.'' इति सूत्रेण कर्मसंज्ञा प्राप्ता भवति तस्य ''नीवह्योर्न'' इति वार्तिकेन निषेधे कृते अनुक्तत्वात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीया भवति ''नाययति भारं भृत्येन'' इति सिद्धम्।

**वाहयति भारं भृत्येन** – भृत्यो भारं वहति इत्यत्र वह प्रापणे धातुयोगे पूर्वानुसारमेव सर्वं साधनीयम्।

**नियन्तृकर्तृकस्य वहेरनिषेधः ( वा. )**

**वार्तिकार्थः** – नियन्ता = सारथिः, नियन्ता कर्ता यस्य वह् धातोः भवति, तत्र अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा निषेधो न भवति।

**रूपलेखनप्रकारः** – वाहयति रथं वाहान्सूतः – इत्यत्र वाहाः रथं वहन्ति इति अण्यन्तावस्था। तान् सूतः प्रेरयति तदा भवति ण्यन्तावस्था 'वाहयति रथं वाहान्सूतः'' इति। इत्यत्र प्रयोज्यकर्तुः 'वाह' इत्यस्य ''गतिबुद्धि.'' इति सूत्रेण प्राप्ता कर्मसंज्ञा ''नीवह्योर्न'' इति वार्तिकेन निषिध्यते परं ''नियन्तृकर्तृकस्य वहेरनिषेधः'' इति वार्तिकेन निषेधस्य प्रतिषेधं कृत्वा सूत्रस्य प्रवृत्तिः विहिता तेन कर्मसंज्ञायां द्वितीयाविभक्तौ वाहान् इति जाते ''वाहयति रथं वाहान्सूतः'' प्रयोगोऽयं सिद्धो भवति।

**आदिखाद्योर्न ( वा. )**

**वार्तिकार्थः** – अद्, खाद् इत्यनयोः अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न भवति। उभौ एव धातू प्रत्यवसानार्थकौ स्तः।

**रूपलेखनप्रकारः** – (१) आदयति अन्नं बटुना – इत्यत्र 'बटुः अन्नं अत्ति' इत्यण्यन्तावस्था, तयन्यः प्रेरयति ''आदयति अन्नं बटुना'' इति ण्यन्तावस्था। अत्र अद् धातु योगे प्रयोज्यकर्तुः 'बटु' इत्यस्य ''गतिबुद्धी.'' इति सूत्रेण कर्मसंज्ञा प्राप्ता भवति तस्याः ''आदिखाद्योर्न'' इति वार्तिकेन निषेधे कृते, कर्तुः अनुक्तत्वात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयायां आदयति अन्नं बटुना इति सिद्धं भवति। एवमेव खाद् धातु योगे 'खादयति अन्नं बटुना' इति सिद्धं भवति।

**भक्षेरहिंसार्थस्य न –**

**वार्तिकार्थः** –अहिंसार्थकस्य भक्ष् धातोः अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न भवति।

**रूपलेखनप्रकारः** –भक्षयति अन्नं बटुना – इत्यत्र 'बटुः अन्नं भक्षयति' इत्यण्यन्तावस्था, 'तं प्रेरयति गुरुः' इत्यर्थे 'हेतुमति च' इति भक्षिधातोर्णिचि पूर्वणिचो णेरनिटीति लोपे कृते भक्षयति अन्नं बटुना इति भवति। अत्र ''गतिबुद्धिप्रत्यवसा.'' इति सूत्रेण ''बटु'' इत्यस्य कर्मसंज्ञा प्राप्ता भवति परं तस्याः ''भक्षेरहिंसार्थस्य'' न इति

वार्तिकेन निषेधे कृते कर्तृपदं "बटु" इत्यस्य अनुक्तत्वात् "कर्तृकरणयोस्तृतीया" इति सूत्रेण तृतीया विभक्तौ भक्षयति अन्नं बटुना इति सिद्धम्।

**अहिंसार्थस्य किम्?** भक्षयति बलीवर्दान् सस्यम्। ननु "भक्षेरहिंसार्थस्य न" वार्तिकेऽस्मिन् अहिंसार्थस्य इति पदस्य किं प्रयोजनम्? अस्य समाधाने उत्तरं दीयते यत् भक्ष् धातोः अहिसार्थके सत्येव कर्मसंज्ञा निषिध्यते यदि हिंसार्थके स्यात् तदा तु कर्मसंज्ञा भवत्येव। यथा – भक्षयति बलिवर्दान् सस्यम् इत्यत्र बलीवर्दाः सस्यं भक्षयन्ति इति अण्यस्तावस्था, तमपरः प्रयुङ्क्ते तदा ण्यन्तावस्थायां कर्तुः "वलीवर्दः" इत्यस्य "गतिबुद्धी." इति सूत्रेण कर्मसंज्ञायां बलीवर्दान् इति भवति। सूत्रे अणि इत्यत्र णिच्-प्रत्ययः "हेतुमति च" इत्यनेन विधीयमानं णिचमेव द्योतयति, न तु स्वार्थिकं चौरादिकं णिचम्।

**विशेषः** – क्षेत्रे अकृत्ते सस्ये अन्तः प्रज्ञजीवस्य विद्यमानता मन्यते, अतः तस्य भक्षणेन नाशेन वा हिंसा एव भवति इति शास्त्रविचक्षणाः वदन्ति।

**वा. जल्पतिप्रभृतीनामुपसंख्यानम् –**

**वार्तिकार्थः** – जल्पादीनां धातूनां विषयेऽपि पूर्वानुसारमण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा भवति।

**विशेषः** – "गतिबुद्धीति." सूत्रे परिगणितानां धातूनां मध्ये जल्पादीनामभावे कर्मसंज्ञा न प्राप्ता भवति एतदर्थं पृथक् रूपेण वार्तिकस्यास्यावतरणं कृतम्। वार्तिके प्रभृति इति शब्देन व्याहरति, वदति, जल्पति, विलपति, आभाषते इत्यादीनां संग्रहः भवति।

**रूपलेखनप्रकारः** – जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः – इत्यत्र जल्पति धर्मं पुत्रः इत्यण्यन्तावस्था, अस्य कर्तृपदमस्ति पुत्रः। ण्यन्तावस्थायां जल्पयति इति भवति। अत्र "जल्पतिप्रभृति." इति वार्तिकेन अण्यन्तावस्थायाः कर्तुः 'पुत्र' शब्दस्य ण्यन्तावस्थायां कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायां कृतायां 'जल्पयति धर्मं पुत्रं देवदत्तः इति सिद्धम् भवति। एवमेव भाषयति योगेपि वाच्यः।

**वा. दृशेश्च** – दर्शयति हरिं भक्तान्।

**वार्तिकार्थः** – दृश् धातु योगे अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा भवति।

**रूपलेखनप्रकारः** – दर्शयति हरिं भक्तान् – इत्यत्र 'भक्ताः हरिं पश्यन्ति' इति अण्यन्तावस्था, अत्र ण्यन्तावस्थायां दृश् धातोः णिच् प्रत्यये दर्शयति इति भवति। अत्र अण्यन्तावस्थायाः कर्तुः 'भक्त' शब्दस्य "दृशेश्च" इति वार्तिकेन कर्मसंज्ञायां "कर्मणि द्वितीया" इति सूत्रेण द्वितीयाविभक्तौ शस् प्रत्यये दर्शयति हरिं भक्तान इति सिद्धम् भवति।

**स्मारयति घ्रापयति वा देवदत्तेन** – ननु "गतिबुद्धिप्रत्य." – सूत्रेऽस्मिन् 'बुद्धि' इति शब्दस्य ग्रहणेन ज्ञानसामान्यवाचकार्थानां धातूनामेव ग्रहणं भवति न तु ज्ञानविशेषवाचकानां धातूनाम् एतदर्थमेव ज्ञानविशेषवाचकानां स्मृ, घ्रा इत्यादीनां विषये अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न भवति। यथा – देवदत्तः स्मरति तं यज्ञदत्तः प्रयुङ्क्ते "यज्ञदत्तो देवदत्तेन स्मारयति"। देवदत्तो जिघ्रति तं यज्ञदत्तः प्रयुङ्क्ते-यज्ञदत्तो देवदत्तेन घ्रापयति। एवं अनयोः द्वयोरेव स्थानयोः ण्यन्तावस्थायाः कर्तुः कर्मसंज्ञा न विहिता अत एव मूले लिखितं सूत्रे ज्ञानसामान्यार्थमेव इति दिक्।

**वा. शब्दायतेर्न शब्दाययति देवदत्तेन।**

**वार्तिकार्थः** – 'शब्दायति' इत्यस्य षष्ठ्यां प्रयोगः शब्दायतेः। 'शब्दं करोति' इत्यर्थे प्रयुक्तः। 'शब्दाय' धातोः अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न भवति।

**रूपलेखनप्रकारः – शब्दाययति देवदत्तेन** – देवदत्तः शब्दं करोति इत्यर्थे अण्यन्तावस्थायां "देवदत्तः शब्दायते" इति भवति, तम् अन्यः प्रेरयति तदा ण्यन्तावस्थायां "शब्दाययति देवदत्तेन" इति भवति। यदा वाक्ये 'देवदत्तः' अण्यन्तावस्थायाः कर्तुपदमस्ति तदा ण्यन्तावस्थायां तस्य "गतिबुद्धिप्रत्यवसा." इति सूत्रेण कर्मसंज्ञा प्राप्ता भवति परं

''शब्दायतेर्न'' इति वार्तिकेन निषिध्यते। अत्र प्रयोज्यकर्त्ता देवदत्तः इत्यस्याप्रधानत्वेन ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीया भवति शब्दाययति देवदत्तेन इति सिद्धम्।

**धात्वर्थसङ्गृहीतकर्मत्वेनाकर्मत्वात्प्राप्तिः** – 'शब्दाययति देवदत्तेन' इत्यत्र 'शब्दाय' इत्यस्यार्थः शब्दकर्मकम् उत्पादनम् इति भवति। एवं शब्दात्मकं कर्म धात्वर्थेऽन्तर्भूतम्। अतएव 'शब्दाय' धातुः अकर्मकः। अकर्मकत्वादेवात्र ''गतिबुद्धिप्रत्यवसानार्थ.'' इति सूत्रेण कर्मसंज्ञाप्राप्ता भवति तस्याः निषेधो भवति ''शब्दायतेर्न'' इति वार्तिकेन। अत एव मूले लिखितम् '**धात्वर्थसङ्गृहीतकर्मकत्वेन अकर्मकत्वात् प्राप्तिः इति**। धात्वर्थबहिर्भूतकर्मत्वेन सकर्मकत्वमिति बोध्यम्। धातूनामकर्मकत्वप्राप्तिविषये कारिकेयं पठ्यते –

**धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात्।**
**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।।**

(१) धातोः अन्यार्थे प्रयोगे सति सकर्मकोऽपि धातुः अकर्मकत्वेन व्यवह्रियते – यथा ''भृत्यो भारं वहति'' इत्यत्र वह् धातुः सकर्मकोऽस्ति। परं 'नदी वहति' प्रयोगेऽस्मिन् पूर्वप्रयोगात् भिन्नार्थे सति वह् धातु अकर्मको भवति।

(२) धात्वर्थसङ्गृहीतकर्मत्वेन – शब्दायते देवदत्तः इति पूर्वं स्पष्टमेव।,

(३) कर्मणः प्रसिद्धे सति – 'मेघो वर्षति' अत्र वाक्ये कर्म जलम् अत्यधिकं प्रसिद्धमस्ति अतः न प्रयुज्यते। तदा धातुः अकर्मको भवति।

(४) अविवक्षातः – यदा धातोः कर्म तु भवति परं तस्य विवक्षा न भवति तदाऽपि धातुः अकर्मको भवति यथा – पाचकः पचति इत्यत्र पच् धातुः अकर्मकोऽस्ति यद्यपि तस्य कर्म ओदनभोजनादिनां प्राप्तिर्भवति परं अविवक्षातः तेषां न प्रयोगः। एतेषु स्थलेषु ''गतिबुद्धिप्रत्यवसानार्थ.'' इति सूत्रे अकर्मकत्वेन केषां ग्रहणं तर्हि मूले लिखितम् –**येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽत्राऽकर्मकाः, न त्वविवक्षितकर्माणोऽपि**। तेन मासामासयति देवदत्तम् इत्यादौ कर्मत्वं भवति, देवदत्तेन पाचयति इत्यादौ तु न।

(१) **मासमासयति देवदत्तम्** – इत्यत्र देवदत्तः मासम् आस्ते इति अण्यन्तावस्थायाः प्रयोगः ण्यन्तावस्थयां-तम् अन्यः आसयति इत्यर्थे मासमायति देवदत्तम् इति भवति। अस्मिन्वाक्ये आस् धातुः मास इति कर्मपदस्य प्रयुक्तेऽपि अकर्मकोऽस्ति। यतो हि कालवाचकस्य मासकर्मणः प्रयोगे धातुः सकर्मको न भवति इति सूत्रे व्याख्यायां स्पष्टम्। एतस्मादेव आस् धातोः अकर्मकत्वे सति अण्यन्तावस्थायाः कर्तुः देवदत्तस्य ण्यन्तावस्थायां ''गतिबुद्धि.'' इति सूत्रेण कर्मसंज्ञा भवति।

(२) **देवदत्तेन पाचयति ( यज्ञदत्तः )** – इत्यत्र 'यज्ञदत्तः पचति' इत्यण्यन्तावस्था तं प्रेरयति यज्ञदत्तः इत्यर्थे ण्यन्तावस्थायां भवति देवदत्तेन पाचयति इति। इत्यत्र पच् धातुः सकर्मकोऽस्ति। अत्र ओदनभोजनादिनां कर्मणामविवक्षातः अकर्मत्वेन ''गतिबुद्धिप्रत्य.'' इति सूत्रस्य प्रवृत्तिः न भवति। यतोहि मूले लिखितम् – न त्वविवक्षितकर्माणोऽपि। अतः प्रयोज्य कर्तुः देवदत्तस्य कर्मसंज्ञा न भवति अपितु अनुक्तत्वात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीया भवति देवदत्तेन पाचयति इति दिक्।

**५४१ ह्रक्रोरन्यतरस्याम् १/४/५३ ह्रक्रोरणौ यः कर्ता स णौ वा कर्मसञ्ज्ञः स्यात्। हारयति कारयति वा भृत्यं भृत्येन वा कटम्। 'अभिवादिदृशोरात्मनेपदे वेति वाच्यम्' ( वा. १११४ )। अभिवादयते दर्शयते देवं भक्तं भक्तेन वा।**

**पदविभागः** – ह्रक्रोः, अन्यतरस्याम्

**सूत्रप्रकारः** – संज्ञासूत्रम्

**सरलार्थः** – हृ, कृ इत्यनयोः अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां विकल्पेन कर्मसञ्ज्ञा भवति।

**व्याख्या** – हा च क्रा च इति ह्रकरौ, तयोः ह्रक्रोः (द्वन्द्वगर्भ तत्पुरुषसमासः) कारके इत्यस्याधिकारो वर्तते।

अन्यतरस्याम् इति पदस्यार्थो विद्यते विकल्पेन। ''गतिबुद्धिप्रत्यवसानार्थ.'' – इति सूत्रात् णौ, कर्ता, अणि इत्येतेषां ''कर्तुरीप्सिततमं कर्म'' इति सूत्रात् कर्म इति पदस्य चानुवृत्तिरायाति।

**रूपलेखनप्रकार: –** हारयति कारयति वा भृत्यं भृत्येन वा कटम्। इत्यत्र भृत्य: कटं हरति करोति वा इत्यण्यन्तावस्था। तमन्य: प्रेरयति इत्यर्थे हारयति कारयति वा भृत्यं भृत्येन वा कटम् इति ण्यन्तावस्था भवति। अत्र अण्यन्तावस्थाया: कर्तृपदमस्ति 'भृत्य:' एतस्य ण्यन्तावस्थायां ''हृक्रोरन्यतरस्याम्'' इति सूत्रेण विकल्पेन कर्मसंज्ञा भवति 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायाम् अम्प्रत्यये भृत्यम् इति भवति। पक्षे कर्मसंज्ञाभावे अनुक्ते प्रयोज्यकर्तरि ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयाभवति भृत्येन इति जायते हारयति कारयति वा भृत्यं भृत्येन वा कटम् इति सिद्धम्।

**विशेष: –** प्रकृतसूत्रं प्राप्ताप्राप्तविभाषासूत्रमस्ति (उभयविभाषासूत्रम्) एतदर्थमेवान्यतरस्यामिति पदस्य प्रयोगो विद्यते। हृ कृ इत्यनयो: पाठ: ''गतिबुद्धि.-'' इति सूत्रे नास्ति, तस्मात् अनयो: योगे कर्मसंज्ञा प्राप्ता न भवति अत एव अप्राप्तस्थले एतेन सूत्रेण कर्मसंज्ञा विधीयते। पुनश्च अभिपूर्वकात् अवपूर्वकाच्च हृधातु प्रयोगो भक्षणार्थे भवति। विपूर्वकात् कृ धातुप्रयोगो भवति तदा अकर्मकत्वं भवति। एवं उभयोरेव स्थानयो: अण्यन्तावस्थाया: कर्तु: ण्यन्तावस्थायां ''गतिबुद्धि प्रत्यवसानार्थ.'' – इति सूत्रेण नित्यं कर्मसंज्ञा प्राप्ता भवति तं प्रबाध्य अनेन वैकल्पिक विधानं क्रियते। अत एव अप्राप्तस्थले प्राप्तस्थले च उभयोरेव स्थानयो: विकल्पेन कर्मसंज्ञाविधानात् सूत्रमिदं उभयत्रविभाषा सूत्रं कथ्यते।

**वा. अभिवादिदृशोरात्मनेपदे वेति वाच्यम् –**

**वार्तिकार्थ:** – आत्मनेपदे अभिपूर्वकात् वद् धातु प्रयोगे दृश् धातु प्रयोगे च अण्यन्तावस्थाया: कर्ता ण्यन्तावस्थायां विकल्पेन कर्मसंज्ञको भवति।

**रूपलेखनप्रकार:** – अभिवादयते दर्शयते देवं भक्तं भक्तेन वा (१) अभिवादयते देवं भक्तम्, अभिवादयते देवं भक्तेन वा (२) दर्शयते देवं भक्तम्, दर्शयते देवं भक्तेन वा।

(१) अभिवादयते देवं भक्तं भक्तेन वा – इत्यत्र भक्त: देवं अभिवदति इत्यण्यन्तावस्था। तम् अन्य: प्रेरयति इत्यर्थे णिच् प्रत्यये ''णिचश्च'' इत्यनेन आत्मनेपदे ण्यन्तावस्थायां अभिवादयते देवं भक्तं भक्तेन वा भवति। अत्र अण्यन्तावस्थाया: कर्तु: 'भक्त' इत्यस्य ण्यन्तावस्थायां ''अभिवादिदृशो.'' इति वार्तिकेन विकल्पेन कर्मसंज्ञा भवति ''कर्मणिद्वितीया'' इति सूत्रेण द्वितीया विभक्ति: भवति भक्तम् इति सिद्धम्। पक्षे कर्मसंज्ञाभावे कर्तु: अनुक्तत्वात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयाविभक्ति: भवति भक्तेन इति सिद्धम्। अभिवादयते देवं भक्तं भक्तेन वा इति प्रयोगो भवति। परस्मैपदे तु कर्मसंज्ञा न भवति अत: अभिवादयति देवं भक्तेन प्रयोगोऽयं भवति।

(२) दर्शयते देवं भक्तं भक्तेन वा – इत्यत्र 'भक्त: देवं पश्यति' इति अण्यन्तावस्था तं पूजक: प्रेरयति इत्यर्थे णिच् प्रत्यये ''णिचश्च'' इति सूत्रेण आत्मनेपदे दर्शयते देवं भक्तं भक्तेन वा इति भवति। अत्र अण्यन्तावस्थाया: कर्तु: ''भक्त:'' इत्यस्य ण्यन्तावस्थायां ''दृशेश्च'' इति वार्तिकेन नित्यं कर्मसंज्ञा प्राप्ता भवति तं प्रबाध्य ''अभिवादिदृशोरात्मनपदे वेति वाच्यम्'' इति वार्तिकेन विकल्पेन कर्मसंज्ञायां ''कर्मणि द्वितीया'' इत्यनेन द्वितीयाविभक्तौ अम् प्रत्यये भक्तम् इति भवति। पक्षे कर्मसंज्ञाभावे अनुक्ते कर्तरि भक्तशब्दात् ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयाविभक्ति: प्रयुज्यते भक्तेन इति भवति। दर्शयते भक्तं भक्तेन वा इति सिद्धम्। परस्मैपदे कर्मसंज्ञाभावे तु दर्शयति देवं भक्तेन इति प्रयोगो भवति।

**विशेष:** – वार्तिकमिदं प्राप्ताप्राप्तविषयकत्वात् उभयत्रविभाषा अस्ति। प्रथमे उदाहरणे ''गतिबुद्धिप्रत्य-' इति सूत्रेण कर्मसंज्ञा अप्राप्ताऽसीत्, द्वितीये उदाहरणे ''दृशेश्च'' इत्यनेन नित्यं कर्मसंज्ञा प्राप्ता आसीत्। द्वयोरेव स्थानयो: ''अभिवादिदृशोरात्मनेपदे वेति वाच्यम्'' इत्यस्य विकल्पेन प्रवृत्ति: भवति।

**५४२ अधिशीङ्स्थाऽऽसां कर्म १/४/४६ ।। अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः।**

(१) पद विभागः - अधिशीङ्स्थासां, कर्म।

(२) सूत्रप्रकारः - संज्ञासूत्रम्

**सरलार्थः** - अधिपूर्वाणां शीङ् स्था, आस् एतेषां धातूनां आधारस्य कर्मसंज्ञा भवति।

**व्याख्या** - शीङ् च स्था च आस् चेति शीङ्स्थासः (इतरेतरद्वन्द्वः)। अधिपूर्वाः शीङ्स्थासः इति विग्रहे ''शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्'' इति समासे पूर्व इत्यस्य च लोपे षष्ठी बहुवचने 'अधिशीङ्स्थासाम्'' इति भवति। कर्म - इति प्रथमान्तं पदम्। कारके इत्यस्याधिकारो वर्तते। 'आधारोऽधिकरणम्' इत्यनेन आधारस्यानुवृत्तिरायाति। 'अधि' इत्यस्य प्रत्येकस्मिन् धातौ योगः। सूत्रे शीङ् स्वप्ने, ष्ठा गतिनिवृत्तौ, आस उपवेशने च धातूनां ग्रहणमस्ति। अत्र त्रिषु एव स्थानेषु औपश्लेषिकाधारो एव गृह्यते संयोगादिसम्बन्धत्वात्। अत्र त्रय एव धातवः अकर्मकाः सन्ति परं आधारस्य कर्मसंज्ञाकृतायां सकर्मकाः भवन्ति इति। अधिकरणसंज्ञायाः अपवादसूत्रमिदम्।

**रूपलेखनप्रकारः - (१) अधिशेते बैकुण्ठं हरिः** - अत्र अधिपूर्वकात् शीङ् धातोराधारस्य बैकुण्ठशब्दस्य 'आधारोऽधिकरणम्' इति सूत्रेण प्राप्ताम् अधिकरणसंज्ञां प्रबाध्य ''अधिशीङ्स्थासां कर्म'' इति सूत्रेण कर्मसंज्ञाकृतायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तौ अम्प्रत्यये अधिशेते बैकुण्ठं हरिः इति सिद्धं भवति।

**(२) अध्यास्ते बैकुण्ठं हरिः** - अत्रापि अधिपूर्वकात् आस् धातोराधारस्य बैकुण्ठशब्दस्य पूर्वानुसारेण कर्मसंज्ञायां प्रयोगोऽयं सिद्धो भवति।

**(३) अधितिष्ठति बैकुण्ठं हरिः** - अत्रापि अधिपूर्वकात् स्थाधातोराधारस्य बैकुण्ठशब्दस्य पूर्वानुसारेण कर्मसंज्ञायां प्रयोगोऽयं सिद्धो भवति।

अत्र त्रिषु एव स्थलेषु अधिपूर्वं न स्यात् तदा तु अस्य सूत्रस्य प्रवृत्तिः न भवति। तत्र अधिकरणसंज्ञायां सप्तमी एव भविष्यति हरिः बैकुण्ठे शेते इतिवद् अन्यत्रापि बोध्यम्।

**५४३ अभिनिविशश्च १/४/४७ ।। अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्। 'परिक्रयणे संप्रदानम्-' (१/४/४४) इति सूत्रादिह मण्डूकप्लुत्या अन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः।**

**पदविभागः** - अभिनिविशः, च।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अभि+नि इत्येतत् समुदायपूर्वकस्य विश् धातोराधारः कारकं कर्मसंज्ञं स्यात्।

**व्याख्या** - अभिश्च निश्चेति अभिनी (इतरेतरद्वन्द्वः) ताभ्यां परो विश् तस्मात् अभिनिविशः। (द्वन्द्वगर्भतत्पुरुषः)। अभिनिविशः - इति षष्ठ्यन्तं पदम्। च - इति अव्ययपदम्। चकारात् ''अधिशीङ्स्थासां कर्म'' इति सूत्रात् कर्म इत्यस्यानुवृत्तिरायाति। 'आधारोऽधिकरणम्' इत्यनेन आधारः इत्यस्यानुवृत्तिः भवति। ''कारके'' इत्यस्याधिकारो वर्तते। अत्र सूत्रे अविकल्पसंघातस्येव ग्रहणम्। अतएव अभि+विश्, नि+विश्, न्यभि+विश् एतेषां त्रयाणामेव प्रयोगो निषिद्धः। अत्र अभि+नि इत्येतत् समुदायपूर्वकमेव ग्राह्यम्। इत्यस्मिन् सूत्रपाठ एव प्रमाणम्।

**रूपलेखनप्रकारः - अभिनिविशते सन्मार्गम्** - अत्र सन्मार्ग इत्यस्य आधारोऽधिकरणम् इति सूत्रेण प्राप्तां अधिकरणसंज्ञां प्रबाध्य अभि नि इत्येतत् समुदायपूर्वकात् विश् धातोराधारस्य ''सन्मार्ग'' इत्यस्य ''अभिनिविशश्च'' इति सूत्रेण कर्मसंज्ञाकृतायां ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ अम् प्रत्यये अभिनिविशते सन्मार्गम् इति सिद्धम्।

**पापेऽभिनिवेशः** - इत्यत्र ''परिक्रयणे संप्रदानमन्यतरस्याम्'' इति सूत्रादिह मण्डूकप्लुतिन्यायेन अन्यतरस्यामिति पदस्यानुवर्तनं मन्यते। अन्यतररस्यामस्ति व्यवस्थितविभाषा। व्यवस्थितविभाषा इत्यस्य तात्पर्यमस्ति सूत्रस्य क्वचित्

अप्रत्तिरेव। अतः पापेऽभिनिवेशः प्रयोगेऽस्मिन् सूत्रस्यास्य प्रवृत्तिः न भवति तस्मात् कर्मसंज्ञाऽपि न भवति। अतएव ''आधारोऽधिकरणम्'' इत्यनेन अधिकरणसंज्ञायां सप्तम्यधिकरणे च इत्यनेन सप्तमी भवति।

**मण्डुकप्लुतिः** – अष्टाध्यायीक्रमे ''परिक्रयणे सम्प्रदानमन्यतरस्याम्'' ''अभिनिविशश्च'' अनयोः द्वयोर्मध्ये आधारोऽधिकरणम्, ''अधिशीङ्स्थासां कर्म'' इत्यनयोः पाठो विहितः। तत्र अनयोः द्वयोरेव सूत्रयोः अन्यतरस्यामिति पाठस्यानुवर्तनं न भवति तस्मात् मण्डुकप्लुतिन्यायस्याश्रयणेन ''परिक्रयणे सम्प्रदानमन्यतरस्याम्'' इति सूत्रादिह अन्यतरस्यामित्यस्य ग्रहणं वर्तते।

**५४४ उपान्वध्याङ्वसः १/४/४८।। उपादिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः। वा. 'अभुक्त्यर्थस्य न'। वने उपवसति।**

**वा.का. – 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**

**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।' उभयतः कृष्णं गोपाः। सर्वतः कृष्णम्। धिक् कृष्णाभक्तम्। उपर्युपरि लोकं हरिः। अध्यधि लोकम्। अधोऽधो लोकम्।**

**वा. 'अभितः परितःसमया-निकषा-हा-प्रति-योगेऽपि'। अभितः कृष्णम्। परितः कृष्णम्। ग्रामं समया। निकषा लङ्काम्। हा कृष्णाभक्तम्, तस्य शोच्यत इत्यर्थः। 'बुभुक्षितं न प्रतिभाति किञ्चित्'।**

**पदविभागः** – उपान्वध्याङ्वसः (एकमेव पदम्)

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – उपपूर्वस्य अनुपूर्वस्य अधिपूर्वस्य आङ्पूर्वस्य च वस् धातोराधारः कारकं कर्मसंज्ञकं भवति।

**व्याख्या** – उपश्च अनुश्च अधिश्च आङ् च उपान्वध्याङः, तेभ्यः परो वस् उपान्वध्याङ्वस्, तस्मात् उपान्वध्याङ्वसः (द्वन्द्वगर्भतत्पुरुषः)। पञ्चम्यन्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'अधिशीङ्स्थासां कर्म' इत्यतः कर्म इत्यनुवर्तते, आधारोऽधिकरणम् इत्यतश्च आधार इति।

**रूपलेखनप्रकारः** – (१) उपवसति बैकुण्ठं हरिः – इत्यत्र ''उपवसति'' इत्यस्याधारस्य ''बैकुण्ठ'' इत्यस्य आधारोऽधिकरणम् इति सूत्रेण प्राप्तां अधिकरणसंज्ञां प्रबाध्य ''उपान्वध्याङ्वसः'' इति सूत्रेण कर्मसंज्ञा कृतायां ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ अम् प्रत्यये उपवसति बैकुण्ठं हरिः इति सिद्धम् भवति। एवमेव अनुवसति अधिवसति आवसति इत्यादिष्वपि बोध्यम्। अत एव उपसति अनुवसति अधिवसति आवसति वा बैकुण्ठं हरिः इति प्रयोगो भवति।

**वा. अभुक्तर्थस्य न –**

**वार्तिकार्थः** – उपपूर्वस्य वस् धातोराधारस्य कर्मसंज्ञा न भवति भोजनाभावे (उपवासे) अर्थे।

**वने उपवसति** – अत्र 'उपवसति' इत्यस्याधारः 'वनम्' अस्ति अतः ''उपान्वध्याङ्वसः'' इति सूत्रेण कर्मसंज्ञा प्राप्ता भवति तस्याः कर्मसंज्ञायाः 'अभुक्तर्थस्य न' इति निषेधे कृते ''आधारोऽधिकरणम्'' इत्यनेन अधिकरणसंज्ञायां ''सप्तम्यधिकरणे च'' इत्यनेन सप्तमी भवति वने उपवसति इति सिद्धम्।

**। इति कारकद्वितीया।**

## अथ उपपदविभक्तिः ( द्वितीयायाम् )

**( वार्तिक-कारिका )**

**उभसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु।**
**द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।**

**वार्तिकार्थः** – चतुर्षु भागेषु विभजनं कृत्वा अस्य वार्तिकस्यार्थो क्रियते।

(१) उभसर्वतसोः द्वितीया कार्या। तद्धिते तसि प्रत्यये उभशब्दात् उभयतः, सर्वशब्दात् सर्वतः इति भवति। अनयोः द्वयोः योगे द्वितीया कार्या।

(२) धिक् इति योगे द्वितीया कार्या

(३) उपर्यादिषु इत्यनेन ''उपर्युध्यधसस्सामीप्ये'' सूत्रे पठितानां उपरि अधि, अधस् एतेषामव्ययमानां ग्रहणं भवति। शब्दस्य द्वित्वे कृते ''तस्य परमाम्रेडितम्'' इति सूत्रेण आम्रेडितसंज्ञा भवति। तस्या एव अत्र ग्रहणम्। अतएव उपर्युपरि, अधोऽधः, अध्यधि इत्यादिषु आम्रेडितान्तेषु द्वितीया कार्या।

(४) ततोऽन्यत्रापि दृश्यते – उपर्युक्ताद् अन्यत्र स्थलेष्वपि द्वितीया भवति।

**रूपलेखनप्रकारः** – (१) उभयतः कृष्णं गोपाः – कृष्णस्य उभयोः पार्श्वयोः गोपाः सन्ति इत्यर्थे तस् प्रत्ययान्तस्य ''उभयतः'' इत्यस्य योगे कृष्णशब्दात् द्वितीयाविभक्तिः भवति उभयतः कृष्णं गोपाः इति सिद्धम्।

(२) सर्वतः कृष्णं गोपाः – कृष्णस्य सर्वेषु भागेषु गोपाः सन्ति इत्यर्थे तस् प्रत्ययान्तस्य सर्वतः इत्यस्य योगे कृष्णशब्दात् द्वितीयाविभक्तिः भवति।

(३) धिक् कृष्णाभक्तम् – कृष्णाभक्तस्यनिन्दा इत्यर्थे धिक् शब्दस्य योगे 'कृष्णाभक्त' इत्यस्मात् द्वितीया विभक्तिः भवति।

**विशेषः** – ननु 'धिङ् मूर्ख' इति वाक्ये धिक् योगे द्वितीया न दृश्यते तर्हि कारणमत्र यत् वाक्ये प्रयुक्तोऽयं मूर्खशब्दः सम्बोधनान्तः ''मूर्ख। त्वां धिक्'' इति बोध्यम्। अत एव धिक् योगे त्वाम् इत्यादीनाम् अध्याहार क्रियते।

(४) उपर्युपरि लोकं हरिः – अत्र 'लोकस्य समीपे उपरि हरिर्विद्यते इत्यर्थः। उपरि इत्यस्य ''उपर्यध्यधसस्सामीप्ये'' इत्यनेन समीपेऽर्थे द्वित्वं भवति पुनश्च आम्रेडितत्वात् ''उपर्युपरि'' इत्यस्य योगे लोकशब्दात् द्वितीया विभक्तिः भवति।

(५) अध्यधि लोकं हरिः – हरिः लोकस्य समीपदेशे विद्यते इत्यर्थः। ''अध्यधि'' इति योगे लोकशब्दात् द्वितीया भवति।

(६) अधोऽधो लोकं हरिः – लोकस्य समीपे अधोदेशे हरिरस्ति इत्यर्थः। अत्रापि पूर्वानुसारेणैव द्वितीया भवति।

**वा. अभितः परितः समयानिकषाहाप्रतियोगेऽपि।**

**वार्तिकार्थः** – पूर्वश्लोकवार्तिकस्य ''ततोऽन्यत्रापि दृश्यते'' इति पाठस्य प्रपञ्चमात्रमिदं वार्तिकम्। तेन वार्तिके पठितानां शब्दानां योगेऽपि द्वितीया भवति इत्यर्थो प्राप्यते।

**रूपलेखनप्रकारः**– (१) अभितः कृष्णम् (गोपाः) – अभितः इत्यस्यार्थः पार्श्वद्वये इति। अत्र ''अभितः'' इत्यस्य योगे कृष्णशब्दात् ''अभितः परितः समया.'' – इति वार्तिकेन द्वितीया भवति।

(२) परितः कृष्णम् (गोपाः) – ''परितः'' इत्यस्यार्थः सर्वेषु भागेषु। पूर्वानुसारमेव अत्रापि द्वितीया भवति।

(३) ग्रामं समया – 'समया' इत्यस्यार्थः समीपे। अत्रापि समया इत्यस्य योगे ग्रामशब्दात् द्वितीया भवति।

(४) निकषा लङ्काम् – ''निकषा'' इत्यस्यार्थः समीपे। अत्र लङ्काशब्दात् द्वितीया भवति।

(५) हा कृष्णाभक्तम् – ''हा'' इत्यव्ययपदं खेदार्थे विषादे च प्रयुक्तं भवति। अत्र 'कृष्णाभक्त' इत्यस्मात् द्वितीया विभक्तिः भवति।

(६) बुभुक्षितं न प्रतिभाति किञ्चित् – 'क्षुधापीडितस्य किमपि न स्फुरति' इत्यर्थे भाति इत्यत्र भा दीप्तौ इति धातुः स्फुरणेऽर्थे विद्यते। अतः ''लक्षणेत्थंभूताख्यानभागवीप्सासुप्रतिपर्यनवः'' इत्यनेन कर्मप्रवचनीयसंज्ञा न भवति। ''कर्मप्रवचनीययुक्ते द्वितीया'' इत्यस्य गतार्थता न भवति च। अतः प्रति योगे बुभुक्षित-शब्दात् द्वितीया भवति।
**विशेषः** – वार्तिकेऽस्मिन् 'अपि' शब्दबलेन सूच्यते यत् वार्तिकस्थलाद् अन्यत्र स्थलेष्वपि द्वितीया प्राप्यते, अतः वर्जनार्थके 'ऋते' इति शब्दस्य योगेऽपि द्वितीयायाः प्रयुक्तिः दृश्यते यथा – फलति पुरुषाराधनमृते।

**५४५ अन्तराऽन्तरेणयुक्ते २/३/४।। आभ्यां योगे द्वितीया स्यात्। अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।**
**पदविभागः** – अन्तराऽन्तरेण युक्ते।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सरलार्थः** – अन्तरा, अन्तरेण इत्येताभ्यामव्ययपदाभ्यां योगे द्वितीया भवति।
**रूपलेखनप्रकारः** – (१) अन्तरा त्वां मां हरिः – तव मम च मध्ये हरिः इत्यर्थे ''अन्तराऽन्तरेण युक्ते'' इति सूत्रेण अन्तरा शब्दस्य योगे यष्मद् तथा च अस्मद् शब्दात् द्वितीयाविभक्तिः क्रियते त्वां माम् इति भवति। अन्तरा त्वां मां हरिः इति सिद्धम्।
(२) अन्तरेण हरिं न सुखम् – हरिं विना न सुखम् इत्यर्थे ''अन्तराऽन्तरेणयुक्ते'' इति सूत्रेण 'अन्तरेण' इति शब्दस्य योगे हरिशब्दात् द्वितीयाविभक्तिः क्रियते हरिम् इति भवति। अन्तरेण हरिं न सुखम् इति सिद्धम्।

**५४६ कर्मप्रवचनीयाः १/४/८३ इत्यधिकृत्य।**

**सूत्रप्रकारः** – अधिकारसूत्रम्।
**व्याख्या** – सूत्रमिदं द्विधा कार्यं करोति संज्ञासूत्रत्वेन अधिकारसूत्रत्वेन च। ''प्राग्रीश्वरान्निपाताः'' इति सूत्रपर्यन्तमस्याधिकारो वर्तते। कर्मप्रवचनीयाः इत्यन्वर्थसंज्ञा विद्यते। कर्म प्रोक्तवन्तः इति कर्मप्रवचनीयाः भवन्ति। कर्मपदमत्र क्रियावाचकं विद्यते। अत एव एते कर्मप्रवचनीयाः क्रियाकृतं विशेषसम्बन्धं द्योतयन्ति। भर्तृहरिणा वाक्यपदीये उक्तम् –

**क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।**
**नापि क्रियापदापेक्षी सम्बन्धस्य तु द्योतकः।।**

**५४७ अनुर्लक्षणे १/४/८४ लक्षणे द्योत्येऽनुरुक्तसञ्ज्ञः स्यात्। गत्युपसर्गसञ्ज्ञापवादः।**
**पदविभागः** – अनुः, लक्षणे
**सूत्रप्रकारः** – संज्ञासूत्रम्
**सरलार्थः** – लक्ष्यलक्षणभावसम्बन्धे द्योत्ये ''अनु'' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**५४८ कर्मप्रवचनीययुक्ते द्वितीया (२/३/८)**

**एतेन योगे द्वितीया स्यात्। पर्जन्यो जपमनु प्रावर्षत्। हेतु भूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीया अनेन बाध्यते 'लक्षणेत्थं भूत.' इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्।**
**पदविभागः** – कर्मप्रवचनीययुक्ते, द्वितीया
**सूत्रप्रकारः** – विधिसूत्रम्।
**सरलार्थः** – कर्मप्रवचनीयेन युक्ते द्वितीया भवति।
**रूपलेखनप्रकारः** – पर्जन्यो जपमनु प्रावर्षत्- अत्र वर्षणस्य हेतुभूतं जपम्, अनुः द्योतयति। अतः ''अनुर्लक्षणे'' इति सूत्रेण अनु इत्यस्य कर्मप्रवचनीयसंज्ञा भवति ''कर्मप्रवचनीययुक्ते द्वितीया'' इति सूत्रेण अनु इत्यादिना सह योगे जपशब्दात् द्वितीयाविभक्तिः भवति पर्जन्यो जपमनु प्रावर्षत् इति सिद्धम्।
**विवेचनम् – परापि हेतौ...................................सामर्थ्यात्।**
ननु ''पर्जन्यो जपमनुप्रावर्षत्'' इत्यत्र ''कर्मप्रवचननीययुक्ते द्वितीया'' इत्यनेन द्वितीयायाः ''हेतौ'' इति

सूत्रेण तृतीयायाश्चयुगपत् प्राप्तिः भवति। ''विप्रतिषेधे परं कार्यम्'' इति नियमेन परकार्यं पूर्वकार्यस्य बाधकं भवति, अत्र परकार्यमस्ति ''हेतौ'' इति सूत्रेण विधीयमाना तृतीया। अतः ''अनुर्लक्षणे'' इत्यस्य का आवश्यकता तदा अत्र उच्यते यत् यद्यपि पूर्वकार्यं परकार्यस्य बाधकं न भवति परमत्र ''लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः'' इत्यनेन अनु इत्यस्य कर्मप्रवचनीयसंज्ञा स्वत एव सिद्धा पुनरपि ''अनुर्लक्षणे'' इति सूत्रेण कर्मप्रवचनीयसंज्ञायाः विधानं क्रियते एतत्समार्थ्यात् परापि हेतौ तृतीया ''अनुर्लक्षणे'' इति सूत्रेण बाध्यते।

### ५४९ तृतीयार्थे १/४/८५

**अस्मिन् द्योत्येऽनुरुक्तसञ्ज्ञः स्यात्।**

**नदीमन्ववसिता सेना। नद्या सह सम्बद्धेत्यर्थः। 'षिञ् बन्धे' क्तः।**

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – तृतीयाऽर्थे द्योत्ये 'अनु' इत्यस्य कर्मप्रवचनीय संज्ञा भवति।

**व्याख्या** – 'कर्मप्रवचनीयाः' इत्यस्याधिकारो वर्तते। 'अनुर्लक्षणे' इति सूत्रादिह 'अनु' इत्यनुवर्तते। तृतीयार्थोऽत्र सहार्थो गृह्यते न तु कर्तृकरणे गृह्येते। तृतीयायाः मुख्यार्थे कर्तृकरणयोः कारकविभक्तेः प्राबल्यात् कर्मप्रवचनीयसंज्ञा निष्फला एव। = अन्यार्थेषु कर्मप्रवचनीयसंज्ञायाः नास्ति किमपि फलमिति।

**रूपलेखनप्रकारः** – नदीम् अन्ववसिता सेना। नद्या सह सम्बद्धा सेना इत्यर्थे ''तृतीयार्थे'' इति सूत्रेण अनु इत्यस्य कर्मप्रवचीनयसंज्ञायां ''कर्मप्रवचनीययुक्ते द्वितीया'' इति सूत्रेण अनुयोगे नदीशब्दात् द्वितीयाविभक्तिः भवति। नदीमन्ववसिता सेना इति सिद्धम्।

### ५५० हीने १/४/८६ **हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।**

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – निकर्षभावे द्योत्ये ''अनु'' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – 'हीने' इति सप्तम्यन्तमेकपदम्। 'कर्मप्रवचीयाः' इत्यस्याधिकारो वर्तते। 'अनुर्लक्षणे' इत्यतः अनु इत्यस्यानुवृत्तिरायाति। ओहाक् त्यागे (हा) धातोः क्तप्रत्यये आकारस्येत्वे ''ओदितश्च'' इत्यनेन तकारस्य नकारे कृते सिद्धं भवति। निकर्षः इत्यर्थः।

**रूपलेखनप्रकारः** – अनु हरिं सुराः – 'हरेर्हीना देवाः' इत्यर्थे ''हीने'' इति सूत्रेण ''अनु'' इत्यस्य कर्मप्रवचनीयसंज्ञायां ''कर्मप्रवचनीययुक्ते द्वितीया'' इति सूत्रेण ''अनु'' इत्यस्य योगे हरिशब्दात् द्वितीया भवति। ''अनु हरिं सुराः'' इति सिद्धम्। हीनाः = निकृष्टा इत्यर्थो गृह्यते।

### ५५१ उपोऽधिके च १/४/८७ **अधिके हीने च द्योत्य उपेत्यव्ययं प्राक्सञ्ज्ञं स्यात्।**

**अधि सप्तमी वक्ष्यते। हीने–उप हरिं सुराः।**

**पदविभागः** – उपः, अधिके च

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – अधिके हीने चार्थे द्योत्ये 'उप' इति अव्ययपदं कर्मप्रवचनीयसञ्ज्ञं स्यात्।

**व्याख्या** – 'उपः' – इति प्रथमान्तम्, 'अधिके' इति सप्तम्यन्तं, 'च' इति अव्ययपदमत्र। चकारादत्र 'हीने' इत्यस्यानुवृत्तिः आयाति। कर्मप्रवचनीयाः इत्यस्याधिकारो वर्तते। प्राक्संज्ञः – इति पदस्यार्थो विद्यते पूर्वकथितसंज्ञकः भवति अर्थात् कर्मप्रवचनीयसञ्ज्ञं स्यादिति।

**अधिके सप्तमी वक्ष्यते** – 'उप' इत्यस्य अधिकेऽर्थे कर्मप्रवचनीयसंज्ञाविधानं द्वितीयाविभक्त्यर्थं नास्ति अपितु ''यस्यादधिकं यस्य चेश्वरवचनं तत्र सप्तमी'' इत्यनेन सप्तमी विद्यास्यते, अतः मूले लिखितम् – 'अधिके सप्तमी वक्ष्यते' इति दिक्।

**रूपलेखनप्रकारः** – उप हरिं सुराः – सुराः हरेः हीनाः सन्ति इत्यर्थे हीने अर्थे द्योत्ये 'उप' इत्यव्ययस्य उपोऽधिके च इति सूत्रेण कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीययुक्ते द्वितीया" इति सूत्रेण "उप" इति योगे हरि शब्दात् द्वितीयाविभक्तिः भवति उपहरिं सुराः इति सिद्धम्।

## ५५२ लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः १/४/९०

**एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसञ्ज्ञाः स्युः।**

**लक्षणे-वृक्षं प्रति परि अनु वा विद्योतते विद्युत्। इत्थंभूताख्याने – भक्तो विष्णुं प्रति परि अनु वा। भागे – लक्ष्मीर्हरिं प्रति परि अनु वा। हरेर्भाग इत्यर्थः। वीप्सायाम् – वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। अत्रोपसर्गत्वाभावान्न षत्वम्। एषु किम्? परिषिञ्चति।**

**पदविभागः** – लक्षणेत्थंभूताख्यानभागवीप्सासु, प्रतिपर्यनवः (द्विपदात्मकम्)
**सूत्रप्रकारः** – संज्ञासूत्रम्।
**सरलार्थः** – ज्ञापकार्थे, इत्थंभूताख्यानार्थे, भागार्थविषयभूते, वीप्सार्थविषये च प्रति, परि, अनु इत्यादीनामव्ययपदानां कर्मसञ्ज्ञा भवति।
**व्याख्या** – कञ्चित्प्रकारं प्राप्तः इत्थम्भूतः इत्थम्भूतस्य आख्यानम् इत्थम्भूताख्यानम् (ष.त. समास)। लक्षणं च इत्थंभूताख्यानं च भागश्च वीप्सा च लक्षणेत्थम्भूताख्यानभागवीप्सास्तासु लक्षणेम्भूताख्यानभागवीप्सासु (इतरेतरद्वन्द्वः)। सप्तम्यन्तबहुवचनान्तं पदम्। प्रतिश्च परिश्च अनुश्च (इतरेतरद्वन्द्वः) प्रतिपर्यनवः। प्रथमाबहुवचनान्तं पदम्। कर्मप्रवचनीयाः इत्यस्याधिकारो वर्तते। इत्थंभूताख्यानम् = लक्षणशब्दार्थोऽत्र ज्ञापकम्। भागः = स्वीकार्योंऽशः, वीप्सा = पूर्णतया व्याप्तिः, सकलतया सम्बन्धुम् इच्छा वा।
**रूपलेखनप्रकारः** – **लक्षणे** – वृक्षं प्रति परि अनु वा विद्योतते विद्युत् (१) वृक्षं प्रति विद्योतते विद्युत् (२) वृक्षं परि विद्योतते विद्युत् (३) वृक्षम् अनु विद्योतते विद्युत् त्रिधाविभक्तमिदं वाक्यं मूले एकस्मिन्नेव उदाहरणे पठितमस्ति।
(१) वृक्षं प्रति विद्योतते विद्युत् – अत्र विद्युता प्रकाशमानं वृक्षं दृष्ट्वा विद्युतो ज्ञानं भवति। अतः वृक्षो ज्ञापको भवति। वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थे "लक्षणेत्थम्भूता." इति सूत्रेण लक्षणार्थे प्रति इत्यस्य कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचीनययुक्ते द्वितीया" इति सूत्रेण प्रति योगे वृक्षशब्दात् द्वितीया विभक्तिः भवति। एवमेव परि, अनु इत्यादिष्वपि उदाहरणेषु बोध्यम्। वृक्षं प्रति, परि अनु वा विद्योतते विद्युत् इति सिद्धम्।
**इत्थम्भूताख्याने** – भक्तो विष्णुं प्रति – विष्णुविषयकभक्तिमान् इत्यर्थके वाक्ये "लक्षणेत्थम्भूताख्यानभागः" इति सूत्रेण इत्थम्भूताख्यानार्थे "प्रति" इत्यस्य कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीययुक्ते द्वितीया" इति सूत्रेण प्रति योगे विष्णु शब्दात् द्वितीयाविभक्तिः भवति "भक्तो विष्णुं प्रति" इति सिद्धम्। एवमे परि, अनु इत्यादीनां योगेऽपि बोध्यम्।
**भागे** – लक्ष्मीः हरिं प्रति – लक्ष्मीः हरेः भागः इत्यर्थे भागार्थे विषयभूते "प्रति" इत्यस्य "लक्षणेत्थम्भूता." इति सूत्रेण कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीय युक्ते द्वितीया" इति सूत्रेण प्रति यागे हरिशब्दात् द्वितीयाविभक्तः भवति लक्ष्मीः हरिं प्रति इति सिद्धम्। एवमेव परि, अनु इत्यादिष्वपि बोध्यम्। मूले पठितम् लक्ष्मी हरिं प्रति परि अनु वा इति सिद्धम्। लक्ष्मीरूपस्य भागस्य हरिणा साकं स्वस्वामिभावसम्बन्धोऽत्र विद्यते।
**वीप्सायाम्** – वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। (१) वृक्षं वृक्षं प्रति सिञ्चति – प्रत्येकं वृक्षं सिञ्चति इत्यर्थेऽत्र वृक्ष शब्दस्य नित्यवीप्सयोरिति द्वित्वं जायते। वीप्सार्थविषये अत्र 'प्रति' इत्यस्य "लक्षणेत्थंभूताख्यान." इति सूत्रेण कर्मप्रवचनीयसंज्ञायां उपसर्गसंज्ञाभावात् "उपसर्गात् सुनोति सुवति" (८.१-६५) इत्यादिना सूत्रेण "सिञ्चति" इत्यस्य सस्य षत्वं न भवति। इत्येवात्र कर्मप्रवचनीयसंज्ञायाः फलम्। वृक्ष शब्दे द्वितीया तु "कर्तुरीप्सिततमं कर्म"

इति सूत्रेण कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीयाविभक्ति कृतायाम् भवति।

**एषु किम्? परिषिञ्चति** – ननु लक्षणेत्थंभूताख्यानभागवीप्सासु इति सप्तम्यन्तपदस्य ग्रहणं किमर्थम्? अत्र समाधीयते यत् एष्वेवार्थेषु विषयभूतेषु प्रति, परि, अनु इत्यादीनां कर्मप्रवचनीयसञ्ज्ञा स्यान्नत्वन्यत्र। अन्यथा तु 'परिषिञ्चति' इत्यत्र ''परि'' इत्यस्य उक्तार्थानामभावेऽपि कर्मप्रवचनीयसंज्ञायां जातायां उपसर्गसंज्ञाया: बाधात् ''उपसर्गात् सुनोति सुवति'' इति सूत्रेण षत्वं न स्यादिति दोष:। अत: सूत्रे लक्षणेत्थम्भूताख्यानभागवीप्सासु इति उच्यते।

## ५५३ अभिरभागे १/४/९१

**भागवर्जे लक्षणादावभिरुक्तसञ्ज्ञः स्यात्। हरिमभि वर्तते। भक्तो हरिमभि। देवं देवमभिसिञ्चति। अभागे किम्? यदत्र ममाभिष्यात् तद्दीयताम्।**

**पदविभाग:** – अभि:, अभागे।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सरलार्थ:** – लक्षणेत्थंभूताख्यानवीप्सासु एव अर्थेषु द्योत्येषु ''अभि:'' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – अभि: प्रथमान्तम्, अभागे–सप्तम्यन्तम्। कर्मप्रवचनीया: इत्यस्याधिकारो वर्तते।'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव:' इति सूत्रादिह 'लक्षणेत्थम्भूताख्यानवीप्सासु' इत्यस्यानुवृत्तिरायाति। प्रकृतसूत्रे 'अभागे' इति प्रतिषेधवचनस्य ग्रहणात् भागे अर्थे अत्र कर्मप्रवचनीयसंज्ञा न भवति।

**रूपलेखनप्रकार:** – (१) हरिम् अभिवर्तते – इत्यत्र 'अभिरभागे' इति सूत्रेण लक्षणेऽर्थे द्योत्ये 'अभि' इत्यस्य कर्मप्रवचनीयसंज्ञायां ''कर्मप्रवचनीययुक्तेद्वितीया'' इति सूत्रेण 'अभि' योगे हरिशब्दात् द्वितीया भवति, हरिम् अभि वर्तते इति सिद्धम्। अत्र हरे: आनुकूल्यमेव लक्ष्यस्य ज्ञापकमस्ति।

(२) भक्तो हरिमभि – हरिविषयकभक्तिमान् इत्यर्थे ''अभिरभागे'' इति सूत्रेण इत्थंभूताख्यानार्थे ''अभि'' इत्यस्य कर्मप्रवचनीयसंज्ञायां ''कर्मप्रवचनीययुक्तेद्वितीया'' इति सूत्रेण अभियोगे हरि शब्दात् द्वितीयाविभक्ति: भवति, भक्तो हरिमभि इति सिद्धम्।

देवं देवम् अभिसिञ्चति – प्रत्येकं देवं स्नपयति इत्यर्थे ''अभिरभागे'' इति सूत्रेण वीप्सायाम् ''अभि'' इत्यस्य कर्मप्रवचनीयसंज्ञायां उपसर्गसंज्ञाबाधात् ''उपसर्गात् सुनोतीत्यादिना'' सूत्रेण सिञ्चति इत्यस्य सस्य षत्वं न भवति देवं देवम् अभिसिञ्चति इति सिद्धम्।

**अभागे किम्?** – ननु 'अभिरभागे' इति सूत्रे अभागे इति पदं नोच्यते तदा भागेर्थे द्योत्येऽपि कर्मप्रवचनीयसंज्ञा प्राप्ता स्यात्। तथा हि ''यदत्र ममाभिष्यात् तद् दीयताम्'' अस्मिन्वाक्ये 'अभि' इत्यस्य प्रयोग: भागेऽर्थेऽस्ति। यदि अस्य कर्मप्रवचनीयसंज्ञा स्यात् तदा तु उपसर्गसंज्ञाभावात् ''उपसर्गप्रादुर्भ्यामस्तिर्यच्पर:'' इति सूत्रेण षत्वं न भवति इति दोषोत्पत्तिर्जायते। तन्न स्यात् एतदर्थमेवात्र 'अभागे' इति पदस्य ग्रहणमस्ति। तेन 'अभिष्यात्' इत्यत्र सस्य षत्वं निर्बाधमेव।

## ५५४ अधिपरी अनर्थकौ १/४/९४

**उक्तसञ्ज्ञौ स्त:। कुतोऽध्यागच्छति? कुत: पर्यागच्छति? गतिसञ्ज्ञाबाधाद् 'गतिर्गतौ' इति निघातो न।**

**पदविभाग:** – अधिपरी, अनर्थकौ।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सरलार्थ:** – अधि, परि इत्येतौ अर्थरहितौ कर्मप्रवचनीयसंज्ञकौ स्त:।

**व्याख्या** – अधिश्च परिश्चेति अधिपरी (इतरेतरद्वन्द्व:)। विद्यतेऽर्थो ययोस्तौ अनर्थकौ (बहुव्रीहि:)। अधिपरी–इति प्रथमाद्विवचनान्तं पदम्। अनर्थकौ – इत्यपि प्रथमाद्विवचनान्तमस्ति। कर्मप्रवचनीया: इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः** – (१) कुतोऽध्यागच्छति – कस्मात् स्थानात् आगच्छति इत्यर्थे अनर्थकस्य 'अधि' इत्यस्य "अधिपरी अनर्थकौ" इति सूत्रेण कर्मप्रवचनीयसंज्ञायां जातायां गतिसंज्ञायाः बाधो भवति। अतएव 'गतिर्गतौ' इत्यनेन विधीयमानो निघातः = अनुदात्तस्वरो न भवति, कुतोऽध्यागच्छति इति सिद्धम्।
(२) कुतः पर्यागच्छति – "कस्मात् स्थानात् आगच्छति" इत्यर्थे पूर्वानुसारेणैव 'परि' इत्यस्य कर्मप्रवचनीयसंज्ञायां सिद्धोऽयं प्रयोगः।

**५५५ सुः पूजायाम् १/४/९४ सुसिक्तम्, सुस्तुतम्। अनुपर्सत्वान्न षः। पूजायाम् किम्? सुषिक्तं किं तवात्र। क्षेपोऽयम्।**

**पदविभागः** – सुः, पूजायाम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – पूजायामर्थे द्योत्ये 'सु' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – 'सुः' इति प्रथमान्तं पदम्। पूजायाम् – इति सप्तम्यन्तपदम्। 'कर्मप्रवचनीयाः' इत्यस्याधिकारो वर्तते।

**उदाहरणम्** – (१) सुसिक्तम्, सुस्तुतम् – उभयत्र प्रयोगे 'सुः' इत्यस्य प्रयोगो पूजायामर्थे विहितः। अतएव 'सु' इत्यस्य 'सुः पूजायाम्' इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। एतस्मात् उपसर्गसञ्ज्ञाभावात् 'सुसिक्तम्' इत्यत्र "उपसर्गात् सुनोति" इत्यादिना सूत्रेण सस्य षत्वं न भवति सुसिक्तम् इति जायते। एवमेव सुस्तुतम् इत्यत्रापि बोध्यम्।
**पूजायां किम्? सुषिक्तं किं तवात्र** – ननु 'सुः पूजायाम्' सूत्रे 'पूजायाम्' इति नोच्यते तदा तु निन्दागम्यमानेऽपि 'सु' इत्यस्य कर्मप्रवचनीयसंज्ञा प्राप्ता स्यात्। तेन सुषिक्तं किं तवात्र – अत्र त्वया किमपि न सिक्तमिति निन्दाभावो गम्यते, अत एव 'पूजायाम्' इति पदस्य ग्रहणेन सुषिक्तं किं तवात्र अत्र कर्मप्रवचनीयसंज्ञा न भवति पुनश्च उपसर्गसंज्ञकत्वात् सस्य षत्वं निर्बाधमेव।

**५५६ अतिरतिक्रमणे च १/४/९५ अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीयसञ्ज्ञः स्यात्। अति देवान् कृष्णः।**

**पदविभागः** – अतिः, अतिक्रमणे च।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – पूजायाम् अतिक्रमणे च 'अति' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – अतिः–प्रथमान्तं पदम्। अतिक्रमणे–सप्तम्यन्तं पदम्। च – इति अव्ययपदम्। चकारात् पूर्वसूत्रादत्र 'पूजायाम्' इति पदस्यानुवृत्तिरायाति। "कर्मप्रवचनीयाः" इत्यस्याधिकारो वर्तते।

**उदाहरणम्** – अतिदेवान् कृष्णः – कृष्णः देवेभ्यः अधिकः इत्यर्थे "अतिरतिक्रमणे च" इति सूत्रेण "अति" इत्यस्य कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीययुक्ते द्वितीया" इति सूत्रेण "अति" इति योगे देवशब्दात् द्वितीयाविभक्तिः भवति अतिदेवान् कृष्णः इति सिद्धम्। द्वयोरेवार्थयोरिदमेकमेव उदाहरणम्।

**५५७ अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चेषु १/४/९६ एषु द्योत्येष्वपिरुक्तसञ्ज्ञः स्यात् सर्पिषोऽपि स्यात्। अनुपर्सत्वान्न षः। संभावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपि शब्दः स्यादित्यनेन सम्बध्यते। 'सर्पिषः' इति षष्ठी त्वपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसंबन्धे। इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्तते, सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तवात्। अपि स्तुयाद्विष्णुम्, संभावनं शक्त्युत्कर्षमाविष्कर्तुम् अत्युक्तिः। अपि स्तुहि, अन्ववसर्गः कामचारानुज्ञा। धिग् देवदत्तम् अपि स्तुयाद् वृषलम्, गर्हा। अपि सिञ्च, अपि स्तुहि, समुच्चये।**

**पदविभागः** – अपिः पदार्थसम्भावनान्वगर्हासमुच्चयेषु।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – पदार्थ सम्भावना, अन्ववसर्ग, गर्हा, समुच्चय, एतेषु अर्थेषु द्योत्येषु अपि इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – पदार्थश्च सम्भावनं च अन्ववसर्गश्च गर्हा च समुच्चयश्चेति (इतरेतरद्वन्द्वः) पदार्थसंभावनान्ववसर्गगर्हासमुच्चयाः, तेषु पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु। इति सम्तम्यन्तं पदम्। ''अपिः'' इति प्रथमान्तं पदम्। कर्मप्रवचनीयाः इत्यस्याधिकारो वर्तते। पदार्थः = अप्रयुज्यमानस्य पदान्तस्य अर्थः इति। सम्भावनम्=शक्तेः उत्कर्षं प्रतिपादयितुं कृता अत्युक्तिः इति। अन्ववसर्गः – कामाचारस्य अनुज्ञा, अर्थात् स्वेच्छया कर्तुम् अकर्तुं वा अनुमतिप्रदानम् इति। गर्हा = निन्दा। समुच्चयः = अनेकपदार्थानामेकत्रीकरणम् इति।

**पदार्थस्योदाहरणम्** – सर्पिषोऽपि स्यात् – सर्पिषः बिन्दुरपि स्यात् इत्यर्थे ''अपि'' = इत्यस्य ''अपिः पदार्थसम्भा.'' इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। तेन उपसर्गसञ्ज्ञाभावात् ''उपसर्गात् सुनोति.'' इत्यादिना स्यात् इत्यस्य सस्य षत्वं न भवति सर्पिषोऽपि स्यादिति जायते।

**सम्भावनस्योदाहरणम्** – अपि स्तुयाद् विष्णुम् – अत्र सम्भावनविषये 'अपि' इत्यस्य ''अपिः पदार्थसम्भाव.'' इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। तेन उपसर्गसंज्ञाभावादत्र ''उपसर्गात् सुनोति सुवतिस्यति स्तौतिस्तोभतिस्थासेनय सेधसिचषञ्जष्वञ्जाम्'' इत्यनेन स्तुयाद इत्यस्य सस्य षत्वं न भवति अपि स्तुयाद् विष्णुमिति सिद्धम्।

**अन्ववसर्गस्योदाहरणम्** – अपि स्तुहि – स्तुहि न वा स्तुहि इति कामचारेऽर्थे ''अपि'' इत्यस्य ''अपि पदार्थसम्भावना.'' – इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। तेन उपसर्गाभावात् पूर्वानुसारमेव स्तुहि इत्यत्र सस्य षत्वं न भवति।

**गर्हाया उदाहरणम्** – धिग्देवदत्तम् अपि स्तुयाद् वृषलम् = अत्र वृषलस्य स्तुतिकरणात् निन्दार्थो गम्यते। अतः ''अपिः पदार्थसम्भावना.'' – इति सूत्रेण अपि इत्यस्य कर्मप्रवचनीयसंज्ञायां पूर्वानुसारमेव स्तुयाद इत्यत्र सस्य षत्वं न भवति।

**समुच्चयस्योदाहरणम्** – अपि सिञ्च अपि स्तुहि – सेचनं कुरु स्तुतिमपि कुरु इत्यर्थे अपिः पदार्थसम्भावनान्व–इति सूत्रेण अपि इत्यस्य कर्मप्रवचनीय संज्ञायां पूर्वानुसारमेव सिञ्च स्तुहि उभयत्र सस्य षत्वं न भवति।

**५५८ कालाध्वनोरत्यन्तसंयोगे २/३/५ इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते क्रोशं गिरिः। अत्यन्तसंयोगे किम्? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।**

**पदविभागः** – कालाध्वनोः अत्यन्तसंयोगे।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – कालवाचकात् अध्ववाचकाच्च शब्दात् द्वितीया भवति गुणक्रियाद्रव्यैः सह कालाध्वनोः अत्यन्तसंयोगे सति।

**व्याख्या** – कालश्च अध्वाचेति कालाध्वानौ (इतरेतरद्वन्द्वः) तयोः कालाध्वनोः। अन्तः = विच्छेदः, तमतिक्रान्तः अत्यन्तः, अत्यन्तश्चासौ अत्यन्तसंयोगस्तस्मिन् अत्यन्तश्चासौ अत्यन्तसंयोगस्तस्मिन् अत्यन्तसंयोगे (तत्पुरुषार्थकर्मधारयः)। अत्यन्तः = निरन्तरमित्यर्थः, अविच्छिन्नभावेन संयोग इति। अविच्छिन्नभावेन संयोगः कुत्र भवेत् तदा उच्यते गुणक्रियाद्रव्यैः इति।

**रूपलेखनप्रकारः** – मासं कल्याणी – इत्यत्र कालवाचकस्य मासशब्दस्य गुणवाचिना कल्याणी इति पदेन सह अत्यन्तसंयोगे सति ''कालाध्वनोरत्यन्तसंयोगे'' इति सूत्रेण कालवाचकात् मासशब्दात् द्वितीयाविभक्तिः भवति मासं कल्याणी इति जायते। सम्पूर्णमासपर्यन्तं निरन्तरं मङ्गलवान् इत्यर्थः। एवमेव मासम् अधीते, मासं गुड्धानाः इत्यादिष्वपि द्वितीया प्रयुज्यते।

क्रोशं कुटिला नदी – क्रोशं यावत् नदी कुटिला = वक्राऽस्ति इत्यर्थे ''कालाध्वनोरत्यन्तसंयोगे'' इति सूत्रेण अध्ववाचकात् क्रोशशब्दात् द्वितीया विभक्तिः भवति। अत्र अध्ववाचकस्य क्रोशशब्दस्य ''कुटिला'' इत्यनेन अत्यन्तसंयोगोऽस्ति। एवमेव क्रोशमधीते, क्रोशं गिरिः इत्यादिष्वपि द्वितीया प्रयुज्यते।

**अत्यन्तसंयोगे किम्?**

ननु ''कालाध्वनोरत्यन्तसंयोगे'' इति सूत्रे अत्यन्तसंयोग: इति पदस्य पाठो न स्यात् तदा को दोष: तर्हि समाधीयते यत् ''मासस्य द्विरधीते'' इत्यत्र मासमध्ये द्वयो: दिनयो: अधीते इत्यर्थे गम्यमाने अत्यन्तसंयोगाभाव:, अत एव द्वितीया न भवति। एवमेव क्रोशस्यैकदेशे पर्वत: इत्यत्रापि क्रोशस्य भागे एकस्मिन् पर्वत: इत्यर्थे सति अत्यन्तसंयोग: नास्ति अत: अत्रापि द्वितीया न लब्धा भवति। अत: अत्यन्तसंयोगाभावे द्वितीयापत्तिवारणार्थमेव पदमिदं सूत्रे पठितमस्ति इति दिक्।

**।। इति द्वितीया।।**

## अथ तृतीया विभक्तिः

**स्वतन्त्र: कर्ता ( १/४/५४ ) क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थ: कर्ता स्यात्।**

**पदविभाग: – स्वतन्त्र:, कर्ता।**

सूत्रप्रकार: – संज्ञासूत्रम्

**सूत्रार्थ:** – क्रियाजनने स्वातन्त्र्येण विवक्षितोऽर्थ: कर्ता भवति।

**व्याख्या** – द्विपदात्मकमिदं सूत्रम्। स्वतन्त्र: इति प्रथमान्तं, कर्ता=इति प्रथमान्तम्। 'कारके' इत्यस्याधिकारो वर्तते। सूत्रे स्वतन्त्र: इत्यस्यार्थोऽस्ति स्वातन्त्र्यम्=प्राधान्यमिति। ''क्रियाजनकत्वं कारकत्वम्'' इत्यस्मात् क्रियायामिति पदं ''विवक्षात: कारकाणि भवन्ति'' इत्यस्मात् 'विवक्षितोऽर्थ:' इति पदञ्च उपलब्धं भवति। अत एव सूत्रार्थो लभ्यते क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थ: कर्ता भवति इति। क्रियासिद्धौ निष्पादकं=जनकं=निमित्तमेव कारकम्।

क्रियानिष्पादकत्वेन कर्म-करण-सम्प्रदान-अपादान-अधिकरणादीनि सर्वाण्येव कारकाणि भवन्ति परं स्वतन्त्रतया=प्रधानतया यद् विवक्षितं भवति तत् कर्तृकारकम्। अर्थात् अन्यानि कारकाणि कर्त्रा प्रेरितानि भवन्ति क्रियानिष्पादने, परं कर्ता अन्येन केनापि प्रेरितो भूत्वा क्रियानिष्पादनं न करोति अपितु स्वतन्त्रतया क्रियाजनकत्वम् भवति कारकेषु।

ननु 'स्थाली पचति' इत्यादौ वाक्ये स्थाल्यादीनामचेतनत्वेन क्रियाजनने स्वातन्त्र्याभावात् कथं कर्तृत्वं स्यादिति प्रश्नोत्तरे उक्तम् – '**विवक्षात: कारकाणि भवन्ति**' – इति भाष्यवचनानुसारेण यथा 'देवदत्त: पचति' इत्यत्र देवदत्तस्य कर्तृत्वमभीष्टं तथैव 'स्थाली पचति' इत्यत्रापि स्थाल्यां कर्तृत्वमस्माकं विवक्षा, अत: कर्तृत्वं सिद्ध्यति। एवमेव काष्ठानि पचन्ति, अग्नि: पचति इत्यादिष्वपि काष्ठादीनां कर्तृत्वं भवत्येव। पुनश्च स्वातन्त्र्यं नाम व्यापाराश्रयत्वम् एवञ्च व्यापाराश्रय: कर्ता इति फलितोऽर्थ:।

**धात्वर्थ:** – फलं व्यापारश्च इति उक्तम्। तत्र व्यापारस्य य: आश्रय: स कर्ता भवति। यथा – '**पाचक: पचति**' इत्यत्र पच् धातोरर्थ: = पाकक्रिया (पाकव्यापार:)। सा क्रिया कुत्र अस्ति? पाचके अस्ति। तथा च पाकक्रियाया: आश्रय: पाचक:। अत: पाचक: कर्ता भवति। अत: भर्तृहरिमहोदयेन कर्तृत्वविषये उक्तम् –

'**धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते**' इति।

**५६० साधकतमं करणम् १/४/४२।। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्।**

**तमब्ग्रहणं किम् - गङ्गायां घोष:।**

**पदविभाग:** – साधकतमम्, करणम्।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सूत्रार्थ:** – क्रियासिद्धौ अतिशयितम् उपकारकं कारकं करणसंज्ञं स्यात्।

**व्याख्या** – साध्नोति इति साधकम्, अतिशयेन साधकम् – साधकतमम्। अत्र 'अतिशायने-तमबिष्ठनौ' इति सूत्रेण

तमप्प्रत्ययःप्रयुक्तो भवति। साधकतमम् – इति प्रथमान्तं पदम्। करणम् – इति प्रथमान्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। करणमिति विषये – यद्यपि क्रियासिद्धौ सर्वेषां कारकाणां साधकत्वं, किन्तु यस्यातिशयेनोपकारकत्वं विवक्ष्यते तत् तदा करणम्। यथा – 'रामेण बाणेन हतो बाली' अत्र बाणस्य बालिसंयोगानुकूलो यो व्यापारस्तदनन्तरमेव हननक्रिया सिद्ध्यति अतः तस्यैव प्रकृष्टोपकारकत्वात् करणसंज्ञा। अतएव यद् व्यापारानन्तरं क्रियासिद्धिः तत् करणमिति। भर्तृहरिमहोदयेन वाक्यपदीये उक्तम् –

**क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनन्तरम्।**
**विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्।।**

'विवक्ष्यते' इति पदेन 'स्थाल्यां पचति' इत्यत्र स्थालीशब्दस्य करणसंज्ञा भवति अन्यथा तु पाकक्रियाया आधारत्वेन 'स्थाल्यां पचति' इत्येव स्यात्।

**प्रत्युदाहरणम् – तमब्ग्रहणं किम्? गङ्गायां घोषः।**

ननु 'साधकतमं करणम्' सूत्रेऽस्मिन् 'साधकतमम्' इति पदे तमब्ग्रहणस्य किं प्रयोजनमिति शङ्कायाः समाधानमत्र प्रस्तूयते। सूत्रे साधकतमम् इति स्थाने साधकम् इत्येव स्यात् यतो हि 'कारके' इत्यस्याधिकारोऽत्र वर्तते तेन कारकसाधकशब्दौ पर्यायौ भवतः। अतः साधकग्रहणादेव प्रकृष्टं साधकम् इत्यर्थलाभो भवति। एवं तमब्ग्रहणं व्यर्थीभूय ज्ञापनं करोति यत् एतत् सूत्रादन्यत्र 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः, न तु गौणे' इति न्यायः कारकप्रकरणे न प्रवर्तते। तेन 'गङ्गायां घोषः' अत्र गौणाधारवाचकत्वेऽपि गङ्गापदे सप्तमी भवति। यदि कारकप्रकरणे शब्दसामर्थ्येन प्रकर्षार्थस्य ग्रहणं क्रियते तदा तु 'आधारोऽधिकरणम्' सूत्रे 'अधिक्रियते क्रिया: अस्मिन्' इति विग्रहानुसारेण 'अधिकरणम्' इत्यन्वर्थमहासंज्ञाकरणादेव आधारार्थलाभो भवति पुनरत्र आधारपदस्य पाठसामर्थ्यात् ज्ञापनं भवति यत् सर्वावयवव्याप्त्याधारस्यैव अधिकरणसंज्ञा भवेत् न तु सामान्याधिकरणस्य। तेन 'तिलेषु तैलम्' इत्यत्र तु अधिकरणसंज्ञा प्राप्ता भवति परं 'गङ्गायां घोषः' इत्यत्र अधिकरणसंज्ञा अलभ्या एव। यतो हि तत्र गङ्गापदं तीरवाचकम् (गौणाधारस्य वाचकम्) अस्ति। अतएव तमब्ग्रहणकृतज्ञापनेन सिद्धोऽयं यत् गौणमुख्यार्थन्यायस्यात्र अप्रवृत्तिः भवति। एतस्मात् 'गङ्गायां घोषः' 'कूपे गर्गकुलम्' इत्यादिषु अधिकरणसंज्ञा प्राप्ता भवति।

**कर्तृकरणयोस्तृतीया २/३/१८।। अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली। 'प्रकृत्यादिभ्य उपसंख्यानम्' (वा. १४६६)। प्रकृत्या चारुः। प्रायेण याज्ञिकः गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि।**

**पदविभागः –** कर्तृकरणयोः, तृतीया।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** अनुक्ते कर्तरि अनुक्ते कर्मणि च तृतीया स्यात्।

**व्याख्या –** कर्ता च करणं च कर्तृकरणे (इतरेतरद्वन्द्वः) तयोः कर्तृकरणयोः। सप्तम्यन्तं पदम्। तृतीया – इति प्रथमान्तं पदम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते। अनभिहिते इत्यस्यार्थोऽस्ति अनुक्ते। 'अनभिहिते' इति अधिकारवचनं वचनविपरिणामेन 'अनभिहितयोः' इति क्रियते अन्वयलाभार्थम्। अतएव अनभिहितयोः कर्तृकरणयोः तृतीया भवति इत्यर्थः प्राप्यते।

**रूपलेखनप्रकारः – रामेण बाणेन हतो बाली।**

कर्मवाच्यस्य प्रयोगोऽयम्। अत्र कर्मणि प्रथमा विभक्तिः प्रयुक्ताऽस्ति उक्तत्वात्। अतः 'बाली' कर्मपदं प्रथमान्तमस्ति। कर्मवाच्ये कर्ता अनुक्तो भवति। अत्र कर्ता अस्ति 'राम' तस्य 'स्वतन्त्रः कर्ता' इति सूत्रेण कर्तृसंज्ञा भवति। हननक्रियायां प्रकृष्टोपकारकमस्ति 'बाण' इत्येतस्य 'साधकतमं करणम्' इति सूत्रेण करणसंज्ञा भवति। 'कर्तृकरणयोस्तृतीया' इति सूत्रेण अनुक्ते कर्तरि अनुक्ते करणे च तृतीया क्रियते ''रामेण बाणेन हतो बाली'' इति

सिद्धम्।

**अन्ये प्रयोगाः –**

1. मया लेखन्या लेखः लिखितः।
2. सैनिकेन भुशुण्ड्या आतङ्कवादी हतः।
3. रजकेन फेनकेन वस्त्राणि प्रक्षालितानि।

## उपपदविभक्तिः

**वा. प्रकृत्यादिभ्यः उपसंख्यानम्**

**वार्तिकार्थः – प्रकृत्यादिगणपठितेभ्यः शब्देभ्यः तृतीया भवति।**

**१. प्रकृत्या चारुः** इत्यत्र सम्बन्धार्थे तृतीया प्रयुक्ताऽस्ति। तस्मात् 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकेन प्रकृतिशब्दात् तृतीया विभक्तौ कृतायां प्रकृत्या चारुः इति जायते।

**२. प्रायेण याज्ञिकः** – इत्यत्र सम्बन्धार्थे तृतीया अस्ति। प्रायशब्दः बहुलवाचकः। तस्मात् प्रायशब्दात् 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकेन तृतीया विभक्तौ कृतायां प्रायेण याज्ञिकः इति जायते।

**३. गोत्रेण गार्ग्यः** – गोत्रम् अस्य गार्ग्यः इत्यर्थे गोत्रशब्दात् प्रथमा प्राप्ता आसीत् तं प्रबाध्य 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकेन तृतीयाविभक्तौ कृतायां गोत्रेण गार्ग्यः इति जायते। यदि गोत्रं गार्ग्ये हेतुस्तदा 'इत्थंभूतलक्षणे' इत्यनेन तृतीया स्यात्।

**४. समेनैति, विषमेण एति** –समं विषमं च गमनं करोति इत्यर्थे क्रियाविशेषणात् द्वितीया प्राप्ता भवति तं प्रबाध्य 'प्रकृत्यादिभ्यः उपसंख्यानम्' इति वार्तिकेन तृतीयाविभक्तौ कृतायां समेनैति, विषमेणैति इति रूपद्वयं सिद्धम्।

**विशेषः** – यदि समविषमशब्दौ करणवाचकस्य मार्गस्य विशेषणं स्यात् तदा तु 'कर्तृकरणयोस्तृतीया' इतिसूत्रेण तृतीया स्यात्। समेन मार्गेण एति, विषमेण मार्गेण एति इत्यर्थे।

**५. द्विद्रोणेन धान्यं क्रीणाति** – सम्बन्धार्थे तृतीया अत्र। द्विद्रोणसम्बन्धिधान्यमित्यर्थे प्राप्तां षष्ठीं प्रबाध्य 'प्रकृत्यादिभ्यः उपसंख्यानम्' इति वार्तिकेन द्विद्रोणशब्दात् तृतीयाविभक्तौ कृतायां द्विद्रोणेन धान्यं क्रीणाति इति सिद्धम्।

**६. सुखेन याति, दुःखेन याति** –सुखजनकं गमनं करोति, दुःखजनकं गमनं करोति इत्यर्थे क्रियाविशेषणत्वात् प्राप्तां द्वितीयां प्रबाध्य सुख तथा च दुःखशब्दात् 'प्रकृत्यादिभ्यः उपसंख्यानम्' इति वार्तिकेन तृतीयाविभक्तौ कृतायां सुखेन याति, दुःखेन याति इति जायते। इत्यादि इति कथनेन नाम्ना सुतीक्ष्णः, धान्येन धनवान् इत्यादिष्वपि अनेन वार्तिकेन एव तृतीया भवति।

**दिवः कर्म च १/४/४३।। दिवः साधकतमं कारकं कर्मसंज्ञं स्यात्, चात्करणसंज्ञम्। अक्षैरक्षान् वा दीव्यति।**

**पदविभागः –** दिवः कर्म च।

**सूत्रप्रकारः –** संज्ञासूत्रम्।

**सूत्रार्थः –** दिवः साधकतमं कारकं कर्मसंज्ञकं करणसंज्ञकं च स्यात्।

**व्याख्या –** दिवः – इति षष्ठ्यन्तं पदम्। कर्म इति प्रथमान्तम्। च – इति अव्ययम्। चकारबलेन 'साधकतमं करणम्' इति सूत्रादिह करणस्यानुवृत्तिरायाति। सूत्रवृत्तौ– दिवः साधकतमम् इत्यनेन दिव् धातोः साधकतमं न गृह्यते अपितु दिव् धात्वर्थं प्रति गृह्यते। अत एव सूत्रस्यार्थो भवति दिव् धात्वर्थं प्रति साधकतमं कारकं कर्मसंज्ञकं करणसंज्ञकं च भवति।

**रूपलेखनप्रकारः – अक्षैः अक्षान् वा दीव्यति।** इत्यत्र 'दिवः कर्म च' इतिसूत्रेण अक्षशब्दस्य पर्यायेण कर्मसंज्ञा

करणसंज्ञा च भवति। तदनुरोधेन कर्मसंज्ञायां 'कर्मणि द्वितीया' इतिसूत्रेण द्वितीयाविभक्तिः भवति, बहुवचने शस् विभक्तौ अक्षान् इति जायते। करणसंज्ञायां 'कर्तृकरणयोस्तृतीया' इतिसूत्रेण तृतीयाविभक्तिः भवति, बहुवचने भिस् विभक्तौ अक्षैः इति जायते। अक्षैः अक्षान् वा दीव्यति इति सिद्धम्।

**अपवर्गे तृतीया २/३/६ ।। अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अह्ना क्रोशेन वा अनुवाकोऽधीतः। अपवर्गे किम् – मासमधीतो नायातः।**

**पदविभागः**– अपवर्गे तृतीया।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः**– फलप्राप्त्यर्थे द्योत्ये कालवाचकात् मार्गवाचकाच्च शब्दात् अत्यन्तसंयोगे सति तृतीयाविभक्तिः प्रयुक्ता भवति।

**व्याख्या** – अपवर्गे – इति सप्तम्यन्तं, तृतीया – इति प्रथमान्तञ्च पदम्। 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रस्य अविकलरूपेण अनुवर्तनं प्राप्यते। अपवर्ग इत्यस्यार्थो विद्यते फलप्राप्तिः समाप्तिर्वा। 'कालाध्वनोरत्यन्तसंयोगे' इत्यस्यापवादसूत्रमिदम्।

**रूपलेखनप्रकारः** – **अह्ना क्रोशेन वा अनुवाकोऽधीतः।**

इत्यत्र वाक्यद्वयं भवति कालवाचके–अह्ना अनुवाकोऽधीतः, मार्गवाचके–क्रोशेन अनुवाकोऽधीतः।

(1) अह्ना अनुवाकोऽधीतः –अत्र कालवाचकात्अहन् शब्दात् 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेण प्राप्तां द्वितीयां प्रबाध्य 'अपवर्गे तृतीया' इति सूत्रेण तृतीया विभक्तिः जायते अह्ना अनुवाकोऽधीतः इति सिद्धम्। सम्पूर्णदिने निरन्तरम् अध्ययनेन अनुवाको ज्ञातः इत्यर्थः। अध्ययनेन फलप्राप्तिरपि अत्र सूचिता भवति।

(2) क्रोशेन अनुवाकोऽधीतः – अत्र अध्ववाचकात् क्रोशशब्दात् पूर्वानुसारेणैव तृतीया भवति। क्रोशे निरन्तरमध्ययनेन अनुवाको ज्ञातः इत्यर्थः। अध्ययनेन फलप्राप्तिरपि अत्र सूचिता भवति।

अन्यानि उदाहरणानि – (1) पञ्चभिर्दिवसैरारोग्यं लब्धवान्।
(2) द्वादशभिः वर्षैः व्याकरणं स्मृतम्।
(3) त्रिभिः वर्षैः अध्ययनं पूर्णम्।

**प्रत्युदाहरणम् – अपवर्गे किम्? मासमधीतो नायातः –**

ननु 'अपवर्गे तृतीया' इति सूत्रे अपवर्गे इत्यस्य किम् प्रयोजनम्? तर्हि समाधीयते यत् फलप्राप्तिद्योत्ये सत्येव अनेन वार्तिकेन तृतीया भवति, फलप्राप्त्यभावे तु पूर्वसूत्रेण द्वितीया एव भविष्यति। यथा – मासम् अधीतो नायातः – इत्यत्र सम्पूर्णमासे निरन्तरमध्ययनं कृतं परं फलप्राप्तिः नाभवत्, अतः अत्र 'अपवर्गे तृतीया' इत्यस्य प्रयुक्तिः न भवति अपितु 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेणैव कालवाचकात् मासशब्दात् द्वितीया भवति इति दिक्।

**सहयुक्तेऽप्रधाने २/३/१९ ।। सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकं सार्धसमं योगेऽपि। विनाऽपि तद्योगं तृतीया। 'वृद्धो यूना' इत्यादिनिर्देशात्।**

**पदविभागः** – सहयुक्ते, अप्रधाने।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – सहार्थेन योगे अप्रधाने तृतीयाविभक्तिः प्रयुज्यते।

**व्याख्या** – सहेन युक्तः इति सहयुक्तः (तृ.त.) तस्मिन् सहयुक्ते, सप्तम्यन्तं पदम्। न प्रधानम् इति अप्रधानम् (नञ्तत्पुरुषः) तस्मिन् अप्रधाने। सप्तम्यन्तं पदम्। 'कर्तृकरणयोस्तृतीया' इत्यस्मात् तृतीयायाः अनुवृत्तिरायाति। सूत्रवृत्तौ सहार्थेन इति लिखितं तेन सहार्थकशब्दाः साकं सार्धम् इत्यादयोऽपि गृह्यन्ते।

**रूपलेखनप्रकारः – पुत्रेण सहागतः पिता।**

अत्र क्रियया सह शाब्दिकः सम्बन्धः पितुरेव, तस्यैव मुख्यरूपेण आगमनं भवति अतः तस्यैव प्राधान्यम्। अप्राधान्यमस्ति पुत्रस्य अतः 'सहयुक्तेऽप्रधाने' इतिसूत्रेण 'सह' इति योगे पुत्रशब्दात् तृतीयाविभक्तौ कृतायां पुत्रेण सहागतः पिता इति सिद्धम्।

**अन्यानि उदाहरणानि –**

**(1) शशिना सह याति कौमुदी।**

**(2) आचार्यः शिष्येण सह आयाति।**

**(3) बालकः पित्रा सह गृहं गच्छति।**

**(4) सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।**

**(5) मृगाः मृगैः सङ्गमनुव्रजन्ति।**

**पङ्क्तिविवेचनम् =विनापि तद्योगं तृतीया 'वृद्धो यूना' इत्यादिनिर्देशात्।**

ननु 'पुत्रेण सहागतः पिता' इत्यत्र 'सह' इति योगे तृतीयाविहिता परं 'वृद्धो यूना तल्लक्षणश्चेदेव विशेषः' इत्यत्र स्वयं सूत्रकारणे युवन् शब्दात् तृतीयायां 'यूना' इति प्रयुक्तः 'सह' इत्यस्य योगाभावेऽपि। इत्यनेन ज्ञापितं भवति यत् 'सह' इति शब्दस्य शाब्दिकयोगाभावेऽपि तृतीया जायते। एतादृशेषु स्थलेषु सहशब्दं विनाऽपि सहार्थस्य विद्यमानता एव पर्याप्ता भवति इति पाणिनिनिर्देशात् स्पष्टम्।

**येनाङ्गविकारः २/३/२०।। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्टः इत्यर्थः। अङ्गविकारः किम्? अक्षि काणमस्य।**

**पदविभागः** – येन अङ्गविकारः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – येन विकृताङ्गेन अङ्गिनो विकारो लक्ष्यते तदा तस्मात् अङ्गवाचकशब्दात् तृतीया भवति।

**व्याख्या** – अङ्गानि अस्य सन्तीति अङ्गम् = शरीरम्। अङ्गशब्दात् 'अर्शआदिभ्योऽच्' इतिसूत्रेण मतुबर्थीयेऽचि कृते 'अङ्गम्' इति सिद्धं भवति। अङ्गस्य विकारः इति अङ्गविकारः (षष्ठीतत्पुरुषः)। येन – इति तृतीयान्तं पदम्। अङ्गविकारः= इति प्रथमान्तं पदम्। 'कर्तृकरणयोस्तृतीया' इत्यस्मादत्र तृतीयायाः अनुवर्तनं भवति।

**रूपलेखनप्रकारः** – अक्ष्णा काणः – अक्षि (अङ्गम्) विकृतमस्ति इत्यर्थे 'येनाङ्गविकारः' इतिसूत्रेण अक्षिशब्दात् तृतीया विभक्तिः भवति अक्ष्णा इति जायते। अक्ष्णा काणः इति सिद्धम्। अक्षिसम्बन्धिकाणत्वदोषयुक्तोऽयं जनः।

**अन्यानि उदाहरणानि –**

**(1) कर्णाभ्यां बधिरः।**

**(2) पादेन खञ्जः।**

**(3) शिरसा खल्वाटः।**

**(4) पृष्ठेन कुब्जः।**

**(5) पाणिना कुणिः।**

**प्रत्युदाहरणम् – अङ्गविकारः किम्? अक्षिकाणमस्य।**

ननु सूत्रे 'अङ्गविकारः' इति नोच्यते तदा तु 'अक्षि काणमस्य' इत्यत्रापि अक्षिशब्दात् तृतीया निर्बाधरूपेण भवति परं न स्यात्। यतो हि 'अक्षि काणमस्य' अत्र वाक्ये अङ्गस्य विकारो लक्ष्यते न तु अङ्गिनः। 'अङ्गिनो विकारः' इत्यनेन देहे विकृतिः परिलक्षिता भवेत् न तु केवलं अङ्गे।

**इत्थम्भूतलक्षणे २/३/२१ कञ्चित् प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।**

**पदविभागः** – इत्थंभूतलक्षणे (एकपदम्)

**सूत्रप्रकारः** – विधिसूत्रम्।
**सरलार्थः** – प्रकारविशेषं प्राप्तस्य ज्ञापके (चिह्ने) तृतीया स्यात्।
**व्याख्या** – अयं प्रकारः इत्थम्, तं भूतः = प्राप्तः इत्थम्भूतः। लक्ष्यतेऽनेनेति लक्षणं ज्ञापकम्। इत्थम्भूतस्य लक्षणम् इत्थम्भूतलक्षणं तस्मिन् इत्थम्भूतलक्षणे (ष.त.समासः) 'कर्तृकरणयोस्तृतीया' इत्यस्मादत्र तृतीयायाः अनुवर्तनं भवति।
**रूपलेखनप्रकारः** – **जटाभिस्तापसः** – इत्यत्र इत्थम्भूतस्य ज्ञापकोऽस्ति जटा शब्दः। जटाः तापसत्वं सूचयति इत्यर्थः। अतः तापसत्वज्ञापकात् जटा शब्दात् ''इत्थम्भूतलक्षणे'' इति सूत्रेण तृतीयाविभक्तिः भवति, बहुवचने भिस् विभक्तौ जटाभिः इति सिद्धम्। जटाभिस्तापसः।
**अन्यानि उदाहरणानि** –

**(1) कमण्डलुना वटुः।**
**(2) शरीरेण मल्लः।**
**(3) वेषेण यतिः।**
**(4) स्वर्णाभूषणैः आढ्यः।**
**(5) यज्ञोपवीतेन द्विजः।**

**सञ्ज्ञोऽन्यतरस्यां कर्मणि २/३/२२।। सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा सञ्जानीते।**

**पदविभागः** – संज्ञः, अन्यतरस्यां, कर्मणि।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सरलार्थः** – सम्पूर्वकस्य ज्ञा धातोः कर्मणि तृतीया भवति विकल्पेन।
**व्याख्या** – सम् पूर्वो ज्ञा सञ्ज्ञा, तस्य सञ्ज्ञः।'सञ्ज्ञः' – इति पदं षष्ठ्यन्तम्। अन्यतरस्याम् इति विभक्तिप्रतिरूपमव्ययम्। कर्मणि – इति सप्तम्यन्तं पदम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते। 'कर्तृकरणयोस्तृतीया' इति सूत्रात् तृतीया इत्यस्यानुवृत्तिरायाति। अन्यतरस्याम् इति ग्रहणेन तृतीयाऽभावे कर्मणि द्वितीया भवति। द्वितीयायाः अपवादोऽयं विकल्पः।
**रूपलेखनप्रकारः** – पित्रा पितरं वा सञ्जानीते –

इत्यत्र सम् पूर्वकात् ज्ञा धातोः 'सञ्जानीते' इत्यस्य कर्म पितृ शब्दः। तस्मात् 'कर्मणि द्वितीया' इत्यनेन प्राप्तां द्वितीयां प्रबाध्य 'सञ्ज्ञोऽन्यतरस्यां कर्मणि' इति सूत्रेण विकल्पेन तृतीयाविभक्तौ कृतायां पित्रा इति जायते। पक्षे तृतीयाभावे द्वितीयाविभक्तौ पितरमिति जायते। पित्रा पितरं वा सञ्जानीते इति सिद्धम्।

**हेतौ २/३/२३ हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति। वा. गम्यमानापि क्रिया कारक विभक्तौ प्रयोजिका। अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधन क्रियां प्रति श्रमः करणम्। शतेन वत्सान् पाययति पयः। शतेन परिच्छिद्येत्यर्थः। वा. अशिष्ट व्यवहारे दाणः चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये तु भार्यायै संयच्छति।**

**पदविभागः** – हेतौ (एकपदम्)
**सूत्रप्रकारः** – विधिसूत्रम्।
**सरलार्थः** – हेतोः अर्थे तृतीया विभक्तिः भवति।
**व्याख्या** – हेतौ – इति सप्तम्यन्तं पदम्। हेतुरिह कारणपर्यायो लौकिक एव विवक्षितः न तु 'तत्प्रयोजको हेतुश्च' इति कृत्रिमः। 'कर्तृकरणयोस्तृतीया' इत्यस्मात् तृतीयायाः अनुवर्तनमत्र भवति। सूत्रवृत्तौ हेतुकरणयोर्मध्ये भेदं स्पष्टयति –

व्यापाररहिता: व्यापारसहिता: वा द्रव्यगुणक्रिया: यदा क्रियासिद्धौ सहायका: भवन्ति, तदा 'हेतु' इति पदेन वाच्या: भवन्ति, तत्रैव सव्यापारं क्रियामात्रस्य साधकं कारकं करणं भवति इति।

**रूपलेखनप्रकार: – दण्डेन घट:** – इत्यत्र घटस्य हेतु: दण्ड: तस्मात् 'हेतौ' इतिसूत्रेण दण्डशब्दात् तृतीयाविभक्ति: भवति दण्डेन घट: इति सिद्धम्। दण्डे व्यापारसत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वमिति भाव:। यतो हि दण्डं विनाऽपि घटोत्पत्ति: सम्भाव्यते।

**पुण्येन दृष्टो हरि:** – क्रियां प्रति हेतोरुदाहरणमिदम्। अत्र पुण्यं हरिदर्शनक्रियाया: हेतु: तस्मात् 'हेतौ' इति सूत्रेण पुण्यशब्दात् तृतीया विभक्तौ कृतायां पुण्येन दृष्टो हरि: इति सिद्धम्। पुण्यं हरिदर्शनं प्रति जनकं त्वस्ति, परं पुण्ये व्यापारो नास्ति, अत: न करणम्।

**अध्ययनेन वसति** – अत्र अध्ययनस्य गुरुकुलवासं प्रति हेतुता नास्ति अपितु साध्यता अस्ति। अत एव फलमपीह हेतु: इत्यनुसारेण अध्ययनं हेतुत्वेन गृह्यते तस्मात् 'हेतौ' इति सूत्रेण अध्ययनशब्दात् तृतीया भवति अध्ययनेन वसति इति सिद्धम्।

**विशेष: – अध्ययने हेतुत्वस्याविवक्षायां फलमात्रस्य विवक्षायां तु चतुर्थी एव भवति। अध्ययनाय वसति इति जायते।**

**अन्यानि उदाहरणानि – ( 1 ) विद्या विनयेन शोभते।**
**( 2 ) विद्यया यशो लभते।**
**( 3 ) श्रमेण साध्या सफलता।**
**( 4 ) चरित्रेण कुलं ज्ञायते।**
**( 5 ) ज्ञानेन वर्धितो यश:।**

### वा. गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका।

**कारिकार्थ:** – गम्यमान: = साक्षाद् अप्रयुक्तेऽपि अर्थेन प्रतीयमान:। अतएव प्रतीयमानापि क्रिया कारकविभक्तौ हेतुर्भवति।

**रूपलेखनप्रकार: – अलं श्रमेण** – श्रमेण साध्यं नास्ति इत्यर्थे। अलम् इति निषेधे अर्थे वर्तते। साध्यम् इति अध्याहारेण गृह्यते। अत्र साधनक्रियां प्रति श्रम: करणम्। अतएव 'गम्यमानापि क्रिया:' इति वार्तिकनियमेन श्रमशब्दात् 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति अलं श्रमेण इति सिद्धम्।

**शतेन शतेन वत्सान् पाययति पय:** – शतेन परिच्छिद्येत्यर्थे वाक्ये विभाजनक्रिया अप्रयुक्ताऽस्ति तस्मात् गम्यमानाऽस्ति, तां प्रति 'शतम्' इति उपकारकमस्ति, उपकारकत्वात् करणमपि। अतएव 'गम्यमानापि क्रियाकारकविभक्तौ' इति वार्तिकनियमेन शतशब्दात् 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति शतेन इति जायते। वीप्सायां शतेन इत्यस्य 'नित्यवीप्सयो:' इत्यनेन द्वित्वं भवति शतेन शतेन वत्सान् पाययति पय: इति सिद्धम्।

**अन्यानि उदाहरणानि – ( 1 ) अलं अतिविस्तरेण।**
**( 2 ) अलं महीपाल तव श्रमेण।**
**( 3 ) अलं शोकेन।**
**( 4 ) अलं प्रलपितेन।**
**( 5 ) अलं भारतीया: मतानां विभेदै:।**

### वा. अशिष्टव्यवहारे दाण: प्रयोगे चतुर्थ्यर्थे तृतीया।

**वार्तिकार्थ:** – वैदिकमार्गानुयायिन: शिष्टा:, वेदमार्गादपेता: अशिष्टा:, तेषां व्यवहार: आचार: तस्मिन् विषये दाण्धातो: प्रयोगे सति चतुर्थ्यर्थे सम्प्रदाने तृतीया भवति।

**रूपलेखनप्रकारः – दास्या संयच्छते कामुकः**– 'कामुकः' इति पदप्रयोगेन ज्ञायते यत् अत्र दास्यै यद् दीयते तत् शास्त्रविरुद्धम् अशिष्टव्यवहारान्वितमस्ति, एतस्मात् अत्र 'दासी' इति शब्दात् सम्प्रदानकारकात् चतुर्थ्यर्थे 'अशिष्टव्यवहारे.' इति वार्तिकेन तृतीया भवति 'दास्या संयच्छते कामुकः' इति सिद्धम्।

यत्र तु धर्मानुकूलमाचरणं तत्र न भवति चतुर्थ्याः निषेधः। यथा – 'भार्यायै संयच्छति' इत्यत्र अशिष्टव्यवहारो न प्रतीयते शास्त्रनियमानुसारेण। अतएव सम्प्रदानकारकात् भार्या शब्दात् 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी भवति 'भार्यायै' इति जायते। अत एव मूले उक्तम् – **धर्म्ये तु भार्यायै संयच्छति।**

**।। इति तृतीया विभक्तिः ।।**

## अथ चतुर्थी

**कर्मणा यमभिप्रैति स सम्प्रदानम् ( १/४/३२ ) दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।**

**पदविभागः** – कर्मणा, यम्, अभिप्रैति, सः, सम्प्रदानम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – (कर्ता) दानक्रियायाः कर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञको भवति।

**व्याख्या** – कर्मणा – तृतीयायान्तं यं –द्वितीयान्तं, अभिप्रैति –इति क्रियापदम् (अभि+प्र+इण्+गतौ, लटि प्रथमपुरुषैकवचनान्तम्)। सः – प्रथमान्तं, सम्प्रदानम् – प्रथमान्तम्, अनेकपदमिदं सूत्रम्। 'कारके' इत्यस्याधिकारो वर्तते। सम्यक् प्रदीयते अस्मै इति सम्प्रदानम् इति अन्वर्थसंज्ञा। दानस्य विषये उक्तम् 'दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्' अर्थात् स्वस्याधिकारस्य सर्वथा निवृत्तिरिति। अत एव 'रजकस्य वस्त्राणि ददाति' इत्यत्र सम्प्रदानसंज्ञा न भवति, सम्बन्धविवक्षायां 'षष्ठी शेषे' इत्यनेन षष्ठी भवति।

**चतुर्थी सम्प्रदाने २/३/१३ ।। विप्राय गां ददाति। अनभिहित इत्येव। दीयते अस्मै दानीयो विप्रः। 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' ( वा. १०८५ )। पत्ये शेते। 'यजेः कर्मणः करणसञ्ज्ञा सम्प्रदानस्य च कर्मसञ्ज्ञा' ( वा. १०८६ )। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः।**

**पदविभागः** – चतुर्थी, सम्प्रदाने।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – अनभिहिते सम्प्रदानकारके चतुर्थी स्यात्।

**व्याख्या** – चतुर्थी – प्रथमान्तं, सम्प्रदाने – सप्तम्यन्तं, द्विपदात्मकं सूत्रमिदम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते।

**रूपनलेखनप्रकारः** – **विप्राय गां ददाति** – अत्र विप्रशब्दस्य 'कर्मणा यमभिप्रैति' इत्यनेन सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति चतुर्थीविभक्तौ कृतायां विप्राय गां ददाति इति सिद्धम्।

**अन्यानि उदाहरणानि –**

**( १ ) भिक्षुकाय भोजनं ददाति।**
**( २ ) रमा सखिभ्यः फलानि दत्तवती।**
**( ३ ) विद्या सर्वेभ्यः विनयं ददाति।**
**( ४ ) बलिः वामनाय पृथ्वीं ददाति।**

**दीयतेऽस्मै दानीयो विप्रः** – ननु 'चतुर्थी सम्प्रदाने' इति सूत्रेण अनुक्ते सम्प्रदाने चतुर्थी विधीयते। यत्र सम्प्रदानम् उक्तं भवति तत्र न चतुर्थी भवति, तत्र तु उक्तत्वात् प्रथमा एव भवति। अतः 'दानीयो विप्रः' इत्यत्र अनीयर्–प्रत्ययः सम्प्रदाने विहितः, अतः सम्प्रदानम् उक्तं जातम्। अतः विप्रशब्दात् चतुर्थी न भवति इति दिक्।

**वा. क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्। पत्ये शेते।**

**वार्तिकार्थः** – कर्ता क्रियया यमुद्दिश्य सम्बद्धुं (युक्तं कर्तुं) इच्छति तस्यापि सम्प्रदानसंज्ञा भवति। क्रियाया उद्देश्यमपि सम्प्रदानं भवति इति।

**रूपलेखनप्रकारः – पत्ये शेते** – पतिमनुकूलयितुं तम् उद्दिश्य शेते इत्यर्थः। अत्र शयनक्रियाद्वारा पतिमभिप्रैति, एतस्मात् पतिशब्दस्य 'क्रियया यमभिप्रैति.' इति वार्तिकेन सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति चतुर्थी विभक्तौ कृतायां पत्ये शेते इति भवति।

**वा. यजेः कर्मणः करणसञ्ज्ञा सम्प्रदानस्य च कर्मसञ्ज्ञा।**

**वार्तिकार्थः** – एकस्मिन्नेव वाक्ये यज् धातुयोगे कर्मणः सम्प्रदानस्य च प्रयोगे सति, कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा भवति।

**रूपलेखनप्रकारः – पशुना रुद्रं यजते** – इत्यत्र पशुं रुद्राय ददाति इत्यर्थे यज्–धातुयोगे कर्मणः 'पशु' इति शब्दस्य करणसञ्ज्ञा भवति 'कर्तृकरणयोस्तृतीया' इतिसूत्रेण तृतीया भवति च पशुना इति जायते। पुनश्च सम्प्रदानस्य 'रुद्र' इत्यस्य कर्मसञ्ज्ञा भवति 'कर्मणि द्वितीया' इतिसूत्रेण द्वितीया भवति रुद्रम् इति जायते। पशुना रुद्रं यजते इति सिद्धम्।

**रुच्यर्थानां प्रीयमाणः १/४/३३।। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किम्? देवदत्ताय रोचते मोदकः पथि।**

**पदविभागः** – रुच्यर्थानाम्, प्रीयमाणः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – रूच्यर्थानां धातूनां प्रयोगे सति प्रियमाणार्थस्य संप्रदानसंज्ञा भवति।

**व्याख्या** – रुचिरर्थो येषां ते रुच्यर्था धातवः, तेषां रुच्यर्थानाम् (बहुव्रीहिः)। रुच्यर्थानाम् – इति षष्ठ्यन्तं पदम्। प्रीयमाणः – इति प्रथमान्तं पदम्। रुच् दीप्तौ अभिप्रीतौ च अर्थे प्रयुज्यते। अत्र रुच् धातोः 'अभिप्रीतिः' एव अर्थो गृह्यते, न तु दीप्तिः, प्रीयमाणः इति विरोधात्। 'कारके' इत्यस्याधिकारो वर्तते। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यस्मात् 'सम्प्रदानम्' इत्यस्यानुवृत्तिरायाति। प्रीयमाणः इत्यस्यार्थोऽस्ति प्रीत्याश्रयः इति। प्रीञ् धातोः कर्मणि लटि, लटः स्थाने शानजादेशेऽनुबन्धलोपे च कृते प्रीयमाणः शब्दः सिद्धः भवति।

**रूपलेखनप्रकारः – हरये रोचते भक्तिः।** अत्र भक्तिः स्वविषयां प्रसन्नतां हरौ उत्पादयति इत्यर्थे 'हरिः' प्रीयमाणोऽस्ति, एतस्मात् 'रुच्यर्थानां प्रीयमाणः' इति सूत्रेण हरिशब्दस्य सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्तिः भवति हरये रोचते भक्तिः इति सिद्धम्।

**अन्यानि उदाहरणानि** –

(1) **बालकाय मोदकं रोचते।**
(2) **संयावः कस्मै न रोचते।**
(3) **ज्ञानं विदुषे रोचते।**
(4) **दानं महते रोचते।**
(5) **न मे स्वदतेऽपूपः।**

**प्रत्युदाहरणम् = देवदत्ताय रोचते मोदकः पथि** –

ननु 'रुच्यर्थानां प्रीयमाणः' इति सूत्रे 'प्रीयमाणः' इति किम्? इति प्रश्नोत्तरे उच्यते यत् प्रीयमाणस्यैव सम्प्रदानसंज्ञा स्यात् 'देवदत्ताय रोचते मोदकः पथि' इत्यत्र प्रीयमाणोऽस्ति देवदत्तः। अतः तस्यैव सम्प्रदानसंज्ञा भवति न तु 'पथि' इत्यस्य। यतो हि मार्गस्तु आधारो वर्तते अतः सप्तमी एव भवति।

**श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः १/४/३४ एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा। ज्ञीप्स्यमानः किम् - देवदत्ताय श्लाघते पथि।**

**पदविभागः -** श्लाघह्नुङ्स्थाशपाम्, ज्ञीप्स्यमानः।

**सूत्रप्रकारः -** संज्ञासूत्रम्।

**सूत्रार्थः -** श्लाघ्, ह्नुङ्, स्था, शप् एतेषां धातूनां प्रयोगे बोधयितुमिष्यमाणः सम्प्रदानसंज्ञो भवति।

**व्याख्या -** श्लाघश्च ह्नुङ् च, स्थाच शप् चेति श्लाघह्नुङ्स्थाशपः (इतरेतरद्वन्द्वः)। तेषां लाघह्नुङ्स्थाशपाम्। षष्ठीबहुवचनान्तं पदम्। ज्ञीप्स्यमानः - इति प्रथमान्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रादिह 'सम्प्रदानम्' इति पदस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः -** गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा।

**गोपी स्मरात् कृष्णाय श्लाघते** - इत्यत्र कामवशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं बोधयति, अतः बोधयितुमिष्टः भवति कृष्णः एतस्मात् कृष्णशब्दस्य 'श्लाघह्नुङ्स्था.' इति सूत्रेण सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्तौ कृतायां च गोपी स्मरात् कृष्णाय श्लाघते इति सिद्धम्।

**गोपी स्मरात् कृष्णाय ह्नुते** - अत्र गोपी निगूहनद्वारा कृष्णं स्वाशयं बोधयति अतः बोधयितुमिष्टः कृष्णोऽस्ति। अग्रे पूर्वानुसारेणैव बोध्यम्।

**गोपी स्मरात् कृष्णाय तिष्ठते** - अत्र गोपी स्थितिक्रियया स्वाशयं बोधयति। शेषं पूर्ववत्।

**गोपी स्मरात् कृष्णाय शपते** - अत्र उपालम्भक्रियया गोपी स्वाशयं बोधयति। शेषं पूर्ववत्।

**ज्ञीप्स्यमानः किम्?** यदि सूत्रे 'ज्ञीप्स्यमानः' इति पदस्य प्रयोगो न भवति तदा तु श्लाघह्नुङ्स्थाशपां योगे सम्प्रदानत्वं प्राप्तं स्यात्। एतस्मात् 'देवदत्ताय श्लाघते पथि' इत्यत्र पथिन् इत्यस्यापि सम्प्रदानसंज्ञा प्राप्ता भविष्यति, तन्निवारणार्थमेव ज्ञीप्स्यमानः इति पदस्य प्रयोगो भवति, ज्ञीप्स्यमानस्तु देवदत्तः अतः तस्यैव सम्प्रदानसंज्ञा भवति इति दिक्।

**धारेरुत्तमर्णः१/४/३५।। धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम् - देवदत्ताय शतं धारयति ग्रामे।**

**पदविभागः -** धारेः, उत्तमर्णः।

**सूत्रप्रकारः-** संज्ञासूत्रम्।

**सूत्रार्थः -** णिच् प्रत्ययान्त - धृ-धातोः प्रयोगे उत्तमर्णः = ऋणदाता संप्रदानसंज्ञको भवति।

**व्याख्या -** उत्तमम् अधिकतां प्राप्तं ऋणं यस्य स उत्तमर्णः। अन्यस्वामिकं द्रव्यं नियतकाले पुनरर्पणभावेन गृहीतम् ऋणमित्युच्यते। तस्य ऋणस्य धारकः अधमर्णः भवति। धनस्वामी उत्तमर्णो भवति। सूत्रे 'धारेः' इति पदं षष्ठ्यन्तम्, उत्तमर्णः - इति प्रथमान्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रादिह 'सम्प्रदानम्' इत्यस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः -1. भक्ताय धारयति मोक्षं हरिः** - इत्यत्र भक्तः सेवनपूजनादिव्यापारेण पत्रपुष्पतुलसीदलादिद्रव्यं हरये प्रयच्छति, हरिः ऋणी भवति तस्माद् अधमर्णो जायते। हरिश्च मोक्षप्रदानेन तदृणमपर्यति। ऋणग्रहीता अधमर्णो हरिः। ऋणस्य दाता उत्तमर्णो भक्तः। एतस्मात् 'धारेरुत्तमर्णः' इति सूत्रेण उत्तमर्णस्य भक्तशब्दस्य सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी भवति भक्ताय धारयति मोक्षं हरिः इति सिद्धम्।

**अन्यानि उदाहरणानि -**

**(1) गोपालः मह्यम् सहस्रं धारयति।**

**(2) सोमदेवः तुभ्यम् शतं धारयति किम्?**

**प्रत्युदाहरणम् - उत्तमर्णः किम्? देवदत्ताय शतं धारयति ग्रामे।**

ननु 'धारेरुत्तमर्णः' सूत्रेऽस्मिन् 'उत्तमर्णः' इति पदं नोच्यते तदा 'देवदत्ताय शतं धारयति ग्रामे' प्रयोगेऽस्मिन् ग्रामशब्दस्यापि सम्प्रदानसंज्ञापत्तिर्भवति, तद्वारणाय 'उत्तमर्णः' इति पदस्यौचित्यमस्ति। अत्र प्रयोगेऽस्मिन् उत्तमर्णः देवदत्तः न तु ग्रामः, अतः देवदत्तस्यैव सम्प्रदानसंज्ञा भवति, इति दिक्।

**विशेषतः** – भक्तः सेवनपूजनादिव्यापारेण यद् द्रव्यं हरये प्रयच्छति, तच्च गृह्णन् सन्तुष्टो हरिः मोक्षप्रदानेन प्रत्यर्पयति, इति विषये पौराणिकाः वदन्ति –

तोयं वा पत्रं वा यद्वा किञ्चित् समर्पितं भक्त्या।
तदृणं मत्वा देवो निःश्रेयसमेव निष्क्रियं मनुते।।
अत्र भक्तस्य ऋणदातृत्वेन उत्तमर्णत्वात् सम्प्रदानत्वम्।

**स्पृहेरीप्सितः१/४/३६।। स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किम् – पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायान्तु परत्वात् कर्मसंज्ञा। पुष्पाणि स्पृहयति।**

**पदविभागः** – स्पृहेः, ईप्सितः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – स्पृहधातोः प्रयोगे ईप्सितकारकस्य सम्प्रदानसंज्ञा भवति।

**व्याख्या** – स्पृहेरीप्सितः। स्पृहेः – षष्ठ्यन्तं पदम्, ईप्सितः – प्रथमान्तं पदम्। चुरादिगणे 'स्पृह ईप्सायाम्' इति अदन्तधातुत्वात् स्वार्थे णिचि प्रत्यये अल्लोपे कृते स्पृहि इति भवति, एतस्य षष्ठ्येकवचने स्पृहेः इति रूपं भवति। आप्तुमिच्छा इत्यर्थे आप् धातोः सनि क्त प्रत्यये च ईप्सितः इति भवति। 'प्रयोगे' इत्यस्याध्याहारो भवति। 'कारके' इत्यस्याधिकारो वर्तते। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रादिह 'सम्प्रदानम्' इति पदस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः**– पुष्पेभ्यः स्पृहयति – इत्यत्र स्पृह् धातोः प्रयोगे ईप्सितस्य पुष्पशब्दस्य 'स्पृहेरीप्सितः' इति सूत्रेण सम्प्रदानसंज्ञा भवति। 'चतुर्थी सम्प्रदाने' इति चतुर्थी विभक्तौ कृतायां बहुवचने भ्यस् प्रत्यये पुष्पेभ्यः स्पृहयति इति सिद्धम्।

**प्रत्युदाहरणम् – ईप्सितः किम्** – ननु 'स्पृहेरीप्सितः' सूत्रे 'ईप्सितः' इति पदं नोच्यते तदा 'पुष्पेभ्यो वने स्पृहयति' इत्यत्रापि वनशब्दस्य सम्प्रदानसञ्ज्ञा प्राप्ता स्यात्, तन्निवारणार्थमेव 'ईप्सितः' इति पदस्यावश्यकता। अतएव वनस्य ईप्सितत्वाभावात् सम्प्रदानसंज्ञा न भवति अपितु आधारत्वात् अधिकरणसंज्ञा भवति।

**विशेषः** – 'स्पृहेरीप्सितः' इति सूत्रेण विधीयमाना संज्ञा ईप्सितमात्रार्थे एव स्पृहेः प्रयोगे भवति। प्रकर्षविवक्षायाम् = ईप्सिततमविवक्षायां तु परत्वात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मसञ्ज्ञा एव भवति 'पुष्पाणि स्पृहयति' इति भवति।

**क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः।।१/४/३७ क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा। 'यं प्रति कोपः' किम्? भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन 'यं प्रति कोपः' इति।**

**पदविभागः** – क्रुधद्रुहेर्ष्यासूयार्थानाम्, यम्, प्रति, कोपः।

**सूत्रप्रकारः** –संज्ञासूत्रम्।

**सूत्रार्थः**– क्रुध्–द्रुह्–ईर्ष्य्–असूय् इत्येतेषां धातूनां तेषां समानार्थकानाञ्च प्रयोगे सति यं प्रति कोपो भवति तस्य कारकस्य सम्प्रदानसञ्ज्ञा भवति।

**व्याख्या** – क्रुधश्च द्रुहश्च ईर्ष्या च असूयाचेति क्रुधद्रुहेर्ष्यासूयाः, क्रुधद्रुहेर्ष्यासूयाः अर्था येषां ते क्रुधद्रुहेर्ष्यासूयार्थास्तेषां क्रुधद्रुहेर्ष्यासूयार्थानाम्। क्रुधद्रुहेर्ष्यासूयार्थानाम् – इति षष्ठ्यन्तं पदम्। यम् – इति द्वितीयान्तपदम्। प्रति – इति

अव्ययपदम्। कोप: – इति प्रथमान्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'सम्प्रदानम्' इति पदस्यानुवर्तनं भवति। अत्र धातूनामर्थान् स्पष्टयति ग्रन्थकार: – क्रोधो नाम अमर्ष:, अर्थात् असहनशीलता। द्रोह: अपकार:। ईर्ष्या अक्षमा = असूया = गुणेषु दोषाविष्करणम्, अर्थात् गुणेषु छिद्रान्वेषणम्। क्रोधादय: समेऽपि भाव: कोपप्रभवा एव, अत: सर्वेषां कृते यं प्रति कोप: इत्येव सामान्यतया विशेषणत्वेन प्रयुक्तम्।

**रूपलेखनप्रकार: – हरये क्रुध्यति** – अत्र हरिशब्दस्य 'क्रुधद्रुहेर्ष्यासूया....' इति सूत्रेण सम्प्रदानसंज्ञा भवति। 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्तौ कृतायां हरये क्रुध्यति इति सिद्धं भवति। एवमेव द्रुहेर्ष्यासूयादीनां योगेऽपि हरये द्रुह्यति हरये ईर्ष्यति, हरये असूयति इत्यादय: सिद्धा: भवन्ति।

**अन्यानि उदाहरणानि –**

**( 1 ) गुरु: मूर्खाय शिष्याय क्रुध्यति।**
**( 2 ) दैत्या: देवेभ्य: द्रुह्यन्ति।**
**( 3 ) कर्ण: अर्जुनाय ईर्ष्यति।**
**( 4 ) मन्दमति: बुद्धिमते असूयति।**
**( 5 ) रूष्यति माता पुत्राय।**

**प्रत्युदाहरणम् –**

**यं प्रति कोप: किम् –**

'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप:' सूत्रे 'यं प्रति कोप:' इति न उच्यते तदा को दोष:? तर्हि समाधानं प्रस्तूयते यत् 'भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदिति' इत्यत्र भार्याशब्दस्य संप्रदानसंज्ञा भविष्यति न त्वत्र द्वितीया विभक्ति: इत्येव दोष:। परञ्च वास्तविकरूपेण अत्र कोप: भार्यां प्रति नास्ति अपितु एनाम् अन्य: न पश्येत् इत्येतदर्थं भार्यागुणेषु दोषारोपणं करोति इति वाक्यार्थ:। अत एव 'यं प्रति कोप:' इति सूत्रांशस्य प्रयोगात् सम्प्रदानसंज्ञा न भवति, द्वितीया एव जायते।

**विशेष: – द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन 'यं प्रति कोप:'** इति। वस्तुत: क्रोधद्रोहेर्ष्यासूयादीनां मूले कोप: एव भवति। अतएव सूत्रे सर्वेषां कृते एकस्यैव विशेषणस्य प्रयोगो विद्यते 'यं प्रति कोप:' इति। अन्यथा तु यं प्रति द्रोह:, यं प्रति ईर्ष्या, यं प्रति असूया इत्यादीनां पृथक् पृथक् रूपेण वचनं स्यात्। अत्र कोपक्रोधौ समानार्थकौ इति मत्वा कुप् धातुयोगे सम्प्रदानसंज्ञा नोपयुक्ता। यतो हि प्ररूढकोप एव हि क्रोध:, अत: कोपेन क्रोधस्य तु ग्रहणं भवति परं क्रोधेन कोपस्य न क्रोधस्य कोपापेक्षया विशेषात् इति। एतेन 'कस्मैचित् कुप्यति' इत्यादि प्रयोग: असाधु: एव।

**क्रुधद्रुहोरुपसृष्टयो: कर्म १/४/३८।। सोपसर्गयोरनयोर्योगे यं प्रति कोप: तत्कारकं कर्मसञ्ज्ञं स्यात्। क्रूरमभिक्रुध्यति, अभिद्रुह्यति वा।**

**पदविभाग: –** क्रुधद्रुहो:, उपसृष्टयो: कर्म।

**सूत्रप्रकार: –** संज्ञासूत्रम्।

**सूत्रार्थ: –** उपसर्गयुक्तयो: क्रुध्–द्रुह्–इत्यनयो: धात्वो: योगे यं प्रति कोपो भवति तत्कारकं कर्मसंज्ञं भवति।

**व्याख्या –** क्रुधश्च द्रुह् चेति क्रुधद्रुहौ (इतरेतरद्वन्द्व:) तयो: क्रुधद्रुहो: – इति षष्ठ्यन्तं पदम्। उपसृष्टयो: – इति षष्ठीद्विवचनान्तं पदम्। कर्म– इति प्रथमान्तम्। 'कारके' इत्यस्याधिकारो वर्तते। पूर्वसूत्रात् 'यं प्रति कोप:' इति अनुवर्तते। योगे इत्यस्याध्याहार: क्रियते। 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप:' इत्यस्यापवादसूत्रमिदम्।

**रूपलेखनप्रकार: – क्रूरमभिक्रुध्यति–** अत्र 'अभि' इति उपसर्गपूर्वकस्य क्रुध–धातुयोगे क्रूरशब्दस्य 'क्रुधद्रुहोरुप....' इति सूत्रेण कर्मसंज्ञाकृतायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तौ कृतायाञ्च क्रूरमभिक्रुध्यति इति सिद्धम्।

एवमेव अभिद्रुह्यति योगेऽपि 'क्रूरमभिद्रुह्यति' इति सिद्धम् भवति।

**राधीक्ष्योर्यस्य विप्रश्नः १/४/३९ ।। एतयोः कारकं सम्प्रदानं स्यात्, यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति, ईक्षते वा। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः।**

**पदविभागः** – राधीक्ष्योः, यस्य, विप्रश्नः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – राध्–ईक्ष् इत्यनयोः धात्वोः प्रयोगे यद्विषयकः शुभाशुभविचारः क्रियते, तत्कारकं सम्प्रदानसंज्ञं भवति।

**व्याख्या** – राधिश्च ईक्षिश्च राधीक्षी (इतरेतरद्वन्द्वः) तयोः राधीक्ष्योः। विविधः प्रश्नो विप्रश्नः। राधीक्ष्योः – षष्ठीद्विवचनान्तं पदम्। यस्य – षष्ठ्यन्तम्। विप्रश्नः = प्रथमान्तम्। राध् संसिद्धौ, ईक्षदर्शने इत्यनयोरत्रार्थो भवति – 'प्रश्नविषयकशुभाशुभविचारः' इति। 'कर्मणा यमभिप्रैति' इति सूत्रात् 'सम्प्रदानम्' इति पदमनुवर्तते। 'कारके' इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः** – **कृष्णाय राध्यति, ईक्षते वा।** अत्र पृष्टो गर्ग शुभाशुभं पर्यालोचयति इत्यर्थो वाक्यस्य। अत्र 'राधीक्ष्योर्यस्य विप्रश्नः' इति सूत्रेण कृष्णशब्दस्य सम्प्रदानसंज्ञा कृता। 'चतुर्थीसम्प्रदाने' इति चतुर्थीविभक्तौ कृतायां कृष्णाय राध्यति, कृष्णाय ईक्षते वा इति रूपद्वयं सिद्धम्।

**प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता १/४/४० ।। आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति, आशृणोति वा। विप्रेण मह्यं देहीति प्रवर्तितस्तत्प्रति जानीते इत्यर्थः।**

**पदविभागः**– प्रत्याङ्भ्यां, श्रुवः पूर्वस्य, कर्ता।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – प्रत्याङ्भ्यां परस्य श्रुधातुयोगे पूर्वस्य प्रेरणारूपव्यापारस्य कर्ता कारकं सत् सम्प्रदानसंज्ञो भवति।

**व्याख्या** – प्रतिश्च आङ् चेति प्रत्याङौ (इतरेतरद्वन्द्वः) ताभ्यां प्रत्याङ्भ्याम्– पञ्चमीद्विवचनान्तम्। श्रुवः – षष्ठ्यन्तं, पूर्वस्य – षष्ठ्यन्तं, कर्ता – प्रथमान्तम्। 'कारके' इत्यस्याधिकारो वर्तते। कर्मणा यमभिप्रैति स सम्प्रदानम् इत्यस्मात् सम्प्रदानम् इत्यस्यानुवर्तनं भवति। प्रत्याङ्भ्यामित्यनेन समुदिताभ्यां परस्य इत्यर्थो न विवक्षितः अपितु तयोः प्रत्येकमेव निमित्तरूपेण स्यादिति। अन्यथा 'अभिनिविशश्च' इति सूत्रवत् अविकलरूपेण अत्रापि 'प्रत्याङ्श्रुवः' इत्येव ब्रूयात्। इत्येव चिन्त्य उदाहरति ग्रन्थकारः – विप्राय गां प्रति शृणोति आशृणोति वा इति।

**रूपलेखनप्रकारः** – विप्राय गां प्रतिशृणोति आशृणोति वा – इत्यत्र विप्रः यजमानं कथयति यत् मह्यं गां देहि इति। अत्र पूर्वप्रेरकः विप्रोऽस्ति। तदनन्तरं यजमानः 'तुभ्यं ददामि' इति अभ्युपगच्छति। अतः पूर्वप्रवर्तनारूपव्यापारस्य कर्तुः विप्रस्य 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' इति सूत्रेण सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति चतुर्थी विभक्तौ कृतायां विप्राय गां प्रतिशृणोति आशृणोति वा इति सिद्धम्।

**अनुप्रतिगृणश्च १/४/४१ ।। आभ्यां गृणातेः कारकं पूर्वव्यापाररस्य कर्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति, प्रतिगृणाति वा। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः।**

**पदविभागः** – अनुप्रति, गृणः, च।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – अनुपूर्वकात् गृधातुयोगे प्रतिपूर्वकात् गृधातुयोगे च पूर्वव्यापारस्य कर्तृभूतं कारकं सम्प्रदानसंज्ञं स्यात्।

**व्याख्या** – अनुश्च प्रतिश्चेति अनुप्रती (इतरेतरद्वन्द्वः) ताभ्याम् अनुप्रतिभ्याम्। अत्र लुप्तपञ्चम्यन्तं पदम् अनुप्रति। गृणः – षष्ठ्यन्तं पदम्। च – इति अव्ययपदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यनेन 'सम्प्रदानम्' इत्यस्य,प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता इत्यनेन 'पूर्वस्य कर्ता' इत्यस्य च अनुवर्तनं भवति।

पूर्वसूत्रे यथा प्रत्याङ्भ्यमिति द्विवचननिर्देशः आसीत् तस्मात् बलात् तत्र प्रत्येकमेव धातुसम्बन्धावधारणा विहिता तत्साहचर्यात् अत्रापि प्रत्येकं धातुसम्बन्धः बोध्यः, अतएव सूत्रवृत्तौ 'आभ्याम्' इति **पदस्य प्रयोगः** विहितः। तथा च उदाहरति ग्रन्थकारः – होत्रेऽनुगृणाति, होत्रे प्रतिगृणाति वा इति।

**रूपलेखनप्रकारः** – होत्रेऽनुगृणाति, प्रतिगृणाति वा – होता प्रथमं शंसति(मन्त्रं पठति) अध्वर्युः तं पुनः पुनः संशनाय प्रोत्साहयति इत्यर्थे कृते गृधातोः पूर्वव्यापारस्य शंसनस्यकर्ता होता प्रोत्साहने कर्म भवति तस्य प्राप्तां कर्मसंज्ञां प्रबाध्य 'अनुप्रतिगृणश्च' इति सूत्रेण सम्प्रदानसंज्ञा भवति 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्तौ कृतायां होत्रेऽनुगृणाति इति सिद्धम्। एवमेव प्रतियोगे होत्रे प्रतिगृणाति इति जायते।

**परिक्रयणे सम्प्रदानमन्यतरस्याम् १/४/४४।। नियतकालं भृत्यास्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं सम्प्रदानसञ्ज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः। वा. 'तादर्थ्ये चतुर्थी वाच्या'। मुक्तये हरिं भजति। वा. 'क्लृपि सम्पद्यमाने च' भक्तिर्ज्ञानाय कल्पते, सम्पद्यते, जायते इत्यादि। वा. 'उत्पातेन ज्ञापिते च' वाताय कपिला विद्युत्। वा. 'हितयोगे च' ब्राह्मणाय हितम्।**

**पदविभागः** – परिक्रयणे, सम्प्रदानम्, अन्यतरस्याम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – परिक्रयणे साधकतमं कारकं विकल्पेन सम्प्रदानसंज्ञं भवति।

**व्याख्या** – परिक्रयणे – सप्तम्यन्तं पदम्। सम्प्रदानम् –प्रथमान्तम्। अन्यतरस्याम् = विकल्पार्थकं विभक्तिप्रतिरूपकमव्ययम्। 'कारके' इत्यस्याधिकारो वर्तते। नियतकालं भृत्या स्वीकरणं परिक्रयणम्। 'साधकतमं करणम्' इत्यतः 'साधकतमं' इत्यस्यानुवृत्तिः आयाति।

**रूपलेखनप्रकारः** – शतेन शताय वा परिक्रीतः – इत्यत्र नियतकालं यावत् शतद्रव्येण भृत्यकार्याय स्वीकृतिः प्रदत्ता। अत एव 'शत' इति साधकतममस्ति, तदनुसारेण 'साधकतमं करणम्' इत्यनेन करणसंज्ञा प्राप्ता भवति तां प्रबाध्य 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इति सूत्रेण विकल्पेन 'शत' शब्दस्य सम्प्रदानसंज्ञा भवति 'चतुर्थीसम्प्रदाने' इति सूत्रेण चतुर्थीविभक्तौ शताय इति भवति। संप्रदानसंज्ञाऽभावे करणसंज्ञायां 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया विभक्तिः भवति शतेन इति जायते। शतेन शताया वा परिक्रीतः इति वाक्यं सिद्धम्।

## वा. तादर्थ्ये चतुर्थी वाच्या।

**वार्तिकार्थः** – तस्मै प्रयोजनाय इदं तदर्थम्, तदर्थस्य भावस्तादर्थ्यम्, तस्मिन् तादर्थ्ये। सप्तम्यन्तं पदम्। उपकार्योपकारकभावसम्बन्धोऽत्र विवक्षितः। तत्र उपकार्यादेव चतुर्थी भवति।'चतुर्थी सम्प्रदाने' इति भाष्ये पठितमेतत् सूत्रम्। तत्र यूपाय दारु, कुण्डलाय हिरण्यम् इत्यादीनि उदाहरणानि पठितानि सन्ति।

**रूपलेखनप्रकारः** – मुक्तये हरिं भजति – अत्र भक्तः हरेः भजनं करोति, तादर्थ्यमस्ति मुक्तिः, एतस्मात् मुक्तिशब्दात् 'तादर्थ्ये चतुर्थी वाच्या'इति वार्तिकेन चतुर्थीविभक्तौ मुक्तये हरिं भजति इति भवति।

**अन्यानि उदाहरणानि** –

**( 1 ) यूपाय दारु।**
**( 2 ) कुण्डलाय हिरण्यम्।**
**( 3 ) ओदनाय तण्डुलाः।**
**( 4 ) वस्त्रेभ्यः कार्पासम्।**

## वा. क्लृपि सम्पद्यमाने च

**वार्तिकार्थः** – क्लृप्धातोः प्रयोगे तत्समानार्थकानां (सम्+पद्, भू,जन्) धातूनां प्रयोगे च यस्य सम्पादनं भवति

तस्मात् चतुर्थी प्रयुज्यते। अतएव वार्तिके 'सम्पद्यमाने' इति पदस्यार्थो भवति विकाररूपेण उत्पत्तिः परिणामो वा।
**रूपलेखनप्रकारः** –भक्तिर्ज्ञानाय कल्पते, सम्पद्यते, जायते इति। इत्यत्र भक्तिः ज्ञानात्मना परिणमते, अत एव क्लृप्धातोः प्रयोगे तत्समानार्थकानां प्रयोगे वा ज्ञानशब्दात् 'क्लृपि सम्पद्यमाने च' इति वार्तिकेन चतुर्थीविभक्तौ भक्तिर्ज्ञानाय कल्पते, सम्पद्यते जायते इति सिद्धम्।

### वा. उत्पातेन ज्ञापिते च –

**वार्तिकार्थः** – अशुभस्य सूचकः आकस्मिकः भूतविकारः उत्पातः। तेन ज्ञापितेऽर्थे चतुर्थी विभक्तिः भवति।
**रूपलेखनप्रकारः** – वाताय कपिला विद्युत् – इत्यत्र महावातस्य सूचिका अस्ति कपिला विद्युत् इति वाक्यार्थे उत्पातेन ज्ञापितोऽस्ति वातः, एतस्मात् वातशब्दात् 'उत्पातेन ज्ञापिते च' इति वार्तिकेन चतुर्थीविभक्तौ वाताय कपिला विद्युत् इति भवति। अस्मिन् विषये पद्यात्मकम् उदाहरणमत्र प्रस्तूयते –

**वाताय** कपिला विद्युद् **आतपाया**तिलोहिनी।
पीता **वर्षाय** विज्ञेया **दुर्भिक्षाय** सिता भवेत्।।

इत्यत्र वात–आतप–वर्षण–दुर्भिक्षादयः चत्वारः उत्पातेन ज्ञापिताः सन्ति, अतः चतुर्षु स्थानेषु चतुर्थी प्रयुक्ता भवति। वाताय, आतपाय, वर्षाय, दुर्भिक्षाय इत्यादयः भवन्ति।

### वा. हितयोगे च –

**वार्तिकार्थः** – 'हितम्' इति शब्दस्य योगे यस्य उपकारो भवति, तस्मात् उपकृतात् चतुर्थी भवति। अत्र प्रमाणं 'चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः' इति सूत्रम्।
**रूपलेखनप्रकारः** – ब्राह्मणाय हितम् – इत्यत्र 'हितयोगे च' इति वार्तिकेन उपकृतात् ब्राह्मणशब्दात् चतुर्थीविभक्तौ कृतायां ब्राह्मणाय हितम् इति भवति। एवमेव गवे हितम्, प्रजायै हितम्, मात्रे हितम् इत्यादयः भवन्ति।
**क्रियार्थोपपदस्य च कर्मणि स्थानिनः २/३/१४।। क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्त्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुम् इत्यर्थः। एवं 'स्वयम्भुवे नमस्कृत्य' इत्यादावपि।**
**पदविभागः** – क्रियार्थोपपदस्य, च, कर्मणि, स्थानिनः।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – क्रियार्था क्रिया उपपदं यस्य तस्य अप्रयुज्यमानस्य तुमुन्प्रत्ययान्तस्य क्रियायाः कर्मणि चतुर्थी भवति।
**व्याख्या** – क्रिया अर्थः = प्रयोजनं यस्याः सा क्रियार्था। क्रियार्था क्रिया उपपदं यस्य स क्रियार्थोपपदस्तस्य क्रियार्थोपपदस्य (उपपदलोपी बहुव्रीहिः)। क्रियार्थोपपदस्य – इति षष्ठ्यन्तं पदम्।च– इति अव्ययम्। कर्मणि – सप्तम्यन्तं पदम्। स्थानिनः – इति षष्ठ्यन्तं पदम्। अनभिहिते – इत्यस्याधिकारो वर्तते। 'चतुर्थी सम्प्रदाने' इत्यतः 'चतुर्थी' इत्यस्यानुवर्तनं भवति। उपपदम् = उप समीपे उच्चरितं पदम् इत्युच्यते। स्थानिनः = अप्रयुज्यमानस्य इत्यर्थः। स्थानिनः इति तुमुन् प्रत्ययान्तस्य विशेषणम्।
**रूपलेखनप्रकारः** – **(1) फलेभ्यो याति** – फलानि आहर्तुं याति इत्यर्थे 'याति' इति क्रियापदम् आहरणक्रियायाः उपपदमस्ति यतो हि यानक्रिया आहरणक्रियार्थमेव भवति। अतः क्रियार्थोपपदस्य 'अप्रयुक्तस्य तुमुन्प्रत्ययान्तस्य अप्रयोगे सत्यपि' कर्मणि चतुर्थी भवति। तत् कर्मपदमस्ति 'फलम्' तस्मात् 'कर्मणि द्वितीया' इति सूत्रेण प्राप्तां द्वितीयां प्रबाध्य 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति सूत्रेण चतुर्थी विभक्तौ फलेभ्यो याति इति सिद्धम्।
**(2) नमस्कुर्मो नृसिंहाय** – नृसिंहमनुकूलयितुं नमस्कुर्मः इत्यर्थे 'नमस्कुर्मः' इति क्रियापदम् अनुकूलनक्रियायाः उपपदमस्ति। तुमुन् प्रत्ययान्तस्य अप्रयोगेऽपि अनुकूलनक्रियायाः कर्मणि 'नृसिंह' इति शब्दे 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति सूत्रेण चतुर्थी प्रयुज्यते। नमस्कुर्मो नृसिंहाय इति भवति। एवमेव स्वयम्भुवे नमस्कृत्य

इत्यादिष्वपि अनुकूलयितुम् इति पदस्यान्वयं कृत्वा स्वयम्भूशब्दे चतुर्थी क्रियते।

**तुमर्थाच्च भाववचनात् २/३/१५।। भाववचनाश्चेति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्। यागाय याति। यष्टुं यातीत्यर्थः।**

**पदविभागः** – तुमर्थात्, च, भाववचनात्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** : – तुमुनः अर्थ इव अर्थो यस्य तादृशो यः 'भाववचनाश्च' इति सूत्रेण विधीयमानो घञ्प्रत्ययः, तदन्तात् शब्दात् चतुर्थी भवति।

**व्याख्या** – तुमुनोऽर्थ इव अर्थो यस्य स तुमर्थस्तस्मात् तुमर्थात् (बहुव्रीहिः)। भावस्य वचनो भाववचनस्तस्माद् भाववचनात् (षष्ठी तत्पुरुष) तुमर्थात् – इति पञ्चम्यन्तं पदम्। च – इति अव्ययम्। भाववचनात् – इति पञ्चम्यन्तम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते। 'चतुर्थी सम्प्रदाने' इत्यस्मात् 'चतुर्थी' इत्यस्यानुवृत्तिरायाति। अत्र 'तुमुनः अर्थ इव अर्थो यस्येति विग्रहे कृते स्पष्टं भवति यत् 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इतिसूत्रेण क्रियार्थक्रियायाम् उपपदभूतायां भविष्यति काले यथा प्रत्ययौ भवतः (भोक्तुं व्रजति, भोजको व्रजति) तद्वदर्थे एव अस्य सूत्रस्य प्रवृत्तिः भवति अतएव मूले उक्तम् –यागाय याति यष्टुं याति इत्यर्थः।

**रूपलेखनप्रकारः** – यागाय याति – इत्यत्र यज्धातोः 'भाववचनाश्च' इति सूत्रेण घञ्प्रत्यये यागः इति शब्दस्य निष्पत्तिः भवति। यष्टुं याति इत्यर्थे याति इति क्रियार्थकक्रियोपपदम्। अतएव 'तुमर्थाच्च भाववचनात्' इति सूत्रेण यागशब्दात् चतुर्थी भवति यागाय याति इति सिद्धम्।

**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च २/३/१५।। एभिर्योगे चतुर्थी स्यात्। हरये नमः। परिभाषा – उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थ ग्रहणम्। तेन दैत्येभ्यो हरिरलम्, प्रभुः समर्थः शक्त इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। 'तस्मै प्रभवति-' (५-१/१०१) 'स एषां ग्रामणीः' (५-२-७८) इति निर्देशात्। तेन 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः, तेनाशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि' (२-३-७३) इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्।**

**पदविभागः** – नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगात्, च।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – सूत्रे पठितानां शब्दानां योगे चतुर्थी विभक्तिः भवति।

**व्याख्या** – नमश्च स्वस्ति स्वाहा च स्वधाच अलं वषट् च तेषामितरेतरयोगद्वन्द्वो नमःस्वस्तिस्वाहास्वधालंवषडः, तेषां योगो नमःस्वस्तिस्वाहास्वधालंवषड्योगः तस्मात् नमःस्वस्तिस्वाहास्वधालंवषड्योगात्। 'चतुर्थी सम्प्रदाने' इत्यस्मात् 'चतुर्थी' इत्यस्यानुवर्तनं भवति। योगः – युज्यते इति कर्मणि घञि प्रत्यये 'योगः' इति भवति। योगात् – इति पञ्चम्यन्तं पदम्। सूत्रोक्ताः सर्वे शब्दाः अव्ययपदत्वेन प्रयुक्ताः भवन्ति। नमःस्वस्तिस्वाहास्वधालंवषड् इत्यादियोगे तादर्थ्यस्य शेषत्वविवक्षायामपि चतुर्थीविधानामर्थमिदं सूत्रम्। शेषत्वविवक्षायां तादर्थ्यचतुर्थी षष्ठीनिवारणार्थम् अस्ति।

**रूपलेखनप्रकारः** – हरये नमः – अत्र 'नमः' योगे नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च इति सूत्रेण हरिशब्दात् चतुर्थी विभक्ति भवति हरये नमः इति सिद्धम्।

**नमस्करोति देवान्**– अत्र 'नमः' इति पदमाश्रित्य 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेण चतुर्थी प्राप्ता भवति, अत्रैव 'नमस्करोति' इति क्रियापदमाश्रित्य 'कर्मणि द्वितीया' इतिसूत्रेण द्वितीया विभक्तिः प्राप्ता भवति। एतस्यामवस्थायाम् 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति परिभाषाबलने कारकविभक्तिरेव प्रयुज्यते तस्मादत्र देवशब्दात् 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तौ बहुवचने शस् प्रत्यये नमस्करोति देवान् इति भवति।

**परिभाषा - उपपदविभक्तेः कारकविभक्तिर्बलीयसी** - विभक्तिः द्विधा विभज्यते - उपपदविभक्तिः कारकविभक्तिश्च। उपपदविभक्तिः - पदान्तरयोगनिमित्ता विभक्तिः उपपदविभक्तिः। कारकविभक्तिः - क्रियामाश्रित्य उत्पन्ना विभक्तिः कारकविभक्तिः। वस्तुतः क्रियाकरकयोर्हि सम्बन्धः अन्तरङ्गो भवति। उपपदार्थेन तु यथाकथञ्चित् क्रियाकारकभावमूलकः सम्बन्धः इति तन्निमित्ता विभक्तिः बहिरङ्गा भवति। अत एव अन्तरङ्गत्वात् कारकविभक्तिरेव बलीयसी भवति इति दिक्।

**प्रजाभ्यः स्वस्ति** - अत्र स्वस्ति योगे प्रजाशब्दात् चतुर्थीबहुवचने प्रजाभ्यः स्वस्ति इति भवति।

**अग्नये स्वाहा** - अत्र स्वाहा योगे अग्निशब्दात् चतुर्थ्याः एकवचने अग्नये स्वाहा इति भवति।

**पितृभ्यः स्वधा** - अत्र स्वधा योगे पितृशब्दात् चतुर्थीबहुवचने भ्यस्-प्रत्यये पितृभ्यः स्वधा इति भवति।

**वा. अलमिति पर्याप्त्यर्थग्रहणम् -**

**वार्तिकार्थः - अलम् इत्यनेन पर्याप्त्यर्थकशब्दानामेव ग्रहणम् अर्थात् प्रभुः, समर्थः, शक्तः इत्यादीनां ग्रहणं स्यात्।**

ननु 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेण अलम् इत्यस्य पाठेन 'कुमारीणामलङ्कार' इत्यत्र कुमारीशब्दात् चतुर्थी स्यादिति अतिव्याप्तिः यतो हि 'अलम्' इत्यस्य भूषणादीनां कृतेऽपि प्रयोगो भवति। अत एव 'अलमिति पर्याप्त्यर्थग्रहणम्' इति वार्तिकेन नियम्यते यत् 'अलम्' इति पदस्य प्रयोगः प्रकृतसूत्रे पर्याप्त्यर्थकशब्दानां ग्रहणाय कृतः। तस्मात् कुमारीणामलङ्कारः इत्यत्र चतुर्थ्याः आपत्तिः निराकृता भवति। तेन दैत्येभ्यो हरिलं, प्रभुः, समर्थः शक्तः इत्यादिष्वेव चतुर्थी भवति।

**पङ्क्तिविवेचनम्** - प्रभ्वादियोगे षष्ठी अपि साधुर्भवति। यतो हि पाणिनिना 'तस्मै प्रभवति सन्तापादिभ्य' (५.१.१०१) इत्यत्र 'प्रभु' इति योगे चतुर्थी 'स एषां ग्रामणीः' अत्र ग्रामणीः शब्दः 'स्वामी' इत्यस्य पर्यायोऽस्ति एतस्य योगे षष्ठ्याः प्रयोगः कृतः। तेन 'प्रभुर्बुभूषुर्भवनत्रयस्य' इत्यत्र माघकाव्ये 'भुवनत्रस्य प्रभुः' इति षष्ठी सम्यगेव प्रतीयते।

**वषड् इन्द्राय** - इन्द्रोद्देश्यकं हविरर्पणमित्यर्थके वाक्ये 'वषट्' इत्यस्य योगे 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेण इन्द्रशब्दात् चतुर्थीविभक्तौ वषड् इन्द्राय इति भवति।

**अन्यानि उदाहरणानि -**

**( 1 ) गं गणपतये नमः।**

**( 2 ) शिष्याय स्वस्ति।**

**( 3 ) रुद्राय स्वाहा।**

**( 4 ) प्रपितामहाय स्वधा।**

**( 5 ) अलं मल्लो मल्लाय।**

**चकारः पुनर्विधानार्थः** - ननु 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' सूत्रे चकारस्य पुनर्विधानसामर्थ्येन उच्यते यत् 'स्वस्ति गोभ्यो भूयात्' इत्यत्र 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' (२/३/७३) इति सूत्रानुरोधेन षष्ठी चतुर्थ्यौ स्तः। अत्रैव 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रेण स्वस्तियोगे चतुर्थ्यैव भवति, पुनश्च 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रापेक्षया 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति सूत्रं परत्वात् बलवान् अस्ति अतः षष्ठी चतुर्थी च अनयो द्वयोरेव प्रयोगो भवेत्, तन्निवारणार्थमेव मूले उक्तम् 'तेन आशीर्विवक्षायां परामपि 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। अतः स्वस्ति गोभ्यो भूयात् इत्येव साधुः।

**मन्येकर्मण्यनादरे विभाषाऽप्राणिषु २/३/१७।। प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वां तृणं मन्ये, तृणाय वा श्यना निर्देशानानादिकयोगे न। न त्वां तृणं मन्ये। वा. 'अप्राणिष्वित्यपनीय**

**नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' तेन 'न त्वां नावमन्नं मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न, न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।**

**पदविभागः –** मन्यकर्मणि, अनादरे, विभाषा, अप्राणिषु।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** प्राणिभिन्ने मन्धातोः अनुक्ते कर्मणि चतुर्थी वा स्यात् अनादरद्योतके अर्थे।

**व्याख्या –** मन्यस्य कर्म मन्यकर्म (ष.तत्पुरुष) तस्मिन् मन्यकर्मणि। न आदरो अनादरस्तस्मिन् अनादरे (नञ्तत्पुरुषः) न प्राणिनोऽप्राणिनस्तेषु अप्राणिषु। मन्यकर्मणि (सप्तम्यन्तम्), अनादरे (सप्तम्यन्तम्) विभाषा (प्रथमान्तम्) अप्राणिषु (सप्तम्यन्तम्) अत्र मन् ज्ञाने इत्यस्य दिवादिगणस्थस्य धातोः श्यना मन्य इति निर्देशः, न तु मनु अवबोधने इत्यस्य तनादिगणस्थस्य। 'चतुर्थी सम्प्रदाने' इत्यस्मात् 'चतुर्थी' इत्यस्यानुवर्तनं भवति। सूत्रे 'अनादरः' इत्यस्य तात्पर्यः आदराभावो न विद्यते अपितु तिरस्कार एव बोध्यम्। 'अनादरः परिभवः परीभावस्तिरस्क्रिया' इत्यमरकोषे उक्तम्।

**रूपलेखनप्रकारः –** न त्वां तृणं मन्ये तृणाय वा। अत्र तृणादपि अधमत्वप्रतीतिरेव तिरस्कारः। न त्वां तृणत्वेनापि मन्ये इति भावः। एतस्मात् 'कर्मणि द्वितीया' इत्यनेन प्राप्तां द्वितीयां प्रबाध्य 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रेण विकल्पेन चतुर्थीविधानं क्रियते, अतः तिरस्कारवाचकात् तृणशब्दात् चतुर्थीविभक्तौ तृणाय इति भवति। पक्षे द्वितीयायां तृणम् इति भवति। 'न त्वां तृणं मन्ये तृणाय वा' इति वाक्यं सिद्धम्।

**प्रत्युदाहरणम् – न त्वां तृणं मन्वे –**

अत्र तनादिस्थस्य मन्धातोः प्रयोगः कृतः। सूत्रे दिवादिस्थस्य मन् धातोरेव ग्रहणं वर्तते। एतस्मात् 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रस्य प्रवृत्तिः प्रयोगेऽस्मिन् न भवति, अपितु 'कर्मणि द्वितीया' इति सूत्रेण तृणशब्दात् द्वितीया विभक्तिः एव प्रयुक्ता भवति न त्वां तृणं मन्वे इति साधुः।

**पङ्क्तिविवेचनम् – अप्राणिष्वित्यनीय –** ननु 'न त्वां नावमन्नं वा मन्ये' इत्यत्र 'नौ' शब्दः अन्नशब्दश्च अप्राणिवाचकौ स्तः अतः अप्राणिवाचकत्वे सति "मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रेण चतुर्थी स्यादिति अतिव्याप्तिः भवति। तथा च 'न त्वां शुने मन्ये' इत्यत्र श्वन्-शब्दः प्राणिवाचकत्वे सति प्रकृतसूत्रेण चतुर्थी न प्राप्ता भवति अतः अव्याप्तिः। अत एव दोषस्य निराकरणाय एव वार्तिकमत्र प्रस्तूयते। मूले उक्तम् – अप्राणिष्वित्यनीय।

### वा. नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्

**वार्तिकार्थः – 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रस्थाप्राणिषु इति पदं त्यक्त्वा नौ-काक-अन्न-शुक-शृगालभिन्ने मन्यधातोः कर्मणि अनादराधिक्ये गम्यमाने विकल्पेन चतुर्थी भवतीति वाच्यम्।**

**सारांशः–** एवं वार्तिकपाठेन फलमुपलब्धं भवति यत् 'न त्वां नावमन्नं वा मन्ये' इत्यत्र 'नौ' 'अन्न' इत्यनयोः शब्दयोः प्रयोगे सति सूत्रस्य प्रवृत्ति न भवति अप्राणिवाचकत्वादपि। अत एव 'कर्मणि द्वितीया' इतिसूत्रेण नौ शब्दात् तथा च अन्नशब्दात् द्वितीया विभक्तिः भवति नावम् – अन्नम् इति भवतः।

**न त्वां शुने मन्ये –** हे देवदत्त त्वां श्वत्वेनापि न मन्ये इत्यर्थः। अत्र अनादरादिक्यस्य प्रतीतिः भवति, एतस्मात् श्वन्-शब्दात् प्राणिवाचकत्वेऽपि 'नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' इति वार्तिकसहायेन 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रस्य प्रवृत्तिः भवति। अतएव 'श्वन्' इति शब्दात् कर्मणि चतुर्थी भवति न त्वां शुने मन्ये इति सिद्धम्।

**गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २/३/१२।। अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम्। ग्रामं ग्रामाय वा गच्छति। चेष्टायाम् किम्? मनसा हरिं व्रजति। अनध्वनि इति किम्? पन्थानं गच्छति। गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव, उत्पथेन पथे गच्छति।**

**पदविभागः –** गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ, चेष्टायाम्, अनध्वनि।
**सूत्रप्रकारः –** विधिसूत्रम्।
**सूत्रार्थः –** शारीरिकचेष्टायाम् अध्वभिन्ने गत्यर्थकधातूनां कर्मणि द्वितीयाचतुर्थ्यौ भवतः।
**व्याख्या –** गतिरर्थो येषां धातूनां ते गत्यर्थास्तेषां कर्म गत्यर्थकर्म, तस्मिन् गत्यर्थकर्मणि (बहुव्रीहिगर्भतत्पुरुषः)। द्वितीया च चतुर्थी चेति द्वितीयाचतुर्थ्यौ (इतरेतरद्वन्द्वः)। न अध्वा अनध्वा तस्मिन् अनध्वनि (सप्तम्यन्तम्)। 'अनभिहिते' इत्यस्याधिकारो वर्तते।
**रूपलेखनप्रकारः – ग्रामं ग्रामाय वा गच्छति।** इत्यत्र शारीरिकचेष्टायाम् गम् धातोः प्रयोगे सति 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' इति सूत्रेण ग्रामशब्दात् चतुर्थीविभक्तौ ग्रामात् इति भवति। द्वितीयायां ग्रामम् इति भवति।
**चेष्टायां किम् – मनसा हरिं व्रजति** – ननु सूत्रे 'चेष्टायाम्' इति पदस्य प्रयोगः न स्यात् तदा को दोषः? अत्र समाधानं प्रस्तूयते – 'मनसा हरिं व्रजति' इत्यत्र मानसिकक्रियया हरिं प्रति गमनं विद्यते परं शारीरिकचेष्टायाः अभावो विद्यते एतस्मात् अस्य सूत्रस्य प्रवृत्तिः न भवति। अतएव 'कर्मणि द्वितीया' इति सूत्रेण हरिशब्दात् द्वितीया एव भवति। मनसा हरिं व्रजति इति साधुः।
**अनध्वनि किम्? पन्थानं गच्छति** – ननु 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' इति सूत्रेण गत्यर्थकधातोः कर्मणि पर्यायेण द्वितीयाचतुर्थ्यौ भवतः। परं 'पन्थानं गच्छति' अत्र तु 'पथिन्' मार्गवाचकोऽयं शब्दः स्वयमेव कर्म अतः चेष्टायामपि प्रकृतसूत्रस्य प्रवृत्तिः न भवति अपितु 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तिरेव भवति पन्थानं गच्छति इति सिद्धम्।
**उत्पथेन पथे गच्छति** – अत्र उत्पथं परित्यज्य सुपथं प्रवेष्टुम् इच्छति इत्यर्थः। अत्र तु पथिन् शब्दात् चतुर्थी भवत्येव। यतो हि अत्र गमनकर्ता मार्गं न आक्रान्तवान् अपितु आक्रमितुमेव इच्छति। एतस्मात् पथिन् शब्दात् चतुर्थी भवति उत्पथेन पथे गच्छति इति स्पष्टम्। मूलेऽपि उच्यते – **गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव।**

**इति चतुर्थी-विभक्तिः**

## अथ पञ्चमी

**ध्रुवमपायेऽपादानम् १/४/२४।। अपायो विश्लेषः तस्मिन् साध्ये ध्रुवमवधिभूतं कारकम् अपादानं स्यात्।**
**पदविभागः –** ध्रुवम्, अपाये, अपादानम्।
**सूत्रप्रकारः –** संज्ञासूत्रम्।
**सूत्रार्थः –** वियोगे साधनीये यत् ध्रुवम् अवधिभूतं कारकं तत् अपादानसंज्ञं भवति।
**व्याख्या** – ध्रुवं – प्रथमान्तम्। अपाये=इति सप्तम्यन्तं पदम्। अपादानम् –इति प्रथमान्तं पदम्। त्रिपदात्मकं सूत्रमिदं वर्तते। 'कारके' इत्यस्याधिकारो वर्तते। अत्र प्रथमान्ततया विपरिणम्य 'कारकम्' इति पदं स्वीक्रियते। अपायः – इत्यस्यार्थः विभागः विश्लेषः, वियोगः पृथकता वा। ध्रुवम् – इत्यस्यार्थोऽवधिभूतम्। अवधिभूतम् इति विषये – द्वयोः पदार्थयोः संयुक्तावस्थायां भूते सति एकस्य चलनात् वियोगो भवति। यच्च न चलति अथवा चलनस्य आश्रयो न भवति, तद् ध्रुवम् अर्थात् अवधिभूतम् इति पदेन विवक्षितं भवति। अवधिभूतं कारकमेव अपादानसंज्ञं भवति। वाक्यपदीये अपादानस्य परिभाषेयं पठ्यते।

**अपाये यदुदासीनं चलं वा यदि वाऽचलम्।**
**ध्रुवमेवातदावेशात् तदपादनमुच्यते।।**

**अपादाने पञ्चमी २/३/२८।। ग्रामादायाति। धावतोऽश्वात् पतति। कारकं किम्? वृक्षस्य पर्णं पतति। वा. 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्'। पापाज्जुगुप्सते, विरमति। धर्मात् प्रमाद्यति।**

**पदविभागः** – अपादाने पञ्चमी।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – अनुक्ते अपादाने पञ्चमी भवति।

**व्याख्या** – अपादाने इति सप्तम्यन्तं पदम्। पञ्चमी – इति प्रथमान्तं पदम्। द्विपदात्मकं सूत्रम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः** – (१) ग्रामादायाति – इत्यत्र कस्मात् आगच्छति? इति प्रश्नोत्तरे 'ग्रामात्' इति पदं प्राप्तं भवति। अत्र 'ग्रामः' अवधिभूतः, स च ध्रुवः अचलः एवास्ति। एतस्मात् ग्रामशब्दस्य 'ध्रुवमपायेऽपादानम्' इत्यनेन अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण ग्रामशब्दात् पञ्चमी विभक्तौ ग्रामादायाति इति भवति।

**धावतोऽश्वात् पतति** – कस्मात् पतति इति इति प्रश्नोत्तरे 'अश्वात्' इति पदं प्राप्यते। अत्र यद्यपि अश्वः चलन-क्रियाश्रयोऽस्ति, चलोऽस्ति च तथापि अश्वस्यैव अवधित्वं सिद्धयति एतस्मात् 'ध्रुवमपायेऽपादानम्' इति सूत्रेण अश्वशब्दस्य अपादानसंज्ञायाम् 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमीविभक्तौ अश्वात् पतति इति भवति।

**अन्यानि उदाहरणानि** –

(1) **कुड्यात् पततोऽश्वात् पतति देवदत्तः।**

(2) **गाण्डीवं संस्रते हस्तात्।**

(3) **न्यायात् पथः प्रविचलन्ति पदं न धीराः।**

(4) **वृक्षात् पर्णं पतति।**

(5) **स्वर्गात् गङ्गा अवतरति।**

**प्रत्युदाहरणम् – कारकं किम्? वृक्षस्य पर्णं पतति** – ननु 'ध्रुवमपायेऽपादानम्' सूत्रेऽस्मिन् 'कारकम्' इत्यर्थो नाश्रीयेत तदा को दोषः इति प्रश्नोत्तरे उक्तम् – 'वृक्षस्य पर्णं पतति' अस्मिन् वाक्ये 'वृक्षः' यद्यपि पतनक्रियां प्रति अवधिभूतोऽस्ति अतः अपादानसंज्ञायाः आपत्तिः भवति परं अत्र वृक्षे सम्बन्धत्वमपेक्षितमस्ति। सम्बन्धे कारकत्वं नास्ति अतः अपादानसंज्ञाऽपि न लब्धा भवति अपितु सम्बन्धत्वात् षष्ठी एव भवति। अत्रैव ध्यातव्यमस्ति यत् – विवक्षातः कारकाणि भवन्ति। अपादानत्वेन विवक्षा स्यात् तदा तु पञ्चमी सम्बन्धत्वेन विवक्षा स्यात् तदा षष्ठी प्राप्ता भवति इति दिक्।

**वा. जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्**

**वार्तिकार्थः** – जुगुप्साविरामप्रमादार्थानां धातूनां योगे जुगुप्सादीनां विषयभूतं कारकं अपादानसंज्ञं भवति। वार्तिकमिदं 'ध्रुवमपायेऽपादानम्' सूत्रे पठितमस्ति। अत्र 'अपादानम्' इत्यस्यानुवर्तनं भवति। 'कारके' इत्यस्याधिकारो वर्तते। वार्तिकस्य उदाहरणेषु वास्तवसंयोगविश्लेषयोरभावात् बुद्धिकृतविश्लेषणावधित्वमादाय अपादानत्वमत्र स्वीकृतम्।

**रूपलेखनप्रकारः – पापाज्जुगुप्सते, विरमति** –

**(1) पापात् जुगुप्सते** – अत्र पापविषये घृणां करोति अतः न प्रवर्तते इत्यर्थे पापशब्दस्य 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकेन अपादानसंज्ञा भवति, 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ कृतायां पापात् इति भवति। पापाज्जुगुप्सते इति सिद्धम्।

**(2) पापात् विरमति** – अत्र पापात् निवर्तते इत्यर्थे पूर्वानुसारमेव पञ्चमी भवति।

**(3) धर्माद् प्रमाद्यति** – धर्मविषये प्रमादं करोति इत्यर्थे प्रमादस्य विषयभूतस्य धर्मशब्दस्य 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकेन अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चम्यां

धर्माद् प्रमाद्यति इति सिद्धम् भवति।

**अन्यानि उदाहरणानि –**

**( 1 ) स्वाध्यायान्मा प्रमदः।**

**( 2 ) सत्यान्न प्रमदितव्यम्।**

**( 3 ) सम्भूतघोरसमराद् विरराम रामः।**

**( 4 ) प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यम्।**

**( 5 ) सन्मार्गात् विरमति दुर्जनः।**

**भीत्रार्थानां भयहेतुः १/४/२५।।भयार्थानां त्राणार्थानां च प्रयोगे हेतुरपादानं स्यात्। चोराद् बिभेति। चोरात् त्रायते। भयहेतुः किम्? अरण्ये बिभेति, त्रायते वा।**

**पदविभागः –** भीत्रार्थानां, भयहेतुः।

**सूत्रप्रकारः –** संज्ञासूत्रम्।

**सूत्रार्थः –** भयार्थानां त्राणार्थानां च प्रयोगे भयस्य हेतुभूतं कारकम् अपादानसंज्ञकं भवति।

**व्याख्या –** भीश्च त्राश्च इति भीत्रौ (इतरेतरद्वन्द्वः) तयोरर्थ इव अर्थो येषां ते भीत्रार्थास्तेषां भीत्रार्थानाम् (बहुव्रीहिः)। भयस्य हेतुः भयहेतुः (षष्ठी तत्पुरुषः)। भीत्रार्थानाम् इति षष्ठ्यन्तं पदम्। भयहेतुः – इति प्रथमान्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रात् अपादानम् इत्यस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः – चोराद् बिभेति** – चोरेण हेतुना बिभेति इत्यर्थे हेतुत्वात् 'हेतौ' इति सूत्रेण प्राप्तां तृतीयां प्रबाध्य 'भीत्रार्थानां भयहेतुः' इति सूत्रेण चोरशब्दस्य अपादानसंज्ञायाम् 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ कृतायां चोराद् बिभेति इति सिद्धम्।

**चोरात् त्रायते** – चोरः बन्धनं न कुर्यात्, वधं न कुर्यात् इत्यादि भयहेतुना आत्मानं रक्षति इत्यर्थे 'भीत्रार्थानां भयहेतुः' इति सूत्रेण भयहेतोः चोरशब्दस्य अपादानसंज्ञा भवति। 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ चोरात् त्रायते इति भवति।

**अन्यानि उदाहरणानि –**

**( 1 ) स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।**

**( 2 ) बालकः सिंहात् बिभेति।**

**( 3 ) मरणाद् भयं नास्ति।**

**( 4 ) नृपः दुष्टात् त्रायते।**

**( 5 ) तैलाद् रक्ष जलाद् रक्ष रक्ष मां श्लथबन्धनात्।**
**आखुभ्यः परहस्तेभ्य इति वदति पुस्तिका।।**

**प्रत्युदाहरणम् –भयहेतुः किम्? अरण्ये बिभेति, त्रायते वा** – ननु 'भीत्रार्थानां भयहेतुः' इति सूत्रे भयहेतुः इति पदस्य किमौचित्यमिति प्रश्नस्य समाधानं प्रस्तूयते यत् पदमिदं न उच्येत तदा भयहेतोरभावेऽपि अपादानसंज्ञा प्राप्ता भवति। यथा – 'अरण्ये बिभेति, त्रायते वा' अस्मिन् वाक्ये अरण्यशब्दादपि अपादानसंज्ञा स्यात्, तन्निवारणार्थमेव 'भयहेतुः' इति पदमावश्यकम्। भयहेतुरत्र अरण्ये निवासिनः हिंसकपशवः सन्ति न तु अरण्यम् अतः अरण्यशब्दस्यापादानसंज्ञा न भवति इति दिक्। एवमेव त्राणार्थेऽपि बोध्यम्।

**पराजेरसोढः १/४/२६।। पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात् पराजयते। ग्लायतीत्यर्थः। 'असोढः' किम् – शत्रून् पराजयते। अभिभवतीत्यर्थः।**

**पदविभागः –** पराजेः, असोढः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।
**सूत्रार्थः** – परापूर्वकस्य 'जि' इति धातुप्रयोगे सति असह्योऽर्थः अपादानसंज्ञो भवति।
**व्याख्या** – परापूर्वो जिः पराजिस्तस्य पराजेः (मध्यमपदलोपी समासः)। षष्ठ्यन्तं पदम्। सोढुं शक्यते इति सोढः, न सोढोऽसोढः (नञ्तत्पुरुषः) पराजेः (षष्ठ्यन्तम्) असोढः (प्रथमान्तम्) 'कारके' इत्यस्याधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रादिह 'अपादानम्' इत्यस्यानुवृत्तिः आयाति।
**रूपलेखनप्रकारः** – **अध्ययनात् पराजयते** – अध्ययनेन हेतु ग्लायति हतोत्साहो भवति इत्यर्थः। अत्र असह्योऽर्थः अध्ययनम् तस्मात् हेतुतृतीयां प्रबाध्य 'पराजेरसोढः' इति सूत्रेण अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमीविभक्तौ कृतायां अध्ययनात् पराजयते इति सिद्धम्।
**प्रत्युदाहरणम् – असोढः किम्? शत्रून् पराजयते, अभिभवति इत्यर्थः** –ननु 'पराजेरसोढः' इति सूत्रे 'असोढः' इति पदस्य किम् प्रयोजनम्? अत्र समाधानं प्रस्तूयते यत् असह्योऽर्थः अपादानं स्यात् न तु सह्योऽर्थः अतः 'शत्रून् पराजयते' अस्मिन् वाक्ये सह्योऽर्थः वर्तते शत्रुशब्दः एतस्मात् असह्यार्थाभावात् अत्र अपादानसंज्ञा न भवति अपितु कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तौ शत्रून् पराजयते इति भवति।

**वारणार्थानामीप्सितः १/४/२७।। प्रवृत्तिविघातो वारणम्। वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः किम् – यवेभ्यो गां वारयति क्षेत्रे।**
**पदविभागः** – वारणार्थानाम्, ईप्सितः।
**सूत्रप्रकारः** – संज्ञासूत्रम्।
**सूत्रार्थः** – वारणार्थानां धातूनां प्रयोगे यो ईप्सितः = अभीष्टः, तस्य कारकस्य अपादानसंज्ञा भवति।
**व्याख्या** – वारणं=प्रवृत्तिविमुखीकरणम्। वारणम् अर्थो येषां धातूनां ते वारणार्था तेषाम् वारणार्थानाम्। षष्ठ्यन्तं पदम्। ईप्सितः = प्रथमान्तमं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रादिह 'अपादानम्' इत्यस्यानुवर्तनं भवति।
**रूपलेखनप्रकारः** – **यवेभ्यो गां वारयति** – अत्र 'वारयति' इति योगे ईप्सिताः यवाः सन्ति अतः 'वारणार्थानामीप्सितः' इति सूत्रेण ईप्सितस्य यवशब्दस्य अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ कृतायां बहुवचने भ्यस् प्रत्यये यवेभ्यो गां वारयति इति भवति।
**प्रत्युदाहरणम् –ईप्सितः किम्? यवेभ्यो गां वारयति क्षेत्रे।**

ननु 'वारणार्थानामीप्सितः' इति सूत्रे ईप्सितः इति पदस्य किम् औचित्यम्? तर्हि अत्र समाधानं उक्तं यत् 'यवेभ्यो गां वारयति क्षेत्रे' अस्मिन् वाक्ये 'वारयति' इति योगे ईप्सिताः यवा एव सन्ति अतः तेषामेव अपादानत्वं भवति न तु क्षेत्रस्य। यदि 'ईप्सितः' इति पदस्य प्रयुक्तिः न भवति तदा तु क्षेत्रेऽपि अपादानसंज्ञायाः आपत्तिः भवति। परं न स्यात् एतदर्थमेव 'ईप्सितः' इति पदस्यावश्यकता। 'क्षेत्रम्' तु आधारत्वात् अधिककरणत्वेन अस्ति, अतः सप्तमी भवति।

**अन्तर्धौ येनादर्शनमिच्छति १/४/२८।। व्यवधाने सति यत् – कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्धौ किम्? चौरान् न दिदृक्षते। इच्छतिग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। देवदत्तात् यज्ञदत्तो निलीयते।**
**पदविभागः** – अन्तर्धौ, येन, अदर्शनम्, इच्छति।
**सूत्रप्रकारः** – संज्ञासूत्रम्।
**सूत्रार्थः** – व्यवधाने सति कर्ता येन स्वस्य दर्शनस्याभावमिच्छति तस्य कारकस्यापादानसंज्ञा भवति।
**व्याख्या** – न दर्शनम् इति अदर्शनम् (नञ्तत्पुरुष)। अदर्शनम् = इति प्रथमान्तम्। येन – इति तृतीयान्तम्। अन्तर्धौ –

इति सप्तम्यन्तम्। इच्छति - इति तिङन्तं क्रियापदम्। 'कारके' इत्यस्यधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रादिह 'अपादानम्' इति पदस्यानुवर्तनं भवति। अन्तर्धौ इत्यस्यार्थोऽस्ति व्यवधाने इति। अदर्शनमिच्छति = दर्शनाभावमिच्छति। आत्मनः इति पदस्य अध्याहारः कृतः।

**रूपलेखनप्रकारः - मातुर्निलीयते कृष्णः**- अत्र व्यवधाने सति कृष्णः स्वविषये मातृकर्तृकदर्शनस्य अभावमिच्छति एतस्मात् मातृशब्दस्य 'अन्तर्धौ येनादर्शनमिच्छति' इति सूत्रेण अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ मातुर्निलीयते कृष्णः इति भवति।

**प्रत्युदाहरणम् - अन्तर्धौ इति किम्? चौरान् न दिदृक्षते।** ननु 'अन्तर्धौ येनादर्शनमिच्छति' सूत्रे अन्तर्धौ इति पदस्य योगः न स्यात् तदा तु 'चौरान् न दिदृक्षते' इत्यत्र व्यवधानाभावे दर्शनाभावमात्रेऽपि चौरशब्दस्य अपादानसंज्ञा प्राप्ता भवति तन्न स्यात् एतदर्थमेव 'अन्तर्धौ' इति पदस्य सार्थकता वर्तते। अतएव 'कर्मणि द्वितीया' इत्यनेन कर्मणि द्वितीया एव भवति चौरान् न दिदृक्षते इत्येव साधुः।

**इच्छति ग्रहणं किम्** - ननु 'अन्तर्धौ येनादर्शनमिच्छति' सूत्रे इच्छति ग्रहणस्य सार्थक्यं प्रतिपादयति यत् अदर्शनेच्छायां सत्यां यथा अपादानसंज्ञा भवति तथैव दर्शने सत्यपि अपादानसंज्ञा भवति। यथा देवदत्तात् यज्ञदत्तो निलीयते अत्र यज्ञदत्तः स्वविषये देवदत्तकर्तृकदर्शस्य अभावमिच्छति अर्थात् यज्ञदत्तः देवदत्तं द्रष्टुं न इच्छति, किन्तु तस्य दर्शनम् अनिच्छया भवति, स तु तस्मात् निलीयते एव। तस्यामवस्थायामपि देवदत्तस्य अपादानसंज्ञा भवति 'देवदत्तात्' इति भवति।

**आख्यातोपयोगे १/४/२९।। नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपध्यायादधीते। उपयोगे किम्? नटस्य (गाथां) शृणोति।**

**पदविभागः -** आख्याता, उपयोगे।

**सूत्रप्रकारः -** संज्ञासूत्रम्।

**सूत्रार्थः -** ब्रह्मचर्यादिनियमानां पालनपूर्वकेण विद्याध्ययने अध्यापयिता अपादानसंज्ञको भवति।

**व्याख्या -** आख्यातृशब्दस्य प्रथमान्तं रूपम् आख्याता। उपयोगे - इति सप्तम्यन्तं पदम्। 'कारके' इत्यस्याधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रादिह 'अपादानम्' इति पदस्यानुवर्तनं भवति। उपयोगः - इति पदस्यार्थोऽत्र नियमपूर्वकविद्याग्रहणम् इति। आख्याता भवति -आचार्यः, उपाध्यायः, उपदेष्टा अध्यापयिता गुरुर्वा इति।

**रूपलेखनप्रकारः - उपाध्यायाद् अधीते (शिष्यः)** - इत्यत्र शिष्यः आश्रमनियमान् पालयन् विद्याध्ययनं करोति। अध्यापयिताऽस्ति उपाध्यायः। अतः 'आख्यातोपयोगे' इति सूत्रेण उपाध्यायशब्दस्य अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तौ उपाध्यायाद् अधीते इति भवति। षष्ठ्याः अपवादसूत्रमिदं वर्तते।

**प्रत्युदाहरणम् - उपयोगे किम्? नटस्य गाथां शृणोति** - ननु 'आख्यातोपयोगे' इति सूत्रे उपयोगे इति पदं नोच्यते तदा वक्तुः अपादानसंज्ञा स्यात्। तथा सति 'नटस्य गाथां शृणोति' इत्यत्रापि नटशब्स्यापादनसंज्ञा प्राप्ता भवति, यतो हि गाथायाः उपदेष्टा भवति नटः। तस्यामवस्थायां अनिष्टरूपोपपत्तिः भवति। तथा न स्यात् एतदर्थमत्र 'उपयोगे' इति पदस्य ग्रहणं कृतम्। तेन नियमपूर्वकेण गाथायाः श्रवणाभावे नटशब्दस्य अपादानसंज्ञा न भवति इति दिक्।

**जनिकर्तुः प्रकृतिः १/४/३१।। जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।**

**पदविभागः -** जनिकर्तुः, प्रकृतिः।

**सूत्रप्रकारः -** संज्ञासूत्रम्।

**सूत्रार्थः -** जायमानस्य हेतुभूतं कारकं अपादानसंज्ञं भवति।

**व्याख्या -** जनेः कर्ता जनिकर्ता (षष्ठीतत्पुरुषः) तस्य जनिकर्तुः। जनी प्रादुर्भावे इणप्रत्यये कृते 'जनि' इति भवति। जनिकर्तुः इति षष्ठ्यन्तं पदम्। जनिकर्तुः इत्यस्यार्थः = उत्पत्तेराश्रयस्येति। प्रकृतिः अत्रोपादानकारणं हेतुर्वा इति।

**रूपलेखनप्रकारः – ब्रह्मणः प्रजाः प्रजायन्ते** – अत्र जायमानस्य हेतुभूतं कारकमस्ति। 'ब्रह्म' इति शब्दः। अतो ब्रह्म इत्यस्य 'जनिकर्तुः प्रकृतिः' इति सूत्रेण अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पंचमीविभक्तौ ब्रह्मणः प्रजाः प्रजायन्ते इति भवति।

**भुवः प्रभवः १/४/३१ ।। भवनं भूः। भूकर्तुः प्रभवस्तथा। हिमवतो गङ्गा प्रभवति। तत्र प्रकाशते इत्यर्थः। वा. 'ल्यब्लोपे कर्मण्यधिकरणे च'। प्रासादात् प्रेक्षते। आसनात् प्रेक्षते। प्रासादमारुह्य, आसने उपविश्य प्रेक्षते इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। वा. 'गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्। कस्मात् त्वम्? नद्याः। वा. 'यतश्चाध्वकालनिमानं ततः पञ्चमी'। वा. 'तद्युक्तादध्वनः प्रथमासप्तम्यौ'। वा. 'कालात् सप्तमी च वक्तव्या'। वनाद् ग्रामो योजनं योजने वा। कार्तिक्या आग्रहायणी मासे।**

**पदविभागः –** भुवः प्रभवः।

**सूत्रप्रकारः –** संज्ञासूत्रम्।

**सूत्रार्थः –** भूधातोः कर्तुः उत्पत्तिस्थानस्य अपादानसंज्ञा भवति।

**व्याख्या –** भुवः = भूधातोः क्विप्-प्रत्यये षष्ठ्येकवचने च भुवः इति। प्रभवः = भूकर्तुः प्रभवस्तथा। स्यात् जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये इति। अर्थात् प्रथमप्रकाशनस्थलम्। 'कारके' इत्यस्याधिकारो वर्तते। 'ध्रुवमपायेऽपादानम्' इति सूत्रादिह 'अपादानम्' इत्यस्यानुवर्तनं भवति। 'जनिकर्तुः प्रकृतिः' इत्यत्र 'जनिकर्तुः' इति समासनिर्दिष्टं पदमस्ति तथापि 'कर्तुः' इति पदस्य अस्मिन्सूत्रे अनुवर्तनं भवति एकदेशे स्वरितत्व प्रतिज्ञाबलात्।

**रूपलेखनप्रकारः – हिमवतो गङ्गा प्रभवति** – हिमालयः गङ्गायाः उद्गमस्थलमस्ति। एतस्मात् 'हिमवत्' इति शब्दस्य 'भुवः प्रभवः' इति सूत्रेण अपादानसंज्ञा भवति 'अपादाने पञ्चमी' इति सूत्रेण पञ्चम्याम् हिमवतो गङ्गा प्रभवति इति सिद्धम्।

## वा. ल्यब्लोपे कर्मण्यधिकरणे च।

**वार्तिकार्थः** – ल्यप् प्रत्ययस्य अदर्शने सति तदर्थकस्य योगे कर्मणि अधिकरणे च पञ्चमीविभक्तिः भवति इति।

**रूपलेखनप्रकारः – प्रासादात् प्रेक्षते** – प्रासादमारुह्य प्रेक्षते इत्यर्थे 'आरुह्य' इति ल्यप्-प्रत्ययान्तस्य पदस्य प्रयोगाभावे तदर्थस्य प्रतीयमाने सति, प्रासादशब्दात् 'ल्यब्लोपे कर्मण्यधिकरणे' इति वार्तिकेन पञ्चमी भवति प्रासादात् प्रेक्षते इति जायते।

**आसनात् प्रेक्षते** – आसने उपविश्य प्रेक्षते इत्यर्थे 'उपविश्य' इति ल्यप् प्रत्ययान्तस्य प्रयोगाभावे पूर्वानुसारेणैव आसनशब्दात् पञ्चमी भवति। अत्र अधिकरणे पञ्चमी भवति इति बोध्यम्।

**श्वसुराज्जिह्रेति** – श्वसुरं वीक्ष्य लज्जते इत्यर्थः। अत्र वीक्ष्य इति ल्यप् प्रत्ययान्तस्य प्रयोगाभावे पूर्वानुसारेण कर्मणि श्वसुरशब्दात् पञ्चमी भवति श्वसुराज्जिह्रेति इति सिद्धम्।

## वा. गम्यमानाऽपि क्रिया कारकविभक्तीनां निमित्तम्।

**वार्तिकः** – प्रकरणादिना प्रतीयमानाऽपि क्रिया कारकविभक्तीनां कारणं भवति।

**रूपलेखनप्रकारः** – कस्मात् त्वं? नद्याः – अत्र वाक्ये क्रियायाः प्रयोगो नास्ति परं प्रश्ने प्रतीतिः भवति अर्थात् कस्मात् त्वं आगतोऽसि इत्यर्थो ज्ञातो भवति एतस्मात् 'किम्' शब्दात् पञ्चमी भवति कस्मात् इति सिद्धम्। पुनश्च प्रश्नोत्तरे 'नद्याः' इति उक्ते सति 'आगतोऽस्मि' इति क्रियापदस्य प्रतीतिः भवति। एतस्मात् 'नदी' शब्दात् पञ्चमी भवति नद्याः इति जायते। कस्मात् त्वं? नद्याः इति सिद्धम्।

**अन्यानि उदाहरणानि –**

**(1) कुतो भवान्? पाटलिपुत्रात्**

**(2) कुतो भवान्? वारणस्याः?**

**वा. यतश्चाध्वकालनिर्माणं ततः पञ्चमी**

**वार्तिकार्थः** – येन अवधिभूतेन अध्वनः कालस्य च परिमाणं ज्ञातं भवति तस्मादवधिभूतात् पञ्चमी भवति।

**वा. तद्युक्तादध्वनः प्रथमासप्तम्यौ** –

**वार्तिकार्थः** –पूर्ववार्तिकेन यत्र पञ्चमी भवति तस्मात् अध्ववाचिशब्दात् प्रथमा सप्तमी च भवतः।

**वा. कालात्सप्तमी च वक्तव्या** –

**वार्तिकार्थः** – अध्वकालपरिमाणे यत्र पञ्चमी उक्ता तत्र कालवाचकशब्दात् सप्तमी भवति।

**रूपलेखनप्रकारः** – ( 1 ) **वनाद् ग्रामो योजनं योजने वा** – अत्र योजनम् इति परिमाणम्। परिमाणस्य आकाङ्क्षायाम् अवधिभूतमस्ति वनम्। तस्मात् वनशब्दात् 'यतश्चाध्वकालनिर्माणं ततः पञ्चमी' इति वार्तिकेन पञ्चमीभवति वनाद् इति जायते। पुनश्च अत्रैव मार्गवाचकात् योजनशब्दात् 'तद्युक्ता ध्वनः प्रथमा सप्तम्यौ' इति वार्तिकेन प्रथमा तथा च सप्तमी भवति योजनं योजने वा इति जायते। वनाद् ग्रामो योजनं योजने वा इति सिद्धम्।

**कार्तिक्या आग्रहायणी मासे** –

अत्र मासरूपं कालपरिमाणम्। परिमाणस्य आकाङ्क्षायाम् अवधिभूतमस्ति 'कार्तिकी' शब्दः। तस्मात् कार्तिकीशब्दात् 'यतश्चाध्वकालनिर्माणं ततः पञ्चमी' इति वार्तिकेन पञ्चमी भवति 'कार्तिक्या' इति जायते। पुनश्च कालवाचकात् मासशब्दात् 'कालात्सप्तमी च वक्तव्या' इति वार्तिकेन सप्तमी भवति कार्तिक्या आग्रहायणी मासे इति सिद्धम्।

**अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २/३/२९ ।। एतैर्योगे पञ्चमी स्यात्। अन्येत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद् वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात् पूर्वः फाल्गुनः। अवयववाचियोगे तु न। 'तस्य परमाम्रेडितम्' इति निर्देशात्। पूर्वं कायस्य।**

**अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ' इति षष्ठीं बाधितुं पृथग्ग्रहणम्। प्राक् प्रत्यग् वा ग्रामात्। आच्-दक्षिणा ग्रामात्। आहि – दक्षिणाहि ग्रामात्। अपादाने पञ्चमीति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी। भवात् प्रभृति आरभ्य वा सेव्यो हरिः। 'अपपरिबहिः' इति समासविधानाज्ज्ञापकाद् बहिर्योगे पञ्चमी। ग्रामाद् बहिः।**

**पदविभागः** – एकपदात्मकं सूत्रम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – अन्य, अन्यार्थस्य, आरात् इत्यस्य, इतरस्य, ऋते इत्यस्य, दिक्शब्दस्य, अञ्चूत्तरपदस्य, आच्प्रत्ययान्तस्य आहि प्रत्ययान्तस्य च योगे पञ्चमी भवति।

**व्याख्या** – दिशि दृष्टः शब्दो दिक्शब्दः (मध्यमपदलोपीसमासः) उत्तरं चादः पदमुत्तरपदम्, अञ्चुः उत्तरपदं यस्य स अञ्चूत्तरपदः। अन्यश्च आरात् च इतरश्च ऋते च दिक्शब्दश्च अञ्चूत्तरपदश्च आच् च आहि च इति अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहयः तैः युक्तम् अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्तम् तस्मिन् अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति सप्तम्यन्तं पदम्। 'अपादाने पञ्चमी' इत्यस्मात् 'पञ्चमी' इत्यस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः** – **अन्यः भिन्न इतरो वा कृष्णात्** – इत्यत्र 'अन्यः' इति शब्दस्य योगे कृष्णशब्दात् 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन पञ्चमी विभक्तिः भवति अन्यः कृष्णात् इति सिद्धम्। एवमेव भिन्नः, इतरः, इत्यादिष्वपि बोध्यम्।

**आराद् वनात्** – इत्यत्र आरात् योगे वनशब्दात् पञ्चमी भवति आराद् वनात् इति सिद्धम्। आराद् इत्यस्यार्थः दूरं

समीपे वा।

**ऋते कृष्णात्** – अत्र वर्जने अर्थे प्रयुक्तमिदम् अव्ययपदम्।'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन 'ऋते' इति योगे कृष्णशब्दात् पञ्चम्यां कृतायां ऋते कृष्णात् इति सिद्धम्।

**अन्यानि उदाहरणानि –**

**(1) संस्कारात् ऋते संस्कृतिः दुर्ज्ञेया।**

**(2) ऋते ज्ञानात् न मुक्तिः।**

**विशेषः** – 'क्व कर्मप्रध्वंसः फलति पुरुषाराधनम् ऋते' इत्यत्र ऋते योगे द्वितीया प्रयुक्ता। अतः कुत्रचित् द्वितीया अपि भवति 'ततोऽन्यत्रापि दृश्यते' इति नियमात्।

**पूर्वो ग्रामात्** – इत्यत्र 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन दिक्शब्दस्य 'पूर्व' इत्यस्य योगे ग्रामशब्दात् पञ्चमी विभक्तिः भवति पूर्वो ग्रामात् इति सिद्धम्।

**चैत्रात्पूर्वः फाल्गुनः** – अत्र 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन दिक्शब्दस्य 'पूर्व' इत्यस्य योगे चैत्रशब्दात् पञ्चमीविभक्तौ कृतायां चैत्रात्पूर्वः फाल्गुनः इति सिद्धम्। दिशि दृष्टः शब्दः यदि देशकालवाचको भवति तदापि सः 'दिक्शब्दः' इत्युच्यते।

**विशेषः –पूर्वं कायस्य** – यदि दिक्शब्दाः अवयववाचकाः भवन्ति तदा तेषां योगे अस्य सूत्रस्य प्रवृत्तिः न भवति, तत्र तु षष्ठी एव भवति **पूर्वं कायस्य** इतिवत्।

**पूर्वं कायस्य**= शरीरस्य पूर्वावयवः इत्यर्थः। अत्र पूर्वशब्दः शरीरस्य अवयववाचकोऽस्ति। एतस्मिन् विषये प्रमाणमत्र – 'तस्य परमाम्रेडितम्' इति पाणिनेः सूत्रम्। तेन अवयववाचकयोगे तद् शब्दात् षष्ठीविभक्तिः विहिता इति दिक्।

**प्राक् प्रत्यग् वा ग्रामात्** – अत्र प्रपूर्वकात् अञ्चु धातोः उत्तरपदे सति प्राक् इति भवति। दिक्शब्दोऽयं तस्मात् 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन प्राक् योगे ग्राम शब्दात् पञ्चमी विभक्तिः भवति प्राक् ग्रामात् इति सिद्धम्। एवमेव प्रति पूर्वकात् अञ्चु धातोः उत्तरपदे सति प्रत्यग् इति भवति। तत्रापि प्रत्यग् ग्रामात् इति सिद्धम् भवति।

**विशेषः** – ननु 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रे दिक्शब्दस्य ग्रहणेनैव प्राक्प्रत्यगित्यादीनां ग्रहणं स्यात् पृथक्तया सूत्रे 'अञ्चूत्तरपद' इति पदस्य पाठः किमर्थं विहितः? तर्हि समाधानं क्रियते यत् 'षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रेण विधीयमाना षष्ठी अत्र न प्रयुक्ता स्यात् एतदर्थं 'अञ्चूत्तरपद' इति पदस्य पृथक्तया सूत्रे ग्रहणं वर्तते। 'षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रं 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण प्राप्तायाः पञ्चम्याः अपवादरूपेण विद्यते।

**दक्षिणा ग्रामात्** – आच्प्रत्ययान्त 'दक्षिणा' इति शब्दस्य योगे 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण ग्रामशब्दात् पञ्चमी भवति दक्षिणा ग्रामात् इति सिद्धम्।

**दक्षिणाहि ग्रामात्** – आहिप्रत्ययान्तस्य 'दक्षिणाहि' इति शब्दस्य योगे पूर्वानुसारेण पञ्चमी भवति दक्षिणाहि ग्रामात्।

**विशेषः** – 'अपादाने पञ्चमी' इति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी भवति। प्रभृतिशब्दस्य पर्यायवाचिनोऽपि गृह्यन्ते।

**रूपलेखनप्रकारः – भवात् प्रभृति आरभ्य वा सेव्यो हरिः** – इत्यत्र प्रभृतियोगे तदर्थकस्य 'आरभ्य' इति शब्दस्य योगे च भवशब्दात् 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति वार्तिकेन पञ्चमी विभक्तिः भवति ''भवात् प्रभृति आरभ्य वा सेव्यो हरिः'' इति सिद्धम्।

**ग्रामाद् बहिः** – अत्र 'अपपरिबहिरञ्चवः पञ्चम्या' इति सूत्रेण पञ्चम्यन्तशब्देन सह समासविधानात् ज्ञापनं भवति यत्

बहिर्योगे पञ्चमी भवति। अत: 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण बहिर्योगे ग्रामशब्दात् पञ्चमीविभक्तौ कृतायां ग्रामाद् बहि: इति सिद्धम्।

**अपपरी वर्जने १/४/८८ एतौ वर्जने कर्मप्रवचनीयौ स्त:।**

**पदविभाग:** – अपपरी, वर्जने।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सूत्रार्थ:** – अप, परि इत्यनयो: वर्जनार्थे कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – अपश्च परिश्च इति अपपरी (इतरेतरद्वन्द्व:)। प्रथमाया: द्विवचनान्तं पदम्। वर्जने –इति सप्तम्यन्तं पदम्। 'कर्मप्रवचनीया:' इत्यस्याधिकारो वर्तते।

**आङ् मर्यादावचने १/४/८९।। आङ् मर्यादायामुक्तसंज्ञ: स्यात्। वचनग्रहणादभिविधावपि।**

**पदविभाग:** – आङ्, मर्यादावचने।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सूत्रार्थ:** – मर्यादायाम् अभिविधौ च 'आङ्' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – मर्यादाया वचनं मर्यादावचनं (षष्ठीतत्पुरुष) तस्मिन् मर्यादावचने। आङ् प्रथमन्तं, मर्यादावचने –सप्तम्यन्तम्। वचनग्रहणात् अभिविधौ अपि कर्मप्रवचनीयसंज्ञा भवति। मर्यादा अत्र अवधि: इति। अभिविधिरपि मर्यादा एव। पुनरपि तत्र तेन विना इति मर्यादा। यथा आ हरिद्वाराद् वृष्टि: इत्यस्यार्थो **मर्यादायां** हरिद्वारात् पूर्वं यावत् वृष्टि: इत्यर्थ:। तेन सहिता अभिविधि। यथा आहरिद्वाराद् वृष्टि: इत्यस्यार्थो भवति हरिद्वारेऽपि वृष्टि: अभवत् इति।

**पञ्चम्यपाङ्परिभि: २/३/१०।। एतै: कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरे:, परि हरे: संसार:। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आ मुक्ते: संसार:। आ सकलाद् ब्रह्म।**

**पदविभाग:** – पञ्चमी, अपाङ्परिभि:।

**सूत्रप्रकार:** – विधिसूत्रम्।

**सूत्रार्थ:** – अप, आङ्, परि, एभि: कर्मप्रवचनीयै: योगे पञ्चमी भवति।

**व्याख्या** – अपश्च, आङ् च परिश्च इति अपाङ्परय: (इतरेतरद्वन्द्व:) तै: अपाङ्परिभि:। तृतीयान्तं पदम्। पञ्चमी – इति प्रथमान्तं पदम्। 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यस्मात् कर्मप्रवचनीययुक्ते इत्यस्यानुवृत्तिरायाति।

**रूपलेखनप्रकार:** – **अप हरे:, परि हरे: संसार:** –हरिं वर्जयित्वा, जन्ममरणात्मकं बन्धनमस्ति इत्यर्थे वर्जनेऽर्थे अप परि इत्यनयो: प्रयोग: कृत: तस्मात् 'अपपरी वर्जने' इति सूत्रेण अनयो: कर्मप्रवचनीयसंज्ञा भवति 'पञ्चम्यपाङ्परिभि:' इति सूत्रेण हरिशब्दात् पञ्चमी भवति अप हरे:, परिहरे: संसार: इति सिद्धम्।

**आमुक्ते: संसार:** – मुक्ते: प्राक् जन्ममरणात्मकं बन्धनं भवति इत्यर्थ:। अत्र 'आङ्मर्यादावचने' इति सूत्रेण 'आङ्' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति 'पञ्चम्यपाङ्परिभि:' इति सूत्रेण 'आङ्' इति योगे मुक्तिशब्दात् पञ्चम्यां कृतायां आ मुक्ते: संसार: इति सिद्धमृ।

**आ सकलाद् ब्रह्म** – ब्रह्म सकलमभिव्याप्य वर्तते इत्यर्थ:। अत्र 'आङ्मर्यादावचने' इति सूत्रेण 'आङ्' इत्यस्य कर्मप्रवचनीयसंज्ञायां 'आङ्' इत्यस्य योगे 'पञ्चम्यपाङ्परिभि:' इति सूत्रेण सकलशब्दात् पञ्चमी भवति आसकलाद् ब्रह्म इति सिद्धम्।

**प्रति: प्रतिनिधिप्रतिदानयो: १/४/९२।। एतयोरर्थयो: प्रतिरुक्तसंज्ञ: स्यात्।**

**पदविभाग:** – प्रति:, प्रतिनिधिप्रतिदानयो:।

**सूत्रप्रकार:** – संज्ञासूत्रम्।

**सूत्रार्थ:** – प्रतिनिधिप्रतिदानयो: अर्थयो: 'प्रति:' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति

**व्याख्या** – प्रतिनिधिश्च प्रतिदानं च प्रतिनिधिप्रतिदाने (इतरेतरद्वन्द्वः) तयोः प्रतिनिधिप्रतिदानयोः इति सप्तम्यन्तं पदम्। प्रतिः इति प्रथमान्तं पदम्। 'कर्मप्रवचनीयाः' इत्यस्याधिकारो वर्तते। प्रतिनिधिः = सदृशः। प्रतिदानम् = विनिमयः अर्थात् दत्तस्य पदार्थस्य स्थाने अन्यपदार्थस्य प्रतिनिर्यातनं भवति प्रतिदानम्।

**प्रतिनिधिप्रतिदाने च यस्मात् २/३/११।। अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। प्रद्युम्नः कृष्णात् प्रति। तिलेभ्यः प्रतियच्छति माषान्।**

**पदविभागः** – प्रतिनिधि प्रतिदाने च, यस्मात्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः**– यस्य प्रतिनिधित्वमस्ति यस्य प्रतिदानत्वमस्ति च तस्मात् शब्दात् 'प्रतिः' इति कर्मप्रवचनीययोगे पञ्चमी भवति।

**व्याख्या** – प्रतिनिधिश्च प्रतिदानं च प्रतिनिधिप्रतिदाने (इतरेतरद्वन्द्वः)। यस्मादित्यत्र षष्ठ्याः अर्थे पञ्चमी अस्ति। अतः पञ्चम्यन्तं पदम्। च –इति अव्ययपदम्। 'पञ्चम्यपाङ्परिभिः' इत्यतः पञ्चमी इत्यस्य 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यतः 'कर्मप्रवचनीययुक्ते' इत्यस्य चानुवृत्तिः आयाति।

**रूपलेखनप्रकारः** – **प्रद्युम्नः कृष्णात् प्रति** – प्रद्युम्नः कृष्णस्य सदृशः गुणवान् इत्यर्थो गृह्यते। अत्र 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति सूत्रेण 'प्रति' इत्यस्य कर्मप्रवचनीयसंज्ञायां तद्योगे 'प्रतिनिधिप्रतिदाने च यस्मात्' इति सूत्रेण कृष्णशब्दात् पञ्चमी भवति प्रद्युम्नः कृष्णात् प्रति इति सिद्धम्।

**तिलेभ्यः प्रति यच्छति माषान्** – तिलानां ग्रहणं माषाणां प्रत्यर्पणञ्च। अत्र प्रतिदानार्थे – 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति सूत्रेण 'प्रति' इत्यस्य कर्मप्रवचनीयसंज्ञायाम्, तद् योगे 'प्रतिनिधि प्रतिदाने च यस्मात्' इति सूत्रेण तिलशब्दात् पञ्चमी भवति। बहुवचने भ्यस् विभक्तौ तिलेभ्यः प्रति यच्छति माषान् इति सिद्धम्।

**अकर्तर्यृणे पञ्चमी २/३/२४।। कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात्। शताद् बद्धः। अकर्तरि किम्। शतेन बन्धितः।**

**पदविभागः** – अकर्तरि, ऋणे, पञ्चमी।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – ऋणवाचकात् शब्दात् पञ्चमी स्यात्, ऋणवाचकस्य शब्दस्य कर्तृसंज्ञारहिते हेतुभूते सति।

**व्याख्या** –न कर्ता अकर्ता, तस्मिन् अकर्तरि। अकर्तरि – इति सप्तम्यन्तं पदम्। ऋणे – सप्तम्यन्तं पदम्। पञ्चमी – प्रथमान्तम्। हेतौ इति सूत्रस्यानुवर्तनं भवति।

**रूपलेखनप्रकारः** – **शताद् बद्धः**– केनापि जनेन शतं (मुद्राः) ऋणरूपेण गृहीतम्। तेन नियतकाले न प्रत्यर्पितम् अतः ऋणहेतुना सः बद्धः इत्यर्थे 'हेतौ' इतिसूत्रेण प्राप्तां तृतीयां प्रबाध्य 'अकर्तर्यृणे पञ्चमी' इति सूत्रेण ऋणवाचकात् हेतुभूतशतशब्दात् पञ्चमी भवति शताद् बद्धः इति सिद्धम्।

**अकर्तरि किम्? शतेन बन्धितः**– 'अकर्तयृणे पञ्चमी' इति सूत्रेण 'अकर्तरि' इति पदस्य प्रयोजनम् अस्ति यत् 'शतेन बन्धितः' इत्यत्र पञ्चमी न स्यात् यतो हि "शतेन प्रयोजककर्त्रा ऋणेन बन्धनं कारितः" इत्यर्थेऽत्र शतेन इति कर्तृसंज्ञकमस्ति एतस्माद् अत्र पञ्चमी नभवति। ण्यन्तावस्थायाः रूपमस्ति 'शतेन बन्धितः' इति। अस्मिन् वाक्ये 'शतम्' इति प्रयोजकत्वात् कर्तृसंज्ञं हेतुसंज्ञं चास्ति। तत्र सूत्रं वर्तते –तत्प्रयोजको हेतुश्च इति।

**विभाषा गुणेऽस्त्रियाम् २/३/२५।। गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्यात् जाड्येन वा बद्धः। गुणे किम्? धनेन कुलम्। अस्त्रियाम् किम्? बुद्ध्या मुक्तः। विभाषा इति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।**

**पदविभागः** – विभाषा, गुणे, अस्त्रियाम्।

**सूत्रप्रकारः -** विधिसूत्रम्।
**सूत्रार्थः -** स्त्रीलिङ्गभिन्ने गुणे हेतौ पञ्चमी विकल्पेन भवति।
**व्याख्या -** न स्त्री अस्त्री तस्यामस्त्रियाम् (नञ्तत्पुरुषः)। सप्तम्यन्तं पदम्। विभाषा - इति प्रथमान्तं पदम्। गुणे - इति सप्तम्यन्तं पदम्। 'हेतौ' इति सूत्रस्य 'अकर्तयृणे पञ्चमी' इत्यतः 'पञ्चमी' इति पदस्य च अनुवर्तनं भवति।
**रूपलेखनप्रकारः - (1) जाड्यात् - जाड्येन वा बद्धः**:- जडशब्दात् ष्यञ् प्रत्यये जडस्य भावो जाड्यम् इति भवति। अत्र जाड्यशब्दः गुणवाचकः, बन्धनहेतुश्चास्ति, अतः 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रेण विकल्पेन जाड्यशब्दात् पञ्चमी भवति जाड्यात् इति। पक्षे 'हेतौ' इति सूत्रेण तृतीयायां जाड्येन इति भवति। जाड्यात् जाड्येन वा बद्धः इति सिद्धम्।
**प्रत्युदाहरणम् - गुणे किम्? धनेन कुलम् -** ननु 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रे 'गुणे' इति पदस्य किमौचित्यम्? द्रव्यवाचकशब्दानां योगे न स्यादिति फलम्। यथा धनेन कुलम् - इत्यत्र धनशब्दो न गुणवाची, अपितु द्रव्यमेव। अतः 'हेतौ' इति सूत्रेण अत्र तृतीया एव भवति न तु पञ्चमी।
**अस्त्रियां किम्? बुद्ध्या मुक्तः -** ननु 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रे 'अस्त्रियाम्' इति पदस्य किमौचित्यम्? अत्र समाधानं प्रस्तूयते यत् अस्त्रियाम् इति पदं न स्यात् तदा तु 'बुद्ध्या मुक्तः' इत्यत्रापि पञ्चमी प्राप्ता स्यात् यतो हि 'बुद्धि' शब्दोऽयं गुणवाचको हेतुभूतोऽस्ति। परं सूत्रे 'अस्त्रियाम्' इति पदस्य ग्रहणात् बुद्धिशब्दस्य स्त्रीलिङ्गत्वात् अत्र पञ्चमी न भवति अपितु 'हेतौ' इति सूत्रेण तृतीया एव भवति बुद्ध्या मुक्तः इति सिद्धम्।
**पङ्क्तिविवेचनम् - ननु 'विभाषा' इति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।**

ननु 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रं योगविभागात् सिद्धं पतञ्जलिना महाभाष्ये, तस्यैव मतमनुसृत्य दीक्षितमहोदयेनापि अत्र योगविभागस्य चिन्तनं कृतम्। तदनुसारेण सूत्रमिदं द्विधा विभज्यते (1) विभाषा (2) गुणेऽस्त्रियाम् इति।

प्रथमे 'विभाषा' अत्र 'हेतौ' तथा च 'पञ्चमी' अनयोः अनुवृत्तिरायाति तेन अर्थोऽयं लभ्यते यत् **'हेतौ विकल्पेन पञ्चमी भवति'**। एतस्मात् 'धूमात् अग्निमान्' प्रयोगेऽस्मिन् हेतुवाचकात् धूमशब्दात् पञ्चमी भवति। पुनश्च अत्रैव प्रथमे भागे 'गुणेऽस्त्रियाम्' इति पदस्याभावत्वात् गुणभिन्नात् स्त्रीवाचकादपि पञ्चमी भवति यथा - 'नास्ति घटोऽनुपलब्धेः'। अत्र स्त्रीलिङ्गे विद्यमानहेतुत्वात् 'अनुपलब्धिः' इति शब्दात् पञ्चमी भवति 'अनुपलब्धेः' इति सिद्धम्। द्वितीयांशे 'गुणेस्त्रियाम्' इत्यत्र 'विभाषा' इति पदस्यानुवृत्तिरायाति तदा अर्थोऽयं लभ्यते यत् 'स्त्रीलिङ्गभिन्ने गुणवाचके हेतौ पञ्चमी भवति विकल्पने 'तदा तु 'जाड्याद् जाड्येन वा बद्धः' इत्यादिप्रयोगानां सिद्धयः भवन्ति इति दिक्।

**पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् २/३/३२ ।। एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थम्। पञ्चमी द्वितीये चानुवर्तेते। पृथग् रामेण रामात् रामं वा। एवं नाना।**
**पदविभागः -** पृथग्विनानानाभिः, तृतीया, अन्यतरस्याम्।
**सूत्रप्रकारः -** विधिसूत्रम्।
**सूत्रार्थः -** पृथक्, विना, नाना इत्येतैः योगे तृतीया स्यात्। पक्षे पञ्चमी द्वितीये च भवतः।
**व्याख्या -** पृथक् च विना च नाना चेति पृथग्विनानाः तैः पृथग्विनानानाभिः। तृतीयान्तं पदमिदम्। तृतीया - इति प्रथमान्तं पदम्। अन्यतरस्याम् इति पदं समुच्चयार्थमस्ति। 'अपादाने पञ्चमी' इत्यस्मात् 'पञ्चमी' इत्यस्य 'एनपा द्वितीया' इत्यस्मात् 'द्वितीया' इत्यस्य चानुवृत्तिरायाति। समुच्चयार्थकस्य 'अन्यतरस्याम्' इति पदस्य ग्रहणेन 'पञ्चमी' इत्यस्य अनुवृत्तिरत्र भवति। सा च मण्डूकप्लुतिन्यायेन एव सम्भवति। यतो हि अष्टाध्यायीग्रन्थे सूत्राणां क्रमः एवं विद्यते - अपादाने पञ्चमी, षष्ठ्यतसर्थप्रत्ययेन,एनपा द्वितीया, 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'।

एतस्यामवस्थायां **पञ्चमी**, **द्वितीया** इत्यनयोः अनुवृत्तिस्तु आयाति परं 'षष्ठ्यतसर्थप्रत्ययेन' इत्यस्मात् 'षष्ठी' नानुवर्तते। यतो हि सूत्रस्य षष्ठी पदे स्वरितत्वप्रतिज्ञा न विहिता। पञ्चमी तथा च द्वितीया अनयोः मण्डूकप्लुत्या अनुवर्तनस्य कारणमस्ति यत् 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम् च' इति पाठमात्रेण चकारात् समीपवर्तिनः 'द्वितीया' इत्यस्यानुवृत्तिस्तु आयाति परं असन्निहिते पञ्चम्याः अनुवृत्तिरसम्भवा एतस्मात् समुच्चयार्थकस्य अन्यतरस्यां ग्रहणस्य सामर्थ्यादेव व्यवहितायाः पञ्चम्या अपि अनुवृत्त्याऽत्र समावेशो भवति इति दिक्।

**रूपलेखनप्रकारः - पृथग् रामेण रामाद् रामं वा -** इत्यत्र 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम् च' इति सूत्रेण 'पृथक्' योगे तृतीया, पञ्चमी, द्वितीया च कृते रामेण, रामाद्, रामं वा इति भवन्ति। एवमेव विना, नाना इत्यादीनां योगेऽपि भवन्ति।

**अन्यानि उदाहरणानि -**

**(1) नाना नारीं निष्फला लोकयात्रा।**
**(2) गुणानुरोधेन विना न सत्क्रिया।**
**(3) ज्ञानं भारः क्रियां विना।**
**(4) यथा तानं विना रागो, यथा मानं विना नृपः।**
**यथा दानं विना हस्ती, तथा ज्ञानं विना यतिः।।**
**(5) पंकैर्विना सरो भाति, सदः खलजनैर्विना।**
**कटुवर्णैर्विना काव्यं, मानसं विषयैर्विना।।**

**करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य २/३३३।। एभ्योऽद्रव्यवचनेभ्यः करणे तृतीया पञ्चम्यौ स्तः। स्तोकेन स्तोकाद् वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः।**

**पदविभागः -** करणे, च, स्तोकाल्पकृच्छ्रकतिपयस्य, असत्त्ववचनस्य।

**सूत्रप्रकारः -** विधिसूत्रम्।

**सूत्रार्थः -** स्तोक, अल्प, कृच्छ्र, कतिपय इत्येभ्यः अद्रव्यवाचकेभ्यः करणे पञ्चमी भवति विकल्पेन।

**व्याख्या -** स्तोकश्च अल्पश्च कृच्छ्रश्च कतिपयश्चेति (समाहारद्वन्द्वः) स्तोकाल्पकृच्छ्रकतिपयं, तस्य स्तोकाल्पकृच्छ्रकतिपयस्य। सत्त्वस्य = द्रव्यस्य वचनं सत्त्ववचनं, न सत्त्ववचनं, असत्त्ववचनं, तस्य असत्त्ववचनस्य। करणे - इति सप्तम्यन्तम्। च - इति अव्ययम्। स्तोकाल्पकृच्छ्रकतिपयस्य - इति षष्ठ्यन्तम्। असत्त्ववचनस्य - इति षष्ठ्यन्तम्। 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम् च' इत्यतः 'अन्यतरस्याम्' इत्यनुवर्तते 'अपादाने पञ्चमी' इत्यतः 'पञ्चमी' इति च। अतः करणे पञ्चमी विकल्पेन लभ्यते। तदभावे तृतीया सिद्धा एव भवति।

**रूपलेखनप्रकारः - स्तोकेन स्तोकाद् वा मुक्तः -** अत्र अद्रव्यवाचकात् स्तोकशब्दात् 'करणे च स्तोकाल्पकृच्छ्रकतिपयासत्त्ववचनस्य' इति सूत्रेण पञ्चमीविभक्तिः भवति स्तोकात् इति जायते। पक्षे करणे तृतीयायां स्तोकेन इति भवति। स्तोकेन स्तोकाद् वा मुक्तः इति सिद्धम्।

**प्रत्युदाहरणम् - स्ताकेन विषेण हतः -** अत्र स्तोकशब्दः विषशब्दस्य विशेषणमस्ति। अतः विशेषणत्वात् द्रव्यम्। अतः अत्र विकल्पेन पञ्चमी न भवति अपितु 'कर्तृकरणयोस्तृतीया' इत्यनेन स्तोकशब्दात् तृतीया भवति तदनुरोधेन स्तोकेन विषेण हतः इति सिद्धम्।

**दूरान्तिकार्थेभ्यो द्वितीया च २/३/३५।। एभ्यो द्वितीया स्याच्चात् पञ्चमी-तृतीये च। प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरम्, दूरात्, दूरेण वा, अन्तिकम्, अन्तिकात् अन्तिकेन वा। असत्त्ववचनस्य इत्यनुवृत्तेर्नेह- दूरः पन्थाः।**

**पदविभागः -** दूरान्तिकार्थेभ्यः, द्वितीया, च।

**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – दूरान्तिकार्थेभ्यः अद्रव्यवाचिभ्यः शब्देभ्यः द्वितीया-तृतीया-पञ्चमी-विभक्तयो भवन्ति।
**व्याख्या** – दूरं च अन्तिकं च दूरान्तिके, ते अर्थौ येषां ते दूरान्तिकार्थास्तेभ्यो दूरान्तिकार्थेभ्यः। इति पञ्चम्यन्तं पदम्।

द्वितीया – इति प्रथमान्तं पदम्। च – इति अव्ययपदम्। चकारात् व्यवहितयोरपि (व्यवधानयुक्तेऽपि) पञ्चमीतृतीययोरनुवृत्तिः आयाति। प्रातिपदिकार्थमात्रे विधिरयम्। अतः प्रथमाया अपवादभूतम्। 'करणे च स्तोकाल्प' इति सूत्रादिह 'असत्त्ववचनस्य' इत्यस्यानुवृत्तिरायाति। अत एव 'दूरः पन्थाः' इत्यत्र 'पथिन्' इति शब्दस्य विशेषणत्वेन दूरशब्दो द्रव्यवाचकोऽस्ति, तस्मात् द्वितीया तृतीया पञ्चमी विभक्तयः न भवन्ति अपितु प्रातिपदिकार्थमात्रे प्रथमा एव भवति।

**रूपलेखनप्रकारः** – **ग्रामस्य दूरम् दूराद्, दूरेण** – अत्र "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रं प्रबाध्य 'दूरान्तिकार्थेभ्यो द्वितीया च' इति सूत्रेण दूरशब्दात् क्रमशः द्वितीया-तृतीया-पञ्चमी-विभक्तयः भवन्ति दूरम् दूराद् दूरेण वा इति सिद्धम्।

एवमेव 'अन्तिकम्' इति शब्दस्य योगेऽपि बोध्यम्। ग्रामस्य अन्तिकम्, अन्तिकाद्, अन्तिकेन वा इति।

**इति पञ्चमी विभक्तिः**

## अथ षष्ठी विभक्तिः

**षष्ठी शेषे २/३/५०।। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।**
**पदविभागः** – षष्ठी, शेषे।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – शेषे षष्ठी स्यात्।
**व्याख्या** – षष्ठी – इति प्रथमान्तं पदम्। शेषे – इति सप्तम्यन्तं पदम्। द्विपदमिदं सूत्रम्। सूत्रवृत्तौ स्पष्टम् – कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। उक्तादन्यः शेषः। कारकप्रकरणे प्रातिपदिकार्थ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणादीनां कृते प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-सप्तमी-विभक्तयः उक्ताः। एतेभ्यः उक्तेभ्यः अन्यः शेष इति। शेषे षष्ठीविभक्तिः भवति। सम्बन्धे षष्ठी प्रयुक्ता भवति। सम्बन्धे कारकत्वं न भवति। षष्ठ्यर्थाः बहवस्तथापि चत्वारः प्रसिद्धाः सन्ति। ते च स्वस्वामिभावसम्बन्धः, अवयवावयविभावसम्बन्धः, जन्यजनकभावसम्बन्धः, प्रकृतिविकृतिभावसम्बन्धश्चेति सन्ति।
**रूपलेखनप्रकारः** – **(1) राज्ञः पुरुषः** – अत्र स्वस्वामिभावसम्बन्धे राजन् शब्दात् 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति राज्ञः इति जायते। राज्ञः पुरुषः इति सिद्धम्। एवमेव –

**(1) मम गृहम् – इत्यत्र स्वस्वामिभावसम्बन्धः।**
**(2) वृक्षस्य शाखा – अत्र अवयवावयविभावसम्बन्धः।**
**(3) पितुः पुत्रम् – अत्र जन्यजनकभावसम्बन्धः।**
**(4) सुवर्णस्य कङ्कणम् – अत्र प्रकृतिविकृतिभावसम्बन्धः।**

**विशेषः** – **कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव** – यदा कर्मादीनां क्रियया सह सम्बन्धमात्रस्य, विवक्षा स्यात् तथा च सम्बन्धस्य प्रकारविशेषस्य ईप्सिततमत्वसाधकतमत्वादिविषये वक्तुमिच्छा न स्यात् तदा कर्मकरणसम्प्रदानादयः संज्ञाः न भवन्ति। तदा षष्ठी एव भवति तथा च तस्यामवस्थायां कारकत्वमपि नष्टं न भवति।

**रूपलेखनप्रकारः** – ( 1 ) **सतां गतम्** – सत्सम्बन्धिगमनमित्यर्थः। अत्र सत् शब्दात् कृर्तत्वाविवक्षायां सम्बन्धत्वमात्रविवक्षायां 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति। सत्-शब्दस्य षष्ठ्याः बहुवचने सतां गतम् इति भवति।
( 2 ) **सर्पिषो जानीते** – अत्र करणत्वविवक्षायां सर्पिषा उपायेन प्रवर्तते इत्यर्थे करणत्वस्य अविवक्षायां सम्बन्धत्वमात्रविवक्षायां सर्पिष् शब्दात् 'षष्ठी शेषे' इति सूत्रेण षष्ठ्यां एकवचने सर्पिषो जानीते इति भवति।
**मातुः स्मरति** – अत्र मातरं स्मरति इति कर्मत्वविवक्षायां अर्थो लभ्यते। अस्मिन् प्रयोगे कर्मत्वस्य अविवक्षायां सम्बन्धत्वमात्रविवक्षायां मातृशब्दात् 'षष्ठी शेषे' इति सूत्रेण षष्ठी विहिता, एकवचने मातुः स्मरति इति भवति। मातृसम्बन्धिस्मरणमित्यर्थः।
**एधोदकस्योपस्कुरुते** – अत्र कर्मत्वस्य शेषत्व-विवक्षायाम् एधोदकसम्बन्धि परिष्करणमित्यर्थो भवति। अत्र एधोदकशब्दात् 'षष्ठी शेषे' इति सूत्रेण षष्ठी विहिता 'एधोदकस्य' इति भवति। एधाश्च उदकानि चेति एधोदकम् तस्य एधोदकस्य इति पदं सिद्धम् भवति।
**भजे शम्भोश्चरणयोः** – अत्र चरणयोः इति पदे कर्मत्वस्य शेषत्वविवक्षायां 'षष्ठी शेषे' इति सूत्रेण चरणशब्दात् षष्ठी विहिता, तदनुरोधेन द्विवचने ओस्-विभक्तौ चरणयोः इति भवति। भजे शम्भोश्चरणयोः इति सिद्धम्। शम्भुचरणसम्बन्धिभजनमित्यर्थः।
**फलानां तृप्तः** – अत्र करणत्वस्य शेषत्वविवक्षायां (सम्बन्धत्वमात्रविवक्षायां) 'षष्ठी शेषे' इति सूत्रेण षष्ठी विहिता तस्मात् फलशब्दात् षष्ठ्याः बहुवचने आम् विभक्तौ फलानां तृप्तः इति वाक्यं सिद्धम् भवति। फलसम्बन्धिनी तृप्तिरित्यर्थः।
**षष्ठी हेतुप्रयोगे २/३/२६।। हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।**
**पदविभागः** – षष्ठी, हेतुप्रयोगे।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये च हेतुवाचकात् शब्दात् षष्ठी भवति।
**व्याख्या** – हेतोः प्रयोगः इति हेतुप्रयोगः (षष्ठी तत्पुरुषः) तस्मिन् हेतुप्रयोगे। सप्तम्यन्तं पदम्। 'हेतौ' इति सूत्रस्यानुवृत्तिरत्रायाति। 'हेतौ' इति सूत्रेण प्राप्ततृतीयायाः अपवादसूत्रमिदम्।
**रूपलेखनप्रकारः** – **अन्नस्य हेतोर्वसति** – अत्र हेतुशब्दस्य प्रयोगे सति हेतुवाचकात् अन्नशब्दात् 'षष्ठी हेतुप्रयोगे' इति सूत्रेण षष्ठी विहिता 'अन्नस्य' इति भवति। 'अन्नस्य' इति पदेन सह समानाधिकरण्यात् हेतुशब्दादपि षष्ठी भवति 'हेतोः' इति जायते। अन्नस्य हेतोर्वसति इति सिद्धम्।
**सर्वनाम्नस्तृतीया च २/३/२७।। सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात्, षष्ठी च। केन हेतुना वसति। कस्य हेतोः। वा. 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्'। किं निमित्तं वसति?, केन निमित्तेन?, कस्मै निमित्ताय? इत्यादि। एवं किं कारणम्?, को हेतुः? किं प्रयोजनम्? इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।**
**पदविभागः** – सर्वनाम्नः, तृतीया च।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – सर्वनामवाचिनो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये हेतुभूतात् सर्वनामवाचकशब्दात् हेतुशब्दाच्च तृतीया स्यात् षष्ठी च।
**व्याख्या** – 'सर्वनाम्नः' इति षष्ठ्यन्तं पदम्। 'तृतीया' इति प्रथमान्तं, च – इति अव्ययपदम्। 'षष्ठी हेतुप्रयोगे' इति सूत्रस्य 'हेतौ' इति सूत्रस्य च अनुवर्तनमत्र भवति।
**रूपलेखनप्रकारः** – केन हेतुना वसति, कस्य हेतोः।

अत्र 'षष्ठी हेतु प्रयोगे' इति सूत्रं प्रबाध्य 'सर्वनाम्नस्तृतीया च' इति सूत्रेण सर्वनामवाचकात् किम् - शब्दात्, हेतुशब्दाच्च तृतीया-षष्ठ्यौ भवतः। तृतीयायां - केन हेतुना वसति, षष्ठ्यां - कस्य हेतोः वसति इति सिद्धम्।

### वा. निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्

**वार्तिकार्थः** - निमित्तशब्दस्य, तस्य पर्यायानाञ्च प्रयोगे सति, निमित्तवाचकेभ्यः, तत्समानाधिकरणेभ्यश्च शब्देभ्यः प्रायः सर्वासां विभक्तिनां प्रयोगो भवति।

**( 1 ) किं निमित्तं वसति** - अत्र निमित्तशब्दस्य प्रयोगे सति, निमित्तशब्दात् समानाधिकरण्यात् किम्- शब्दाच्च 'निमित्तपर्यायः' इति वार्तिकेन प्रथमायां किं निमित्तं वसति इति भवति।

**( 2 ) द्वितीयायामपि किं निमित्तं वसति** इति जायते।

**( 3 ) केन निमित्तेन वसति** - तृतीयायां निमित्तशब्दात् किम् - शब्दाच्च भवति प्रयोगोऽयम्।

**( 4 ) कस्मै निमित्ताय वसति** - इति चतुर्थ्यां भवति।

**( 5 ) कस्मात् निमित्तात् वसति** - इति पञ्चम्यां भवति।

**( 6 ) कस्य निमित्तस्य** - इति षष्ठ्यां भवति।

**( 7 ) कस्मिन् निमित्ते** - इति सप्तम्यां भवति।

**विशेषः** - एवमेव निमित्तपर्यायाणां कारणहेतुप्रयोजनादीनां शब्दानां प्रयोगेऽपि बोध्यम्। किं कारणम्, को हेतुः, किम् प्रयोजनम् इतिवत् सर्वासु विभक्तिषु प्रयोगाः भवन्ति इति।

**पङ्क्तिविवेचनम् - प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः** - ननु 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' वार्तिकेऽस्मिन् प्रायग्रहणात् बोध्यमस्ति यत् सर्वनामभिन्नहेतुभूतात् शब्दात् प्रथमां द्वितीयाञ्च विहाय अन्याः सर्वाः विभक्तयः प्रयुक्ताः भवन्ति इति। यथा - ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्ताय, ज्ञानात् निमित्तात् ज्ञानस्य निमित्तस्य, ज्ञाने निमित्ते इत्यादिषु 'हरिः सेव्यः' इति प्रत्येकं वाक्येन सह योजनीयः अत्र ज्ञानशब्दः सर्वनामभिन्नोऽस्ति इति बोध्यम्।

**षष्ठ्यतसर्थप्रत्ययेन २/३/३० ।। एतद्योगे षष्ठी स्यात्। दिक्शब्द इति पञ्चम्या अपवादः। ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात्।**

**पदविभागः** - षष्ठी, अतसर्थप्रत्ययेन।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सूत्रार्थः** - अतसर्थप्रत्ययान्तानां योगे षष्ठी भवति।

**व्याख्या** - अतसः अर्थः अतसर्थः (षष्ठी तत्पुरुषः) अतसर्थस्य इव अर्थो यस्य (मध्यमपदलोपी बहुव्रीहिः) अतसर्थः। अतसर्थश्चासौ प्रत्ययः अतसर्थप्रत्ययः (कर्मधारयसमासः) तेन अतसर्थप्रत्ययेन। तृतीयान्तं पदम्। 'अतसर्थः' इत्यनेन अतस्-प्रत्ययः, तदर्थप्रत्ययाश्च इति बोध्यम्। अतसर्थप्रत्ययाः - अतसुच्, अस्, अस्तात्, रिल्, रिष्टात् इत्यादयः सन्ति। 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण कृतायाः पञ्चम्याः अपवादरूपेण प्रयुक्तमिदं सूत्रम्।

**रूपलेखनप्रकारः** - ग्रामस्य दक्षिणतः, पुरः, पुरस्ताद्, उपरि उपरिष्टात् इति।

**( 1 ) ग्रामस्य दक्षिणतः** - इत्यत्र दक्षिणशब्दात् 'दक्षिणोत्तराभ्यामतसुच्' इत्यनेन अतसुच् प्रत्यये दक्षिणतः इति भवति। अत्र "अन्यारादितरर्तेदिक्शब्दा." इतिसूत्रेण प्राप्तां दिग्योगलक्षणां पञ्चमीं प्रबाध्य 'षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रेण ग्रामशब्दात् षष्ठी भवति ग्रामस्य - दक्षिणतः इति जायते।

**( 2 ) ग्रामस्य पुरः** - इत्यत्र पूर्वशब्दात् 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' इति सूत्रेण अस्प्रत्यये कृते, पूर्वस्थाने

पुरादेशे कृते च पुरः इति भवति। 'पुरः' इति योगे ग्रामशब्दात् 'अन्यारादितरर्ते.' इति सूत्रेण प्राप्तां पञ्चमीं प्रबाध्य 'षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रेण षष्ठी विहिता ग्रामस्य पुरः इति सिद्धम्।

**( 3 ) ग्रामस्य पुरस्तात्** – इत्यत्र पूर्वशब्दात् 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इत्यनेन अस्तात् प्रत्यये, पूर्वस्थाने पुरादेशे कृते पुरस्तात् इति भवति शेषं पूर्ववत्।

**( 4 ) ग्रामस्य उपरि** – इत्यत्र उपर्युपरिष्टात् इति सूत्रेण ऊर्ध्वशब्दस्य स्थाने उपादेशे रिल् (रि) प्रत्यये कृते निपातनात् 'उपरि' इति भवति। शेषं पूर्ववत् –

**( 5 ) ग्रामस्य उपरिष्टात्** – इत्यत्र 'उपर्युपरिष्टात्' इति सूत्रेण ऊर्ध्वशब्दस्य स्थाने उपादेशे रिष्टात् – प्रत्यये कृते निपातनात् उपरिष्टात् इति भवति। शेषं पूर्ववत्।

**एनपा द्वितीया २/३/३१ ।। एनबन्तेन योगे द्वितीया स्यात्। 'एनपा' इति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवमुत्तरेण।**

**पदविभागः** – एनपा, द्वितीया।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – 'एनप्' इति प्रत्ययान्तेन योगे द्वितीया भवति।

**व्याख्या** – एनपा इति तृतीयान्तं पदम्। द्वितीया इति प्रथमान्तं पदम्। तद्धिते 'एनबन्यतरस्यामदूरेऽपञ्चम्याः' इत्यनेन विहितस्य एनप्-प्रत्ययस्य ग्रहणमत्र। 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषाबलेन एनप् – प्रत्ययान्तशब्दानां योगे द्वितीया भवति इत्यर्थो लभ्यते। एनप् प्रत्ययोऽपि अतसुच् प्रत्ययार्थेषु एवास्ति। अतः 'षष्ठ्यतसर्थप्रत्ययेन' इत्यनेन प्राप्तां षष्ठीं बाधते सूत्रमिदम्। मूले उक्तम् – '**एनपा इति योगविभागात् षष्ठ्यपि**' एतेन प्रकृतसूत्रं विभज्यते एनपा इति, द्वितीया इति च। 'एनपा' अत्र पूर्वसूत्रेण 'षष्ठ्यतसर्थप्रत्ययेन' इत्यस्मात् 'षष्ठी' इत्यस्यानुवृत्तिरायाति। तदा सूत्रार्थो भवति **एनबन्तेन सह योगे षष्ठी भवतीति।** पुनः 'द्वितीया' अत्र प्रथमसूत्रात् 'एनपा' इत्यस्यानुवृत्तिरायाति। तदा सूत्रार्थो भवति – **एनबन्तेन सह योगे द्वितीया भवतीति।** षष्ठी द्वितीया च अनेन सूत्रेण विधीयते।

**रूपलेखनप्रकारः –दक्षिणेन ग्रामं ग्रामस्य वा** – अत्र दक्षिणशब्दात् एनप्-प्रत्यये कृते दक्षिणेन इति भवति। 'दक्षिणेन' इति योगे ग्रामशब्दात् 'एनपा द्वितीया' इति सूत्रेण द्वितीयायां कृतायां भवति दक्षिणेन ग्रामम् इति। 'एनपा' इति योगविभागात् षष्ठ्यां भवति दक्षिणेन ग्रामस्य इति। एवमेव उत्तरेण ग्रामं ग्रामस्य वा इत्यपि साधुः।

**दूरान्तिकार्थैः षष्ठ्यन्तरस्याम् २/३/३४।। एतैर्योगे षष्ठी स्यात् पञ्चमी च। दूरं निकटं ग्रामस्य ग्रामाद् वा।**

**पदविभागः**– दूरान्तिकार्थैः, षष्ठी, अन्यतरस्याम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – दूरान्तिकार्थैः शब्दैः योगे विकल्पेन षष्ठी भवति पक्षे पञ्चमी च।

**व्याख्या** – दूरं च अन्तिकं चेति दूरान्तिके (इतरेतरद्वन्द्वः) दूरान्तिकयोरर्थ इव अर्थो येषां ते दूरान्तिकार्थाः, तैः दूरान्तिकार्थैः। तृतीयाबहुवचनान्तपदम्। षष्ठी – इति प्रथमान्तं पदम्। षष्ठ्याभावे पञ्चमी भवति। 'अपादाने पञ्चमी' इत्यतः पञ्चमी इत्यस्यानुवृत्तिरायाति 'अन्यतरस्याम्' इति पदस्योल्लेखस्य इत्येव फलम्।

**रूपलेखनप्रकारः** – दूरं निकटं ग्रामस्य ग्रामाद् वा – अत्र दूरशब्दस्य निकटशब्दस्य च योगे ग्रामशब्दात् ''दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्'' इति सूत्रेण विकल्पेन षष्ठी भवति ग्रामस्य इति जायते। पक्षे पञ्चमीविभक्तौ ग्रामात् इति भवति। दूरं निकटं ग्रामस्य ग्रामाद्वा इति सिद्धम्। एवमेव समीपम्, अन्तिकम्, आरात्, अभ्याशात् इत्यादीनां योगेऽपि बोध्यम्।

**ज्ञोऽविदर्थस्य करणे २/३/५१ ।। जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानम्।**

**पदच्छेदः** – ज्ञः, अविदर्थस्य, करणे।

**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – ज्ञानार्थकभिन्ने सति ज्ञा धातोः प्रयोगे करणे शेषत्वविवक्षायां षष्ठी भवति।
**व्याख्या** – विद् अर्थो यस्य स विदर्थः, न विदर्थः अविदर्थः, तस्य अविदर्थस्य। अविदर्थस्य इति षष्ठ्यन्तं पदम्। ज्ञः – इति षष्ठ्यन्तं पदम्। करणे – इति सप्तम्यन्तम्। 'षष्ठी शेषे' इत्यस्मात् 'शेषे' इत्यस्यानुवृत्तिरायाति। यद्यपि शेषत्वेन विवक्षायां 'षष्ठी शेषे' इति सूत्रेणैव षष्ठी भवितुमर्हति। तथापि ''प्रतिपदविधाना षष्ठी न समस्यते'' इति वार्तिकनियमने यत्र पदमाश्रित्य सूत्रविशेषेण षष्ठी विधीयते तेषु तेषु स्थानेषु समासाभावात् विभक्तेरेव श्रवणं स्यादिति।
**रूपलेखनप्रकारः** – **सर्पिषो ज्ञानम्** – अत्र ज्ञानमित्यस्यार्थः प्रवृत्तिः। अत्र करणत्वस्याविवक्षायां सम्बन्धस्य विवक्षायाञ्च 'ज्ञोऽविदर्थस्य करणे' इति सूत्रेण सर्पिष्शब्दात् षष्ठी विधीयते सर्पिषः इति भवति। सर्पिषो ज्ञानम् इति वाक्यम्।
**अधीगर्थदयेशां कर्मणि २/३/५२।। एषां कर्मणि षष्ठी स्यात्। मातुः स्मरणम्। सर्पिषो दयनम्, ईशनं वा।**
**पदच्छेदः** – अधीगर्थदयेशां, कर्मणि।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – स्मरणार्थकस्य धातोः, दय-धातोः, ईशधातोश्च कर्मणि शेषत्वविवक्षायां षष्ठी भवति।
**व्याख्या** – अधिपूर्वः इक् स्मरणे धातुः अधीक् इति भवति। अधीग् अर्थो येषां ते अधीगर्थाः, अथवा अधीकः अर्थ इव अर्थो येषां ते अधीगर्थाः। अधीगर्थाश्च दयश्च ईश् च इति अधीगर्थदयेशः, तेषाम् अधीगर्थदयेशाम् (बहुव्रीहिगर्भो द्वन्द्वः) अधीगर्थदयेशाम् – इति षष्ठ्यन्तं पदम्। कर्मणि – इति सप्तम्यन्तम्। 'षष्ठी शेषे' इति सूत्रस्य अनुवत्तिरत्र आयाति।
**रूपलेखनप्रकारः** – **मातुः स्मरणम्** – अत्र अधिगर्थे स्मृ (चिन्तायां) धातोः प्रयोगे सम्बन्धमात्रविवक्षायां मातृशब्दात् 'अधीगर्थदयेशां कर्मणि' इति सूत्रेण कर्मणि षष्ठी विहिता मातुः स्मरणम् इति भवति।
**सर्पिषो दयनम्** -अत्र दयधातुप्रयोगे सति सम्बन्धमात्रविवक्षायां सर्पिष् शब्दात् षष्ठी भवति सर्पिषो दयनम्।
**सर्पिषो ईशनम्** – अत्र ईश-धातुप्रयोगे सति सम्बन्धमात्रविवक्षायां षष्ठी भवति सर्पिषो ईशनम् इति जायते।
**कृञः प्रतियत्ने २/३/५३।। प्रतियत्नो गुणाधानम्। कृञः कर्मणि शेषे षष्ठी स्यात् गुणाधाने। एधोदकस्योपस्करणम्।**
**पदविभागः** – कृञः, प्रतियत्ने।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – गुणाधाने गम्यमाने सति कृञ्-धातोः कर्मणि शेषत्वविवक्षायां षष्ठी भवति।
**व्याख्या** – कृञः – इति षष्ठ्यन्तं पदम्। प्रतियत्ने इति सप्तम्यन्तम्। 'षष्ठी शेषे' इति सूत्रस्य तथा च 'अधिगर्थदयेशां कर्मणि' इत्यतः 'कर्मणि' इत्यस्यानुवृत्तिरायाति।
**एधो दकस्योपस्करणम्** = इत्यत्र एधो दकशब्दात् शेषत्वविवक्षायां गुणाधाने अर्थे 'कृञः प्रतियत्ने' इति सूत्रेण षष्ठी विधीयते एधो दकस्योपकरणम् इति भवति।
**रुजार्थानां भाववचनानामज्वरेः २/३/५४।। भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा। वा. 'अज्वरिसन्ताप्योरिति वाच्यम्। रोगस्य चौरज्वरः चौरसन्तापो वा। रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः।**
**पदच्छेदः** – रुजार्थानाम्, भाववचनानाम्,अज्वरेः।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – 'ज्वरि' इति धातुं विहाय भावकर्तृकरोगार्थकधातूनां कर्मणि शेषत्वविवक्षायां षष्ठी भवति।
**व्याख्या** – रुजा अर्थो येषां ते रुजार्थास्तेषां रुजार्थानाम्। भावः = धात्वर्थो वचनः = कर्ता येषां ते भाववचनास्तेषां

भाववचनानाम्। न ज्वरिः इति अज्वरिः तस्य अज्वरेः। रुजार्थानाम् –इति षष्ठ्यन्तं पदम्।
भाववचनानाम् – इति षष्ठ्यन्तम्, अज्वरेः – इति षष्ठ्यन्तम्। 'षष्ठी शेषे' इति सूत्रस्य 'अधीगर्थदयेषां कर्मणि' इत्यतः 'कर्मणि' इत्यस्य च अनुवृत्तिरायाति।

**रूपलेखनप्रकारः – ( 1 ) चौरस्य रोगस्य रुजा** –अत्र रुज् धातोः घञि प्रत्यये रोगः इति भवति। रोगः रुजायां कर्ता अस्ति। चौरः कर्म अस्ति। अत्र शेषत्वविवक्षायां 'रुजार्थानां भाववचनानामज्वरेः' इति सूत्रेण चौरशब्दात् षष्ठी विधीयते चौरस्य रोगस्य रुजा इति सिद्धम्। चौरस्य रुजा **चौररुजा** इति प्रयोगो न भवति प्रतिपदविधाना षष्ठी न समस्यते इति नियमात्।

## वा. अज्वरिसन्ताप्योरिति वाच्यम्

**वार्तिकार्थः**– सूत्रस्थ 'अज्वरेः' इति पदस्य स्थाने 'अज्वरिसन्ताप्योः' इति वक्तव्यम्। एतेन ज्वर्, सन्तप् इत्यननयोः कर्मणि शेषत्वविवक्षायां षष्ठी न भवति।

**रूपलेखनप्रकारः** – रोगस्य चौरज्वरः – रोगकर्तृकं चौरसम्बन्धिज्वरः इत्यर्थे, 'रोगः' कर्ता, ज्वर–धातोः प्रयोगे 'चौर' इति कर्म, तस्मात् 'रुजार्थानां भाववचनानामज्वरेः' इति सूत्रेण शेषत्वविवक्षायां षष्ठी प्राप्ता भवति तस्याः 'अज्वरिसन्ताप्योरिति वाच्यम्' इति वार्तिकेन निषेधो भवति। परिणामतया 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति। एतस्याः षष्ठ्याः प्रतिपदविधानाभावात् समासस्य निषेधोऽपि न भवति, अतः चौरस्य ज्वरः इति चौरज्वरः साधुरेव।
**रोगस्य चौरसन्तापः** – रोगकर्तृकं चौरसम्बन्धिसन्तापः इत्यर्थे रोगः कर्ता, 'सन्तापि' इति धातोः प्रयोगे 'चौर' इति कर्म, तस्मात् पूर्वानुसारेण प्राप्तायाः षष्ठ्याः निषेधो भवति। परिणामतया 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति। अत्रापि समासस्य निषेधो न भवति चौरस्य सन्तापः इति चौरसन्तापः साधुरेव।

**आशिषि नाथः २/३/५५ ।। आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनम्। आशिषि इति किम्? माणवकनाथनम्। तत्सम्बन्धिनी याच्ञेत्यर्थः।**

**पदविभागः** – आशिषि, नाथः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – आशीरर्थस्य नाथधातोः प्रयोगे कर्मणि शेषत्वविवक्षायां षष्ठी भवति।

**व्याख्या** – आशिषि – इति सप्तम्यन्तं, नाथः – इति षष्ठ्यन्तम्। 'षष्ठी शेषे' इत्यस्य 'अधीगर्थदयेशां कर्मणि' इत्यतः 'कर्मणि' इत्यस्य च अनुवृत्तिरायाति। इदं मे भूयादिति इच्छा एव आ पूर्वकस्य शास् धातोरर्थः। तदेव आशीः नाथतेरर्थः।

**रूपलेखनप्रकाः – सर्पिषो नाथनम्** – सर्पिः मे स्यादितीच्छा। अत्र नाथधातोः कर्म 'सर्पिस्' इत्यस्ति। अतः कर्मणि शेषत्वविवक्षायां सर्पिस् शब्दात् 'आशिषि नाथः' इति सूत्रेण षष्ठी भवति सर्पिषो नाथनम् इति सिद्धम्।

**प्रत्युदाहरणम् – आशिषि इति किम्? माणवकनाथनम्।**

ननु 'आशिषि नाथः' अस्मिन्सूत्रे 'आशिषि' इति पदस्य किमौचित्यम् तर्हि समाधाने वाक्यमस्ति 'माणवक नाथनम् इत्यत्र मा स्यात्। माणवकसम्बन्धियाच्ञा अत्र नाथधातुः याचनार्थे प्रयुक्ताऽस्ति न तु 'आशिषि' इत्यर्थे। एतस्मात् 'षष्ठी शेषे' इति सूत्रेण शेषत्वविवक्षायां षष्ठी भवति माणवकस्य नाथनम् इति जायते पुनश्च समासे कृते माणवकनाथनम् इति भवति।

**जासिनिप्रहणनाटक्राथपिषां हिंसायाम् २/३/५६ ।। हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनम्। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनम् – प्रनिहननम्-निहननं-प्रहणनं वा। 'नट अवस्कन्दने' चुरादिः। चौरस्योन्नाटनम्। चौरस्य क्राथनम्। वृषलस्य पेषणम्। हिंसायां किम् – धानापेषणम्।**

**पदच्छेदः** – जासि-निप्रहण-नाट-क्राथ-पिषाम्, हिंसायाम्।
**सूत्रप्रकारः** –विधिसूत्रम्।
**सूत्रार्थः** – जसु हिंसायां चौरादिकस्य धातोः निप्रपूर्वस्य हन् धातोः, नट अवस्कन्दे धातोः, क्रथहिंसायाम् धातोः, पिष् धातोश्च कर्मणि शेषत्वविवक्षायां षष्ठी भवति। निप्रपूर्वस्य हन् धातोः विषये क्वचित् संहितौ, क्वचित् विपर्यस्तौ, क्वचित् केवलं नि, क्वचित् केवलं प्र इति स्थितेऽपि हिंसार्थेवगम्यते एव।
**व्याख्या** – जासिश्च निप्रहणश्च नाटश्च क्राथश्च पिष् चेति (इतरेतरद्वन्द्वः) जासिनिप्रहणनाटक्राथपिषः, तेषां जासिनिप्रहणनाटक्राथपिषाम् इति षष्ठ्यन्तम्। हिंसायाम् –इति सप्तम्यन्तम्। 'षष्ठी शेषे' इति सूत्रस्य 'अधीगर्थदयेशां कर्मणि' इत्यतः 'कर्मणि' इत्यस्य अनुवर्तनं भवति।
**रूपलेखनप्रकारः** – **चौरस्योज्जासनम्** – अत्र उत् पूर्वकात् जासिधातोः ल्युट् – प्रत्यये उज्जासनम् इति भवति। एतस्य कर्म चौरः इत्यस्ति, तस्मात् चौरशब्दात् शेषत्वविवक्षायां 'जासि निप्रहण.' इति सूत्रेण षष्ठी भवति चौरस्योज्जासनम् इति सिद्धम्।
**चौरस्य निप्रहणनम् -प्रणिहननम् निहननम् – प्रहणनं वा** – अत्र कर्मत्वेन 'चौरः'– इत्यस्ति, तस्य हननमित्यर्थे 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति सूत्रेण शेषत्वविवक्षायां चौरशब्दात् षष्ठी विभक्तिः भवति चौरस्य इति जायते। 'निप्रहणनम्' इत्यत्र नि, प्र अनयोः उपसर्गयोः समस्ते प्रयोगः कृतः तदनन्तरं हन् धातोः ल्युटि प्रत्यये हननम् इति भवति तत्रापि 'हन्तेरत्पूर्वस्य' इति सूत्रेण नस्य णत्वं भवति निप्रहणनम् इति कृते सति चौरस्य निप्रहणनम् इति सिद्धम्।
**चौरस्य प्रणिहननम्** – इत्यत्र पूर्वानुसारेण एव चौरशब्दात् षष्ठी भवति। प्रणिहननम् इत्यत्र प्र, नि, अनयोः द्वयोः विपर्यस्तावस्थायां प्रयोगे कृते नेर्गदनदपतपदघुमास्यति हन्तियातिवातिप्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' इति सूत्रेण 'नि' इति उपसर्गस्थनकारस्य णत्वे कृते प्रणिहननम् इति भवति।
**चौरस्य निहननम्** – अत्र प्रथमप्रयोगानुसारेण चौरशब्दात् षष्ठी भवति। उपसर्गस्य व्यस्तावस्थायां प्रयोगे कृते निहननम् इति जाते, चौरस्य निहहनम् इति सिद्धम्।
**चौरस्य प्रहणनम्** – अत्रापि चौरशब्दात् षष्ठी भवति, तथा च 'प्र' उपसर्गस्य व्यस्तावस्थायां प्रयोगे कृते 'हन्तेरत्पूर्वस्य' इत्यनेन नस्य णत्वं विधीयते। प्रहणनम् इति सिद्धम्।
**चौरस्य उन्नाटनम्** – अत्रापि चौरशब्दात् शेषत्वविवक्षायां 'जासिनिप्रहण' इति सूत्रेण षष्ठी भवति। उन्नाटनम् – इत्यत्र उत् – उपसर्गपूर्वकात् नट अवस्कन्दे इत्यस्मात् ण्यन्तात् नाटिधातोः ल्युट्–प्रत्यये उन्नाटनम् भवति।
**चौरस्य क्राथनम्** – चौरशब्दात् शेषत्वविवक्षायां षष्ठ्यां चौरस्य इति भवति। क्राथनम् – अत्र क्रथधातोः णिजन्तात् ल्युट् प्रत्यये क्राथनम् इति भवति। चौरस्य क्राथनम् इति सिद्धम्।
**वृषलस्य पेषणम्** – पिष्लृ संचूर्णने इत्यर्थे पिष् धातोः ल्युट्–प्रत्यये पेषणनम् इति भवति। संचूर्णने हिंसा एव भवति अतः वृषलशब्दात् शेषत्वविवक्षायां षष्ठी भवति वृषलस्य पेषणनम् इति सिद्धम्।
**प्रत्युदाहरणम् – हिंसायाम् किम्? धानापेषणम्** – अत्र 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति सूत्रे 'हिंसायाम्' इति पदस्य विधानात् 'धानापेषणम्' इत्यत्र हिंसाभावे प्रकृतसूत्रस्य प्रयोगो न भवति अपितु 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति धानस्य इति जायते। तत्र प्रतिपदविधानषष्ठ्याभावात् समासोऽपि भवति धानस्य पेषणम् इति धानापेषणम् इति साधुः।
**व्यवहृपणोः समर्थयोः २/३/५७।। शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणम्, पणनं वा। समर्थयोः किम्? शलाकाव्यवहारः। गणनेत्यर्थः। ब्राह्मणपणं स्तुतिरित्यर्थः।**
**पदविभागः** – व्यवहृपणोः, समर्थयोः।

**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – समानार्थकयोः वि+अव इति पूर्वस्य हृ धातुः, पण् धातुः इत्यनयोः कर्मणि शेषत्वविवक्षायां षष्ठी भवति।
**व्याख्या** – विश्च अवश्चेति व्यवौ (इतरेतरद्वन्द्वः) तौ पूर्वौ यस्य स व्यवहा, व्यवहा च पण् च व्यवहृपणौ (इतरेतरद्वन्द्वः) तयोः व्यवहृपणोः। समोऽर्थो ययोस्तौ समर्थौ, तयोः समर्थयोः। व्यवहृपणोः– इति षष्ठीद्विवचनान्तं पदम्। समर्थयोः – इति षष्ठीद्विवचनान्तमेव। षष्ठी शेषे इति सूत्रस्य "अधीगर्थदयेषां कर्मणि" इत्यस्मात् 'कर्मणि' इत्यस्य चानुवृत्तिरायाति। समर्थशब्दस्यार्थोऽस्ति तुल्यता। अत एव मूले उक्तम् "द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता" इति। समर्थयोः इति पदं व्यवहृपणोः इत्यस्य विशेषणत्वेन प्रयुक्तमस्ति।
**रूपलेखनप्रकारः** – **शतस्य व्यवहरणं पणनं वा** –
(1) **शतस्य व्यवहरणम्** – अत्र वि+अव उपसर्गपूर्वस्य हृधातोः ल्युट्–प्रत्यये व्यवहरणम् इति भवति। इत्यस्य कर्म अस्ति 'शत' इति। एवं शतशब्दात् शेषत्वविवक्षायां "व्यवहृपणोः समर्थयोः" इति सूत्रेण षष्ठी भवति शतस्य व्यवहरणम् इति जायते।
(2) **शतस्य पणनम्** – अत्र पण् धातोः कर्म अस्ति 'शत' इति तस्मात् षष्ठी भवति शतस्य पणनम् इति जायते।
द्यूतव्यवहारेण क्रयविक्रयव्यवहारेण वा शतं गृह्णाति इत्यर्थः।
**प्रत्युदाहरणम् – समर्थयोः किम्? शलाकाव्यवहारः।**
अत्र 'व्यवहृपणोः समर्थयोः' इति सूत्रे 'समर्थयोः' इति पदस्य ग्रहणात् 'शलाकाव्यवहारः' इति प्रयोगे प्रकृतसूत्रेण षष्ठी न भवति यतो हि अत्र व्यहृधातुः गणनायामर्थेऽस्ति। तत्र 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति, प्रतिपदविधानषष्ठ्याभावात् समासोऽपि भवति शलाकाव्यवहारः इति बोध्यम्।
**ब्राह्मणपणनम्** – अत्र पणनं 'स्तुतिः' इत्यर्थेऽस्ति। न तु व्यवहारार्थकः। तस्मात् ब्राह्मणशब्दात् 'व्यवहृपणोः समर्थयोः' इत्यनेन षष्ठीन भवति अपितु 'षष्ठी शेषे' इत्यनेन षष्ठ्यां कृतायां ब्राह्मणानां पणनम् इति भूते सति प्रतिपदविधानषष्ठ्याभावात् समासोऽपि भवति ब्राह्मणपणनम् इति सिद्धम्।
**दिवस्तदर्थस्य २/३/५८।। द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति। तदर्थस्य किम्? ब्राह्मणं दीव्यति। स्तौतीत्यर्थः।**
**पदविभागः** – दिवः, तदर्थस्य।
**सूत्रप्रकारः** – विधिसूत्रम्।
**सूत्रार्थः** – द्यूतार्थकस्य क्रयविक्रयरूपव्यवहारार्थकस्य च दिव्–धातोः कर्मणि षष्ठी भवति।
**व्याख्या** – स व्यवहारोऽर्थो यस्य सः तदर्थः, तस्य तदर्थस्य (बहुव्रीहिः)। दिवः – इति षष्ठ्यन्तम्। 'षष्ठी शेषे' इत्यतः षष्ठी इत्यस्य 'अधीगर्थदयेषां कर्मणि' इत्यतः 'कर्मणि' इत्यस्य चानुवृत्तिरायाति। तदर्थः – इति पदस्यार्थो विद्यते पूर्वोक्ते 'व्यवहृपणोः समर्थयोः' इति सूत्रे पठिता तुल्यार्थता। अग्रे वक्ष्यमाणे सूत्रे 'दिव्' इत्यस्यानुवृत्त्यर्थे अत्र पृथक्तया अस्य सूत्रस्य प्रणयनं विहितम्। अत्र कर्मण्येव षष्ठी भवति न तु शेषत्वविवक्षायाम्। अतः न प्रतिपदविधानषष्ठी अपितु कारकषष्ठ्येव।
**रूपलेखनप्रकारः** – **शतस्य दीव्यति** – अत्र द्यूतार्थकस्य क्रयविक्रयव्यवहारार्थकस्य च दिवः प्रयोगे 'दिवस्तदर्थस्य' इति सूत्रेण शतशब्दात् षष्ठी भवति शतस्य दीव्यति इति रूपं सिद्धम्।
**प्रत्युदाहरणम् – तदर्थस्य किम्? ब्राह्मणं दीव्यति** – अत्र 'दिवस्तदर्थस्य' इति सूत्रे 'तदर्थस्य' इति पदस्य ग्रहणमस्ति तस्मात् दिव् धातोः द्यूतार्थे क्रयविक्रयरूपव्यवहारार्थे प्रयोगे सत्येव कर्मणि षष्ठी स्यात् इत्यर्थो लभ्यते। 'ब्राह्मणं दीव्यति' इत्यत्र दिव्–धातोः प्रयोगः स्तुत्यर्थेऽस्ति एतस्मात् षष्ठी न भवति अपितु 'कर्मणि द्वितीया' इत्यनेन द्वितीया एव भवति ब्राह्मणं दीव्यति इति दिक्।

**विभाषोपसर्गे २/३/५९।। पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति।**

**पदविभागः –** विभाषा, उपसर्गे।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** द्यूतार्थकस्य क्रयविक्रयरूपव्यवहारार्थकस्य च दिव् धातोः कर्मणि विकल्पेन षष्ठी भवति।

**व्याख्या –** विभाषा – इति प्रथमान्तं पदम्। उपसर्गे – इति सप्तम्यन्तम्। दिवस्तदर्थस्य इत्यस्य 'षष्ठी शेषे' इत्यस्मात् 'षष्ठी' इत्यस्य च अविकलरूपेण अनुवर्तनं भवति। 'अधीगर्थदयेशां कर्मणि' इत्यतः 'कर्मणि' इति पदस्य च अनुवर्तनं भवति। 'दिवस्तदर्थस्य' इत्यस्य अपवादसूत्रमिदम्।

**रूपलेखनप्रकारः – शतस्य शतं वा प्रतिदीव्यति –** क्रयविक्रयव्यवहारे द्यूतक्रीडार्थे वा शतं गृह्णाति इत्यर्थः। अत्र 'प्रति' इति उपसर्गपूर्वस्य दिव् धातोः कर्मत्वेन पदमस्ति 'शत' इति। अत्र 'विभाषोपसर्गे इति सूत्रेण शतशब्दात् विकल्पेन षष्ठी भवति शतस्य इति जायते। पक्षे षष्ठ्याभावे 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया भवति शतम् इति जायते। शतस्य शतं वा प्रतिदीव्यति इति सिद्धम्।

**प्रेष्यब्रुवोर्हविषो देवता सम्प्रदाने २/३/६१।। देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणोर्हविषो वाचकाच्छब्दात् षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा।**

**पदविभागः –** प्रेष्यब्रुवोः, हविषः, देवतासम्प्रदाने।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः–** देवतासम्प्रदानेऽर्थे विद्यमानयोः प्रेष्यब्रुवोः धात्वोः कर्मीभूतात् हविष्यवाचकात् षष्ठी भवति।

**व्याख्या –** प्रेष्यश्च ब्रूश्च इति प्रेष्यब्रुवौ (इतरेतरद्वन्द्वः) तयोः प्रेष्यब्रुवोः। देवता सम्प्रदानं यस्य सः देवतासम्प्रदानम्, तस्मिन् देवतासम्प्रदाने (ब्रहुव्रीहिः)। प्रेष्यब्रुवोः – इति षष्ठीद्विवचनान्तं पदम्। हविषः –इति षष्ठ्येकवचनान्तं, देवतासम्प्रदाने – इति सप्तम्यन्तम्। 'षष्ठी शेषे' इति सूत्रात् 'षष्ठी' इत्यस्यानुवृत्तिरायाति परं व्याख्यानात् 'शेषे' इत्यस्यानुवृत्तिः न मन्यते। 'अधीगर्थदयेशां कर्मणि' इत्यतः 'कर्मणि' इत्यस्यानुवृत्तिः आयाति।

**रूपलेखनप्रकारः – अग्नये छागस्य हविषो वपायाः मेदसः प्रेष्य –** हे मैत्रावरुण! अग्निदेवमुद्दिश्य प्रदास्यमानं छागसम्बन्धि यद्धविः वपाख्यं मेदोरूपं तत् प्रेष्य इत्यर्थः। अत्र हविर्वाचकं वपानामकं मेदः, तदेव कर्म अस्ति। अतः तत्र ''प्रेष्यब्रवोर्हविषो देवता सम्प्रदाने'' इति सूत्रेण षष्ठी भवति 'वपायाः मेदसः' इति सिद्धम्। छागस्य इत्यत्र तु 'षष्ठी शेषे' इति सूत्रेण सम्बन्धसामान्ये षष्ठी भवति।

**अग्नये छागस्य हविषो वयायाः मेदसः अनुब्रूहि** – अत्र अनुब्रूहि इत्यस्य कर्म वपानामकं मेदः विद्यते। अतः हविर्विशेषवाचकत्वात् देवतासम्प्रदाने अर्थे सति कर्मीभूतात् वपानामकमेदस् शब्दात् 'प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने' इति सूत्रेण षष्ठी भवति। छागस्य इत्यत्र सम्बन्धसामान्ये अग्नये छागस्य हविषो वपायाः मेदसः अनुब्रूहि इति सिद्धम्।

**कृत्वोऽर्थप्रयोगे कालेऽधिकरणे २/३/६४।। कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्। शेषे किम्? द्विरहन्यध्ययनम्।**

**पदविभागः –** कृत्वोऽर्थप्रयोगे, काले, अधिकरणे।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** कृत्वसुच् प्रत्ययान्तस्य तदर्थप्रत्ययान्तस्य च योगे कालवाचिन्यधिकरणे शेषत्वविवक्षायां षष्ठी भवति।

**व्याख्या –** कृत्वसुच् – प्रत्ययस्य अर्थ इव अर्थो येषां ते कृत्वोऽर्थास्तेषां प्रयोगः कृत्वोऽर्थप्रयोगः तस्मिन् कृत्वोऽर्थप्रयोगे (बहुव्रीहिगर्भतत्पुरुषः)। कृत्वोर्थप्रयोगे – इति सप्तम्यन्तं, काले – इति सप्तम्यन्तं, अधिकरणे – इति सप्तम्यन्तम्। 'षष्ठी शेषे' इति सूत्रस्य अनुवृत्तिर्भवति मण्डकप्लुति न्यायेन।

'सङ्ख्यायाः क्रियाभ्यावृत्तिगणेन कृत्वसुच्' इत्यनेन कृत्वसुच् 'द्वित्रिचतुर्भ्यः सुच्' इत्यनेन सुच् च भवतः। 'प्रत्ययग्रहणे तदन्तग्रहणम्' अनया परिभाषया प्रत्ययान्तानां कृत्वसुजन्तसुजन्तशब्दानामेव ग्रहणं भवति। 'सप्तम्यधिकरणे च' इति सूत्रस्यापवादसूत्रमिदम्। अत्र सम्बन्धमात्रविवक्षायामेव षष्ठी भवति।

**रूपलेखनप्रकारः – पञ्चकृत्वोऽह्नो भोजनम् –** दिने पञ्चवारं भोजनमित्यर्थः। अत्र संख्यावाचकत्वात् पञ्चन् शब्दात् कृत्वसुच् – प्रत्यये कृते पञ्चकृत्वः इति भवति। अतः तस्मिन् योगे कालवाचकात् अहन् शब्दात् अधिकरणे प्राप्तां सप्तमीं प्रबाध्य 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति सूत्रेण षष्ठी भवति पञ्चकृत्वोऽह्नो भोजनम् इति सिद्धम्।

**द्विरह्नो भोजनम् – दिने द्विवारं भोजनम् –** अत्र संख्यावाचकात् द्विशब्दात् सुच् प्रत्ययो भवति तस्मात् पूर्वानुसारेणैव षष्ठी भवति द्विरह्नो भोजनम् इति सिद्धम्।

**प्रत्युदाहरणम् – शेषे किम्? द्विरहन्यध्ययनम् –** यत्र शेषत्वेन विवक्षा न भवति तत्र षष्ठी न भवति अत्र अधिकरणस्य विवक्षा कृता, तस्मात् अहन् शब्दात् सप्तमी भवति द्विरहनि इति जायते। अतः सूत्रे 'शेषे' इति पदस्य प्रयोगः स्यादेव।

**कर्तृकर्मणोः कृति २/३/६५।। कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। वा. 'गुणकर्मणि वेष्यते'। नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा। कृति किम्? तद्धिते मा भूत्, कृतपूर्वी कटम्।**

**पदविभागः –** कर्तृकर्मणोः कृतिः।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** कृद्योगे अनभिहिते कर्तरि करणे च षष्ठी भवति।

**व्याख्या –** कर्ता च कर्म च कर्तृकर्मणी, तयोः कर्तृकर्मणोः (इतरेतरद्वन्द्वः) षष्ठ्यन्तं पदम्।

**कृति –** इति सप्तम्यन्तं पदम्। 'षष्ठी शेषे' इत्यतः 'षष्ठी' इत्यस्यानुवृत्तिरायाति। 'अनभिहिते' इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः – कृष्णस्य कृतिः –** अत्र कृ-धातोः भावे 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन् प्रत्यये कृतिः इति भवति। कृदन्तत्वात् कृतिः इति शब्दस्य योगे अनभिहिते कर्तरि कृष्णशब्दात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण षष्ठी भवति कृष्णस्य कृतिः इति सिद्धम्।

**जगतः कर्ता कृष्णः –** अत्र कृ-धातोः तृच् प्रत्यये कृदन्ते कर्ता इति पदं भवति। इत्यस्य योगे 'जगत्' इति कर्मणि 'कर्तृकर्मणोः कृतिः' इति सूत्रेण षष्ठी भवति जगतः इति जायते। जगतः कर्ता कृष्णः इति वाक्यं भवति।

**वा. गुणकर्मणि वेष्यते।**

**वार्तिकार्थः –** गौणे कर्मणि कृद्योगे षष्ठी विकल्पेन भवति।

**रूपलेखनप्रकारः –** नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा। अत्र णीञ् प्रापणे (नी) धातोः तृच्-प्रत्यये कृते कृदन्ते 'नेता' इति भवति। कर्तरि प्रत्यये सति कर्म अनुक्तमस्ति। अश्व इति प्रधानं कर्म 'स्रुघ्न' इति अप्रधानं कर्म चास्ति। 'अकथितं च' इति सूत्रेण अप्रधानस्य 'स्रुघ्न' इत्यस्य कर्मसंज्ञा भवति। अत्र 'कर्तृकर्मणोः कृतिः' इति सूत्रेण प्रधानकर्मणि 'षष्ठी भवति, अश्वशब्दात् अश्वस्य इति जायते। पुनः 'गुणकर्मणि वेष्यते' इति वार्तिकेन अप्रधानकर्मणि विकल्पेन षष्ठी भवति स्रुघ्नस्य इति जायते। यत्र षष्ठी न भवति तत्र पक्षे 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया भवति स्रुघ्नम् इति जायते। नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा इति वाक्यं सिद्धम्।

**कृति किम्? तद्धिते मा भूत्, कृतपूर्वी कटम् –** ननु 'कर्तकर्मणोः कृतिः' इति सूत्रे 'कृतिः' इति पदस्य ग्रहणं कथम् इति जिज्ञासायामत्र पूर्वप्रकरणस्य ज्ञानमावश्यकम्। तदनुसारेण धातुतः द्विविधं प्रत्ययं भवति –**तिङ् तथा च कृत्।** तिङ्न्तस्थलेषु 'कटं करोति' इत्यादिषु 'लादेशत्वात् न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति सूत्रनिषेधात् षष्ठी न भवति। अवशिष्यते कृत् इति। एतेषां योगे षष्ठी इष्टैव तदा तु 'कृति' इति पाठं विनाऽपि कार्यं भवति पुनः कृतिग्रहणस्य किं प्रयोजनम्?

अत्रोच्यते यत् 'तद्धिते मा भूत्' इति। तद्धितान्तयोगे षष्ठी न स्यात्, केवले कृदन्तयोगे एव षष्ठी स्यात्

एतस्मादेव 'कृति' इत्यस्य ग्रहणमस्ति। यथा – **कृत पूर्वीकटम्** – कृधातोः भावे क्त-प्रत्यये कृतमिति भवति। अत्र 'पूर्वम्' इति पदं एतस्य क्रियाविशेषणमस्ति। 'कृतं पूर्वम् अनेन' इति विग्रहे 'सह सुपा' इत्यनेन समासे कृते 'सपूर्वाच्च' इत्यनेन इनि-प्रत्यये कृते च 'कृतपूर्वी' इति शब्दस्य सिद्धिर्भवति। तस्यार्थः पूर्वं कृतवान् इति। किं कृतवान्? इति प्रश्नस्योत्तरे 'कटम्' इति प्राप्यते। अतः 'कटम्' इति कर्मत्वेन अस्ति।

गुणीभूतक्रियया सह अपि कारकसम्बन्धो भवति, एतस्मात् कटम् इत्यस्यान्वये न दोषः। अत्र 'कटम्' इत्यस्य कर्मत्वं क्तप्रत्ययेन नोच्यते। यतो हि 'नपुंसके भावे क्तः' इति सूत्रेण भावे क्तप्रत्ययः विहितः। इनि-प्रत्ययार्थः कर्ता एव। अत्र 'कर्तृकर्मणोः कृतिः' इति सूत्रेण कटशब्दात् कर्मणि षष्ठी प्राप्ता भवति। किन्तु सूत्रे 'कृति' इति पदस्य ग्रहणात् अस्य सूत्रस्य प्रवृत्तिः न भवति। यतोहि 'कृतपूर्वी' इत्यत्र कृतशब्दः यद्यपि कृदन्तः तथापि इनि प्रत्ययान्तत्वात् 'कृतपूर्वी' तद्धितोन्तो एव भवति। अत एव द्वितीया एव भवति कृतपूर्वी कटम् इति दिक्।

**उभयप्राप्तौ कर्मणि २/३/६६।। उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। वा. 'स्त्रीप्रत्ययोरकाकारयोर्नायं नियमः'। भेदिका बिभित्सा वा रुद्रस्य जगतः। वा. 'शेषे विभाषा'। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येण आचार्यस्य वा।**

**पदविभागः** – उभयप्राप्तौ, कर्मणि।

**सूत्रप्रकारः** – नियमसूत्रम्।

**सूत्रार्थः** – यस्मिन् कृति कर्तरि कर्मणि च एक सह षष्ठी प्राप्ता भवति तत्र कर्मण्येव षष्ठीभवति, न तु कर्तरि।

**व्याख्या** – उभयोः प्राप्तिर्यस्मिन् सोऽयमुभयप्राप्तिः तस्मिन् उभयप्राप्तौ। उभयप्राप्तौ इति सप्तम्यन्तं पदम्। कर्मणि – इति सप्तम्यन्तम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते। 'षष्ठी शेषे' इत्यस्मात् षष्ठी तथा च 'कर्तृकर्मणोः कृति' इत्यस्मात् 'कृति' इत्यस्यानुवृत्तिरायाति।

**रूपलेखनप्रकारः** – **आश्चर्यो गवां दोहोऽगोपेन** – इत्यत्र दुह् प्रपूरणे धातोः भावे अर्थे घञ्प्रत्यये 'दोहः' इति शब्दस्य निष्पत्तिर्भवति। शब्दोऽयं भावे एव उक्तः, कर्तरि कर्मणि चानुक्तः। दोहनकार्यस्य कर्ता 'अगोप' इत्यस्ति कर्म च 'गो' इत्यस्ति च। अतएव 'कर्तृकर्मणोः कृतिः' इति सूत्रेण कर्तरि कर्मणि च युगपत् षष्ठी प्राप्ता भवति तां प्रबाध्य 'उभयप्राप्तौ कर्मणि' इति सूत्रेण कर्मण्येव षष्ठी विधीयते। तस्मात् गोशब्दात् षष्ठ्याः बहुवचने 'गवाम्' इति भवति। अनुक्ते कर्तरि 'अगोप' इति शब्दात् 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति 'अगोपेन' इति जायते। आश्चर्यो गवां दोहोऽगोपेन इति सिद्धम्।

**वा. स्त्रीप्रत्ययोरकाकारयोर्नायं नियमः।**

**वार्तिकार्थः** – अक-अकार इत्यनयोः कृत्प्रत्ययोः स्त्रीप्रत्ययाधिकारे प्रयुक्तयोः 'कर्मण्येव षष्ठी' इति नियमः न प्रयुक्तो भवति। अर्थात् कर्तरि अपि षष्ठी प्रयुक्ता स्यादिति।

**रूपलेखनप्रकारः** – **भेदिका विभित्सा वा रुद्रस्य जगतः** – प्रयोगेऽस्मिन् 'रुद्रः' कर्ता 'जगत्' कर्म अस्ति। भेदिका – भिद् धातोः ण्वुल् प्रत्यये स्त्रीत्वविवक्षायां भवति। विभित्सा –सन्नन्त-भिद्धातोः अप्रत्यये कृते स्त्रीत्वविवक्षायां भवति। अनयोः योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण षष्ठी प्राप्ता भवति तं सूत्रं प्रबाध्य 'उभयप्राप्तौ कर्मणि' इति सूत्रेण कर्मण्येव षष्ठी स्यात् इति नियम्यते, अत्रापि 'स्त्रीप्रत्ययोरकाकारयोनायं नियमः' इति वार्तिकेन 'उभयप्राप्तौ कर्मणि' इति सूत्रं प्रबाध्य पुनः उभयोर्योगे षष्ठी विधीयते रुद्रस्य जगतः इति भवति। भेदिका बिभित्सा वा रुद्रस्य जगतः इति वाक्यं सिद्धम्।

**वा. शेषे विभाषा।**

**वार्तिकार्थः** – अक-अकार इत्याभ्यां भिन्नः प्रत्ययः 'शेषे' इति पदेन गृह्यते। 'स्त्रीप्रत्ययोरकाकारयोर्नायं नियमः' इति

वार्तिकात् 'स्त्रीलिङ्गयोः' इति पदस्यानुवृत्तिरायाति। अतः 'अकाकारभिन्नकृत्प्रत्यययोगे' उभयप्राप्तौ कर्मणि इति नियमः विकल्पेन प्रवर्तते। अयं विकल्पः स्त्रीत्वविवक्षायामेव भवति इति केचित् वदन्ति।

**रूपलेखनप्रकारः – विचित्रा जगतः कृतिः हरेः हरिणा वा** – अत्र 'कृतिः' इत्यत्र कृधातोः 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन्-प्रत्ययो भवति कृतिः इति जायते। 'कृतिः' इति योगे कर्तुः हरिशब्दात् 'शेषे विभाषा' इति वार्तिकेन विकल्पेन षष्ठी भवति हरेः इति जायते। षष्ठ्याभावे अनुक्ते कर्तरि 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति हरिणा इति जायते। अत्रैव वाक्ये जगत् शब्दात् 'उभयप्राप्तौ कर्मणि' इति सूत्रेण षष्ठीभवति 'जगतः' इति जाते विचित्रा जगतः कृतिः हरेः हरिणा वा इति सिद्धम्।

**पङ्क्तिविवेचनम् – केचिदविशेषेण विभाषामिच्छन्ति। शब्दानाम् अनुशासनम् आचार्येण आचार्यस्य वा।**

केचित् आचार्यः 'शेषे विभाषा' इति वार्तिके 'स्त्रीप्रत्ययोरकाकारयोर्नायं नियमः' इति वार्तिकात् 'स्त्रीप्रत्ययोः' इत्यस्यानुवृत्तिः न गृह्यन्ते। अतः अकाकारभिन्नस्त्रीप्रत्यये अस्त्रीप्रत्यये च कृति प्रयोगे सति कर्तरि विकल्पेन षष्ठी भवति इत्यर्थो लभ्यते।

**रूपलेखनप्रकारः –शब्दानाम् अनुशासनम् आचार्येण आचार्यस्य वा** – अत्र अनुपूर्वकात् शास् धातोः ल्युट् प्रत्यये अनुशासनम् इति भवति। 'अनुशासनम्' इति पदं अस्त्रीप्रत्ययान्तः कृदन्तश्चास्ति। तद्योगे कर्तुः आचार्यशब्दात् 'शेषे विभाषा' इति वार्तिकेन' विकल्पेन षष्ठी भवति आचार्याणामिति जायते। पक्षे अनुक्ते कर्तरि 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति आचार्येण इति जायते। शब्दानाम् – इत्यत्र 'उभयप्राप्तौ कर्मणि' इति सूत्रेण शब्दशब्दात् षष्ठी भवति। शब्दानाम् अनुशासनम् आचार्येण आचार्येण वा इति सिद्धम्।

**विशेषः** – अयम् आशयः यत् सर्वत्र कृत्योगे अनुक्ते कर्मणि षष्ठी भवति परं कर्तरि तु विकल्पेन एव भवति।

**क्तस्य च वर्तमाने २/३/६७।। वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। 'न लोक.-' इति निषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा।**

**पदविभागः** – क्तस्य, च वर्तमाने

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – वर्तमानार्थे प्रयुक्तस्य क्तप्रत्ययस्य योगे अनुक्ते कर्मणि कर्तरि च षष्ठी भवति।

**व्याख्या** – क्तस्य – इति षष्ठ्यन्तम्। च –इति अव्ययपदम्। वर्तमाने – इति सप्तम्यन्तं पदम्। 'षष्ठी शेषे' इत्यतः 'षष्ठी' इत्यस्यानुवृत्तिरायाति। 'अनभिहिते' इत्यस्याधिकारो वर्तते। 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति निषेधस्यापवादसूत्रमिदम्।

**रूपलेखनप्रकारः – राज्ञां मतोबुद्धः पूजितो वा** –

**राज्ञां मतः** – इत्यत्र मन्-धातोः 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण क्तप्रत्यये मतः इति भवति। वर्तमानकालार्थे प्रयोगः। एतस्मात् क्तप्रत्ययान्तस्य अस्य योगे 'क्तस्य च वर्तमाने' इति सूत्रेण कर्तुः राजन् शब्दात् षष्ठी कृता। तदनुसारेण 'राज्ञां मतः' इति सिद्धं भवति। एवमेव बुध्धातोः क्तप्रत्यये बुद्धः, पूज्-धातोः क्तप्रत्यये पूजितः इति भवति।

**विशेषः** – सूत्रे 'क्तस्य' इति प्रयोगेण नियम्यते यत् वर्तमानार्थे अन्येषु प्रत्ययेषु षष्ठी न भवति, यथा – **ओदनं पचमानः**। एवमेव वर्तमानार्थे विहिते क्तप्रत्यये एव षष्ठी भवति न तु भूतकालिके – यथा '**पुस्तकालयं गतः**'।

**अधिकरणवाचिनश्च २/३/६८।। क्तस्य योगे षष्ठी स्यात्। इदमेषाम् आसितं शयितं गतं भुक्तं वा।**

**पदविभागः** – अधिकरणवाचिनः, च।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – अधिकरणवाचिनः क्तप्रत्ययान्तशब्दस्य योगे षष्ठी भवति।

**व्याख्या** – अधिकरणं वक्तीति अधिकरणवाची, तस्य अधिकरणवाचिनः। अधिकरणवाचिनः – इति षष्ठ्यन्तं पदम्। च –इति अव्ययम्। 'क्तस्य च वर्तमाने' इत्यतः 'क्तस्य' इत्यस्य 'षष्ठी शेषे' इत्यतः 'षष्ठी' इत्यस्य चानुवृत्तिः आयाति। 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इत्यनेन विहितस्य क्तस्यात्र ग्रहणमस्ति। 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति नेषधस्यापवादसूत्रमिदम्।

**रूपलेखनप्रकारः** – इदम् एषाम् आसितम्, शयितम्, गतम्, भुक्तम् वा।

**इदम्, एषाम् आसितम्** = आस्यते अस्मिन् इति आसितम् इत्यर्थे आस् धातोः 'क्तोऽधिकरणे च' इत्यनेन क्तप्रत्यये आसितम् इति भवति। अत्र वाक्ये कर्ता 'इदम्' अस्ति। अनुक्त कर्तुः इदम् शब्दात् 'अधिकरणवाचिनश्च' इति सूत्रेण षष्ठी भवति एषाम् इति जायते। इदम् एषाम् आसितम् इति सिद्धम्।

एवमेव अन्येषु प्रयोगेष्वपि बोध्यम् –

**इदम् एषां शयितम्** – शीङ् स्वप्ने क्तप्रत्यये शयितम्। (शेतेऽस्मिन् इति शयितम्)

**इदम् एषां गतम्** – गम्लृ गतौ, क्तप्रत्यये गतम्। (गच्छति अस्मिन् इति गतम्)

**इदम् एषां भुङ्क्तम्** – भुजपालनाभ्यवहारयोः क्तप्रत्यये भुक्तम्। (भुङ्क्ते अस्मिन् इति भुक्तम्)

उपर्युक्तेषु त्रिषु स्थलेष्वपि शयितं गतं भुक्तम् इत्यादीनां योगे 'इदम्' शब्दात् षष्ठी भवति।

**न लोकाव्ययनिष्ठाखलर्थतृणाम् २/३/६९।। एषां प्रयोगे षष्ठी न स्यात्। लादेश-कुर्वन् कुर्वाणो वा सृष्टिं हरिः। उ-हरिं दिदृक्षुः, अलङ्करिष्णुर्वा। उक्-दैत्यान् घातुको हरिः। वा. 'कमेरनिषेधः'। लक्ष्म्याः कामुको हरिः। अव्ययम् – जगत्सृष्ट्वा, सुखं कर्तुम्। निष्ठा – विष्णुना हता दैत्याः, दैत्यान् हतवान् विष्णुः। खलर्थाः – ईषत्करः प्रपञ्चो हरिणा। तृन् इति प्रत्याहारः 'शतृशानचौ' इति तृशब्दादारभ्य आ तृनो नकारात्। शानन् – सोमं पवमानः। चानश् – आत्मानं मण्डयमानः। शतृ – वेदमधीयन्। तृन् – कर्ता लोकान्। वा. 'द्विषः शतुर्वा' मुरस्य मुरं वा द्विषन्। सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य विष्णुः।**

**पदविभागः** – न, लोकाव्ययनिष्ठाखलर्थतृनाम्

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – लादेशप्रयोगे, उ–उक इत्यनयोः प्रत्ययान्तयोः प्रयोगे, अव्ययप्रयोगे, क्तक्तवतू प्रयोगे, खलर्थ–तृन्–प्रत्ययानां च प्रयोगे अनुक्ते कर्तरि कर्मणि च षष्ठी न भवति।

**व्याख्या** – खलोऽर्थः खलर्थः, खलर्थ इव अर्थो येषां ते खलर्थाः (तत्पुरुषगर्भ बहुव्रीहिः)। लश्च उश्च उकश्च अव्ययं च निष्ठां च खलर्थाश्च तृन् च इति लोकाव्ययनिष्ठाखलर्थतृनः तेषां लोकाव्ययनिष्ठाखलर्थतृनाम्। षष्ठ्यन्तं पदम्। न – इति अव्ययम्। 'षष्ठी शेषे' इत्यतः 'षष्ठी' इति अनुवर्तते। अनभिहिते इत्यपि। 'कर्तृकर्मणोः कृतिः' इति सूत्रेण प्राप्तां षष्ठीमनेन प्रबाध्यते। 'ल' इत्यनेन लादेशाः शतृशानजादयो गृह्यन्ते। उ–इत्यनेन उ–प्रत्ययान्तः, उक्–इत्यनेन उकञ्प्रत्ययान्तश्च गृह्यते। अव्यय इत्यनेन क्त्वा, तुमुन् इत्यादयः, निष्ठा इत्यनेन क्तक्तवतू, खलर्थः इत्यनेन खल् युच् इत्यादयः, तृन् इत्यनेन तृन्, शानन्, चानश् इत्यादयो गृह्यन्ते। 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषाबलात् तत्तत्प्रत्ययैः तत्तत्प्रत्ययान्तानां शब्दानामेव ग्रहणं भवति।

**रूपलेखनप्रकारः** – **(1) लादेशे – कुर्वन् कुर्वाणो वा सृष्टिं हरिः** – इत्यत्र कृधातोः लट् लकारे, 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रेण शत्रादेशे कुर्वन् इति शानच् आदेशे कुर्वाणः इति च भवति। अत्र कर्म पदं 'सृष्टि' इत्यस्ति। 'कर्तृकर्मणोः कृतिः' इति सूत्रेण अनुक्ते कर्मणि षष्ठी प्राप्ता भवति तां 'न लोकाव्ययनिष्ठा.' इति निषेधति – 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायां कुर्वन् कुर्वाणो वा सृष्टिं हरिः इति सिद्धम्।

**उ-प्रत्यये – हरिं दिदृक्षुः अलंकरिष्णुर्वा** – अत्र सन्नन्तात् दिदृक्ष–धातोः 'सनाशंसभिक्ष उः' इत्यनेन उ–प्रत्यये

दिदृक्षुः इति भवति। अलंपूर्वात् कृधातोः 'अलंकृञ्निराकृञ्प्रजनोत्पचोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्' इत्यनेन इष्णुच् – प्रत्यये अलंकरिष्णुः इति भवति। अत्र कर्मणि हरिशब्दात् 'कर्तृकर्मणोः कृतिः' इत्यनेन प्राप्तां षष्ठीं 'न लोकाव्ययनिष्ठाः' इति निषेधति। तस्मात् 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायां हरिं दिदृक्षुः अलंकरिष्णुर्वा इति सिद्धम्।

**उक-प्रत्यये – दैत्यान् घातुको हरिः** – अत्र हन्-धातोः 'लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्' इत्यनेन उकञ्प्रत्यये घातुकः इति भवति। 'घातुकः' इति योगे दैत्यशब्दात् 'कर्तृकर्मणोः कृतिः' इत्यनेन प्राप्तां षष्ठीं 'न लोकाव्ययनिष्ठा.' इति निषेधति। तस्मात् कर्मणि द्वितीया भवति दैत्यान् घातुको हरिः इति सिद्धम्।

**वा. कमेरनिषेधः।**

**वार्तिकार्थः** – कम् धातोः उक्-प्रत्ययान्ते प्रयोगे सति 'न लोकाव्ययनिष्ठा' इत्यनेन षष्ठ्याः निषेधो न स्यात्।

**रूपलेखनप्रकारः – लक्ष्म्या कामुको हरिः** – अत्र उकञ्-प्रत्ययान्तस्य कामुकशब्दस्य योगे 'कमेरनिषेध' इति वार्तिकेन 'न लोकाव्यय...' इत्यस्य निषेधात् 'कर्तृकर्मणोः कृतिः' इत्यनेन लक्ष्मीशब्दात् षष्ठी भवति लक्ष्म्या कामुको हरिः इति सिद्धम्।

**अव्यये – जगत् सृष्ट्वा** – अत्र सृज्धातोः क्त्वा प्रत्यये सृष्ट्वा इति पदस्य 'क्त्वातोसुन् कसुनः' इति सूत्रेण अव्ययत्वं भवति। तस्मात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण जगत् शब्दात् प्राप्तां षष्ठीं 'न लोकाव्ययनिष्ठा.......' इति निषेधति। अत एव 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां जगत् सृष्ट्वा इति सिद्धम् भवति।

एवमेव '**सुखं कर्तुम्**' इत्यत्रापि 'कर्तुम्' इति अव्ययपदमस्ति। 'कृन्मेजन्तः' इत्यनेन अव्ययसंज्ञा भवति। तस्मात् 'कर्तुम्' इति योगे सुखशब्दात् पूर्वानुसारेण प्राप्तायाः षष्ठ्याः निषेधो भवति, द्वितीयायां 'सुखं कर्तुम्' इति सिद्धम्।

**निष्ठायाम् – विष्णुना हताः दैत्याः** – हन् धातोः कर्मणि क्तप्रत्यये प्रथमायाः बहुवचने हताः इति भवति। अत्र 'हताः' इति योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण अनुक्ते कर्तरि विष्णुशब्दात् प्राप्तां षष्ठीं 'न लोकाव्यय......' इति निषेधति। अत एव 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीया भवति विष्णुना इति जायते। कर्मणि उक्ते सति दैत्याः इत्यत्र तु 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यनेन प्रथमा एव अतः विष्णुना हताः दैत्याः इति सिद्धम्।

**दैत्यान् हतवान् विष्णुः** – अत्र हन् धातोः कर्तरि क्तवतु प्रत्यये हतवान् इति भवति। तद्योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण अनुक्ते कर्मणि दैत्यशब्दात् षष्ठी प्राप्ता भवति तस्याः 'न लोकाव्यय....' इति सूत्रेण निषेधे कृते कर्मणि द्वितीया इति सूत्रेण द्वितीयायां बहुवचने दैत्यान् हतवान् विष्णुः इति सिद्धम्।

**खलर्थे – ईषत्करः प्रपञ्चो हरिणा** – ईषत् पूर्वस्य कृधातोः 'ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति सूत्रेण खल् प्रत्यये कृते ईषत्करः इति भवति। अत्र 'ईषत्करः' इति योगे हरिशब्दात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण षष्ठीप्राप्तायां 'न लोकाव्ययनिष्ठाखलर्थ...' इति सूत्रेण निषेधो भवति। अतः अनुक्ते कर्तरि 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति ईषत्करः प्रपञ्चो हरिणा इति सिद्धम्।

**तृन्-प्रत्यये** = तृन् इति प्रत्याहारः 'शतृशानचौ' इति तृशब्दादारभ्य आतृनो नकारात्।

**शानन्-प्रत्यये सोमं पवमानः** – अत्र पूङ्धातोः 'पूङ्यजोः शानन्' इत्यनेन शानन् प्रत्यये कृते पवमानः इति भवति। तद्योगे कर्मणि सोमशब्दात् 'कर्तृकर्मणोः कृतिः' इत्यनेन प्राप्तां षष्ठी 'न लोकाव्ययनिष्ठाखलर्थः' इति निषेधति। तस्मात् 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां 'सोमं पवमानः' इति सिद्धं भवति।

**चानश्-प्रत्यये = आत्मानं मण्ड्यमानः** – अत्र मडिभूषायां धातोः 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति सूत्रेण चानश् प्रत्यये मण्ड्यमानः इति भवति। तद्योगे आत्मन् शब्दात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण प्राप्तां षष्ठीं 'न लोकाव्ययनिष्ठाः' इति निषेधति। तस्मात् 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां आत्मानं मण्ड्यमानः इति सिद्धं भवति।

**शतृ-प्रत्यये = वेदम् अधीयन्** – अधिपूर्वकात् इङ्धातोः 'इङ्धार्योः शत्रकृच्छ्रिणि' इत्यनेन शतृप्रत्यये अधीयन् इति भवति। तद्योगे वेदशब्दात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण प्राप्तां षष्ठीं 'न लोकाव्यय...'इति निषेधति। द्वितीयायां वेदम् अधीयन् इति जायते।

**तृन्-प्रत्यये = कर्ता लोकान्** – कृधातोः तच्छीलादौ अर्थे 'तृन्' इति सूत्रेण तृन्प्रत्यये कृते कर्ता इति भवति। तद्योगे लोकशब्दात् प्राप्तां षष्ठीं प्रबाध्य द्वितीया भवति कर्ता लोकान् इति जायते।

**वा. द्विषः शतुर्वा।**

**वार्तिकार्थः** – द्विष् धातोः शतृप्रत्ययान्ते सति तद्योगे षष्ठ्याः निषेधो विकल्पेन भवति।

**रूपलेखनप्रकारः – मुरस्य मुरं वा द्विषन्** – अत्र द्विष् धातोः 'द्विषोऽमित्रे' इत्यनेन शतृ-प्रत्यये कृते द्विषन् इति भवति। तद्योगे मुरशब्दात् प्राप्तायाः षष्ठ्याः ''द्विषः शतुर्वा'' इति विकल्पेन निषेधे कृते 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां मुरम् इति भवति। पक्षे निषेधाभावे षष्ठ्यां मुरस्य इति भवति। मुरस्य मुरं वा द्विषन् इति सिद्धम्।

**पङ्क्तिः – सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव।**

**रूपलेखनप्रकारः – ब्राह्मणस्य कुर्वन्** – अत्र कर्मणोऽविवक्षायां शेषत्वविवक्षायां 'षष्ठी शेषे' इति सूत्रेण ब्राह्मणशब्दात् षष्ठी भवति ब्राह्मणस्य कुर्वन् इति जायते। अत्र निषेधो न प्रयुज्यते कारकषष्ठ्यभावात्।

**नरकस्य जिष्णुः** – अत्रापि शेषत्वविवक्षायां षष्ठी कर्मत्वस्यविवक्षा स्यात्तदा तु 'कर्मणि द्वितीया' इत्यनेन द्वितीया एव करणीया भवति।

**अकेनोर्भविष्यदाधमर्ण्ययोः २/३/७०।। भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजं गामी। शतं दायी।**

**पदविभागः** – अकेनोः, भविष्यदाधमर्ण्ययोः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः**– भविष्यति अर्थे विहितस्य अक-प्रत्ययस्य भविष्यति अधमर्ण्ये च अर्थे विहितस्य 'इन्' – प्रत्ययस्यच योगे षष्ठी न स्यात्।

**व्याख्या** – अकश्च इन् चेति अकेनौ, तयोरकेनोः। भविष्यत् च आधमर्ण्यं चेति भविष्यदाधमर्ण्यौ (इतरेतरद्वन्द्वः)। तयोः भविष्यदाधमर्ण्ययोः। अकेनोः – इति षष्ठीद्विवचानन्तम्। भविष्यदाधर्मण्ययोः इति षष्ठ्यन्तम्। 'षष्ठी शेषे' इत्यतः 'षष्ठी' इत्यस्य तथा च 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इत्यतः 'न' इत्यस्यानुवृत्तिरायाति। 'अनभिहिते' इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः – सतः पालकोऽवतरति** –अत्र पाल्-धातोः णिच्-प्रत्यये पालि इति जाते भविष्यति ण्वुल्-प्रत्यये णिलोपे पालकः इति भवति। तद्योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण सत्शब्दात् प्राप्तां षष्ठीं ''अकेनोर्भविष्यदाधमर्ण्ययोः.'' इति निषेधति। तस्मात् 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां सतः पालकोऽवतरति इति सिद्धम्।

**व्रजं गामी** – अत्र गम् धातोः 'आवश्यकाधमर्ण्ययोर्णिनिः' इति सूत्रेण णिनि-प्रत्यये कृते गामिन् इति भवति, तस्यैव प्रथमायाः एकवचने गामी इति जायते। तद्योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण व्रजशब्दात् प्राप्तां षष्ठी ''अकेनोभविष्यदाधयर्थयोः'' इति निषेधति। 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायां व्रजं गामी इति भवति।

**शतं दायी** – दा धातोः णिनि प्रत्यये 'आतो युक्' इत्यनेन युकागमे कृते दायिन् इति शब्दस्य प्रथमायाः एकवचने दायी इति भवति। तद्योगे 'कर्तृकर्मणोः कृतिः' इति सूत्रेण शतशब्दात् प्राप्तां षष्ठीं 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति निषेधति। अतएव 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयायां शतं दायी इति भवति। 'ऋणरूपेण गृहीतं शतं प्रत्यर्पयति' इति वाक्यार्थः।

**कृत्यानां कर्तरि वा २/३/७१।। षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। कर्तरि इति किम्? गेयो माणवकः साम्नाम्। 'भव्यगेय' इति कर्तरि यद्विधानाद् अनभिहितं कर्म। अत्र योगो विभज्यते। कृत्यानाम्। 'उभयप्राप्तौ इति', 'न' इति चानुवर्तते। तेन – नेतव्या व्रजं गावः कृष्णेन। ततः 'कर्तरि वा' उक्तोऽर्थः।**

**पदविभागः –** कृत्यानां, कर्तरि, वा।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** कृत्यप्रत्ययानां योगे अनुक्ते कर्तरि विकल्पेन षष्ठी भवति।

**व्याख्या –** कृत्यानाम् इति षष्ठ्यन्तम्। कर्तरि – इति सप्तम्यन्तम्। वा – इति विकल्पार्थे प्रयुक्तं अव्ययपदम्। 'षष्ठी शेषे' इत्यस्मात् षष्ठी इत्यस्यानुवृत्तिरायाति। 'अनभिहिते' इत्यस्याधिकारो वर्तते। 'कृत्य' इत्यनेन कृत्यसंज्ञकाः तव्यत्तव्यानीयरः यत्, ण्यत्, क्यप्, केलिमर् च प्रत्ययाः परिगण्यन्ते।

**रूपलेखनप्रकारः – मया मम वा सेव्यो हरिः** – सेव् धातोः 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत् – प्रत्यये सेव्यः इति भवति। एतद्योगे अनुक्ते कर्तरि अस्मद् शब्दात् 'कर्तृकर्मणोः कृतिः' इति सूत्रेण प्राप्तां षष्ठीं प्रबाध्य 'कृत्यानां कर्तरि वा' इत्यनेन विकल्पेन षष्ठी विधीयते 'मम' इति भवति। पक्षे अनुक्ते कर्तरि 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीया भवति 'मया' इति जायते। 'मया मम वा सेव्यो हरिः' इति सिद्धम्।

**प्रत्युदाहरणम् – कर्तरि इति किम्? गेयो माणवकः साम्नाम्** – अत्र 'कृत्यानां कर्तरि वा' इति सूत्रे कर्तरि इति पदस्यौचित्यं प्रदर्शयति प्रत्युदाहरणेन। तत्र हि 'गेयो माणवकः,साम्नाम्' इत्यत्र 'गेयः' इति पदस्य निष्पत्तिः गै धातोः 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे कृते 'भव्यगेयप्रवचनीयोपस्थानीय' इति सूत्रेण कर्तरि यत्-प्रत्यये 'गेयः' इति भवति।

सूत्रे 'कर्तरि' इति पदस्य योगो न स्यात् तदा तु कर्मण्यपि षष्ठी स्यात्। तथा सति अनुक्ते कर्मणि सामन् शब्दात् अपि विकल्पेन षष्ठीविधानम् दोषपूर्णमेव। अतएव सूत्रे 'कर्तरि' इति पदस्य प्रयोगे सति कर्मणि विकल्पेन षष्ठी न भवति अपितु 'कर्तृकर्मणोः कृतिः' इत्यनेन नित्यमेव भवति इति दिक्।

**अत्र योगो विभज्यते इति –** ननु 'कृत्याननां कर्तरि वा' इति सूत्रस्य योगविभागः क्रियते तदनुसारेण प्रथमम् – **कृत्यानाम्,** द्वितीयम् –**कर्तरि वा** इति भवति। कृत्यानाम् – अत्र 'उभयप्राप्तौ कर्मणि' इत्यतः उभयप्राप्तौ इत्यस्य 'न लोकाव्ययनिष्ठाः' इत्यतः न इत्यस्य चानुवृत्तिरायाति। 'षष्ठी' इत्यस्यापि अनुवर्तनं भवत्येव।

अतएव अर्थोऽयं भवति यत् कृत्यानां योगे उभयप्राप्तौ (कर्तरि कर्मणि च प्राप्तौ) षष्ठी न भवति। तदनुसारेण 'नेतव्या गावः वज्रं कृष्णेन' अस्मिन् वाक्ये कृत्यप्रत्ययान्तस्य 'नेतव्या' इति पदस्य योगे कर्तरि कृष्णशब्दात् कर्मणि व्रजशब्दात् च षष्ठी प्राप्ता भवति परं योगविभागात् 'कृत्यानाम्' इत्यनेन उभयत्र प्राप्तायाः षष्ठ्याः निषेधो भवति। तथा सति कर्मणि द्वितीयायां कर्तरि तृतीयायां च प्रयोगोऽयं सिद्धो भवति नेतव्या गावः वज्रं कृष्णेन इति।

**(2) कर्तरि वा** – अत्र 'कृत्यानामित्यनुवर्तते। कृत्यप्रत्ययान्तानां योगे कर्तरि विकल्पेन षष्ठी भवति इत्यर्थो लभ्यते। एवं अनुक्ते कर्तरि नित्यप्राप्तां षष्ठीं प्रबाध्य विकल्पेन षष्ठी भवति। मया मम वा सेव्यो हरिः इति प्रयोगो भवति।

**तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् २/३/७२।। तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किम्? तुला उपमा वा कृष्णस्य नास्ति।**

**पदविभागः –** तुल्यार्थैः, अतुलोपमाभ्यां, तृतीया अन्यतरस्याम्।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** तुलोपमारहिताभ्यां तुल्यार्थकशब्दैः योगे तृतीया वा स्यात्पक्षे षष्ठी।

**व्याख्या –** तुल्य इति अर्थो येषां ते तुल्यार्थाः तैः तुल्यार्थैः। तुला च उपमा च तुलोपमे, न तुलोपमे इति अतुलोपमे, ताभ्याम् अतुलोपमाभ्याम्। तुल्यार्थैः इति तृतीयान्तं पदम्। अतुलोपमाभ्याम् – इति तृतीयाद्विवचनान्तम्। तृतीया – इति प्रथमान्तम्।

**रूपलेखनप्रकारः – (1) तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा** – इत्यत्र 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति सूत्रेण तुल्ययोगे कृष्णशब्दात् तृतीयायां कृष्णेन इति भवति। पक्षे षष्ठ्यां कृतायां कृष्णस्य इति भवति। एवमेव तुल्यशब्दस्य पर्यायाणां सदृश, सम, इत्यादीनां योगेऽपि बोध्यम्।

**प्रत्युदाहरणम्** – अतुलोपमाभ्यां किम्? तुला उपमा वा कृष्णस्य नास्ति।

ननु 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' सूत्रे अतुलोपमाभ्याम् इति पदं नोच्यते तदा अत्र वाक्ये तुला, उपमा इत्यनयोः योगेऽपि कृष्णशब्दात् तृतीया-षष्ठ्यौ स्याताम्। परं एतस्य पदस्य प्रयोगात् शेषत्वविवक्षायामेव 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति।

**चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २/६/६३।। एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी। आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात्। आशिषि किम्? देवदत्तस्यायुष्यमस्ति। व्याख्यानात् सर्वत्रार्थग्रहणम्। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः।**

**पदविभागः** – चतुर्थी, च, आशिषि, आयुष्यमद्रभद्रकुशलसुखार्थहितैः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – आशीर्वादे अर्थे आयुष्य-मद्र-भद्र-कुशल-सुख-अर्थ-हित-इत्येतैः योगे एतेषाम् अर्थकशब्दानां योगे च शेषत्वविवक्षायां विकल्पेन चतुर्थी भवति। पक्षे षष्ठी च।

**व्याख्या** – आयुष्यं मद्रं च भद्रं च कुशलं च सुखं च अर्थं च हितं चेति आयुष्यमद्रभद्रकुशलसुखार्थहितानि (इतरेतरद्वन्द्वः) तैः आयुष्यमद्रभद्रकुशलसुखार्थहितैः। चतुर्थी-प्रथमान्तं पदम्। च – इति अव्ययम्। आशिषि – इति सप्तम्यन्तम्। आयुष्यमद्रभद्रकुशलसुखार्थहितैः – इति तृतीयान्तम्। 'षष्ठी शेषे' इति सूत्रस्यानुवृत्तिरायाति। 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्तरस्याम्' इत्यस्मात् अन्यतरस्याम् – इति पदस्यानुवर्तनं भवति। इदम् उपपदषष्ठीविधायकं सूत्रम्।

**रूपलेखनप्रकारः – आयुष्यं चिरञ्जीवितं कृष्णस्य कृष्णाय वा भूयात्** – अत्र आयुष्यचिरञ्जीवितशब्दयोर्योगे कृष्णशब्दात् "चतुर्थी चाशिष्यायुष्यमद्र." इति सूत्रेण विकल्पेन चतुर्थी भवति कृष्णाय इति जायते। पक्षे षष्ठ्यां कृतायां कृष्णस्य इति भवति। आयुष्यं चिरञ्जीवितं कृष्णस्य कृष्णाय वा भूयात् इति सिद्धम्। एवमेव अन्येषां आशीर्वादार्थकशब्दानां योगेऽपि बोध्यम्।

**आशिषि किमिति** – अत्र सूत्रे यदि 'आशिषि' इति पदं नोच्यते तदा 'देवदत्तस्य आयुष्यमस्ति' इत्यत्र 'आयुष्यम्' इति पदम् आशिषार्थे न प्रयुक्तम् अपितु तथ्यकथनार्थेऽस्ति। अतः अत्र चतुर्थीषष्ठ्यौ न स्यातामित्यस्मादेव 'आशिषि' पदस्य सूत्रे ग्रहणं वर्तते। अत्र तु शेषत्वविवक्षायामेव 'षष्ठी शेषे' इति सूत्रेण षष्ठी भवति।

**इति षष्ठीविभक्तिः**

## अथ सप्तमीविभक्तिः

**आधारोऽधिकरणम् १/४/४५।। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकम् अधिकरणसंज्ञः स्यात्।**

**पदविभागः** –आधारः, अधिकरणम्।

**सूत्रप्रकारः** –संज्ञासूत्रम्।

**सूत्रार्थः** – कर्तृद्वारा कर्मद्वारा च कर्तृनिष्ठकर्मनिष्ठक्रिययोः अधमः कारकम् अधिकार स्यात्।

**व्याख्या** – आधारः इति प्रथमान्तम्। अधिकरणम् – इत्यपि प्रथमान्तपदम्। द्विपदं सूत्रमिदम्। 'कारके' इत्यस्याधिकारो वर्तते। एतस्य प्रथमायां विभक्तिविपरिणामो भवति 'कारकम्' इति पठ्यते। अत्र 'कारकम्' 'आधारः' इत्यस्य

विशेषणं भूत्वा 'आधारः कारकम् अधिकरणं स्यादिति भवति।

आध्रियन्तेऽस्मिन्निति आधारः। अत्र प्रश्नोद्भवति कस्य आधारः अधिकरणं स्यात् तर्हि उत्तरे 'क्रियायाः' आधारः इति प्राप्यते। क्रियाया आधारः कर्ता कर्म वा भवति कारणं हि क्रिया कर्तृगता कर्मगता वा भवति। यथा - देवदत्तः कटे आस्ते इत्यत्र आसनक्रिया 'देवदत्त' इति कर्तृद्वारा कटे अस्ति। एवं परम्परया आसनक्रियाया आधारः कटोऽस्ति।

**पुनश्च स्थाल्यां पचति** -अत्र पचनक्रिया 'तण्डुल' इति कर्मद्वारा स्थाल्यामस्ति। एवं परम्परया पचनक्रियाया आधारः स्थाली अस्ति। तात्पर्योऽयं विद्यते यत् आधारः साक्षात् क्रियायाः न गृह्यते अपितु परम्परया गृह्यते। एवं कटस्थाल्योः आधारत्वेन अधिकरणसंज्ञा भवति। अतएव मूले उक्तम् - **कर्तृकर्मद्वारातन्निष्ठक्रियाया आधारः कारकम् अधिकरणसंज्ञः स्यात्।** अस्मिन् विषये भर्तृहरिमहोदयस्य कारिकेयं पठ्यते -

**कर्तृकर्मव्यवहिताम् असाक्षाद्-धारयत् क्रियाम्।**
**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।**

**विशेषः** - 'भूतले घटः' इत्यत्र क्रिया न पठिता तत्र क्रियाया अभावे आधारस्याधिकरणसंज्ञा कथं भविष्यति? तर्हि समाधीयते यत् तेषु स्थलेषु अस्ति, भवति इत्यादीनां अध्याहारेण कर्तृ-कर्मद्वारा तन्निष्ठक्रियायाः आधारत्वात् भूतलादीनां अधिकरणसंज्ञा सिद्धा एव।

**सप्तम्यधिकरणे च २/३/३६।। अधिकरणे सप्तमी स्यात्, चकारात् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्माऽस्ति। वनस्य दूरे अन्तिके वा। 'दूरान्तिकार्थेभ्यः' इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। वा. 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्'। अधीती व्याकरणे। अधीतमनेनेति विग्रहे 'इष्टादिभ्यश्च' इति कर्तरीनिः। वा. 'साध्वसाधुप्रयोगे च'। साधुः कृष्णो मातरि, असाधुर्मातुले। वा. 'निमित्तात् कर्मयोगे'। निमित्तमिह फलम्। योगः संयोगसमवायात्मकः।**

**'चर्मणि द्वीपिनं हन्ति दन्त्योर्हन्ति कुञ्जरम्।**
**केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।' (इति भाष्यम्)**

**हेतुतृतीयात्र प्राप्ता, तन्निवारणार्थमिदम्। सीमा अण्डकोशः। पुष्कलको गन्धमृगः। योगविशेषे किम्? वेतनेन धान्यं लुनाति।**

**पदविभागः -** सप्तमी, अधिकरणे च।

**सूत्रप्रकारः -** विधिसूत्रम्।

**सूत्रार्थः -** अनभिहिते अधिकरणे सप्तमी भवति, चकारात् दूरार्थकेभ्यः समीपार्थकेभ्यश्च सप्तमी भवति।

**व्याख्या** - सप्तमी - इति प्रथमान्तम्, अधिकरणे -इति सप्तम्यन्तं, द्विपदं सूत्रमिदम्। 'अनभिहिते' इत्यस्याधिकारो वर्तते। सूत्रे चकारग्रहणात् 'दूरान्तिकार्थेभ्यः द्वितीया च' इति सूत्रात् 'दूरान्तिकार्थेभ्यः' इति पदस्यानुवृत्तिरायाति। आधारस्त्रिधा भवति। औपश्लेषिकः;वैषयिकः, अभिव्यापकश्च।

**(1) औपश्लेषिकः -** उपश्लेषः संयोगादिसम्बन्धः। कर्तृद्वारकः कर्मद्वारकः इति द्विधा भवति।

कर्तृद्वारकः - **कटे आस्ते** - अत्र देवदत्तः इति कर्तृपदस्य अध्याहरणं कृत्वा देवदत्तगतामासन क्रियां प्रति कटस्य संयोगः इत्यर्थो लभ्यते। अतः कटस्य आधारत्वात् 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणसंज्ञा भवति तस्मात् 'सप्तम्यधिकरणे च' इति सूत्रेण सप्तम्यां कटे आस्ते इति सिद्धं भवति।

**कर्मद्वारकः - स्थाल्यां पचति** - अत्र 'तण्डुलान्' इति शेषः। तण्डुलकर्मगता पाकक्रियां प्रति स्थाल्याः संयोगसम्बन्धः। अतः स्थाली आधारः। आधारत्वात् 'आधारोऽधिकरणम्' इति सूत्रेण 'स्थाली' इत्यस्याधिकरणसंज्ञा भवति 'सप्तम्यधिकरणे

च' इत्यनेन अधिकरणे सप्तम्यां स्थाल्यां पचति इति सिद्धम् भवति।

**( 2 ) वैषयिकः - विषयतासम्बन्धकृतः आधारः।**

**रूपलेखनप्रकारः** - मोक्षे इच्छा अस्ति - अत्र कर्तृभूता इच्छा। तद्गतां सत्तां क्रियां प्रति मोक्षस्य विषयतासम्बन्धेन आधारसंज्ञा भवति। आधारत्वात् 'आधारोऽधिकरणम्' इति सूत्रेण मोक्ष-शब्दस्य अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' इत्यनेन सप्तमी भवति मोक्षे इच्छा अस्ति इति सिद्धम्।

**( 3 ) अभिव्यापकः -** सकलावयवव्याप्तिकृतः। अभि=समन्ताद्, व्याप्नोति सर्वम् इति व्युत्पत्तिः।

**रूपलेखनप्रकारः - सर्वस्मिन् आत्मा अस्ति -** अत्र आत्मरूपकर्तृगतां सत्ताक्रियां प्रति समग्रव्याप्तिं पुरस्कृत्य आत्मद्वारा सत्ताधारत्वात् 'सर्व' इति शब्दस्य 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणसंज्ञा भवति। तदनुसारेण 'सप्तम्यधिकरणे च' इति सूत्रेण सप्तम्यां सर्वस्मिन् आत्मा अस्ति इति सिद्धं भवति।

**वनस्य दूरे अन्तिके वा** - अत्र 'सप्तम्यधिकरणे च' इति सूत्रे चकारग्रहणात् दूरशब्दात् अन्तिकशब्दाच्च सप्तमी भवति 'वनस्य दूरे अन्तिके वा' इति निष्पन्नम्।

**विशेषः** - 'दूरान्तिकार्थेभ्यो द्वितीया च' इति सूत्रेण दूरार्थकात् अन्तिकार्थकाच्च द्वितीया-तृतीया-पञ्चमीविभक्तयः उक्ताः। अनेन सूत्रेण सप्तमी विहिता। इत्थं चतस्रो विभक्तः दूरार्थकात् अन्तिकार्थकाच्च प्राप्ताः भवन्ति।

**वार्तिकम् - क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्।**

**वार्तिकार्थः** - क्तप्रत्ययान्तशब्दः इन् प्रत्ययान्तस्य विषयः स्यात् तदा तस्य कर्मणि सप्तमी भवति।

**रूपलेखनप्रकारः - अधीती व्याकरणे-** अधिपूर्वस्य इङ्धातोः क्तप्रत्यये 'अधीतः' इति भवति। अधीतमनेन इति विग्रहे 'इष्टादिभ्यश्च' इत्यनेन कर्तरि इन्-प्रत्ययो भवति, अधीती इति निष्पन्ने सति एतद्योगे 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति वार्तिकेन व्याकरणशब्दात् सप्तम्याम् 'अधीती व्याकरणे' इति सिद्धं भवति।

**अन्यानि उदाहरणानि -**

**( 1 ) पठीती शास्त्रे।**
**( 2 ) उपकृती मित्रेषु।**
**( 3 ) अर्चिती गोविन्दे।**

**वा. साध्वसाधुप्रयोगे च।**

वार्तिकार्थः:- साधु असाधु इत्यनयोः शब्दयोः योगे सप्तमी भवति।

**रूपलेखनप्रकारः - साधुः कृष्णो मातरि, असाधुर्मातुले -**

**( 1 ) साधुः कृष्णो मातरि** - अत्र 'साध्वसाधुप्रयोगेच' इति वार्तिकेन साधुशब्दस्य योगे मातृशब्दात् सप्तमी विधीयते साधुः कृष्णो मातरि इति सिद्धम्।

**( 2 ) असाधुर्मातुले** - एवमेव असाधुशब्दयोगेऽपि मातुलशब्दात् सप्तमी भवति असाधुर्मातुले इति सिद्धम्।

**अन्यानि उदाहरणानि -**

**( 1 ) साधुः सैनिकः अस्मत्सु असाधुरातंकवादिषु।**
**( 2 ) साधुः श्यामः सज्जनेषु असाधुदुर्जनेषु।**

**वा. निमित्तात् कर्मयोगे।**

**वार्तिकार्थः** - येन निमित्तेन क्रिया क्रियते, तेन निमित्तेन युक्तं यदि क्रियायाः कर्म स्यात् तदा निमित्तवाचकात् शब्दात् सप्तमी भवति। निमित्तमिह फलम्। हेतु - तृतीयायाः तादर्थ्यचतुर्थ्याश्च बाधकमिदं वार्तिकम्।

**रूपलेखनप्रकारः - ( 1 ) चर्मणि द्वीपिनं हन्ति** - चर्मार्थं व्याघ्रं हन्ति। अत्र 'चर्मन्' शब्दोऽयं हेतुः (फलम्) अस्ति। 'निमित्तात् कर्मयोगे' इति वार्तिकेन चर्मन् शब्दात् सप्तमी भवति चर्मणि द्वीपिनं हन्ति इति सिद्धम्। 'द्वीपी'

'चर्मन्' इत्यनयो: समवायसम्बन्ध:।

**( 2 ) दन्तयोर्हन्ति कुञ्जरम्** – दन्तार्थं गजं हन्ति। अत्र निमित्तवाचकात् दन्तशब्दात् 'निमित्तात् कर्मयोगे' इति वार्तिकेन सप्तमी विधीयते द्विवचने दन्तयोर्हन्ति कुञ्जरम् इति सिद्धम्।

**( 3 ) केशुषु चमरीं हन्ति** – केशार्थं चमरीनामकं मृगविशेषं हन्ति। अत्र निमित्तवाचकात् केशशब्दात् सप्तमी भवति, बहुवचने केशेषु चमरीं हन्ति इति सिद्धम्।

**( 4 ) सीम्नि पुष्कलको हत:** – अण्डकोशार्थं कस्तूरीमृग: हत:। अत्र निमित्तवाचकात् सीमन् शब्दात् सप्तमी भवति सीम्नि पुष्कलको हत: इति सिद्धम्। अत्र सर्वेषु उदाहरणेषु समवाय सम्बन्धो विद्यते।

**प्रत्युदाहरणम् – योगविशेषे किम् – वेतनेन धान्यं लुनाति** – 'निमित्तात् कर्मयोगे' इति वार्तिकेन कर्मयोगे इति नोच्यते तदा तु कुत्रापि योगे सति सप्तमी प्राप्ता भवति। तेन 'वेतनेन धान्यं लुनाति' अत्रापि वेतनशब्दात् सप्तमी स्यात्, परं न, यतो हि समवायसंयोगरूपे योगे एव सप्तमी भवति, अत्र न तथा योग: अत: न सप्तमी भवति अपितु 'हेतौ' इत्यनेन तृतीया एव इति दिक्।

**यस्य च भावेन भावलक्षणम् २/३/३७।। यस्य क्रियया क्रियान्तरं लक्ष्यते, तत: सप्तमी स्यात्। गोषु दुह्यमानासु गत:। वार्तिकम् – अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च।**

> **सत्सु तरत्सु असन्त आसते।**
> **असत्सु तिष्ठत्सु सन्त: तरन्ति।।**
> **सत्सु तिष्ठत्सु असन्तस्तरन्ति।**
> **असत्सु तरत्सु सन्तस्तिष्ठन्ति।।**

**पदविभाग:** – यस्य, च, भावेन, भावलक्षणम्।

**सूत्रप्रकार:** – विधिसूत्रम्।

**सूत्रार्थ:** – यस्य क्रियया अन्यस्या: क्रियाया: सूचनं भवति तत: सप्तमी स्यात्।

**व्याख्या** – भावस्य लक्षणं भावलक्षणम्। यस्य – इति षष्ठ्यन्तं, भावेन – इति तृतीयान्तं, भावलक्षणम् – इति प्रथमान्तम्। 'सप्तम्यधिकरणे च' इत्यत: 'सप्तमी' इत्यनुवर्तते। भावशब्द: क्रियावाचक:। क्रिया भवति कर्तृनिष्ठा कर्मनिष्ठा च। अत: 'यस्य' इति पदेन कर्तु: कर्मणो वा ग्रहणं भवति।

**रूपलेखनप्रकार:** – **गोषु दुह्यमानासु गत:** – अत्र 'गो' इति कर्मपदमस्ति। कर्मनिष्ठा क्रियास्ति दोहनम्। तेन गमनक्रियाया: सूचनं भवति। अत: गोशब्दात् दुह्यमाना इति क्रियापदाच्च सप्तमी भवति गोषु दुह्यमानासु गत: इति सिद्धम्।

**अन्यानि उदाहरणानि** –

> **( 1 ) गर्जति मेघे मयूरोऽनृत्यत्।**
> **( 2 ) उदिते सवितरि कमलं विकसति।**

**वार्तिकम् – अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च।**

**( 1 ) सत्सु तरत्सु असन्त आसते** – अत्र योग्यानां कर्तृत्वं ज्ञापितं भवति तस्मात्, तरणक्रियाया:, कर्तृत्वं सतामस्ति, तद्योग्यता चाप्यस्ति। अत: सत् शब्दात् 'तरत्' क्रियावाचकात् च 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' इति वार्तिकेन सप्तमी भवति सत्सु तरत्सु असन्त आसते इति सिद्धम्।

**( 2 ) असत्सु तिष्ठत्सु सन्त: तरन्ति** – अत्र अयोग्यानाम् अकर्तृत्वं ज्ञापितमस्ति। एतस्मात् – असत् शब्दात् तिष्ठत् क्रियावाचकाच्च 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' इति वार्तिकेन सप्तमी भवति असत्सु तिष्ठत्सु सन्त: तरन्ति इति सिद्धम्।

**( ३ ) सत्सु तिष्ठत्सु असन्तस्तरन्ति** – अत्र योग्यस्य अकर्तृत्वं ज्ञापितमस्ति। एतस्मात् सत् शब्दात् तिष्ठत् – क्रियावाचकाच्च सप्तमी भवति।

**( ४ ) असत्सु तरत्सु सन्तस्तिष्ठन्ति** – अत्र अयोग्यस्य कर्तृत्वं ज्ञापितमस्ति। एतस्मात् असत् शब्दात् तरत् क्रियावाचकाच्च सप्तमी भवति।

**षष्ठी चानादरे २/३/३८ ।। अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः। रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकम् अनादृत्य सन्न्यस्तवानित्यर्थः।**

**पदविभागः** – षष्ठी, च, अनादरे।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – अनादराधिक्ये गम्यमाने सति यस्य क्रियया क्रियान्तरं सूचितं भवति, तस्मात् षष्ठीसप्तम्यौ स्तः।

**व्याख्या** – न आदरोऽनादरः तस्मिन् अनादरे। षष्ठी– प्रथमान्तं पदम्। अनादरे – इति सप्तम्यन्तं पदम्। 'यस्य च भावेन भावलक्षणम्' इति सूत्रस्य 'सप्तम्यधिकरणे च' इत्यतः 'सप्तमी' इति पदस्य च अनुवृत्तिरायाति।

**रूपलेखनप्रकारः** – **रुदति रुदतो वा प्राव्राजीत्** – रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवान् इत्यर्थे रुदत् शब्दात् 'षष्ठी चानादरे' इति सूत्रेण षष्ठीसप्तम्यौ भवतः। सप्तम्यां रुदति, षष्ठ्यां – रुदतः इति भवति। रुदति रुदतो वा प्राव्राजीत् इति सिद्धम्।

**स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च २/३/३९ ।। एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः।**

**पदविभागः** – स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः, च।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – स्वामीश्वरादिभिः शब्दैः योगे षष्ठीसप्तम्यौ स्तः।

**व्याख्या** – स्वामी च ईश्वरस्य अधिपतिश्च दायादश्च साक्षी च प्रतिभूश्च प्रसूतश्चेति (इतरेतरद्वन्द्वः) 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इति तृतीयाबहुवचनान्तं पदम्। च – इति अव्ययम्। चकारात् 'षष्ठी चानादरे' इत्यस्मात् 'षष्ठी' इत्यस्य 'सप्तम्यधिकरणे च इत्यस्मात् 'सप्तमी' इत्यस्य चानुवृत्तिरायाति। स्वामी ईश्वरः अधिपतिश्च प्रायः समानार्थकाः।

**रूपलेखनप्रकारः** – **गवां गोषु वा स्वामी** – अत्र गोशब्दात् 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इति सूत्रेण षष्ठीसप्तम्यौ भवतः गवां गोषु वा स्वामी इति सिद्धम्।

**गवां गोषु वा प्रसूतः** – अत्र प्रसूतशब्दयोगे गोशब्दात् 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' इति सूत्रेण षष्ठीसप्तम्यौ भवतः गवां गोषु वा प्रसूतः इति सिद्धम्।

**आयुक्तकुशलाभ्यां चासेवायाम् २/३/४० ।। आभ्यां योगे षष्ठीसप्तम्यौस्तस्तात्पर्येऽर्थे। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किम्? आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः।**

**पदविभागः** – आयुक्तकुशलाभ्याम्, च, आसेवायाम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ भवतः तात्पर्ये अर्थे।

**व्याख्या** – आयुक्तश्च कुशलश्चेति आयुक्तकुशलौ, ताभ्याम् – आयुक्त-कुशलाभ्याम्। इति तृतीयान्तं पदम्। च – इति अव्ययम्। आसेवायाम् – इति सप्तम्यन्तपदम्। 'षष्ठी चानादरे' इत्यतः 'षष्ठी' इत्यस्य 'सप्तम्यधिकरणे च' इत्यतः 'सप्तमी' इत्यस्य चानुवृत्तिरायाति। आसेवायाम् इति पदस्यार्थो विद्यते औत्सुक्यम्, तत्परः, व्यापारितः प्रवर्तित इति।

**रूपलेखनप्रकारः – आयुक्तो हरिपूजने हरिपूजनस्य वा** – अत्र आयुक्तशब्दस्य योगे 'आयुक्तकुशलाभ्यां चासेवायाम्' इति सूत्रेण हरिपूजनशब्दात् षष्ठीसप्तम्यौ भवतः आयुक्तो हरिपूजने हरिपूजनस्य वा इति सिद्धम्। एवमेव कुशलशब्दस्य योगे 'कुशलो हरिपूजने हरिपूजनस्य वा' इति सिद्धम् भवति।

**प्रत्युदाहरणम् – आसेवायाम् किम्? आयुक्तो गौः शकटे** – ननु 'आयुक्तकुशलाभ्यां चासेवायाम्' सूत्रे आसेवायाम् किम्? इति प्रश्नोत्तरे समाधानं प्रस्तूयते यत् आसेवायाम् इत्यस्यार्थो भवति एकनिष्ठता। 'आयुक्तो गौः शकटे' इत्यत्र ईषद्युक्तः इत्यर्थे एकनिष्ठतायाः अभावे एतस्य सूत्रस्य प्रयोगो न भवति अतः सप्तमी एव भवति आयुक्तो गौः शकटे इति दिक्।

**यतश्च निर्धारणम् २/३/४१ ।। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा द्विजः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावञ्छीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।**

**पदविभागः –** यतः, च, निर्धारणम्।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** जातिगुणक्रियासंज्ञाभिः यस्मात् समुदायात् एकस्य भागस्य पृथक्करणं भवति, तस्मात् समुदायवाचकात् षष्ठीसप्तम्यौ भवतः।

**व्याख्या –** यतः – इति अव्ययम्। च – इति अव्ययम्। निर्धारणम् – इति प्रथमान्तम्। 'सप्तम्यधिकरणे च' इत्यस्मात् 'सप्तमी' इत्यस्य 'षष्ठी चानादरे' इत्यस्मात् 'षष्ठी' इत्यस्य चानुवृत्तिरायाति।

**रूपलेखनप्रकारः – ( 1 ) नृणां नृषु वा द्विजः श्रेष्ठः** – अत्र मनुष्यजातिवाचकोऽयं नृशब्दः। तस्मात् समुदायात् द्विजस्य पृथक्करणे 'यतश्च निर्धारणम्' इति सूत्रेण समुदायवाचकात् नृशब्दात् षष्ठीसप्तम्यौ भवतः नृणां नृषु वा द्विजः श्रेष्ठः इति सिद्धम्।

**( 2 ) गवां गोषु वा कृष्णा बहुक्षीरा-** अत्र गोसमुदायात् 'कृष्णा' इत्यस्याः बहुक्षीरत्वकारणात् पृथक्करणं भवति तस्मात् समुदायवाचकात् गोशब्दात् षष्ठीसप्तम्यौ भवतः। गुणेन पृथक्करणस्योदाहरणमिदम्।

**( 3 ) गच्छतां गच्छत्सु वा धावञ्छीघ्रः** – अत्र समुदायवाचकात् गच्छत् शब्दात् 'यतश्च निर्धारणम्' इति सूत्रेण षष्ठीसप्तम्यौ भवतः गच्छतां गच्छत्सु वा धावञ्छीघ्रः इति सिद्धम्। अत्र क्रियया पृथक्करणस्योदाहरणम्।

**( 4 ) छात्राणां छात्रेषु वा मैत्रः पटुः** – अत्र संज्ञाद्वारा पृथक्करणं विधीयते। छात्रसमुदायात् एकस्य मैत्रनाम्नः छात्रस्य पृथक्करणं भवति। एतस्मात् छात्रशब्दात् 'यतश्च निर्धारणम्' इति सूत्रेण षष्ठीसप्तम्यौ भवतः छात्राणां छात्रेषु वा मैत्रः पटुः इति सिद्धम्।

**पञ्चमी विभक्ते २/३/४२ ।। विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः।**

**पदच्छेदः –** पञ्चमी, विभक्ते।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** निर्धारणावधेः निर्धार्यमाणस्य च यत्र भेदः स्यात् तत्र निर्धारणावधेः पञ्चमी भवति।

**व्याख्या –** पञ्चमी – इति प्रथमान्तं, विभक्ते इति सप्तम्यन्तम्। 'यतश्च निर्धारणम्' इति सम्पूर्णसूत्रस्यानुवृत्तिरायाति। विपूर्वकात् भज् धातोः क्तप्रत्यये 'विभक्तः' इति भवति, तस्यार्थो विभागः।

**रूपलेखनप्रकारः – माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः** – अत्र माथुराः निर्धार्यमाणाः सन्ति। यतो निर्धारणावधिः तत् पाटलिपुत्रकम्। अत्र 'पञ्चमी विभक्ते' इति सूत्रेण पाटलिपुत्रकशब्दात् पञ्चमी विधीयते माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः इति सिद्धम्।

**साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २/३/४३।। आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। अर्चायां किम्? निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यम्। वा. 'अप्रत्यादिभिरिति वक्तव्यम्'। साधुर्निपुणो वा मातरं प्रति परि अनु वा।**

**पदविभागः** – साधुनिपुणाभ्याम्, अर्चायाम् सप्तमी, अप्रतेः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – प्रशंसार्थे गम्यमाने सति साधु, निपुण इत्यनयोः शब्दभ्योः योगे सप्तमी भवति अप्रतेः।

**व्याख्या** – साधुश्च निपुणश्चेति साधुनिपुणौ, ताभ्यां साधुनिपुणाभ्याम्। न प्रतिः अप्रतिः, तस्य अप्रतेः। साधुनिपुणाभ्याम् – इति तृतीयान्तम्। अर्चायाम् – इति सप्तम्यन्तम्। सप्तमी – प्रथमान्तम्। अप्रतेः षष्ठ्यन्तम्। अर्चायाम् इत्यस्यार्थो विद्यते प्रशंसायामिति।

**रूपलेखनप्रकारः** – **मातरि साधुर्निपुणो वा** – अत्र साधु-शब्दस्य प्रशंसार्थे गम्यमाने सति तद्योगे मातृशब्दात् 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति सूत्रेण सप्तमी विधीयते मातरि साधुः इति भवति। एवमेव निपुणशब्दस्य योगेऽपि बोध्यम्। मातरि साधुर्निपुणो वा इति सिद्धम्।

**प्रत्युदाहरणम् – अर्चायां किम्? निपुणो राज्ञो भृत्यः** – अत्र 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति सूत्रे 'अर्चायाम्' इति पदस्यौचित्यं किम्? तर्हि समाधीयते यत् 'निपुणो राज्ञो भृत्यः' अत्र अर्चा इत्यर्थस्य प्राधान्यं नास्ति इह तत्त्वकथने तात्पर्यमस्ति एतस्मात् अत्र निपुणशब्दस्य योगे सप्तमी न भवति इति दिक्।

### वा. अप्रत्यादिभिरिति वक्तव्यम्

**वार्तिकार्थः** – प्रशंसार्थे गम्यमाने सति साधु, निपुण इत्यनयोः योगे सप्तमी भवति परं प्रति, परि, अनु एतेषां प्रयोगाभावे एव स्यात्।

**रूपलेखनप्रकारः – साधुर्निपुणो वा मातरं प्रति परि अनु वा** – अत्र अर्चायां साधुनिपुणशब्दाभ्यां योगे प्रति परि अनु इत्येतेषु कस्यापि एकस्य प्रयोगे सति 'अप्रत्यादिभिरिति वक्तव्यम्' इति वार्तिकनियमेन 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति सूत्रस्य प्रवृत्तिः न भवति तस्मात् 'लक्षणेत्थंभूताख्यानभागवीप्सासुप्रतिपर्यनवः' इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन मातृशब्दात् द्वितीया भवति साधुर्निपुणो वा मातरं प्रति परि अनु वा इति सिद्धम्।

**प्रसितोत्सुकाभ्यां तृतीया च २/३/४४।। आभ्यां योगे तृतीया स्यात् चात् सप्तमी। प्रसित उत्सुको वा हरिणा हरौ वा।**

**पदविभागः** – प्रसितोत्सुकाभ्याम्, तृतीया च।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रार्थः** – प्रसित, उत्सुक इत्येताभ्यां शब्दाभ्यां योगे तृतीया तथा च सप्तमी भवति।

**व्याख्या** – प्रसितश्च उत्सुकश्चेति प्रसितोत्सुकौ (इतरेतरद्वन्द्वः)। ताभ्यां प्रसितोत्सुकाभ्याम्। तृतीयान्तं पदम्। तृतीया – इति प्रथमान्तं पदम्। च – इति अव्ययपदम्।

चकारात् 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इत्यस्मात् 'सप्तमी' इति अनुवर्तते। वैषयिक सप्तम्यामेव प्राप्तायामिदं सूत्रं प्रयुज्यते।

**रूपलेखनप्रकारः** – प्रसित उत्सुको वा हरिणा हरौ वा –

(1) **प्रसितो हरिणा हरौ वा** – अत्र प्रसितशब्दस्य योगे 'प्रसितोत्सुकाभ्यां तृतीया च' इति सूत्रेण हरिशब्दात् तृतीया तथा च सप्तमी विधीयते।

(2) **उत्सुको हरिणा हरौ वा** – अत्रापि पूर्वानुसारेणैव उत्सुकशब्दस्य योगे तृतीया तथा च सप्तमी भवति इति

बोध्यम्।

**नक्षत्रे च लुपि २/३/४५।। नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौस्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा।'लुपि किम्? पुष्ये शनिः।**

पदविभागः - नक्षत्रे, च, लुपि'।

सूत्रप्रकारः - विधिसूत्रम्।

सूत्रार्थः - नक्षत्रे प्रकृत्यर्थे सति लुप्यमानस्य प्रत्ययस्य अर्थेऽपि वर्तमानात् नक्षत्रवाचकात् शब्दात् अधिकरणे तृतीयासप्तम्यौ पर्यायेण भवतः।

व्याख्या - नक्षत्रे इति सप्तम्यन्तम्। च - इति अव्ययपदम्। लुपि - सप्तम्यन्तम्।'प्रसितोत्सुकाभ्यां तृतीया च' इत्यतः तृतीया इत्यस्य 'साधुनिपुणाभ्यामचार्यां सप्तम्यप्रतेः इत्यतः 'सप्तमी' इत्यस्य चानुवृत्तिरायाति। 'सप्तम्यधिकरणे च' इत्यतः मण्डुकप्लुत्या 'अधिकरणे' इति पदस्यापि अनुवृत्तिः मन्यते।

रूपलेखनप्रकारः - **मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा -**

**(1) मूलेनावाहयेद् देवीं मूले वा** - अत्र नक्षत्रवाचकात् मूलशब्दात् 'मूलेन युक्तः कालः' इत्यर्थे अण्-प्रत्यये 'लुबविशेषे' इत्यनेन तस्य लोपे कृते मूलशब्द एवावशिष्यते। तस्मात् 'नक्षत्रे च लुपि' इति सूत्रेण मूलशब्दात् तृतीया तथा च सप्तमी विधीयते मूलेन मूले वा इति भवति।

**(2) श्रवणेन विसर्जयेद् देवीं श्रवणे वा** - अत्र नक्षत्रवाचकात् श्रवणशब्दात् 'श्रवणेन युक्तः कालः' इत्यर्थे पूर्वानुसारेण एव सिद्धम् भवति।

**प्रत्युदाहरणम्** - लुपि किम्? पुष्ये शनिः। ननु सूत्रे लुपि इति पदस्य प्रयोगेन नियम्यते यत् यत्र लोपो न भवति तत्र एतस्य सूत्रस्य प्रवृत्तिरेव न भवति। यथा - 'पुष्ये शनिः' अत्र कालार्थे अण्-प्रत्ययाभावो विद्यते एतस्मात् लोपस्य तु प्रसङ्ग एव नास्ति अतएव पुष्यशब्दात् अत्र तृतीया न भवति अपितु अधिकरणे सप्तमी एव भवति पुष्ये शनिः इति सिद्धम्।

**सप्तमीपञ्चम्यौ कारकमध्ये २/३/७।। शक्तिद्वयमध्ये यौ कालाध्वनौ ताभ्यामेते स्तः। अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद् वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रोशे क्रोशाद् वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्यऽयं देशः। अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते। तदस्मिन्नधिकम् इति 'यस्मादधिकम् - इति च सूत्रनिर्देशात्'। लोके लोकाद् वा अधिको हरिः।**

पदविभागः - सप्तमीपञ्चम्यौ, कारकमध्ये।

सूत्रप्रकारः - विधिसूत्रम्।

सूत्रार्थः - शक्तिद्वयमध्ये यदा कालवाची शब्दः समयं सूचयति मार्गवाचीशब्दः स्थानं सूचयति तदा कालवाचकात् मार्गवाचकाच्च शब्दात् सप्तमीपञ्चम्यौ भवतः।

व्याख्या - सप्तमी च पञ्चमी चेति सप्तमीपञ्चम्यौ। कारकयोर्मध्यं कारकमध्यम्, तस्मिन् कारकमध्ये। सप्तमीपञ्चम्यौ - इति प्रथमान्तम्, कारकमध्ये इति सप्तम्यन्तम्।'कालाध्वनोरत्यन्तसंयोगे इत्यतः 'कालाध्वनोः.....' इत्यस्यानुवृत्तिरायाति। तच्च पञ्चम्यन्ततया विपरिणम्यते।

रूपलेखनप्रकारः - **अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता** अत्र द्व्यहशब्दः कालवाचकः, तस्मात् सप्तमीपञ्चम्यौ कारकमध्ये' इति सूत्रेण सप्तमीपञ्चम्यौ भवतः द्व्यहे द्व्यहाद्वा इति भवति।

**इहस्थोऽयं क्रोशे क्रोशाद् वा लक्ष्यं विध्येत्** -अत्र कर्तृशक्तेः कर्मशक्तेश्च मध्ये स्थानवाची क्रोशशब्दोऽस्ति, तस्मात् क्रोशशब्दात् 'सप्तमीपञ्चम्यौ कारकमध्ये इत्यनेन सप्तमीपञ्चम्यौ भवतः क्रोशे क्रोशाद् वा लक्ष्यं विध्येत् इति भवति।

**पङ्क्तिविवेचनम् – अधिकशब्देन योगे इति –**

ननु अत्र अधिकशब्देन योगे सति सप्तमीपञ्चम्यौ भवतः इत्यर्थः। एतस्य विषये प्रमाणं पाणिनेः सूत्रम् – तत्र हि 'तदस्मिन्नधिकमितिदशान्ताड्डः' इति सूत्रे अधिकशब्देन योगे सप्तम्यन्तस्य 'अस्मिन्' इति शब्दस्य प्रयोगो विद्यते। तथा च 'यस्माद् अधिकं यस्य चेश्वरवचनं तत्र सप्तमी' सूत्रे अधिकशब्देन योगे पञ्चम्यन्तस्य 'यस्मात्' इति शब्दस्य प्रयोगो विद्यते। अत एव सूत्रनिर्देशानुसारेण अधिकशब्देन योगे सप्तमीपञ्चम्यौ भवतः। तेन 'लोके लोकाद्वा अधिको हरिः' इति सिद्धम्।

**अधिरीश्वरे १/४/९७।। स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात्।**

**पदविभागः –** अधिः, ईश्वरे।

**सूत्रप्रकारः –** संज्ञासूत्रम्।

**सूत्रार्थः –** स्वस्वामिसम्बन्धे 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या –** अधिः – प्रथमान्तम्, ईश्वरे इति सप्तम्यन्तम्। 'कर्मप्रवचनीयाः' इत्यस्याधिकारो वर्तते। ईश्वर इत्यस्यार्थः स्वस्वामिसम्बन्धविवक्षितः।

**यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २/३९।। अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्धे हरेर्गुणाः। परार्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः। अधि रामे भूः। सप्तमी शौण्डैः इति समासपक्षे तु रामाधीना। अषडक्ष – इत्यादिना खः।**

**पदविभागः –** यस्माद् अधिकं यस्य च ईश्वरवचनं।

**सूत्रप्रकारः –** विधिसूत्रम्।

**सूत्रार्थः –** यस्मादधिकम् इत्यर्थे कर्मप्रवचनीययुक्ते सप्तमी भवति, तथा च यस्य ईश्वरवचनं तस्मादपि कर्मप्रवचनीययुक्ते सप्तमी भवति।

**व्याख्या –** ईश्वरस्य वचनं ईश्वरवचनम्। यस्मात् – इति पञ्चम्यन्तम्। अधिकम् – इति प्रथमान्तम्। यस्य – इति षष्ठ्यन्तम्। च – इति अव्ययम्। ईश्वरवचनम् –प्रथमान्तम्। तत्र –इति अव्ययपदं सप्तम्यर्थे प्रयुक्तम्। 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यतः 'कर्मप्रवचनीययुक्ते' इत्यस्यानुवृत्तिरायाति।

**रूपलेखनप्रकारः – उपपरार्धे हरेर्गुणाः** – परार्धादपि अधिकाः हरिगुणाः सन्ति इत्यर्थः। अत्र 'उपोऽधिके च' इति सूत्रेण 'उप' इत्यस्य अधिके अर्थे कर्मप्रवचनीयसंज्ञा भवति। 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इत्यनेन परार्धशब्दात् सप्तमी भवति उपपरार्धे हरेर्गुणाः इति सिद्धम्।

**अधि भुवि रामः** – रामः भुवः स्वामी इत्यर्थः। अत्र स्वस्वामिसम्बन्धे 'अधिरीश्वरे' इति सूत्रेण 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञायां 'यस्मादधिकं यस्य येश्वरवचनं तत्र सप्तमी' इत्यनेन स्ववाचकात् भूशब्दात् अधि इत्यस्य कर्मप्रवचनीयस्य योगे सप्तमी भवति अधि भुवि रामः इति सिद्धम्।

**अधि रामे भूः** – रामस्य स्वभूता भूः इत्यर्थः। 'अधिरीश्वरे' इति सूत्रेण 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञायाम् 'यस्मादधिकं यस्य चेश्वरवचनम्' इत्यनेन ईश्वरवाचकात् रामशब्दात् सप्तमी भवति अधि रामे भूः इति सिद्धम्।

**रामाधीना** – अधि इत्यस्य शौण्डादिगणे पाठात् रामे अधि इत्यनयोः 'सप्तमी शौण्डैः' इति समासे प्रातिपदिकसंज्ञायां सुपो लुकि कृते रामाधिशब्दात् 'अषडक्षाशितः' इति सूत्रेण ख–प्रत्यये, ईनादेशे, भसंज्ञायां इकारलोपे च कृते रामाधीन शब्दो भवति। भूशब्दस्य विशेषणत्वात् स्त्रीत्वविवक्षायां टाप्–प्रत्यये, सवर्णदीर्घे च कृते रामाधीना इति सिद्धं भवति।

विभक्त्यर्थेऽव्ययीभावसमासे तु अधि इत्युत्तरपदाभावात् ख–प्रत्ययो न स्यात्, अधिरामं भूः इत्येव स्यात् इति।

**विभाषा कृञि १/४/९८।। अधिः करौतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे। यदत्र मासमधिकरिष्यति। विनियोक्ष्यत**

**इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात् 'तिङि चोदात्तवति' इति निघातो न। इति सप्तमी विभक्तिः।।**

**पदविभागः** – विभाषा कृञि।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सूत्रार्थः** – कृञ्-धातौ परे सति स्वस्वामिसम्बन्धार्थे 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**व्याख्या** – विभाषा – इति प्रथमान्तम्। कृञि – इति सप्तम्यन्तम्। 'अधिरीश्वरे' इति सम्पूर्णसूत्रस्यानुवृत्तिरायाति। 'कर्मप्रवचनीयाः' इत्यस्याधिकारो वर्तते।

**रूपलेखनप्रकारः** – यदत्र माम् अधिकरिष्यति –यत् माम् अधिकरिष्यति तद्युक्तमित्यर्थः। अत्र नियोक्तुः ईश्वरत्वेन प्रतीयते। अतः 'विभाषा कृञि' इत्यनेन 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति। तद्योगे अस्मद् शब्दात् 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन द्वितीया भवति यदत्र माम् अधिरिष्यति इति सिद्धम्।

## वस्तुनिष्ठप्रश्नाः

(1) 'उच्चैः' इति प्रातिपदिकार्थमात्रस्योदाहरणमस्ति, कथम्?

(अ) अलिङ्गत्वात् (ब) नियतलिङ्गत्वात् (स) अनियतलिङ्गत्वात् (द) परिमाणमात्रत्वात्।

(2) ईप्सिततमस्य कारकस्य कर्मसंज्ञा केन सूत्रेण भवति।

(अ) कर्तुरीप्सिततमं कर्म (ब) तथायुक्तं चानीप्सितम् (स) अकथितं च (द) कर्मणि द्वितीया

(3) अभिहिते कर्मणि प्रथमा कुत्र नास्ति?

(अ) हरिः सेव्यते (ब) लक्ष्म्या सेवितः (स) शतेन क्रीतः शत्यः (द) हरिं भजति

(4) अनभिहिते कर्मणि प्रयुक्ता भवति।

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) चतुर्थी

(5) द्वेष्यकर्मणः उदाहरणं किम् अस्ति।

(अ) ग्रामं गच्छन् तृणं स्पृशति (ब) ओदनं भुञ्जानो विषं भुङ्क्ते (स) पयसा ओदनं भुङ्क्ते (द) माषेषु अश्वं बध्नाति

(6) अपादानादिविशेषैरविवक्षितं कारकं किं भवति?

(अ) कर्तृसंज्ञम् (ब) कर्मसंज्ञम् (स) करणसञ्ज्ञम् (द) अपादानसञ्ज्ञम्

(7) द्विकर्मकधातुषु कस्य ग्रहणं नास्ति?

(अ) दुह् (ब) प्रच्छ् (स) चिञ् (द) रुच्

(8) अकर्मकधातुयोगे भाववाचकस्य कर्मसंज्ञाया उदाहरणं किम्?

(अ) कुरून् स्वपिति (ब) मासमास्ते (स) गोदोहमास्ते (द) क्रोशमास्ते

(9) अधोलिखितेषु अशुद्धं वाक्यं किम्?

(अ) अधिशेते वैकुण्ठं हरिः (ब) अधितिष्ठति वैकुण्ठं हरिः (स) अध्यास्ते वैकुण्ठं हरिः (द) हरिः वैकुण्ठे वसति

(10) 'हरिः वैकुण्ठम् उपवसतिं' अत्र द्वितीयाविभक्तिः केन सूत्रेण भवति?

(अ) उपान्वध्याङ्वसः (ब) अधिशीङ्स्थासां कर्म (स) कर्मणि द्वितीया (द) अकथितं च

(11) क्रियायां स्वातन्त्र्येण विवक्षितो भवति।

(अ) कर्ता (ब) कर्म (स) करणम् (द) सम्प्रदानम्

(12) 'रामेण बाणेन हतो बाली' इत्यत्र अनुक्तं कर्तृपदमस्ति।
(अ) रामेण (ब) बाणेन (स) हत: (द) बाली
(13) सहयुक्ते तृतीयाविभक्ति: भवति –
(अ) प्रधाने (ब) अप्रधाने (स) प्रधानेऽप्रधाने च (द) प्रधानाप्रधानरहिते
(14) 'अक्षै: दीव्यति' इत्यत्र तृतीयाविधायकमस्ति –
(अ) साधकतमं करणम्(ब) कर्तृकरणयोस्तृतीया (स) दिव: कर्म च (द) अपवर्गे तृतीया
(15) 'मासमधीतो नायात:' अत्र सूत्रं प्रयुक्तं भवति।
(अ) कालाध्वनोरत्यन्तसंयोगे (ब) अपवर्गे तृतीया
(स) कर्मणि द्वितीया (द) गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ।
(16) 'पुण्येन दृष्टो हरि:' इत्यत्र तृतीया केन सूत्रेण विहिता।
(अ) येनाङ्गविकार: (ब) हेतौ (स) इत्थंभूतलक्षणे (द) साधकतमं करणम्
(17) 'सीता स्थाल्यां **तण्डुलान्** ओदनं पचति' अस्मिन्वाक्ये चिह्निते पदे कस्य कारकस्याविवक्षा विहिता।
(अ) करणस्य (ब) सम्प्रदानस्य (स) अपादानस्य (द) अधिकरणस्य
(18) 'ध्रुवमपायेऽपदानम्' अत्र 'अपाय:' इति पदस्य कोऽर्थ:?
(अ) नियतम् (ब) अवधि: (स) विश्लेष: (द) संयोग:
(19) 'गंगातटे राजा विप्राय गां ददाति' – अत्र वाक्ये अभिप्रेतोऽस्ति।
(अ) गङ्गातटम् (ब) राजा (स) विप्र: (द) गो:
(20) 'अधिशेते वैकुण्ठं हरि:' इत्यत्र द्वितीया केन सूत्रेण विहिता।
(अ) अधिशीङ्स्थासां कर्म (ब) उपान्वध्याङ्वस: (स) अभिनिविशश्च (द) कर्मणि द्वितीया
(21) 'अधिशीङ्स्थासां कर्म' इत्यस्योदाहरणं नास्ति।
(अ) अधिशेते शिलाम् (ब) अधितिष्ठति आसन्दम् (स) अध्यास्ते सिंहासनम् (द) गृहम् अधिवसति।
(22) सर्वस्मिन्नात्माऽस्ति अत्र कीदृशमधिकरणम्?
(अ) औपश्लेषिकम् (ब) वैषयिकम् (स) अभिव्यापकम् (द) एषु न किमपि
(23) 'आख्यातोऽपयोगे' इत्यत्र 'उपयोग:' इत्यस्य कोऽर्थ:?
(अ) नियमपूर्वकविद्याध्ययनम् (ब) कथाश्रवणजन्यज्ञानम् (स) व्यवधाने सति अदर्शनम् (द) भाववचनम्
(24) 'यतश्च निर्धारणम्' इत्यस्य अधोलिखितेषु उदाहरणं नास्ति।
(अ) नृणां नृषु वा द्विज: श्रेष्ठ: (ब) गच्छतां गच्छत्सु वा धावञ्छीघ्र: (स) छात्राणां छात्रेषु वा मैत्र: पटु: (द) माथुरा: पाटलिपुत्रकेभ्य: आढ्यतरा:
(25) 'केशुषु चमरीं हन्ति' इत्यत्र सप्तमीविधायकं किम्?
(अ) सप्तम्यधिकरणे च (ब) निमित्तात् कर्मयोगे (स) यस्य च भावेन भावलक्षणम् (द) आयुक्तकुशलाभ्यां चासेवायाम्

## लघूत्तरात्मकप्रश्ना:

1. प्रथमाविधायकं सूत्रं किम्?
2. 'बलिं भिक्षते वसुधाम्' इत्यत्र कर्मसंज्ञाविधायकं सूत्रं किम्?
3. 'वने उपवसति मुनि:' अत्र कर्मसंज्ञा केन निषिद्धा भवति?
4. 'गोत्रेण गार्ग्योऽहं नमस्करोमि' अत्र तृतीयाविधानं केन भवति?

5. सम्प्रदानसंज्ञा विधायकं सूत्रं किम्?
6. 'अरण्ये सिंहात् बिभेति पथिकः' अत्र भयहेतुः किम्?
7. 'यवेभ्यो गां वारयति' अत्र अपादानसंज्ञा केन सूत्रेण भवति?
8. कालिदासस्य कृतिरियं 'अभिज्ञानशाकुन्तलम्' अस्मिन्वाक्ये षष्ठीविधायकं सूत्रं किम्?
9. 'अलं भारतीयाः मतानां विभेदैः' अत्र अलं योगे का विभक्तिः केन विधीयते।
10. 'तिलेभ्यः प्रतियच्छति माषान्' इत्यत्र पञ्चमीविधायकं सूत्रं किम्?

## निबन्धात्मकप्रश्नाः

1. आधारः कतिधा, सोदाहरणं विवेच्यताम्
2. 'कालाध्वनोरत्यन्तसंयोगे' सूत्रेऽस्मिन् अत्यन्तसंयोगे इति पदस्य किमौचित्यम्?
3. तुमर्थाच्च भाववचनात् इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
4. प्रसिद्धाः षष्ठ्यर्थाः के सन्ति, तेषां सोदाहरणं विवेचनं विधीयताम्।
5. तमब्ग्रहणं किम्? गङ्गायां घोषः। इत्यस्य विवेचनं विधीयताम्।

## ।। अथ लिङ्गानुशासनम् ।।

लिङ्गानाम् अनुशासनमिति लिङ्गानुशासनम्। केषां लिङ्गानुशासनम्? व्याकरणस्य शब्दानां लिङ्गानुशासनम्, शब्दानां प्रातिपदिकत्वात्। अत्र हि ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' इति सूत्रं प्रमाणम्। पुनश्च व्याकरणशास्त्रे लिङ्गव्यवस्थाया: नियामकं किमिति जिज्ञासायां 'स्त्रियाम्' सूत्रेऽस्मिन् प्रारम्भे भाष्यकारेण निगदितम् –

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरनन्तरं यच्च तदभावे नपुंसकम्।।**

उक्तानुसारेण लिङ्गव्यवस्थाया: निर्धारणमसंभवं यतो हि –

**लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप् प्रसज्यते।**
**नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिद्ध्यतः।।**

अर्थात् स्तनकेशवतीत्वलोमत्वयोरेव लिङ्गाधार: स्वीक्रियते तदा तु भ्रुंकुस: = स्त्रीवेशधारी नट: स्त्रीत्वे स्यात् यतो हि नाटकमञ्चने स: स्तनकेशवान् भवति, पुनश्च खरकुटी: (नापितस्य गृहम्) खरकुटी+शस् इत्यत्र द्वितीया बहुवचने ''तस्माच्छसो न: पुंसि'' इत्यनेन सकारस्य स्थाने नत्वं स्यात् यतो हि खरकुटी लोमश: भवत्येव अत: पुंस्त्वस्यानापत्ति:। अनेनैव 'खट्वा' इत्यत्र स्त्रीत्वं न स्यात् स्तनकेशवतीत्वाभावात्। 'वृक्ष:' इत्यत्र पुंस्त्वं न स्यात् लोमशाभावात्। एवं व्याकरणस्य लौकिकलक्षणमिदं लिङ्गस्य खट्वा, माला, तट, घट, पट इत्यादिषु जडपदार्थेषु न घटितं भवति, अत एव व्याकरणशास्त्रे न आश्रयणीयमेतत्। वस्तुतस्तु सत्वरजस्तमोगुणानां मध्ये कस्यचिद्गुणस्योपचयांश: पुंस्त्वम् (उपचय: = वृद्धिरिति), अपचयांश: (ह्रास:) स्त्रीत्वम् इति। नपुंसकता तु तत्र कस्यचिद् गुणस्य साम्यावस्था अर्थात् उपययापचयराहित्येन सपरिणाम:। अतएव उत्कर्षापकर्षसत्वेऽपि स्थितिमात्रमादाय सामान्ये नपुंसकम् इति प्रवादस्योत्कर्षापकर्षसाम्यात्मकावस्थात्रयसाधारण स्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थ:। अनेन 'लिङ्गम्' अर्थनिष्ठं भवति न तु शब्दनिष्ठम्। परं वाच्यवाचकयो: अभेदोपचारात्वात् व्यवहारे शब्दा: पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च प्रयुक्ता: भवन्ति। अत्रापि ध्यातव्यं यत् ब्रह्मन्, आत्मन इत्यादिषु सत्त्वरजस्तमोगुणानां विपरिणामो न दृश्यते तथापि सत्वरजस्तमोगुणानां आरोपणं कृत्वा लिङ्गव्यवस्था स्वीकरणीया। सत्त्वरजस्तमोगुणानामुपचयापचयस्थितित्वेन लिङ्गनिर्धारणे या विवक्षाऽस्ति सा अस्मदादीनां प्रयोक्तृणामाश्रिता न भवति एतस्या: नियामकास्तु शिष्टा: एव भवन्ति। तेषां विवक्षा एव व्याकरणलिङ्गानुशासनकोषादिषु निबद्धाऽस्ति। इदमेव अस्माभिरनुसरणीयं न तु स्वेच्छया। एतस्मादेव केचन शब्दा: त्रिषु लिङ्गेषु प्रयुक्ता: भवन्ति केचन द्विलिङ्गा: भवन्ति, यथा – (तट:, तटी, तटम्), (शुक्ल:, शुक्ला, शुक्लम्), (कृष्ण:, कृष्णा, कृष्णम्), (गौरयम्, गौरियम्), (अशनिरयम्, अशनिरियम्) इति। अत एव इदमेव वक्तव्यमस्ति यत् व्याकरणशास्त्रे लिङ्गनिर्धारणं शिष्टप्रयोगेष्वाश्रित शास्त्रनियमानुसारेण भवति न तु स्वेच्छया लोकपरम्परया वा।

## ।। अथ स्त्रीलिङ्गप्रकरणम् ।।

१. **लिङ्गम्। अधिकारोऽयम् –**

**सूत्रार्थ:** – इत ऊर्ध्वं ''सर्वादीनि सर्वनामानि'' इति सूत्रं यावत् अस्याधिकारो बोध्य:।

**व्याख्या** – महर्षि: पाणिनि: लिङ्गानुशासनस्यादौ सर्वतो प्राक् सूत्रं विचारयामास 'लिङ्गमिति'। तत्रादौ ग्रन्थस्यारम्भे मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरित्युक्तिदिशा मङ्गलाचारमुखेनाह प्रथममिदं सूत्रम्। ''शब्दानामनेकार्थत्वात्'' लिङ्गशब्दोऽयं सगुणब्रह्मण: सदाशिवस्य वाचकत्वेन मन्यते, एवञ्च नपुंसकत्वेन सर्वव्यापकनिर्गुणब्रह्मण: वाचकत्वात् माङ्गलिकमिति प्रथितम्।

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।**

कारिकोक्तलक्षणानुसारं 'लिङ्गम्' सूत्रमिदं अधिकारसूत्रमस्ति। अधिकारसूत्रञ्च – 'स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थबोधकत्वम्। अर्थात् सूत्रस्य यस्मिन्नध्याये यस्मिन्पादे पठनं कृतं तत्र वाक्यार्थशून्यता भवति उत्तरोत्तरफलजनकता च।

**२. स्त्री। अधिकार सूत्रे एते –**

**सूत्रार्थः** – इत ऊर्ध्वं ''शलाका स्त्रियां नित्यम्'' इति सूत्रपर्यन्तमस्य सूत्रस्याधिकारः प्रचलिष्यति।

**व्याख्या** – ''लिङ्गम्'' 'स्त्री' अनयोः द्वयोः सूत्रयोः एक सह प्रयोगः कृतः एतस्मात् मूले द्विवचनस्य प्रवृत्तिः दृश्यते ''अधिकारसूत्रे एते'' इति। ''शलाका स्त्रियां नित्यम्'' सूत्रेऽस्मिन् नित्यग्रहणात् अन्यत्र कुत्रचिदस्य व्याभिचारोऽपि ज्ञाप्यते। एतस्मात् ''ताराधाराज्योत्स्नादयश्च'' इति पर्यन्तमेव 'स्त्री' इति सूत्रस्याधिकारो वर्तते इति बोध्यम्। ननु त्रिषु लिङ्गेषु सर्वतो प्राक् स्त्रीलिङ्गप्रकरणं विवेचितं तर्ह्यत्र किं चिन्तनं महर्षिपाणिनेः? प्रकरणेऽस्मिन् सयुक्तिकं प्रमाणमत्रोपस्थाप्यते –

१. 'मातृदेवो भव' 'पितृदेवो भव' 'आचार्यदेवो भव' 'अतिथिदेवो भव' इति उपनिषत्सु पठ्यतेऽत्रापि मातुरेव प्रथमं स्थानम्।

२. प्रकृति – पुरुषयोः प्रकृतेः प्राधान्यं वर्तते एतस्मात् ''अभ्यर्हितञ्च'' इति वार्तिकानुसारेण प्राधान्यस्य (श्रेष्ठस्य) पूर्वप्रयोगः कृतः।

३. भारतीय परम्परायां लोकेऽपि लक्ष्मीनारायणाभ्यां नमः, उमामहेश्वराभ्यां नमः, वाणीहिरण्यगर्भाभ्यां नमः, शचीपुरन्दराभ्यां नमः, अत्रापि लक्ष्यादीनां प्राधान्येन प्रयोगः कृतः।

४. महाकवि कालिदासस्य प्रसिद्धोऽयं श्लोकोऽपि अत्र प्रमाणत्वेन पठ्यते।

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**

एवं प्रथमतया स्त्र्यधिकारस्य प्रयोगः उचितमेव प्रतीयते।

**३. ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः –**

**ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। सवस्रादिपञ्चकस्यैव ङीप निषेधेन कर्त्रीत्यादेङीपा ईकारान्तत्वात्। तिसृचतस्त्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात्।**

**सूत्रार्थः** – ऋकारान्ताः मातृ-दुहितृ-स्वसृ-यातृ-ननान्दृ इत्येते शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – माता च दुहिता च स्वसा च पोता च ननान्दा चेति ऋकारान्ता------------ननान्दरः (इतेरतरद्वन्द्वसमासः)। ऋकारोऽन्ते येषान्ते ऋकारान्ताः (बहुव्रीहिसमासः)। अत्र सूत्रेऽस्मिन् प्रतिपदोच्चारणात् एते पञ्चैव स्त्रलिङ्गाः भवन्ति। अन्ये ये ऋकारान्ताः सन्ति से पुंसि नपुंसके वा प्रयुक्ताः भवन्ति इत्याशयः। कुत्रचित् यातृ शब्दस्य स्थाने 'पोतृ' शब्दस्यापि पाठभेदो दृश्यते। प्रकृतेऽस्मिन् सूत्रे तिसृ, चतसृ, अनयोः ग्रहणं न भवति। ''त्रिचतुरो स्त्रियां तिसृ चतसृ'' इति सूत्रेण त्रि, चतुर्, इत्यनयोः शब्दयोः स्थाने विहितौ तिसृचतस्रौ आदेशरूपे स्तः अतः मूले ऋकारान्तत्वाभावो दृश्यते। यद्यपि स्वस्रादयः सप्त सन्ति –

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।**
**याता मातेति सप्तैते स्वस्रादयः उदाहृताः।।**

परमत्र पञ्चानामेव ग्रहणं कृतम्।

**उदाहरणानि** – इयं माता। दुहिता। स्वसा। याता। ननान्दा

**४. अन्यूप्रत्ययान्तो धातुः –**

**अनिप्रत्ययान्तः ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किं – देवयतेः क्विप्।**

**द्यूः। विशेष्य लिङ्गः।**

**सूत्रार्थः** – 'अनि' प्रत्ययान्तः 'ऊ' प्रत्ययान्तश्च धातुः स्त्रीलिङ्गो भवति।

**व्याख्या** – अनिश्च ऊश्चेति अन्यू, अन्यू प्रत्ययौ अन्ते यस्य स अन्यूप्रत्ययान्तः (द्वन्द्वमूलकबहुव्रीहिसमासः) पदमिदं प्रथमैकवचनान्तम्। 'धातुः' शब्दोऽयं प्रथमैकवचनान्तम्। अत एव अनि प्रत्ययान्तः ऊप्रत्ययान्तश्च प्रत्येकं शब्दः स्त्रीलिङ्गे प्रयुज्यते।

**उदाहरणानि** – इयम् अवनिः। इयम् चमूः।

**विशेषः – प्रत्ययग्रहणं किम् देवयते क्विप् द्यूः। विशेष्य लिङ्गः।** ननु "अन्यूप्रत्ययान्तो धातुः" सूत्रेऽस्मिन् प्रत्ययग्रहणं कथमिति चेदुच्यते सूत्रे प्रत्ययग्रहणाभावे प्रत्ययभिन्नानां अन्यन्तानां ऊकारान्तानां स्त्रीत्वं निर्बाधमेव। यथा – दिव् धातोः क्विप् प्रत्यये सर्वापहारे लोपे च कृते 'च्छ्वोः शूडनुनासिके' च इति सूत्रेण वकारस्य स्थाने ऊठादेशे कृते "इकोयणचि" इति सूत्रेण यणि कृते द्यू इति जाते प्रातिपदिकत्वात् स्वादिकार्ये द्यूः इति जायते। अत्र द्यूरित्यस्यापि ऊकारान्तत्वेन स्त्रीलिङ्गग्रहणं भवितुं शक्यते परं न भवति प्रत्ययान्तत्वाभावात्। अर्थात् 'द्यूः' शब्दोऽयं 'ऊ' प्रत्ययान्तो नास्ति इति दिक्।

५. **अशनिभरण्यरणयः पुंसि च – इयमयं वा अशनिः।**

**सूत्रार्थः** – अशनिः, भरणिः, अरणिः इत्येते धातुजशब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या** – अशनिश्च भरणिश्च अरणिश्चेति अशनिभरण्यरणयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदमिदम्। चकारस्य प्रयोगः समुच्चयार्थकः। तस्मात् सूत्रेण पुल्लिङ्गे विधानात् चकारबलाच्च एते धातुजाः शब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि** – इयम् अशनिः, अयम् अशनिः। इयम् भरणिः, अयम् भरणिः। इयम् अरणिः, अयम् अरणिः।

६. **मिन्यन्तः – मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः। ग्लानिः।**

**सूत्रार्थः** – मिप्रत्ययान्ताः निप्रत्ययान्ताश्च धातुजशब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – मिश्च निश्चेति मिनी, मिनी अन्ते यस्य सः मिन्यन्तः। "अन्यूप्रत्ययान्तो धातुः" इति सूत्रात् 'प्रत्ययः' इति पदमनुवर्तते। 'धातोः' इत्यधिकारात् मि, नि प्रत्ययान्तो यो धातुरित्यर्थो प्राप्यते। 'स्त्री' इत्यन्वितं पदं सप्तम्यां विपरिणम्यते। अनेन सूत्रस्यास्य अर्थोऽयं लभ्यते यत् मि प्रत्ययान्तो यो धातुः नि प्रत्ययान्तो यो धातुः ततो जायमानः प्रत्येकं शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति इति।

**उदाहरणानि** – इयं भूमिः। इयं ग्लानिः।

७. **वह्निवृष्ण्यग्नयः पुंसि। पूर्वस्यापवादः –**

**सूत्रार्थः** – वह्नि-वृष्णि-अग्नि इत्येते नि प्रत्ययान्ताः धातुजशब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – 'मिन्यन्तः' इति सूत्रेण विधीयमानस्य निषेधरूपेण प्रयुक्तमिदं सूत्रम्। अत एव मूले उक्तम् पूर्वस्यापवादः। पूर्वसूत्रेण प्राप्त स्त्रीलिङ्गं प्रबाध्य पुंस्त्वमनेन विधीयते। वह्निश्च वृष्णिश्च अग्निश्चेति वह्निवृष्ण्यग्नयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। पुंसि इति सप्तम्यन्तं पदम्।

**उदाहरणम्** – अयं वह्निः। वृष्णिः। अग्निः।

८. **श्रोणियोन्यूर्मयः पुंसि च – इयमयं वा श्रोणिः।**

**सूत्रार्थः** – श्रोणि-योनि-ऊर्मि इत्येते धातुशब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या** – श्रोणिश्च योनिश्च ऊर्मिश्चेति श्रोणियोन्यूर्मयः (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदमिदम्। सूत्रे चकारग्रहणात् स्त्रीत्वप्राप्तिर्भवति। 'पुंसि' इति सप्तम्यन्तं पदम्। अनेन पुल्लिङ्गविधानं क्रियते। अतः 'मिन्यन्तः' इति सूत्रस्य अपवादरूपेणमिदं सूत्रमस्ति। अत एव श्रोणिः, योनिः, ऊर्मिः इत्येते शब्दाः पुंसि स्त्रियां च प्रयुज्यन्ते

इत्याशय:।

**उदाहरणनि** – अयम् इयं वा श्रोणि:। योनि:। ऊर्मि:।

**९. क्तिन्नन्तः – स्पष्टम्। कृतिरित्यादि।**

**सूत्रार्थ:** – क्तिन् प्रत्ययान्ता: धातुजशब्दा: स्त्रीलिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – क्तिन् अन्ते यस्य स: क्तिन्नन्त:। सूत्रे मूले उक्तम् – ''स्पष्टम्''। अर्थात् ''स्त्रियां क्तिन्'' इति सूत्रेण स्त्रीत्वेऽर्थे एव क्तिन् प्रत्ययो भवति। एतेन क्तिन् प्रत्ययान्तो धातुजशब्दो स्त्रीलिङ्गवाचको भवतीति आशय:।

**उदाहरणानि** – कृति:। कृतिरियं कालिदासस्य। एवमेव: – दृति:, बुद्धि:, लब्धि:, हति:, धृति:, वृष्टि:, दृष्टि:, श्रुति:, स्तुति: इत्यादय: भवन्ति।

**१०. ईकारान्तश्च – ई प्रत्ययान्त: स्त्री स्यात्। लक्ष्मी:।**

**सूत्रार्थ:** – ई प्रत्ययान्ता: धातुजशब्दा: स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – ईकारोऽन्ते यस्य स: ईकारान्त:। सूत्रेऽस्मिन् चकारग्रहणं धात्वधिकारनिवृत्यर्थम्। अत्र ईकार: प्रत्यय: एव गृह्यते पूर्वोत्तर प्रत्ययस्यैव साहचर्यात्। अत: सूत्रार्थोऽयं लभ्यते यत् ईप्रत्ययान्तो धातु: स्त्रीलिङ्गो भवतीति।

**उदाहरणानि**– इयं लक्ष्मी:। लक्षदर्शनाङ्कयो: अस्माद्धातो: 'लक्षेर्मुट्च्' इत्यादि उणादिसूत्रेण ई प्रत्यये मुडागमे च कृतेऽनुबन्धलोपे लक्ष्मी इति जाते प्रातिपदिकत्वात् प्रथमाया: एकवचने सु विभक्तौ लक्ष्मी: इति सिद्धम्। एवमेव अवी:, तरी:, तन्त्री:, पपी: इत्यादय: ई प्रत्ययान्ता:।

**११. ऊङ्ङ्याबन्तश्च।। कुरू:। विद्या।**

**सूत्रार्थ:** – ऊङ् प्रत्ययान्ता: आप् प्रत्ययान्ताश्च शब्दा: स्त्रीलिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – ऊङ् च आप् चेति ऊङापौ तयो: अन्ते यस्य स: ऊङाबन्त: (द्वन्द्वमूलकबहुव्रीहि:)। सूत्रे आप् ग्रहणेन टाप्, डाप्, चाप् इत्येतेषां प्रत्ययानां ग्रहणं भवति। ऊङ् प्रत्यय: 'ऊङुत:' इति सूत्रेण भवति। अत: ऊङ् प्रत्ययान्ता: आप् प्रत्ययान्ताश्च शब्दा: स्त्रीलिङ्गे प्रयुज्यन्ते इत्यर्थो लभ्यते। अस्मिन् सूत्रे कुत्रचित् ङीप् ग्रहणमपि वर्तते, अत: 'ऊङ्ङ्याबन्तश्च' एवम्प्रकारेणापि सूत्रमिदं पठ्यते। तदनुसारेण ङी प्रत्ययान्ता: इति ग्रहणेन ङीप्, ङीष्, ङीन् इत्येतेषां प्रत्ययानामपि ग्रहणमत्र भवति, तदा सूत्रस्यास्य अर्थोऽयं भवति यत् ऊङ् प्रत्ययान्ता:, ङी प्रत्ययान्ता:, आप् प्रत्ययान्ताश्च शब्दा: स्त्रीलिङ्गे प्रयुक्ता भवन्ति इति।

**उदाहरणानि** – ऊङ् प्रत्ययान्ता: – इयं कुरू:। अलाबू:। पङ्गू:। करभोरू:। श्वश्रू:।

आप् प्रत्ययान्ता: – इयं विद्या अजा। वत्सा। एडका। कोकिला। चटका।

ङी प्रत्ययान्ता: – कर्त्री। हर्त्री। दण्डिनी। ब्राह्मणी। गौरी। सूरी। इत्यादय:।

**१२. य्वन्तमेकाक्षरम् – श्री:। भू:। एकाक्षरं किम। पृथुश्री:।**

**सूत्रार्थ:**– एकाक्षरयुक्ता: ईकारान्ता: ऊकारान्ताश्च शब्दा: स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – ई च ऊ चेति यू, यू अन्ते यस्य तद् य्वन्तम्। एकमक्षरं यस्य तदेकाक्षरम्। य्वन्तञ्च तद् एकाक्षरमिति य्वन्तमेकाक्षरम्। एतेन ईकारान्तम् ऊकारान्तञ्च यदेकाक्षरं शब्दस्वरूपं तत् स्त्रीलिङ्गं भवति इत्यर्थो लभ्यते।

**उदाहरणानि** – इयं श्री:। इयं भ्रू:।

**विशेष:** – एकाक्षरं किम्? पृथुश्री:। सूत्रे 'एकाक्षरम्' इति पदस्य ग्रहणं न क्रियते चेत् ''पृथुश्री'' इत्यत्रापि स्त्रीलिङ्गस्य प्रसङ्ग आयाति ईकारान्तात्वात्। परं एकाक्षरमेव स्यात् इति विधानादत्र न भवति स्त्रीत्वम्। अत एव एकाक्षरग्रहणमुपयुक्तमेव।

**१३. विंशत्यादिरानवते: – इयं विंशति: त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टि:। सप्तति:। अशीति:। नवति:।**

**सूत्रार्थ:** – विंशत्यादय: आनवते: (नवतिपर्यन्तम्) संख्यावाचका: शब्दा: स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – विंशतिः आदिर्यस्य सः विंशत्यादिः। 'आङ्मर्यादाभिविध्यौ' इति सूत्रेण आ इति मर्यादार्थे प्रयुज्यते, अत एव 'आनवतेः' इत्यस्य अर्थोऽयं लभ्यते नवतिपर्यन्तमिति। एतेन विंशतिः इत्यारभ्य नवतिपर्यन्तं संख्याकाः शब्दाः स्त्रीलिङ्गे भवन्ति। विंशतिः इत्यादयः शब्दाः रूढिशब्दाः वर्तन्ते तस्मात् निपातनात् एतेषां सिद्धयः भवन्ति। तदर्थं सूत्रमस्ति "पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टि सप्तत्यशीतिनवतिशतम्। द्वौ दशतौ परिमाणमस्येति विंशतिः। त्रयो दशतो परिमाणस्येति त्रिंशत्। चत्वारः दशतः परिमाणस्येति चत्वारिंशत्। पञ्च दशतः परिमाणस्येति पञ्चाशत्। षट् दशतः परिमाणस्येति षष्टिः। सप्तदशतः परिमाणस्येति सप्ततिः। अष्ट दशतः परिमाणमस्येति अशीतिः। नव दशतः परिमाणमस्येति नवतिः।

**उदाहरणानि** – इयं विंशतिः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः।

**१४. दुन्दुभिरक्षेषु – इयं दुन्दुभिः। अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः।**

**सूत्रार्थः** – अक्षेष्वर्थेषु दुन्दुभिः शब्दः स्त्रीलिङ्गो भवति।

**व्याख्या** – दुन्दुभिः शब्दः वाद्यविशेषाद्यर्थेष्वपि प्रयुक्तो भवति, तद्वाचकः शब्दः पुल्लिङ्गो भवति। अतः वाद्यविशेषाद्यतिरिक्त अक्षार्थेषु एव दुन्दुभिः शब्दः स्त्रीलिङ्गो भवति इति स्पष्टम्। अत एव लिखति मूलकारः – "अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरोवेत्यर्थः। दुन्दुभिः नाम राक्षसस्यापि, तस्य पुंस्त्वे प्रयोगो भवति, अयं दुन्दुभिः (राक्षसः)। अयं दुन्दुभिः (वाद्यविशेषः)।

**उदाहरणानि**– इयं दुन्दुभिः।

**१५. नाभिरक्षत्रिये – इयं नाभिः।**

**सूत्रार्थः** – अक्षत्रियेऽर्थे 'नाभिः' इति शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति।

**व्याख्या** – न क्षत्रियः इति अक्षत्रियः तस्मिन् अक्षत्रिये। अक्षत्रियेर्थे गम्यमाने सत्येव 'नाभि' इति शब्दस्य स्त्रीलिङ्गे प्रयोगो भवति न तु अन्यार्थे। सूत्रे नाभिः इति प्रथमान्तं पदम्, अक्षत्रिये इति सप्तम्यन्तं पदम्।

**उदाहरणानि** – इयं नाभिः = प्राण्यङ्ग विशेषः, कस्तूरी मृगनाभिर्वा।

**१६. उभावन्यत्र पुंसि – दुन्दुभिर्नाभिश्चोक्त। विषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि समुल्लसत्पङ्कजपत्र कोमलैरूपाहितश्रीण्युपनीविनाभिरिति भारविः। उच्यते-दृढं भक्तिरित्यादाविव कौमलैरिति सामान्ये नपुंसकं बोध्यम्। वस्तुतस्तु "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति" भाष्यात्पुंस्त्वमपीह साधु। अत एव नाभिर्मुख्य नृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे इति मेदिनी। रबसोप्याह। मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति। एवमेव विधेऽन्यत्रापि बोध्यम्।**

**सूत्रार्थः** – दुन्दुभिः नाभिश्च इत्येतौ शब्दौ क्रमेण अक्षादक्षत्रियाच्चान्यत्र पुल्लिङ्गे प्रयुज्येते।

**व्याख्या** – सूत्रे "उभौ" इति पदेन दुन्दुभिः, नाभिरिति शब्दौ गृह्यते। अन्यत्र अर्थात् अक्षादन्यत्र दुन्दुभिः शब्दः, क्षत्रियवाचकः नाभिशब्दश्च पुल्लिङ्गे प्रयुक्तौ भवतः इत्याशयः। सूत्रे 'पुंसि' इति सप्तम्यन्तं पदमस्ति। अतः 'नाभिः क्षत्रियः' इत्यस्मिन् प्रयोगे 'नाभि' शब्दः क्षत्रियार्थकत्वात् 'अयं नाभिः' इति प्रयुज्यते। देहमध्यवर्ति चक्रात्मकचिह्नविशेषः।

**उदाहरणानि**– अयं दुन्दुभिः। अयं नाभिः।

**विशेषः** –अस्मिन् प्रसङ्गे मूलकार भारवेः उदाहरणं प्रस्तौति – "समुल्लसत्पङ्कजपत्र–कोमलैरूपाहित श्रीण्युपनीविनाभिरिति भारविः। अत्र यत् कोमलैरित्युक्तं नाभिरित्यस्य विशेषणत्वेन तत्कथं सङ्गच्छेत् तत्समाधानार्थं मूले उच्यते – दृढं भक्तिः दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। तथाप्यरुचिं चित्ते निधाय मूले उक्तम् – वस्तुतस्तु लिङ्गं शासयितुं योग्यं न भवति शब्दानां लिङ्गस्तु लोकप्रयोगमनुसृत्य काव्यकोषनाटकादीनां प्रयोगमाधृत्य अवगन्तुं शक्यते अत एव भाष्यकारेणोक्तम् – लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति मतमाधृत्यात्र "नाभि" इति शब्दे पुंस्त्वमपि साधु।

अत्रैव मेदिनी कोषे उक्तम् –

**नाभिमुख्यनृपे चक्रमध्ये क्षत्रिययोः पुमान्।**

**द्वयोर्प्राणि प्रतीके स्यात् स्त्रियां कस्तूरिका मद इति।।**

रभस कोषकारोऽपि –

**मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः।**

**चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिका मद इति।।**

एवमेवान्यत्रापि साधुत्वं बोध्यमिति।

१७. **तलन्तः।। अयं स्त्रियां स्यात्। शुक्लस्य भावः शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता।**

**सूत्रार्थः** – तल् प्रत्ययान्ताः ये शब्दाः ते स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – तल् अन्ते यस्य सः तलन्तः (बहुव्रीहिसमासः)। तल् प्रत्ययः 'तस्यभावस्त्वत्तलौ' इति सूत्रेण विधीयते। अतः तल् प्रत्ययान्तत्वात् शुक्लस्य भावः शुक्लता इति भवति। एवमेव ''ग्रामजनबन्धुसहायेभ्यस्तल्'' इत्यनेन तल् विधीयते तदा ग्रामता, जनता, बन्धुता, सहायता इत्यादयः भवन्ति। 'देवात्तल्' इति सूत्रेण तल् प्रत्ययेन देवता इति जायते। अतः ''स्त्रियः'' अधिकारत्वात् सूत्रस्यास्य अर्थोऽयं लभ्यते यत् तल् प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते इति।

**उदाहरणानि** – इयं शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता।

१८. **भूमिविद्युत्सरिल्लतावनिताभिधानानि।। भूमिर्भूः। विद्युत्सौदामनी। सरिन्निम्नगा। लता बल्ली। वनिता योषित्।**

**सूत्रार्थः** – भूमि, विद्युत्, सरित्, लता, वनिता इत्येते शब्दाः एतेषां पर्यायवाचिनश्च स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – भूमिश्च विद्युत् च सरित् च लता च वनिता चेति भूमिविद्युत्सरिल्लतावनिताः तेषामभिधानानि (द्वन्द्वमूलकबहुव्रीहिः)। सूत्रेऽस्मिन् 'अभिधान' शब्दः पर्यायवाचकः अतः सूत्रोक्ताः शब्दास्तु स्त्रीलिङ्गे भवन्ति एव तेषां पर्यायवाचकाः शब्दा अपि स्त्रीलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्** – इयं भूमिः। विद्युत्। सरित्। लता। वनिता।

१९. **यादो नपुंसकम्।। याद शब्दः सरिद् वाचकोऽपि क्लीबं स्यात्।**

**सूत्रार्थः** – 'याद' शब्दः नपुंसकलिङ्गो भवति।

**व्याख्या** – इदं पूर्वसूत्रस्यापवादसूत्रमस्ति। 'याद' शब्दः सरित्वाचकोऽस्ति, अतः पूर्वसूत्रेणात्रापि स्त्रीत्वस्य प्राप्तिर्भवति परं तं प्रबाध्य प्रकृत सूत्रेण नपुंसकत्वं विधीयते।

**उदाहरणानि** – इदं यादः। (सरित्)

२०. **भाः स्रुक्स्रग्दिगुष्णिगुपानहः।। एते स्त्रियाँ स्युः इयं भाः इत्यादि।**

**सूत्रार्थः** – भ्रास् स्रक् स्रग् दिक् उष्णिक् उपानह् इत्येते शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – भाश्च स्रक् च स्रग् च दिक् च उष्णिक् च उपानच्चेति ते भास..........उपानहः (इतरेतरद्वन्द्वः) सूत्रोक्ताः सर्वे शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– इयं भाः। स्रक्। स्रग्। उष्णिक्। उपानत्।

२१. **स्थूणोर्णे नपुंसके च।।एते स्त्रियां क्लीवे च स्तः। स्थूणा। स्थूणम्। उर्णा। ऊर्णम्। तत्र स्थूणा काष्ठमयी द्विकर्णिका। ऊर्णा तु मेषादिलोम।**

**सूत्रार्थः** – स्थूणा ऊर्णा इत्येतौ शब्दौ स्त्रीलिङ्गे पुल्लिङ्गे च प्रयुक्तौ भवतः।

**व्याख्या** - स्थूणा च ऊर्णा चेति स्थूणोर्णे। अथवा स्थूणञ्च ऊर्णञ्चेति स्थूणोर्णे। सूत्रे चकारग्रहणेन स्त्रीत्वमपि भवति। अतएव सूत्रार्थो लभ्यते यत् इमौ द्वावपि शब्दौ नपुंसके स्त्रियां च प्रयुज्येते। यथा - १. इयं स्थूणा (काष्ठमयी द्विकर्णिका) स्त्री. इदं स्थूणम्। २. इयं ऊर्णा (मेषादिलोम) इदं ऊर्णम्।

**२२. गृहशशाभ्यां क्लीबे।। नियमार्थमिदम्। गृह शशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः। गृहस्थूणम्। शशोर्णं शशलोमनीत्यमरः।**

**सूत्रार्थः** - गृहशशाभ्यां परौ स्थूणोर्णशब्दौ नपुंसके प्रयुक्तौ स्याताम्।

**व्याख्या** - नियमार्थमिदं सूत्रम्। यतो हि पूर्वं 'स्थूणोर्णे नपुंसके च' इति सूत्रेण स्थूणा ऊर्णा इत्येतौ शब्दौ स्त्रीलिङ्गे नपुंसकलिङ्गे च निर्दिष्टौ। पुनः अनेन सूत्रेण नपुंसकविधानस्य काऽवश्यकता, अतः क्लीबपदस्य ग्रहणं व्यर्थः सति ज्ञापयति यत् गृहशब्दोत्तर स्थूणाशब्दः शशशब्दोत्तरोर्णा शब्दश्च नपुंसकलिङ्गे एव भवति इत्याशयः।

**उदाहरणानि**- इदं गृहस्थूणम्। इदं शशोर्णम्।

**२३. प्रावृट् विप्रुट् रुट्विट्त्विषः।। एते स्त्रियाँ स्युः।**

**सूत्रार्थः** - प्रावृट् विप्रुट् रुट् विट् त्विट् इत्येते शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** - प्रावृट् च विप्रुट् च रुट् च विट् च त्विट् चेति प्रावृट्विप्रुट्रुटत्विषः (इतरेतरद्वन्द्वः)। स्त्रियः अधिकारत्वात् सूत्रोक्ताः शब्दाः स्त्रीलिङ्गा भवन्ति इत्याशयः।

**उदाहरणम्** - इयं प्रावृट्। विप्रुट्। रुट्। विट्। त्विट्।

**२४. दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधि कट्यङ्गुलयः।। एते स्त्रियां स्युः। पक्षे ङीप्। दर्वी दर्विरित्यादि।**

**सूत्रार्थः** - दर्व्यादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति।

**व्याख्या** - दर्विश्च विदिश्च वेदिश्च खनिश्च शनिश्च अश्रिश्च वेशिश्च कृषिश्च ओषधिश्च कटिश्च अङ्गुलिश्चेति दर्विविदि......... कट्यङ्गुलयः (इतरेतरद्वन्द्वसमासः)। 'दर्वि' शब्दोऽयं दृ धातोः "वृदृभ्यां विन्" इति सूत्रेण विन् प्रत्यये गुणे रपरत्वे च कृते सिद्धो भवति। सर्वतोऽक्तिन्नर्थादित्येके इत्यनेन विकल्पेन ङीप् कृते सति दर्वी इत्यपि रूपं भवति। अत एव इयं दर्विः - दर्वी इति रूपद्वयं भवति।

**उदाहरणानि**- इयं दर्विः। विदिः। वेदिः। खनिः। शनिः। अश्रिः। वेशिः। कृषिः। ओषधिः। कटिः। अंगुलिः।

**२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः।। एते प्राग्वत्। इयं तिथिरित्यादि अमरस्त्वाह-तिथयो द्वयोरिति। तथा च भारविः। तस्य भुविबहुतिथास्तिथय इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्री हर्षश्च-निखिलान्निशि पौर्णिमातिथीनिति।**

**सूत्रार्थः** - तिथिनाड्यादयः रात्र्यादयश्च शब्दाः स्त्रीलिङ्गा भवन्ति।

**व्याख्या** - तिथिश्च नाडिश्च रूचिश्च वीचिश्च नालिश्च धूलिश्च किकिश्च केलिश्च छविश्च रात्र्यादयश्चेति (इतरेतरद्वन्द्वः)। रात्र्यादयः इत्यत्र रात्रिरादिः येषां ते रात्र्यादयः (बहुव्रीहिः)। स्त्र्यधिकारो वर्तते। अतः सूत्रोक्ताः तिथ्यादयः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति। 'रात्र्यादयः' इत्यत्र आदिपदेन रात्रिशब्दस्य पर्यायवाचिनः शब्दाः अपि स्त्रीलिङ्गे प्रयुक्ताः भवन्ति। यथा - रात्रिः, शर्वरी, निशा, क्षपा, रजनी, यामिनीत्यादयः। अमरकोषे तिथिशब्दः स्त्रीलिङ्गे पुंसि च प्रयुक्तोऽस्ति। अत एव मूले उक्तम् - 'तिथयो द्वयोः'। महाकवि भारविना तिथिशब्दस्य प्रयोगः स्त्रियां पुंसि च कृतः। तदुच्यते - तस्य भुवि बहुतिथास्तिथय इति। पृषोदरादित्वात् ङीपि तिथी शब्दे बहुतिथ्य इति स्यात्। श्री हर्षेणापि स्वीये नैषधचरिते लिखितम् - 'निखिलान्निशिपौर्णमातिथीन्'। इत्यत्र 'तिथि' शब्दः द्वितीयाबहुवचनान्ते शस् प्रत्यये पुल्लिङ्गे प्रयुक्तोऽस्ति।

**उदाहरणानि**- इयं तिथिः। नाडिः। रूचिः। वीचिः। नालिः। धूलिः। किकिः। केलिः। छविः। रात्रिः।

**२६. शष्कुलिराजिकुट्य शनि भृकुटि त्रुटि वलि पंक्तयः।। एतेऽपि स्त्रियाँ स्युः। इयं शष्कुलिः।**

**सूत्रार्थः** – शष्कुलिराजिकुट्यादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति।

**व्याख्या** – शष्कुलिश्च राजिश्च कुटिश्च अशनिश्च वर्तिश्च भृकुटिश्च त्रुटिश्च वलिश्च पंक्तिश्चेति शष्कुलि.........वलिपंक्तयः (इतरेतरद्वन्द्वः)। 'स्त्री' इति सूत्रस्याधिकारात् स्त्रीत्वमत्र प्राप्यते। अत एव एते सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– इयं शष्कुलिः। राजिः। कुटिः। अशनिः। वर्तिः। भृकुटिः। त्रुटिः। वलिः। पंक्तिः।

**२७. प्रतिपदापद्विपदसम्पच्छरत्संसत्परिषदुषः सम्विक्षुत्पुन्मुत्समिधः।। इयं प्रतिपदित्यादि। उषा उच्छन्ति। उषाः प्रातरधिष्ठात्रा देवता।**

**सूत्रार्थः** – प्रतिपदापत्विपदादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – प्रतिपच्च आपच्च विपच्च सम्पच्च शरच्च संसच्च परिषच्च उषाश्च क्षुच्च पुच्च मुच्च समित् चेति प्रतिपदाप......... .........समिधः (इतरेतरद्वन्द्व)। प्रतिपदादयः सर्वे शब्दाः क्विप् प्रत्ययान्ताः सन्ति। 'स्त्री' इति सूत्रस्याधिकारात् सर्वे शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः। तद्यथा– इयं प्रतिपत् इयं आपत् इत्यादयः। उषा उच्छन्ति। 'उषाः' इति पदेन प्रातरधिष्ठातृ देवतायाः निर्देशनम्।

**उदाहरणानि** – इयं प्रतिपत्। आपत्। विपत्। सम्पत्।

**२८. आशीर्धूः पूर्गीद्वारः।। इयमाशीरित्यादि।**

**सूत्रार्थः** – आशीः, धूः, पूः, गीः द्वा इत्येते शब्दाः स्त्रियां प्रयुक्ताः स्युः।

**व्याख्या** – आशीश्च धूश्च पूश्च गीश्च द्वाश्चेति ते आशीर्धूः पूर्गीर्द्वारः (इतरेतरद्वन्द्वः)। 'स्त्री' इत्यस्याधिकारो वर्तते। एतेन सूत्रोक्ताः शब्दाः स्त्रीलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – इयमाशीः। धूः। पूः। गीः। द्वाः।

**२९. अप्सुमनस्समासिकता वर्षाणां बहुत्वं च।। अवादीनां पञ्चानाम् स्त्रीत्वं स्यात् बहुत्वं च। आपः इमाः। स्त्रियः सुमनसः पुष्पम्। सुमना मालती जातिः। देववाची तु पुंस्येव। सुपर्वाणः सुमनसः। बहुत्वं प्रायिकम्। एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्य प्रयोगात्। समां समां विजायते ( १८१३ ) इत्यत्र समायां समायामिति भाष्याच्च। ''विभाषाघ्राघ्रेट्'' ( २३७६ ) इति सूत्रे अघ्रासातां सुमनसाविति वृत्ति व्याख्यायां हरदत्तोप्येवम्।**

**सूत्रार्थः** – अप् सुमनस्, समा, सिकता, वर्षा इत्येतेषां शब्दानां स्त्रीलिङ्गे बहुवचने विधानं भवति।

**व्याख्या** – आपश्च सुमनश्च समाश्च सिकताश्च वर्षाश्चेति (इतरेतरद्वन्द्वः)। तेषामिति अप्सुमनस्समासिकतावर्षाणामिति। बहुत्वम्–बहुत्वविवक्षा बोधनार्थम्। बहुत्वमत्र प्रायिकं वर्तते। विकल्पेन कुत्रचित् बहुत्वाभावेऽपि न क्षतिः। प्रमाणत्वेन 'अर्थवत्' सूत्रस्यभाष्ये ''एका च सिकता तैलदाने असमर्थेति'' अत्र सिकता पदस्य एकवचनान्तप्रयोगः भाष्यकारेण विहितः। समां समां विजायते इत्यत्रापि समायां समायां इति एकवचनान्तप्रयोगः भाष्यकारेण विहितः।

अत्रैव 'सुमना माली' इति एकवचनान्तः प्रयोगः कथम्? जात्यर्थे इति। देववाची सुमनस् शब्दस्तु पुल्लिङ्गः एव भवति। यथा अमरकोषकारेणोक्तम् – ''सुपर्वाणः सुमनसः'' इति। आचार्यहरदत्तेन ''विभाषाघ्राधेट्'' इति सूत्रे अघ्रासतां सुमनसौ इति प्रयोगः कृतः। एवं पूर्ववर्णितोदाहरणैः ज्ञातुं शक्यते यत् उक्तसूत्रेण विहितं बहुत्वं प्रायिकं वर्तते।

**उदाहरणानि** – इमा आपः। सुमनसः। समाः। सिकताः। वर्षाः।

**३०. स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः।। इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक्।**

**सूत्रार्थः** – सूत्रोक्ताः स्रक्त्वगादयः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – स्रक् च त्वक् च ज्योक् च वाक् च यवागूश्च नौ च स्फिक् चेति (इतरेतरद्वन्द्वः) ते स्रक्त्वक्........ नौस्फिजः (प्रथमाबहुवचनान्तं पदम्)। ''स्त्रीः'' इत्यस्याधिकारो वर्तते। तेन सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्** – इयं स्रक्। त्वक्। ज्योक्। वाक्। यवागूः। नौ। स्फिक्।

**३१. तृटि सीमा संबध्याः।। इयं तृटिः। सीमा। संबध्या।**

**सूत्रार्थः** – तृटि, सीमा, संबध्या इत्येते शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – तृटिश्च सीमा च संबध्या चेति ते (इतरेतरद्वन्द्वः) तृटिसीमासंबध्याः। प्रथमाबहुवचनान्तं पदम्। 'स्त्री' इत्यस्याधिकारो वर्तते। तेन सूत्रोक्ताः शब्दाः स्त्रियां प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इयं तृटिः। सीमा। संबध्या।

**३२. चुल्लिवेणिखार्यश्च।। स्पष्टम्।**

**सूत्रार्थः** – चुल्लि, वेणि, खारी इत्येते शब्दाः स्त्रीलिङ्गा भवन्ति।

**व्याख्या** – चुल्लिश्च, वेणिश्च, खारी चेति ते चुल्लिवेणिखार्यः (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। एतेषां सूत्रोक्तानां त्रयाणां स्त्रीलिङ्गे एव प्रयोगो भवति।

**उदाहरणानि**– इयं चुल्लिः। वेणिः। खारी।

**३३. ताराधाराज्योत्स्नादयश्च।।**

**सूत्रार्थः** – तारा, धारा, ज्योत्स्नादयश्च शब्दाः स्त्रीलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – ज्योत्स्ना आदिर्येषान्ते ज्योत्स्नादयः। तारा च धारा च ज्योत्स्नादयश्चेति ते ताराधाराज्योत्स्नादयः (इतरेतरद्वन्द्वः)। चकारेण स्त्रीत्वस्य ग्रहणम्। अत एव ज्योत्स्नादयः अर्थात् ज्योत्स्ना स्वयं तथा तस्य पर्यायाः चन्द्रिका, कौमुदी इत्यादयः स्त्रीलिङ्गाः भवन्ति।

**उदाहरणानि** – इयं तारा। धारा। ज्योत्स्ना।

**३४. शलाका स्त्रियां नित्यम्।। नित्यग्रहणमन्येषां क्वचिद् व्यभिचारं ज्ञापयति।**

**सूत्रार्थः** – शलाका शब्दो नित्यं स्त्रीलिङ्गे एव प्रयुज्यते।

**व्याख्या** – 'शलाका स्त्रियाम् नित्यम्' इत्यत्र नित्य ग्रहणं किमर्थम्? यतो हि 'स्त्री' इति सूत्रस्याधिकारात् अत्रापि शलाका शब्दस्य प्रयोगः स्त्रीलिङ्गे भवितुं शक्यते अतो नित्यग्रहणं व्यर्थमेव। अत्रैव नित्यग्रहणं व्यर्थं सत् बोधयति यत् नित्यपदस्य साहचर्यात् शलाकाशब्दस्य प्रयोगः स्त्रीलिङ्गे एव स्यात् न तु क्वचित् अन्येषामिव व्यभिचारः। यथा तिथि शब्दस्य स्त्रियां प्रयोगस्तु भवत्येव परं पुंस्त्वमपि पूर्वं प्रदर्शितं तथा न स्यादिति।

**उदाहरणानि**– इयं शलाका।

**इति पाणिनीयलिङ्गानुशासनेस्त्रीलिङ्गप्रकरणम्**

## – अथ पुंल्लिङ्गप्रकरणम्–

**३५. पुमान्।। अधिकारोऽयम्।**

**सूत्रार्थः**– पुमान् इति सूत्रस्य प्रकरणान्तं यावदधिकारो वर्तते।

**व्याख्या**– अधिकारसूत्रमिदम्। स्वदेशे वाक्यार्थशून्यत्वे सति स्वेतरवाक्यार्थ जनकत्वमिति।

पुमान् इति सूत्रं स्वस्मिन् अर्थबोधशून्यत्वमुपपाद्यापि स्वेतर सूत्रेषु पुंस्त्वार्थं बोधयति। अतः ''**सारथ्यातिथि कुक्षिवस्तिपाण्यञ्जलयः**'' इति प्रकरणस्यान्तिमसूत्रपर्यन्तं पुंल्लिङ्गस्याधिकारो वर्तते।

**३६. घञबन्तः।। पाकः त्यागः। करः। गरः। भावार्थ एवेदम्। नपुंसकत्व विशिष्टे भावे क्तल्युड्भ्यां, स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्वाधेन परिशेषात्। कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम्। तथा च भाष्यम् –**

**संबन्धमनुवर्तिष्यते इति।**

**सूत्रार्थः**- घञ् प्रत्ययान्तः अप् प्रत्ययान्तश्च शब्द पुंल्लिङ्गे प्रयुक्तो भवति।

**व्याख्या**- घञ् च अप् चेति घञपौ तौ अन्ते यस्य सः घञबन्तः (द्वन्द्वमूलक बहुव्रीहिः)। पुमान् ''इत्यस्यधिकारो वर्तते।'' भावे घञ्'' इति सूत्रेण विहितः घञ् प्रत्यय एवात्र ग्राह्यः। अत एव '' भावे घञ्'' इति सूत्रेण कृतघञ्प्रत्ययान्तानां शब्दानामेव पुंल्लिङ्गे प्रयोगः भवितुमर्हति न तु कर्मादौ विहितानां घञाद्यन्तानामित्याशयः।

अतएव भाष्यकारेणोक्तम्- ''सम्बन्धमनुवर्तिष्यत् इति। अर्थात् तत्तदर्थप्रत्यय विशिष्टार्थे एव प्रयुज्यते इति। एवं भावे क्त प्रत्ययान्तशब्दानां ल्युट् प्रत्ययान्तशब्दानाञ्च प्रयोगः नपुंसकलिङ्गे क्तिन्नादि प्रत्ययान्तशब्दानां प्रयोगः स्त्रीलिङ्गे भवति।

**उदाहरणानि**- घञि - अयं पाकः/ त्यागः

अपि - अयं करः/ गरः

**३७. घाजन्तश्च।। विस्तरः। गोचरः। चयः। जयः इत्यादि।**

**सूत्रार्थः**- घ प्रत्ययान्ताः अच् प्रत्ययान्ताश्च शब्दाः पुंल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**- घश्च अच् चेतित घाचौ तौ अन्ते यस्य सः घाजन्तः (द्वन्द्वमूलक बहुव्रीहिः)। पुंस्त्वस्याधिकारो वर्तते। चकारः समुच्च्यार्थकः। प्रत्ययग्रहणे प्रत्ययान्तस्य ग्रहणं भवति, अत एव सूत्रे निर्दिष्टप्रत्ययान्तशब्दाः पुंल्लिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- घ प्रत्ययान्ते- विस्तरः, गोचरः।

अच् प्रत्ययान्ते- चयः, जयः।

**३८. भयलिङ्गभगपदानि नपुंसके।। एतानि नपुंसके स्युः। भयम्। लिङ्गम्। भगम्। पदम्।**

**सूत्रार्थः**- भय, लिङ्ग, भग, पद इत्येते शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** - भयञ्च लिङ्गञ्च भगञ्च पदञ्चेति भयलिङ्गभगपदानि (इतरेतरद्वन्द्वसमासः)। नपुंसके इति विधेयं सप्तम्यन्तं पदम्। सूत्रमिदं पूर्वसूत्रस्यापवादो वर्तते। तथाहि ''चयः'' अच् प्रत्ययान्तत्वेन ''घाजन्तश्च'' इति सूत्रेण पुंल्लिङ्गे गण्यते तथैव ''भयः'' इति पदस्यापि 'भी' धातोः अच् प्रत्यये कृते सति निष्पत्तिर्भवति। अतः अच् प्रत्ययान्तत्वात् एतस्यापि गणना पुल्लिङ्गे एव भवितुं शक्यते सा न स्यात् एतदर्थमस्य सूत्रस्य विधानं कृतम्। ''अनवकाशो हि विधिरपवादः'' इति नियमः। तस्मात् भयम् इत्यादिपदानि ''भयलिङ्गभगपदानि नपुंसके'' इत्यनेन नपुंसकलिङ्गानि भवन्ति इत्याशयः।

**उदाहरणानि**- इदं भयम्/ लिङ्गम्/ भगम्/पदम्

**३९. नङन्तः।। नङ्प्रत्ययान्तः पुंसि स्यात्। यज्ञः। यत्नः।**

**सूत्रार्थः**- नङ् प्रत्ययान्तः शब्दः पुंसि स्यात्।

**व्याख्या** - नङ् अन्ते यस्य सः नङन्तः (बहुव्रीहिः)। यथा ''यज्ञः'' यज् धातोः ''यजयाचयतविच्छप्रच्छरक्षोनङ्'' इति सूत्रेण नङ् प्रत्यये कृतेऽनुबन्धलोपे च यज् न् इत्यवस्थायां स्तोः श्चुना श्चुः इत्यनेन श्चुत्वे कृते (नकारस्य ञकारे) जञोर्ज्ञः इति जाते पुंल्लिङ्गे यज्ञः इति सिद्धं भवति। अनेनैव यत् धातोः उक्तसूत्रेणैव नङ् प्रत्यये यत्नः इत्यस्यापि सिद्धिर्भवति। अत एव अनयोः द्वयोः पुंल्लिङ्गे प्रयोगो भवति।

**उदाहरणम्**- अयं यज्ञः/ अयं यत्नः/प्रश्नः।

**४०. याच्ञा स्त्रियाम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**- ''याच्ञा'' शब्दोऽयं स्त्रीलिङ्गे प्रयुज्यते

**व्याख्या**- इदं सूत्रं पूर्वसूत्रस्यापवादः। पूर्वसूत्रेण नङ्प्रत्ययान्तशब्दस्य पुंसि विधानात् ''याच्ञा'' शब्दस्यापि पुंल्लिङ्गे

गणना भवितुं शक्यते, तद्बाधनार्थं मूले आह- पूर्वसूत्रस्यापवादः। अत एव सूत्रस्य अपवादत्वेनात्र स्त्रीत्वं भवति। तेन ''याच्ञा'' याच् धातोः ''यजयाचयतविच्छप्रच्छरक्षो नङ्'' इति सूत्रेण नङ् प्रत्यये कृते सिद्धोऽयं शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति इत्याशयः।

**उदाहरणम्**- इयं याच्ञा।

''याच्ञामोघावरणमधिगुणेनाधमेलब्धकामा''।

**४१. क्यन्तो घुः।। कि प्रत्ययान्तो घुः। पुंसि स्यात्। आधिः। निधिः। उदधिः। क्यन्तः किम्? दानम्। घुः किम्? जज्ञिर्वीजम्।**

**सूत्रार्थः**- कि प्रत्ययान्ताः घुसंज्ञकाः शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**- किः अन्ते यस्य सः क्यन्तः। कि प्रत्ययोऽन्तः परो यस्मात् तादृशो घुसञ्ज्ञको धातुस्तद्घटितः शब्दः पुमान् भवति इति। ''दाधाध्वदाप्'' इति सूत्रेण दा, धा अनयोः घुसंज्ञा भवति तदनन्तरं कि प्रत्ययान्तत्वात् अनयोः पुंल्लिङ्गे प्रयोगो भवति।

**उदाहरणानि**- अयं व्याधिः/ निधिः/ उदधिः

**विशेषः** - क्यन्तग्रहणं कथम्- दानम् इति। इत्यत्र दा धातोः घुसंज्ञाभावे सूत्रस्यास्य प्रवृत्तिसम्भवात् पुंस्त्वं यथा न स्यादेतदर्थमत्र क्यन्तग्रहणम्।

'घुः' इति पदस्य ग्रहणं कथम्? जज्ञिर्बीजम्। ननु घुरितिविधानाभावात् 'जज्ञि' इत्यस्य कि प्रत्ययान्तत्वात् पुल्लिङ्गापत्तिस्तत्र भवति घुसंज्ञाभावात् सूत्रे च तस्य विधानादिति।

**४२. इषुधिः स्त्री च।। इषुधि शब्दः स्त्रियां पुंसि च। पूर्वस्यापवादः।**

**सूत्रार्थः** - इषुधिः शब्दः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुक्तो भवति।

**व्याख्या** - सूत्रमिदं पूर्वसूत्रस्यापवादः। पूर्वसूत्रेण क्यन्तघुसंज्ञकस्य पुल्लिङ्गे विधानात् अत्रापि पुंस्त्वस्यैव प्राप्तिः परं तं प्रबाध्यानेन सूत्रेण स्त्रीत्वं पुस्त्वञ्च विहितम्। अत्र ''दाधाघ्वदाप्'' इति सूत्रेण घु संज्ञा। ''कर्मण्यधिकरणे च'' इति सूत्रेण कि प्रत्ययो भवति। अतः क्यन्तघुसंज्ञकत्वेऽपि इषुधिः शब्दोऽयं न केवलं पुंस्त्वे प्रयुक्तो भवति अपितु प्रकृतसूत्रेण पक्षे स्त्रीत्वमपि भवति इत्याशयः।

**उदाहरणानि**- इयम् अयं वा इषुधिः।

**४३. देवासुरात्म-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुजकण्ठ-खड्ग-शर-पङ्कभिधानानि। एतानि पुंसि स्युः। देवाः सुराः। असुरा दैत्याः। आत्मा क्षेत्रज्ञः। स्वर्गोनाकः। गिरिः पर्वतः। समुद्रोऽब्धिः। नखः कररुहः। केशः शिरोरुहः। दन्तो दशनः। स्तनः कुचः। भुजो दोः। कण्ठो गलः। खड्गः करवालः। शरोमार्गणः। पङ्कः कर्दम् इत्यादि।**

**सूत्रार्थः** - देवासुरेत्यादयः सूत्रोक्ताः शब्दाः तेषां र्पायवाचिनश्च शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- देवश्च असुरश्च आत्मा च गिरिश्च समुद्रश्च नखश्च केशश्च दन्तश्च स्तनश्च भुजश्च कण्ठश्च खड्गश्च शरश्च पङ्कश्चेति (इतरेतरद्वन्द्वः)। तेषामभिधानानि (द्वन्द्वमूलक तत्पुरुषः) एतेन सूत्रे पठितानां शब्दानां पुंस्त्वमत्रं विहितम्।

**उदाहरणानि**- इमे देवाः सुराः। इमे असुराः, दैत्या। अयम् आत्मा, क्षेत्रज्ञः। स्वर्गः, नाकः। गिरिः पर्वतः। समुद्रः अब्धिः। नखः, कररुहः। केशः, शिरोरूहः। दन्तः, दशनः। स्तनः, कुचः। भुजः, दोः। कण्ठः, गलः। खड्गः, करवालः। शरः, मार्गणः। पङ्कः, कर्दमः।

**४४. त्रिविष्टपत्रिभुवने नपुंसके।। स्पष्टम्। तृतीयं विष्टपं त्रिविष्टपम्। स्वर्गाभिधानतया पुंस्त्वे प्राप्तेऽयमारम्भः।**

**सूत्रार्थः**– त्रिविष्टिप त्रिभुवन इत्येतौ शब्दौ नपुंसकलिङ्गे प्रयुक्तौ स्याताम्।

**व्याख्या**– त्रिविष्टपञ्च त्रिभुवनञ्चेति त्रिविष्टपत्रिभुवने (इतरेतरद्वन्द्वः)। प्रथमाद्विवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। पूर्वसूत्रस्य अपवादसूत्रमिदम्। ''देवासुर–'' इति सूत्रे निर्दिष्टानां शब्दानां तेषां पर्यायाणाञ्च प्रयोगः पुंल्लिङ्गे निर्दिष्टः, तदनुसारेण अस्मिन् सूत्रे पठितोऽयं त्रिविष्टिप् शब्दः स्वर्गस्य पर्यायोऽस्ति, अतः पुंस्त्वस्य प्राप्तिः भवति परं न स्यादेतदर्थं सूत्रेऽस्मिन् नपुंसकत्वस्य विधानं विहितम्। इदं त्रिविष्टिपम्= स्वर्गः इति।

**उदाहरणानि**– इदं त्रिविष्टिपम्/ इदं त्रिभुवनम्

४५. **द्यौः स्त्रियाम्।। द्योदिवोस्तन्त्रेणोपादानमिदम्।**

**सूत्रार्थः**– 'द्यौः' शब्दः स्त्रीलिङ्गे स्यात्

**व्याख्या** – इदमपि ''देवासुर–'' इति सूत्रस्य अपवादसूत्रम्। द्यौ शब्दः स्वर्गाभिधानवाचकः। अत एव देवासुर'' इति सूत्रेण पुंस्त्वे प्राप्ते तद्बाधनार्थमिदं सूत्रम्। एतेन 'द्यौः' शब्दः स्त्रियां प्रयुक्तो भवति इत्याशयः। द्यौः = स्वर्गः।

**उदाहरणम्**– इयं द्यौः।

४६. **इषुबाहू स्त्रियां च।। चात्पुंसि।**

**सूत्रार्थः** – इषु बाहु इत्येतौ शब्दौ स्त्रियां पुंसि च प्रयुक्तौ स्याताम्।

**व्याख्या**– इषुश्च बाहूश्चेति इषुबाहू (इतरेतद्वन्द्वः)। स्त्रियाम् इति सप्तम्यन्तं विधेयं पदम्। चकारात् पुंल्लिङ्गस्यापि ग्रहणम्। अत एव अर्थोऽयं लभ्यते यत् सूत्रोक्तौ शब्दौ स्त्रीलिङ्गे पुंल्लिङ्गे च भवतः।

**उदाहरणानि**– इयम् अयं वा इषुधिः = शरः। इयम् अयं वा बाहुः = भुजः।

४७. **बाणकाण्डौ नपुंसके च।। चात्पुंसि। त्रिविष्टपेत्यादिचतुः सूत्री देवासुरेत्यस्यापवादः।**

**सूत्रार्थः**– बाण काण्ड इत्येतौ शब्दौ पुंसि नुपंसके च लिङ्गे प्रयुक्तौ भवतः

**व्याख्या**– बाणश्च काण्डश्चेति बाणकाण्डौ (इतरेतरद्वन्द्वः)। पूर्वं देवासुर– इति सूत्रेण शराभिधानवाचकस्य शब्दस्य पुंल्लिङ्गे विधानात् बाणकाण्डौ शब्दौ नित्यं पुंस्त्वे भवेतां परं तद्वारणार्थं पुंस्त्वे नपुंसकत्वे (उभयलिङ्गे) च विधानार्थं सूत्रमिदम्। अत एव शब्दौ इमौ पुंल्लिङ्गे नपुंसकलिङ्गे च भवतः। सूत्रमिदं ''देवासुर.–'' इति सूत्रस्यापवादः। बाणः– शरः काण्डः = शरः।

**उदाहरणानि**– अयम् इयं वा बाणः। अयम् इयं वा काण्डः।

४८. **नान्तः।। अयं पुंसि। राजा। तक्षा। न च चर्मवर्मादिष्वतिव्याप्तिः, मन्द्व्यच्कोऽकर्तरि इति नपुंसकप्रकरणे वक्ष्यमाणत्वात्।**

**सूत्रार्थः**– नकारान्ताः शब्दाः पुंल्लिङ्गे प्रयुज्यन्ते।

**व्याख्या**– न अन्ते यस्य सः नान्तः (बहुव्रीहि समासः) पुंल्लिङ्गस्याधिकारो वर्तते। अत्र सूत्रानुसारेण नान्ताः शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति, अत एव आशङ्क्यते यत् चर्म (चर्मन्) वर्म (वर्मन्) इत्यादिषु प्रयोगेषु अतिव्याप्तिः स्यादिति जिज्ञासायामुच्यते– मन्नन्तः द्व्यच्कः शब्दः नपुंसकलिङ्गो भवति इत्यर्थकं ''मन्–द्व्यच्कोऽकर्तरि'' इति सूत्रं नपुंसकलिङ्गप्रकरणे वक्ष्यामः इति भावः। अत एव नान्तत्वेनापि मन् प्रत्ययान्तौ चर्म वर्म शब्दौ नपुंसकलिङ्गौ न तु पुल्लिङ्गौ।

**उदाहरणानि** – अयं राजा। अयं तक्षा।

४९. **ऋतुपुरुषकपोलगुल्फमेघाभिधानानि।।क्रतुरध्वरः। पुरुषो नरः। कपोलोगण्डः। गुल्फः प्रपदः। मेघो नीरदः।**

**सूत्रार्थ** – ऋतुपुरुषकपोलादयः शब्दाः तेषां पर्यायाश्च पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**– ऋतुश्चपुरुषश्चकपोलश्चगुल्फश्च मेघश्चेति ऋतुपुरुष कपोल गुल्फमेघाः तेषामभिधानानि

ऋतुपुरुषकपोलगुल्फमेघाभिधानानि (द्वन्द्वगर्भो बहुव्रीहिः)। सूत्रे पठिताः शब्दाः एतेषां पर्यायवाचिनश्च पुंल्लिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं ऋतुः= अध्वरः, पुरुषः= नरः कपोलः=गण्डः, गुल्फः=प्रपद, मेघः=अम्बुदः।

**५०. अभ्रं नपुंसकम्।। पूर्वस्यापवादः।**

**सूत्रार्थः** - अभ्रशब्दो नपुंसकं भवति।

**व्याख्या**- इदं सूत्रं ''ऋतुपुरुष - '' इति सूत्रस्यापवादो मेघाभिधानविषये। अभ्रशब्दः मेघशब्दस्य पर्यायो वर्तते, अतः पुंस्त्वे प्राप्ते तं प्रबाध्य ''अभ्रं नपुंसकम्'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव मूले उक्तम्- **पूर्वस्यापवादः।**

**उदाहरणानि**- इदमभ्रम्। अभ्रम् = मेघः।

**५१. उकारान्तः।। अयं पुंसि स्यात्। प्रभुः। इक्षुः। 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्'। 'द्वयोः कपोलावयवे' इति मेदिनिः। 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः। एवञ्जातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च- लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः इति। एवमन्यत्रापि।**

**सूत्रार्थः**- उकारान्तः शब्दः पुल्लिङ्गो भवति।

**व्याख्या**- उकारो अन्ते यस्य सः उकारान्तः (बहुव्रीहिः)। उकारान्तः पुंसि प्रयुज्यते इति प्रकृतसूत्रस्याशयः। एवं तु 'हनु' शब्दोऽपि उकारान्तत्वात् पुंसि एव यद्यपि स्यात् तथापि 'हनुः' इति शब्द हट्टविलासिन्यां नृत्यारम्भे व्यक्तिवाचि चार्थे स्त्रीलिङ्गेऽपि प्रयुज्यते। मेदिनीकोषकारस्य मतानुसारेण तु 'हनु' शब्दः कपोलवाचकः स्यात्तर्हि पुंसि स्त्रियां च प्रयुक्तो भवति। अमरकोषकारस्य मतानुसारेण 'करेणु' शब्दः यद्यपि उकारान्तः तथापि अयं स्त्रीलिङ्गे नैव प्रयुज्यते। एवमेव 'हनु' 'करेणु' इत्यादयः जातीयकाः शब्दाः यदा विशेषवचनैः आक्रान्ता न भवन्ति तदैव उकारान्तः इति सूत्रेण पुल्लिङ्गा भवन्ति। इदं-हि तथ्यं विद्वज्जनैरपि समर्थितं वर्तते।

तथा हि लिङ्गविशेषविधिव्यापृतो भवति, यदि विधिरयं अपवादेन बाधितो न भवति तर्हि अयं व्यापक एवाङ्गीक्रियते न तु सङ्कुचित इति मूलस्याशयः।

**उदाहरणानि**- अयं प्रभुः। अयं इक्षुः।

**५२. धेनुरज्जु-कुहु-सरयु-तनु-रेणु-प्रियङ्गवः स्त्रियाम्।**

**सूत्रार्थः**- धेनुरज्जवादयः सूत्रोक्ताः शब्दाः स्त्रीलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- धेनुश्च रज्जुश्च कुहुश्च सरयुश्च तनुश्च रेणुश्च प्रियङ्गुश्चेति धेनुरज्जुकुहूसरयूतनुरेणुप्रियङ्गवः (इतरेतरद्वन्द्वः) प्रथमान्तबहुवचनपदम्। स्त्रियाम्- इति सप्तम्यन्तं पदम्। उकारान्तः इति सूत्रस्यापवादसूत्रमिदम्। ''धेनुरज्जु.''-

सूत्रेऽस्मिन् वर्णिताः सर्वे शब्दाः उकारान्ताः सन्ति उकारान्तत्वेन पूर्ववर्णितेन ''उकारान्तः'' इति सूत्रेण पुंस्त्वं प्राप्तं भवति परं तं प्रबाध्य प्रकृत सूत्रेण नियम्यते यत् एते शब्दाः स्त्रियामेव भविष्यन्ति।

**उदाहरणानि**- इयं धेनुः। रज्जुः। कुहूः। सरयुः। तनुः। रेणुः। प्रियङ्गुः।

**५३. समासे रज्जुः पुंसि च।। कर्कटरज्वा। कर्कटरज्जुना।**

**सूत्रार्थः**- समासे 'रज्जु' शब्दः पुंसिस्त्रियाञ्च प्रयुज्यते।

**व्याख्या**- सूत्रे चकारात् स्त्रीत्वस्य प्राप्तिः भवति। ''धेनुरज्जु-'' इत्यादिना सूत्रेण रज्जु शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति परं सूत्रमिदं निर्दिशति यत् समासे रज्जुशब्दस्य प्रयोगः स्यात् तर्हि पुंस्त्वं भवति। यदि सामासिकपदं नास्ति तदा तु पूर्वसूत्रेण यथाप्राप्त स्त्रीत्वमेव भवति इति।

**उदाहरणानि**- कर्कटरज्वा (पु.)। कर्कटज्जुना (स्त्री.)।

**५४. शमश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके।।**

**सूत्रार्थः**- शमश्रुजानुवस्वादयः सूत्रे वर्णिताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या**– श्वश्रु च जानु च स्वादु च अश्रु च जतु च त्रपु च तालु चेति श्मश्रुजानुवस्वाद्वश्रुजतुत्रपुतालूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। उकारान्तः इति सूत्रस्यापवादः। अत्र उकारान्तः इति सूत्रेण पुंस्त्वं प्राप्तं भवति परं तं प्रबाध्य ''श्मश्रु जानु.–'' इति सूत्रेण विशेषविधानात् सूत्रोक्ताः शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**– इदं श्मश्रु। जानु। वसु। स्वादु। अश्रु। जतु। त्रपु। तालु।

**५५. वसुचार्थवाचि।।'अर्थवाचि' इति किम्? 'वसुर्मयूखाग्निधनाधिपेषु'।**

**सूत्रार्थः** – अर्थवाची वसुशब्दश्च नपुंसकलिङ्गे प्रयुक्तः स्यात्।

**व्याख्या**– वसुचार्थवाचि सूत्रेऽस्मिन् अर्थवाचीति पदस्य ग्रहणेन तात्पर्यमिदं प्राप्यते यत् वसु शब्दस्य नपुंसकलिङ्गे प्रयोगस्तदा एव भवति यदा स अर्थवाचकः स्यात्, भिन्नार्थवाचकश्चेत्तदा तु वसुशब्दः पुल्लिङ्गेऽपि प्रयुक्तो भवितुं शक्यते। अत एव सूत्रे मूले– 'अर्थवाचीति'' किम्– वसुर्मयुखाग्निधनाधिपेषु। अत्र 'वसुः' पुल्लिङ्गे प्रयुक्तोऽस्ति भिन्नार्थवाचकत्वात्।

**उदाहरणानि**– इदं वसु। (धनम्)

**५६. मुद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।। चात्पुंसि। अयं मद्गुः, इदं मद्गु।**

**सूत्रार्थः**– मदगुमधुसीध्वादयः शब्दाः पुंसि नपुंसके च लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**– मद्गु च मधु च सीधु च शीधु च सानु च कमण्डलु चेति मद्गुमधुसीधुशीधुसानु– कमण्डलूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तपदम्। चकारात् पुंस्त्वमपि अत्र गृह्यते। सूत्रोक्ताः शब्दाः उकारान्ताः सन्ति, तस्मादत्र ''उकारान्तः'' इति सूत्रेण पुंस्त्वे प्राप्ते परमत्र प्रकृतसूत्रेण पक्षे नपुंसकत्वस्यापि विधानं क्रियते अत एते सूत्रे वर्णिताः शब्दाः उभयलिङ्गे (पुनंपुंसके) प्रयुक्ताः सन्तु इत्याशयः।

**उदाहरणानि**– अयं मद्गुः इदं मदगु। मधुः, मधु। सीधुः, सीधु। शीधुः, शीधु। सानुः, सानु। कमण्डलुः, कमण्डलु।

**५७. रुत्वन्तः।। मेरुः। सेतुः।**

**सूत्रार्थः**– रुवर्णान्तः तुवर्णान्तश्च शब्दः पुल्लिङ्गो भवति।

**व्याख्या**– रुश्च तुश्चेति रुतू, रुतू अन्ते यस्य सः रुत्वन्तः (द्वन्द्वमूलक बहुव्रीहिः)।

मेरु– इत्यत्र मि धातोः रु प्रत्यये कृते सिद्धः।

सेतुः – इत्यत्र सि धतोः तुन् प्रत्यये कृते सिद्धः।

रुवर्णान्तत्वात् तुवर्णान्तत्वाच्च उभा एव पुल्लिङ्गे प्रयुक्तौ भवतः।

**उदाहरणानि**– अयं मेरुः। अयं सेतुः।

**५८. दारुकशेरुजतुवस्तुवस्तूनि नपुंसके। रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु।**

**सूत्रार्थः**– दारुकशेरुजत्वादयः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**– दारु च कशेरु च जतु च वस्तु च मस्तु चेति दारुकशेरुजतुवस्तूमस्तूनि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तपदम्। नपुंसके– इति सप्तम्यन्तं विधेयं पदम्। सूत्रमिदं ''रुत्वन्तः'' इति सूत्रस्यापवादः। रुप्रत्ययान्तत्वादत्र पुंस्त्वं प्राप्यते परं प्रबाध्य प्रकृतसूत्रेण नपुंसकत्वं विधीयते। ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''दारुकशेरु.–'' इति निरवकाशत्वेन ''रुत्वन्तः'' इति पूर्वसूत्रस्यापवादो वर्तते।

**उदाहरणानि**– इदं दारु। कशेरु । जतु । वस्तु / मस्तु

**५९. सक्तुर्नपुंसके च।। चात्पुंसि। सक्तुः, सक्तु।**

**सूत्रार्थः**– सक्तुशब्दः नपुंसकलिङ्गे प्रयुक्तो स्यात्।

**व्याख्या**– रुत्वन्तः इति सूत्रस्यापवादः। नुपंसके– इति सप्तम्यन्तं पदम्। सक्तुः शब्दोऽयं तु वर्णान्तः, तस्मात्

तुवर्णान्तत्वात् ''रुत्वन्तः'' इति सूत्रेण प्राप्तं पुंस्त्वं प्रबाध्य सक्तुर्नपुंसके च इति सूत्रेण पक्षे नपुंसकत्वं विधीयते। चकारादत्र पुंस्त्वमर्थोऽपि गृह्यते।

**उदाहरणानि-** अयं सक्तुः। इदं सक्तु।

**६०. प्राग्रश्मेरकारान्तः।। रश्मिर्दिवसाभिधानमिति इति वक्ष्यति, ततः प्राक् एतस्मादकारान्त इत्यधिक्रियते।**

**सूत्रार्थः-** अधिकारोऽयम्/ इत ऊर्ध्वं रश्मिदिवसाभिधानानि इत्यतः प्राक् अकारान्तः इत्यधिकृतो वेदितव्यः।

**व्याख्या-** अधिकारसूत्रमिदम्/ तत्र हि लक्षणम् ''स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थ बोधकम्''। अकारो अन्ते यस्य सः अकारान्तः (बहुव्रीहिः)। अतः रश्मिदिवसाभिधानानि इत्यतः प्राक् ''कंसं चाप्राणिनि'' इति सूत्रपर्यन्तम् ''अकारान्तः'' इत्यस्याधिकारः प्रचलिष्यति इति। तस्मात् अकारान्तशब्दानामेव लिङ्गविधानमिति तात्पर्यम्।

**६१. कोपधः।। कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः।**

**सूत्रार्थः-** ककारोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो भवति।

**व्याख्या-** क उपधायां यस्य सः कोपधः (बहुव्रीहिः)। उपधायाः स्वरूपम् ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रेण स्पष्टम्, तदनुसारेण यस्य शब्दस्य अन्त्यालः पूर्वो वर्णः ककारोऽस्ति सः कोपधः। अतः कोपधोऽकारान्तः शब्दः पुंसि प्रयुक्तो स्यादित्याशयः।

**उदाहरणानि-** अयं स्तबकः। अयं कल्कः।

**६२. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।। पूर्वसूत्रापवादः।**

**सूत्रार्थः -** चिबुकशालूकप्रातिपदिकादयः सूत्रवर्णिताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या-** चिबुकञ्च शालूकञ्च प्रातिपदिकञ्च अंशुकञ्च उल्मुकञ्चेति चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि (इतरेतरद्वन्द्वः)। प्रथमाबाहुवचनान्तपदम्। नपुंसके- इति सप्तम्यन्तं पदम्।

प्रकृतसूत्रे वर्णिताः शब्दाः कोपधाः अकारान्ताश्च अतः ''कोपधः'' इति सूत्रेणात्र पुंस्त्वे प्राप्ते तं प्रवाध्य चिबुकशालूक- इति सूत्रेण नियम्यते यत् चिबुकादयः शब्दाः नपुंसकलिङ्गे एव प्रयुक्ताः भवन्ति इति। सूत्रमिदं ''कोपधः'' इति सूत्रस्यापवादः।

**उदाहरणानि-** इदं चिबुकम्। शालूकम्। प्रातिपदिकम्। अंशुकम्। उल्मुकम्।

**६३. कण्टकनीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डककपिटकतालकफलकपुलाकानि नपुंसके च। चात्पुंसि। अयं कण्टकः, इदं कण्टकमित्यादि।**

**सूत्रार्थः-** कण्टकानीकसरकादयः सूत्रोक्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्याः-** कण्टकञ्च अनीकञ्च सरकञ्च मोदकञ्च चषकञ्च मस्तकञ्च पुस्तकञ्च तडाकञ्च निष्कञ्च शुष्कञ्च वर्चस्कञ्च पिनाकञ्च भाण्डकञ्च पिण्डकञ्च कण्टकञ्च शण्डकञ्च पिटकञ्च तालकञ्च फलकञ्च पुलाकञ्चेति कण्टकानीकसरक......... फलकपुलकानि (इतरेतरद्वन्द्वः)। इदं सूत्रं ''कोपधः'' इति सूत्रस्यपवादः। अत्र हि अकारान्तकोपधशब्दानां ''कोपधः'' इति सूत्रेण पुंस्त्वे प्राप्ते तं निषिध्य ''कण्टकानीक.'' इति सूत्रेण पक्षे नपुंसकत्वं विधीयते। अत एव प्रकृतसूत्रे पठिताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि-** अयं कण्टकः, इदं कण्टकम्। अनीकः, अनीकम्। सरकः, सरकम्। मोदकः, मोदकम्। चषकः, चषकम्। मस्तकः, मस्तकम्। पुस्तकः, पुस्तकम्। तडाकः, तडाकम्। निष्कः, निष्कम्। शुष्कः, शुष्कम्। वर्चस्कः, वर्चस्कम्। पिनाकः, पिनाकम्। भाण्डकः, भाण्डकम्। पिण्डकः, पिण्डकम्। कटकः, कटकम्। शण्डकः, शण्डकम्। पिटकः, पिटकम्। तालकः, तालकम्। फलकः, फलकम्। पुलाकः, पुलाकम्।

**६४. टोपधः।। टोपधोऽकारान्तः पुंसि स्यात्। घटः। पटः।**

**सूत्रार्थः**- टोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुज्यते।

**व्याख्या**- ट उपधायां यस्य सः टोपधः (बहुव्रीहिः) पुल्लिङ्गस्याधिकारो वर्तते। अकारान्तस्य चाधिकारत्वात् टोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो स्यादित्यर्थो लभ्यते।

**उदाहरणानि**- अयं घटः। अयं पटः

६५. **किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके।। किरीटमित्यादि।**

**सूत्रार्थः**- किरीटमुकुटललाटादयः सूत्रोक्ताः टोपधाकारान्ताः शब्दाः नपुंसकलिङ्गे भवन्ति।

**व्याख्या**- किरीटञ्च मुकुटञ्च ललाटञ्च वटञ्च विटञ्च शृङ्गाटञ्च कराटञ्च लोष्टञ्चेति किरीटमुकुटललाटवटविटश्रृंगाटकराटलोष्टानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्/ इदं सूत्रं पूर्वसूत्रस्यापवादोऽस्ति। पूर्वं ''टोपधः'' इति सूत्रेण टोपधारकारान्ताः शब्दाः पुल्लिङ्गे विहिताः तं प्रबाध्य 'किरीटमुकुट-' इति सूत्रेण सूत्रे पठिताः सर्वे शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- इदं किरीटम्। मुकुटम्। ललाटम्। वटम्। विटम्। शृंगाटम्। कराटम्। लोष्टम्

६६. **कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च।। चात्पुंसि। कुटः, कुटमित्यादि।**

**सूत्रार्थः**- कुटकूटकपाटादयः सूत्रे पठिताः टोपधाकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**- कुटञ्च कूटञ्च कपटञ्च कपाटञ्च कर्पटञ्च नटञ्च निकटञ्च कीटञ्च कटञ्चेति कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। चकारः समुच्चयार्थकः। इदं सूत्रं ''टोपधः'' इति सूत्रस्यापवादः। तत्र हि तत्सूत्रेण अकारान्तटोपधशब्दानां पुल्लिङ्गे विधानेन अस्मिन्सूत्रे वर्णितां शब्दानां पुल्लिङ्गे प्राप्ते पक्षेऽनेन सूत्रेण नपुंसकत्वं विधीयते। अतः पुंनपुंसके उभयलिङ्गे एते शब्दाः प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं कुटः, इदं कुटम्। कूटः, कूटम्। कपटः, कपटम्। कवाटः, कवाटम्। कर्पटः, कर्पटम्। नटः, नटम्। निकटः, निकटम्। कीटः, कीटम्। कटः, कटम्।

६७. **णोपधः।। णोपधोऽकारान्तः पुंसि स्यात्। गुणः। गणः। पाषाणः।**

**सूत्रार्थः**- णोपधोऽकारान्ताः शब्दाः पुल्लिङ्गे प्रयुज्यन्ते।

**व्याख्या**- ण उपधायां यस्य सः णोपधः (बहुव्रीहिः) ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रानुसारेण अन्त्यादलः पूर्वो वर्णः उपधासंज्ञकः, अतः अकारान्तः शब्दः यदि णोपधः स्यात्तर्हि पुंसि प्रयुक्तो भवेदित्याशयः

**उदाहरणानि**- अयं गुणः। गणः। पाषाणः

६८. **ऋणलवणपर्णतोरणोष्णानि नपुंसके।। पूर्वसूत्रापवादः।**

**सूत्रार्थः**- ऋणलवणपर्णादयः सूत्रोक्ताः णोपध-अकारान्ताः शब्दाः नपुंसकलिङ्गे भवन्ति।

**व्याख्या**- ऋणञ्च लवणञ्च पर्णञ्च तोरणञ्च रणञ्च उष्णञ्चेति ऋणलवणपर्णतोरणोष्णानि (इतरेतरद्वन्द्व)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। इदं सूत्रं ''णोपधः'' इति सूत्रस्यापवादः। तत्र हि वर्ण्यते यत् णोपधाकारान्ताः शब्दाः पुंसि प्रयुक्ताः स्युः तेन अत्रापि सूत्रे वर्णिताः शब्दाः पुंस्येव स्यात्, तन्निवारणर्थमेव ''ऋणलवण.-'' इति सूत्रस्य विधानं कृतम् तदनुसारेण प्रकृतसूत्रे वर्णिताः शब्दाः नपुंसकलिङ्गाः भवन्ति इत्याशयाः।

६९. **कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च। चात्पुंसि।।**

**सूत्रार्थः**- णोपध-अकारान्ताः सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या**- कार्षापणञ्च स्वर्णञ्च सुवर्णञ्च ऋणञ्च चरणञ्च वृषणञ्च विषाणञ्च चूर्णञ्च तृणञ्चेति कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारादत्र पुंस्त्वं गृह्यते। ''णोपधः'' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् ''णोपधः'' इति सूत्रेण पुंस्त्वे प्राप्ते

तं प्रवाध्य प्रकृत सूत्रेण पक्षे नपुंसकत्वमत्र विधीयते। एवं णकारोपध- अकारान्ताः प्रकृतसूत्रे वर्णिताः शब्दाः नपुंसके पुंसि च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं कार्षापणः, इदं कार्षापणम्। स्वर्णः, स्वर्णम्। सुवर्णः, सुवर्णम्। व्रणः, व्रणम्। चरणः, चरणम्। वृषणः, वृषणम्। विषाणः, विषाणम्। चूर्णः, चूर्णम्। तृणः, तृणम्।

७०. **थोपधः।। रथः।।**

**सूत्रार्थ**- थकारोपध-अकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**- थ उपधायां यस्य सः थोपधः (बहुव्रीहिः)। यथा- 'रथः' इत्यत्र अन्त्यात् पूर्ववर्णस्योपधासंज्ञकत्वात् थकारोऽत्र उपधासंज्ञकोऽस्ति। तस्मात् रथः पुंसि प्रयुक्तो स्यात्।

**उदाहरणम्**- अयं रथः।

७१. **काष्ठपृष्ठसिक्थोक्थानि नपुंसके। इदं काष्ठमित्यादि।**

**सूत्रार्थः**- थोपध-अकारान्ताः काष्ठपृष्ठादयः सूत्रोक्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**- काष्ठञ्च पृष्ठञ्च सिक्थञ्च उक्थञ्चेतित काष्ठपृष्ठसिक्थोक्थानि (इतरेतरद्वन्द्वः)। इदं सूत्रं "थोपधः" इति सूत्रस्यापदसूत्रम्। थोपध- अकारान्तशब्दस्य "थोपधः" इति सूत्रेण पुल्लिङ्गे विधानात् काष्ठपृष्ठादीनामपि पुस्त्वे प्राप्ते नपुंसकत्वं विधानार्थमिदं सूत्रम्। अत एव सूत्रोक्ताः काष्ठपृष्ठादयः शब्दाः नपुंसकलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि**- इदं काष्ठम्। पृष्ठम्। सिक्थम्। उक्थम्।

७२. **काष्ठा दिगर्था स्त्रियाम्।। इमाः काष्ठाः।**

**सूत्रार्थः**- थोपधः दिगर्थः 'काष्ठा' शब्दः स्त्रीलिङ्गे प्रयुज्यते।

**व्याख्या**- दिक् अर्थः यस्या सा दिगर्था (बहुव्रीहिः)। 'स्त्रियाम्' इति सप्तम्यन्तं पदम्। "थोपधः" इति सूत्रेण थकारोपधः पुंसि प्रयुक्तो भवति, तदनुसारेणात्रापि पुंस्त्वे प्राप्ते तं प्रबाध्य "काष्ठा दिगर्था स्त्रियाम्" इत्यनेन स्त्रीत्वं विधीयते। एवं दिक् वाचकः थोपधः काष्ठा शब्दः स्त्रीलिङ्गे भवति इत्याशयः।

**उदाहरणानि**- इयम् काष्ठा। इमाः काष्ठाः।

७३. **तीर्थ- प्रोथ- यूथ-गाथानि नपुंसके च।। चात्पुंसि। अयं तीर्थः। इदं तीर्थम्।**

**सूत्रार्थः**- तीर्थप्रोथयूथादयः थकारोपधाः अकारान्ताः शब्दाः नपुंसके पुंसि च प्रयुज्यन्ते।

**व्याख्या**- तीर्थञ्च प्रोथञ्च यूथञ्च गाथञ्चेति तीर्थप्रोथयूथगाथानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तपदम्। नपुंसके- इति सप्तम्यन्तं पदम्। चकारः समुच्चयार्थकः। चकारादत्र पुंस्त्वं गृह्यते। "थोपधः" इति सूत्रस्य अपवादसूत्रम्। "थोपधः" इति सूत्रेणात्रापि पुंस्त्वं प्राप्तं भवति तं प्रबाध्य पक्षे नपुंसकत्वविधानार्थं सूत्रमिदमुपस्थितम्। तेन सूत्रोक्ताः तीर्थप्रोथादयः शब्दाः नपुंसके पुंसि च प्रयुक्ताः भवन्ति इत्याशयः।

७४. **नोपधः।।अदन्तः पुंसि। इनः। फेनः।**

**सूत्रार्थः**- नोपधोऽकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**- न उपधायां यस्य सः नोपधः (बहुव्रीहिः)। "अलोन्त्यात्पूर्व उपधा" इति सूत्रनियमेन अन्त्यादलः पूर्ववर्णः एव उपधा, सः वर्णः नकारः, अत एव नोपधः इति। एवं नोपधोऽकारान्तः पुल्लिङ्गे प्रयुक्तो भवति इत्याशयः।

**उदाहरणानि**- अयम् इनः। अयम् केनः।

७५. **जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके।। पूर्वस्यापवादः।**

**सूत्रार्थः**- जघनाजिनतुहिनादयो नोपधाकारान्ताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**– जघनञ्च, अजिनञ्च, तुहिनञ्च, काननञ्च वनञ्च, वृजिनञ्च, विपिनञ्च, वेतनञ्च, शासनञ्च, सोपानञ्च, मिथुनञ्च, श्मशानञ्च, रत्नञ्च, निम्नञ्च चिह्नञ्चेति जघनाजिन.............चिह्नानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। नोपधः इति सूत्रस्यापवादोऽयम्। जघनाजिन- इति सूत्रस्योदाहरणेषु ''नोपधः'' इति सूत्रेण पुंस्त्वं प्राप्तं भवति तद्वारणार्थं प्रकृतसूत्रमत्रोपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शब्दाः नपुंसकलिङ्गाः भवन्ति इति नियम्यते।

**उदाहरणानि**– इदं जघनम्। अजिनम्। तुहिनम्। काननम्। वनम्। वृजिनम्। विपिनम्। वेतनम्। शासनम्। सोपानम्। मिथुनम्। श्मशानम्। रत्नम्। निम्नम्। चिह्नम्।

७६. **मान-यानाभिधान-नलिन-पुलिनोद्यान शयनासन-स्थान-चन्दनालान-समान-भवन-वसन-संभावन-विभावन-विमानानि नपुंसके च।। चात्पुंसि। अयं मानः। इदं मानम्।**

**सूत्रार्थः**– मानयानाभिधानादयः सूत्रोक्ताः नकारोपधाः अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या** – मानञ्च यानञ्च अभिधानञ्च नलिनञ्च पुलिनञ्च उद्यानञ्च शयनञ्च आसनञ्च स्थानञ्च चन्दनञ्च आलानञ्च समानञ्च भवनञ्च वसनञ्च सम्भावनञ्च विभावनञ्च विमानञ्चेति मानयाना- विमानानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। चकारस्य समुच्चयबोधकत्वात् पुंस्त्वमर्थः बोध्यते। प्रकृतसूत्रं ''नोपधः'' इति सूत्रस्यापवादः। ''नोपधः'' इति सूत्रेणात्र नकारोपधत्वात् सर्वेषु उदाहरणेषु पुस्त्वे प्राप्ते तं प्रबाध्य मानयानेत्यादि- सूत्रेण पुंस्त्वं नपुंसकत्वञ्च विहितम्।

**उदाहरणानि**– अयं मानः इदं मानम्। यानः, यानम्। अभिधानः, अभिधानम्। नलिनः, नलिनम्। पुलिनः, पुलिनम्। उद्यानः, उद्यानम्। शयनः, शयनम्। आसनः, आसनम्। स्थानः, स्थानम्। चन्दनः, चन्दनम्। आलानः, आलानम्। समानः, समानम्। भवनः, भवनम्। वसनः, वसनम्। सम्भावनः, सम्भावनम्। विभावनः, विभावनम्। विमानः, विमानम्।

७७. **पोपधः।। अदन्तः पुंसि। यूपः। दीपः। सर्पः।**

**सूत्रार्थः**– पोपधाकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति।

**व्याख्या**– पकारः उपधायामस्ति यस्य सः पोपधः (बहुव्रीहिः)। ''अलोऽन्त्यात्पूर्व उपधा'' इति सूत्रेण अन्त्यादलः अव्यवहितोत्तरपूर्ववर्णः उपधा भवति। सा उपधा पकारोऽस्ति चेत् ''पोपधः'' इत्युच्यते। एतादृशः पोपधोऽकारान्तः शब्दः पुल्लिङ्गे प्रयुक्तो भवति इत्याशयः। एवं यूपः, दीपः इत्यादयः पुंस्त्वे प्रयुक्ता भवन्ति।

**उदाहरणानि**– अयं यूपः। अयं दीपः।

७८. **पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके। इदं पापमित्यादि।**

**सूत्रार्थः**– पापरूपोडुपादयः पोपधाकारान्ताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**– पापञ्च रूपञ्च उडुपञ्च तल्पञ्च शिल्पञ्च पुष्पञ्च शष्पञ्च समीपञ्च अन्तरीपञ्चेति पापरूप- समीमान्तराणि (इतरेतरद्वन्द्वसमासः) प्रथमाबहुवचनान्तपदम्। नपुंसके- इति सप्तम्यन्तं पदम्। ''पोपधः'' इति सूत्रेण प्रकृतसूत्रस्योदाहरेणषु पुस्त्वे प्राप्ते तं प्रबाध्य ''पापरूपो-'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव सूत्रमिदं ''पोपधः'' इति सूत्रस्यापवादः।

**उदाहरणानि**– इदं पापम्। रूपम्। उडुपम्। तल्पम्। शिल्पम्। पुष्पम्। शष्पम्। समीपम्। अन्तरीपम्।

७९. **शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च।। अयं शूर्पः, इदं शूर्पमित्यादि।**

**सूत्रार्थः**– शूर्पकुतुपकुणपादयः पोपधाकारान्ताः सूत्रे वर्णिताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**– शूर्पञ्च कुतुपञ्च कुणपञ्च द्वीपञ्च विटपञ्चेति शूर्पकुतपकुणपद्वीपविटपानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि गृह्यते। इदं सूत्रं ''पोपधः'' इति सूत्रस्यापवादः। अत्र प्रकृतसूत्रस्य शूर्पकुतपकुणुपादयः शब्दाः ''पोपधः'' इति सूत्रेण पुंस्येव स्युः, तन्निवारणार्थं पक्षे नपुंसकत्वं

विधानार्थसूत्रमिदमुपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शूर्पकुतुपकुणुपादयः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**– अयं शूर्पः, इदं शूर्पम्। कुतुपः, कुतुपम्। कुणपः, कुणपम्। द्वीपः, द्वीपम्। विटपः, विटपम्।

**८०. भोपधः।। स्तम्भः। कुम्भः।**

**सूत्रार्थः**– भोपधाकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति।

**व्याख्या**– भकारः उपधायां यस्य सः भोपधः (बहुव्रीहिसमासः)। ''अलोऽन्त्यात्पूर्व उपधा'' इति सूत्र नियमेन सः एव भोपधः वाच्यः यस्मिनन्त्यलाव्यवहितपूर्वत्वविशिष्टो वर्णः भकारः स्यात्। अत एव भकारोपधा अकारान्ताः शब्दाः पुल्लिङ्गाः भवन्ति। इत्याशयः।

**उदाहरणानि**– अयं स्तम्भः। अयं पूम्भः।

**८१. तलभं नपुंसकम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**– भोपधोऽकरान्तः 'तलभशब्दः' नपुंसके प्रयुज्यते।

**व्याख्या**– ''भोपधः'' इति सूत्रेणात्रापि ''तलभ'' शब्दोऽयं पुंसि प्रयुक्तो स्यात् परं तन्निवार्य नपुंसकविधानार्थं ''तलभं नपुंसकम्'' सूत्रमिदमुपस्थाप्यते, तदनुसारेण नपुंसकलिङ्गे एतस्य प्रयोगो भवति। ''इदं तलभम्'' इत्याशयः। ''भोपधः'' इति सूत्रस्यापवादसूत्रमिदम्।

**उदाहरणम्**– इदं तलभम्।

**८२. जृम्भं नपुंसके च।। जृम्भम्। जृम्भः।**

**सूत्रार्थः**– भोपधोऽकारान्तः 'जृम्भ' शब्दः पुंसि नपुंसके च प्रयुज्यते।

**व्याख्या**– ''भोपधः'' इति सूत्रस्य अपवादोऽयम्। अत एव ''भोपधः'' इति सूत्रेण प्राप्तं पुंस्त्वं प्रबाध्य पक्षे नपुंसकत्वमनेन विधीयते। अत एव उभयलिङ्गे पुंसि नपुंसके च प्रयुक्तो भवति ''जृम्भ'' शब्दः इत्याशयः।

**उदाहरणम्**– अयं जृम्भः, इदं जृम्भम्।

**८३. मोपधः।। सोमः। भीमः।**

**सूत्रार्थः**– मोपधोऽकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**– मकारः उपधायां यस्य सः मोपधः (बहुव्रीहिः)। अलोऽन्त्यात् पूर्व उपधा इति सूत्रानुसारेण यथा ''सोम'' इति शब्दे अन्त्यालस्ति अकारः, तत्पूर्वं मकारस्योपधासंज्ञकत्वात् मोपधोऽयं शब्दः पुल्लिङ्गे प्रयुक्तो भवति इत्याशयः। एवमेव भीमादयेष्वपि भवति।

**उदाहरणानि्**– अयं सोमः। अयं भीमः।

**८४. रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके। इदं रुक्ममित्यादि।**

**सूत्रार्थः**– रूक्मसिध्मयुध्मादयः सूत्रोक्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ता भवन्ति।

**व्याख्या**– रूक्मञ्च सिध्मञ्च युध्मञ्च इध्मञ्च गुल्मञ्च अध्यात्मञ्च कुङ्कुमञ्चेति रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके– इति सप्तम्यन्तं पदम्। 'मोपधः' इति सूत्रेण मोपधोऽकारान्तस्य पुल्लिङ्गविधानं कृतं तदनुसारेण ''रूक्मसिध्म............नपुंसके'' अस्मिन् सूत्रे वर्णिताः शब्दाः पुंसि एव प्रयुक्ताः स्युः, परं न अत एव नपुंसकविधानार्थमिदं सूत्रमत्रोपस्थाप्यते। एतदनुसारेण सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः। सूत्रमिदं ''मोपधः'' इति सूत्रस्यापवादो वर्तते।

**८५. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च।। चात्पुंसि। अयं संग्रामः, इदं संग्रामम्।**

**सूत्रार्थः**– संग्रामदाडिमकुसुमादयः सूत्रोक्ताः मोपधाः अकारान्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या**– संग्रामञ्च दाडिमञ्च कुसुमञ्च आश्रमञ्च क्षेमञ्च क्षौमञ्च होमञ्च उद्दामञ्चेति

संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि (इतरेतरद्वन्द्वः)। सूत्रमिदं ''मोपधः'' इति सूत्रस्यापवादः। सूत्रे चकारग्रहणेन पुंस्त्वस्यानुवृत्तिरायाति। तथा हि ''संग्रामदाडिम.'' अस्मिन् सूत्रे पठिताः शब्दाः अकारोपधत्वात् ''मोपधः'' इति सूत्रेण पुंस्त्वे प्रयुक्ताः सन्तु परं तन्निवार्य ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''संग्रामदाडिम.'' इति अपवादसूत्रेण पक्षे नपुंसकत्वं विधीयते। तस्मादर्थोऽयं लभ्यते यत् प्रकृतसूत्रे वर्णिताः मोपधा अकारान्ताः शब्दाः पुन्नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं संग्रामः, इदं संग्रामम्। दाडिमः, दाडिमम्। कुसुमः, कुसुमम्। आश्रमः, आश्रमम्। क्षेमः, क्षेमम्। क्षौमः, क्षौमम्। होमः, होमम्। उद्दामः, उद्दामम्।

८६. **योपधः।। समयः। हयः।**

**सूत्रार्थः**- यकारोपधा अकारान्ताः शब्दाः पुंसि प्रयुक्ताः स्युः।

**व्याख्या**- यकारः उपधायामस्ति यस्य सः योपधः। (बहुव्रीहि समासः) ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रेण अन्त्यादलः अव्यवहितपूर्वो वर्णः उपधा सञ्ज्ञको भवति, तदनुसारेण 'समयः' इत्यत्र यकारः उपधासञ्ज्ञोऽस्ति अकारान्तोऽपि च। अत एव शब्दोऽयं पुल्लिङ्गे प्रयुज्यते। एवमेव अन्येषां विषयेऽपि ध्यातव्यः।

**उदाहरणानि**- अयं समयः। अयं हयः।

८७. **किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके।। स्पष्टम्।**

**सूत्रार्थः**- योपधाकारान्ताः किसलयहृदयेन्द्रियादयः सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति।

**व्याख्या**- किसलयञ्च हृदयञ्च इन्द्रियञ्च उत्तरीयञ्चेति ''किसलय..............उत्तरीयाणि'' (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। निरवकाशो हि विधिरपदवादः इत्यनेन ''योपधः'' इति सूत्रस्यापवादसूत्रमिदम्। यकारोपधत्वात् किसलयहृदयादयः शब्दाः ''योपधः'' इति सूत्रेण पुंस्त्वे प्रयुक्ताः सन्तु, तं प्रवाध्य ''किसलय.'' इति सूत्रेण नपुंसकत्वं विधीयते। अत एव ''किसलयहृदयादय.'' इति सूत्रे वर्णिताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते इत्याशयः।

**उदाहरणम्**- इदं किसलयम्। हृदयम्। इन्द्रियम्। उत्तरीयम्।

८८. **गोमयकषायमलयान्वयाव्ययानि नपुंसके च।। गोमयः। गोमयम्।**

**सूत्रार्थः**- गोमय कषायादयः सूत्रे पठिताः योपधाकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या**- गोमयञ्च कषायञ्च मलयञ्च अन्वयञ्च अव्ययञ्चेति गोमयकषाय........व्ययानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके। इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि भवति। ''योपधः'' इति सूत्रस्य अपवादसूत्रमिदम्। तथा हि ''गोमयकषायमलयान्वयाव्ययानि नपुंसके च'' सूत्रेऽस्मिन् पठिताः सर्वे शब्दाः ''योपधः'' इति सूत्रेण पुंसि प्रयुक्ताः स्युः, परं तन्निवारणार्थमेव सूत्रमिदमत्र प्रस्तूयते।

एतदनुसारेण गोमयकषायादयः शब्दाः पक्षे नपुंसकत्वमपि भवन्ति। अत एव सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं गोमयः। इदं गोमयम्। कषायः, कषायम्। मलयः, मलयम्। अन्वयः, अन्वयम्। अव्ययः, अव्ययम्।

८९. **रोपधः।। क्षुरः। अङ्कुरः।**

**सूत्रार्थः**- रोपधोऽकारान्तः शब्दः पुंसि प्रयुज्यते।

**व्याख्या**- र उपधायां यस्य सः रोपधः (बहुव्रीहिसमासः)। अकारान्तस्याधिकारात् रेफोपधोऽकारान्तः शब्दः पुंल्लिङ्गे प्रयुक्तो भवति इत्याशयः। यथा- 'क्षुरः' इत्यत्रान्त्यवर्णोऽस्ति रेफोत्तरवर्त्यकारः, तदव्यवहित पूर्वो वर्णः रेफः, सोऽस्ति उपधात्वेन अतः पुल्लिङ्गवाचकोऽयं शब्दः। एवमेव अन्येषु विषयेष्वपि प्रयोक्तव्यः।

**उदाहरणानि**- अयं क्षुरः। अयं अङ्कुरः।

**९०. द्वाराग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-नार-तीर-दूर-कृच्छ्र-रन्धाश्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर-केदारोदराजस्र-शरीर-कन्दर-पञ्जराजर-जठराजिर-वैर-चामर-पुष्कर-गह्वर-कुटीर-कुलीर-चत्वर-काश्मीर-नीराम्बर-तन्त्र-यन्त्र-क्षत्र-मित्र-कलत्र-चित्र-मूत्र-सूत्र-वक्त्र-नेत्र-गोत्राङ्गुलित्र-भलत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्रच्छत्राणि नपुंसके।। इदं दारमित्यादि।**

**सूत्रार्थः**- सूत्रे वर्णिताः द्वाराग्रस्फारतक्रादयः रेफोपधा अकारान्ताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या**- सूत्रमिदं ''रोपधः'' इति सूत्रस्यापवादः। ''रोपधः'' इति सूत्रेण रोपधोऽकारान्तः पुंल्लिङ्गे प्रयुक्तो भवति। अत एव प्रकृत सूत्रस्य सर्वे शब्दाः द्वाराग्रस्फारादयः पुंस्त्वे प्रयुक्ताः स्युः तन्निवारणार्थमेवात्र इदं सूत्रं पठितम्। तस्मात् ''द्वाराग्रस्कार.-'' इति सूत्रेण नपुंसकत्वमत्र विधीयते।

**उदाहरणानि**- इदं द्वारम्। अग्रम्। स्फारम्। तक्रम्। वक्रम्। वप्रम्। क्षिप्रम्। नारम्। तीरम्। दूरम्। कृच्छ्रम्। रन्ध्रम्। अश्रम्। श्वभ्रम्। भीरम्। गभीरम्। क्रूरम्। विचित्रम्। केयूरम्। केदारम्। उदरम्। अजस्रम्। शरीरम्। कन्दरम्। पञ्जरम्। अजरम्। जठरम्। अजिरम्। वैरम्। चामरम्। पुष्करम्। गह्वरम्। कुहरम्। कटीरम्। कुलीरम् चत्वरम्। काश्मीरम्। नीरम्। अम्बरम्। तन्त्रम्। यन्त्रम्। क्षत्रम्। क्षेत्रम्। मित्रम्। कलत्रम्। चित्रम्। मूत्रम्। सूत्रम्। वक्त्रम्। नेत्रम्। गोत्रम्। अंगुलित्रम्। भलत्रम्। शस्त्रम्। वस्त्रम्। पत्रम्। पात्रम्। छत्रम्।

**९१. शुक्रमदेवतायाम्।। इदं शुक्रं रेतः।**

**सूत्रार्थः**- रोपधोऽकारान्तः ''शुक्र शब्दः'' नपुंसकलिङ्गे प्रयुक्तो भवति देवताभिन्नार्थे।

**व्याख्या**- न देवता अदेवता (नञ्तत्पुरुषसमासः) तस्याम् अदेवतायाम्। देवतभिन्नार्थे इत्यर्थः। इदं सूत्रं ''रोपधः'' इति सूत्रस्यापवादः। ''रोपधः'' इति सूत्रेण रोपधोऽकारान्तः शब्दः पुंस्त्वे प्रयुक्तो कृतः तदनुसारेण ''शुक्र'' शब्दोऽयं रोपधोऽकारान्तत्वात् पुंस्येव स्यात्, तन्निवारणार्थं शुक्रमदेवतायाम् इति सूत्रमुपस्थाप्यते। अत एव ''शुक्र'' शब्दोऽदेवतार्थे नपुंसके प्रयुज्यते इत्याशयः।

**उदाहरणानि्**- इदम् शुक्रम् । शुक्रम। रेतः।

**९२. चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशि-शिराणि नपुंसके च।। चात्पुंसि। चक्रः, चक्रमित्यादि।**

**सूत्रार्थः**- चक्रवज्रान्धकारादयः सूत्रोक्ताः रोपधा अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या**- चक्रश्च वज्रश्च अन्धकारश्च सारश्च अवारश्च पारश्च क्षीरश्च तोमरश्च शृंगारश्च भृंगारश्च मन्दारश्च उशीरश्च तिमिरश्च शिशिरश्चेति चक्रवज्र.........तिमिर शिशिराणि (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। चकारात् पुंस्त्वमपि गृह्यते। इदं सूत्रं ''रोपधः'' इति सूत्रस्यापवादो वर्तते। रोपधाकारान्तस्य पुल्लिङ्गे विद्यानत्वेनात्रापि पुस्त्वे प्राप्ते तं प्रवाध्य पक्षे नपुंसकत्वविधानार्थमिदं सूत्रम्/एतदनुसारेण चक्रवज्रान्धकारादयः शब्दाः पुन्नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं चक्रः, इदं चक्रम्। वज्रः, वज्रम्। अन्धकारः, अन्धकारम्। सारः, सारम्। अवारः, अवारम्। पारः, पारम्। क्षीरः, क्षीरम्। तोमरः, तोमरम्। शृंगारः, शृंगारम्। भृंगारः, भृंगारम्। मन्दारः। मन्दारम्। उशीरः, उशीरम्। तिमिरः, तिमिरम्। शिशिरः, शिशिरम्।

**९३. षोपधः।। वृषः। वृक्षः।**

**सूत्रार्थः**- षोपधोऽकारान्तः शब्दः पुंसि प्रयुक्तो भवति।

**व्याख्या-** षकारः उपधायां यस्य सः षोपधः (बहुव्रीहिः)। षोपधः स एव शब्दः यो हि अन्त्यादलः अव्यवहितपूर्ववर्तिनोऽस्ति। यथा ''वृषः'' इत्यत्र अन्त्यवर्णोऽस्ति अकारः, तदव्यवहित पूर्ववर्तिनोऽस्ति षकारः तस्मादेतस्य षोपधत्वात् पुंस्त्वं भवति।

**उदाहरणानि-** अयं वृषः। अयं वृक्षः।

**९४. शिरीर्षजीर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके।**

**सूत्रार्थः-** सूत्रोक्ताः षोपधा अकारान्ताः शिरीषर्जीषाम्बरीषादयः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या-** शिरीषश्च ऋजीषश्च अम्बरीषश्च पीयूषश्च पुरीषश्च किल्बिषश्च कल्माषश्चेति शिरीषशीर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि (इतरेतरद्वन्द्वः)। ''षोपधः'' इति सूत्रस्यापदसूत्रमिदम्। ''षोपधः'' इति सूत्रेण षोपधा अकारान्ताः शब्दाः पुंल्लिङ्गे निर्धारिताः तस्मादत्रापि शिरीर्जीषाम्बरीषादयः शब्दा अपि पुंस्त्वे प्रयुक्ताः स्यु, परं तं प्रवाध्य प्रकृतसूत्रेण शिरीषर्जीषाम्बरीषादयः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इति विधानं कृतम्।

**उदाहरणानि-** इदं शिरीषम्। ऋजीषम्। अम्बरीषम्। पीयूषम्। पुरीषम्। किल्विषम्। कल्माषम्।

**९५. यूषकरीषमिषविषवर्षाणि नपुंसके च।। चात्पुंसि। अयं यूषः। इदं यूषमित्यादि।**

**सूत्रार्थः-** यूषकरीषमिषादयः षोपधा अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुज्यन्ते।

**व्याख्या-** यूषश्च करीषश्च मिषश्च विषश्च वर्षश्चेति यूषकरीषमिषवर्षाणि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्/ चकारात् पुंस्त्वमपि गृह्यते।

''षोपधः'' इति सूत्रस्यापवादसूत्रमिदम्। तत्र तेन सूत्रेण षोपधोऽकारन्तः शब्दः पुंस्त्वे प्रयुक्तः। तदनुसारेण ''यूषकरीष- '' इति सूत्रस्थाः सर्वे शब्दाः पुंल्लिङ्गाः स्युः, तं प्रबाध्य पक्षे नपुंसकत्वं प्रकृतसूत्रेण विधीयते। एतदनुसारेण यूषकरीषादयः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भविष्यन्ति इत्याशयः।

**उदाहरणानि-** अयं यूषः, इदं यूषम्। करीषः, करीषम्। मिषः, मिषम्। विषः, विषम्। वर्षः, वर्षम्।

**९६. सोपधः।। वत्सः। वायसः। महानसः।**

**सूत्रार्थः-** सोपधोऽकारान्तः शब्दः पुंसि स्यात्।

**व्याख्या-** स उपधायां यस्य स सोपधः (बहुव्रीहिः)। अलोऽन्त्यात्पूर्व उपधा इति सूत्रेण सोपधः शब्दः स एव भवति यत्र अन्त्यादलः अव्यवहित पूर्ववर्तिनो वर्णः सकारः स्यात्। अत एव ''सोपधः'' इति सूत्रेण वत्सः, वायसः महानस इत्यादिषु प्रयोगेषु सोपधत्वात् पुंस्त्वविधानं क्रियते।

**उदाहरणानि-** अयं वत्सः। वायसः। महानसः।

**९७. पनसबिसबुससाहसानि नपुंसके।**

**सूत्रार्थः-** पनस विसबुसाहसादयः सोपधा अकारान्ताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या-** पनसश्च विसश्च बुसञ्च साहसश्चेति पनसविसबुससाहसानि (इतरेतरद्वन्द्वसमासः) प्रथमाबहुवचनान्तं पदम्। नपुंसके- इति सप्तम्यन्तं पदम्। ''सोपधः'' इति सूत्रस्य अपवादसूत्रमिदम्। ''पनसविसबुस-'' नपुंसके इति सूत्रस्थाः सर्वे शब्दाः सोपधाः सन्ति तस्मादत्रापि ''सोपधः'' इति सूत्रेण पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण नपुंसकत्वं विहितम्। एतेन पनसविसबुससाहसादयः नपुंसकलिङ्गे प्रयुज्यन्त इत्याशयः।

**उदाहरणानि-** इदं पनसम्। विसम्। बुसम्। साहसम्।

**९८. चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसनिनपुंसके च।। इदं चमसम् अयं चमसः इत्यादि।**

**सूत्रार्थः**- चमसांसरसादयः सोपधाः अकारान्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या**- चमसश्च अंसश्च रसश्च निर्यासश्च उपवासश्च कार्पासश्च वासश्च भासश्च कासश्च कांसश्च मांसश्चेति चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। नपुंसके इति सप्तम्यन्तं पदम्। चकारग्रहणं पुंस्त्वविधानार्थम्। चमसांसरसा...............नुपंसके च' सूत्रेऽस्मिन् पठिताः शब्दाः ''सोपधः'' इति सूत्रस्यार्थेनान्विताः सन्ति, एतस्मात् प्रकृतसूत्रस्यापि सर्वे शब्दाः पुंस्त्वे प्रयुक्ताः स्युः। तन्निषेधार्थमेव सूत्रमिदम त्रोपस्थाप्यते, तेन सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्यर्थो लभ्यते।

**उदाहरणानि**- अयं चमसः। इदं चमसम्। अंसः, अंसम्। रसः, रसम्। निर्यासः, निर्यासम्। उपवासः, उपवासम्। कार्पासः, कार्पासम्। वासः, वासम्। भासः, भासम्। कासः, कासम्। कांसः, कासंम्। मांसः, मांसम्।

**९९. कंसं चाप्राणिनि।। कंसोऽस्त्री पानभाजनम्। प्राणिनि तु कंसो नाम कश्चिद्राजा।**

**सूत्रार्थ**- अप्राणिवाच्यः सोपधोऽकारान्तः 'कंस' शब्दः पुंसि नपुंसके च प्रयुक्तो भवति।

**व्याख्या**- न प्राणी इति अप्राणी तस्मिन् अप्राणिनि (नञ् तत्पुरुष समासः) अप्राणिनि इत्यस्याशयो वर्तते प्राणिभिन्नार्थे इति। कंसम् इति निर्देशात् ''नपुंसके च'' इत्यस्य सम्बन्धः। सूत्रे चकारग्रहणम् अकारान्ताधिकार निवृत्त्यर्थं वर्तते। अत एव सोपधोऽकारान्तः 'कंस'' शब्दः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यते इत्याशयः। प्राणिवाच्ये तु कंसो नाम कश्चिद् राजा इति बोध्यते।

**उदाहरणानि**- अयम् कंसः। इदम् कंसम्।

**१००. रश्मिदिवसाभिधानानि।। एतानि पुंसि स्युः। रश्मिर्मयूखः। दिवसो घस्त्रः।**

**सूत्रार्थः**- रश्मिदिवस इमौ शब्दौ अनयोरभिधानानि च पुंसि प्रयुज्यन्ते।

**व्याख्या**- रश्मिश्च दिवसश्च रश्मिदिवसौ अनयोरभिधाना नीति रश्मिदिवसाभिधानानि (द्वन्द्वमूलक तत्पुरुष समासः)। पुंस्त्वस्याधिकारो वर्तते। अभिधानशब्दबलात् सूत्रोक्तानां शब्दानां पर्यायवाचिनोऽपि गृह्यन्ते। अत एव अर्थोऽयं लभ्यते यत् सूत्रोक्तौ शब्दौ, एतयोः पर्यायाश्च पुंल्लिङ्गे प्रयुक्ताः भविष्यन्ति। रश्मिः= मयूखः। दिवसः = घस्त्रः इति।

**उदाहरणानि**- अयं रश्मिः। अयं दिवसः।

**१०१. दीधितिः स्त्रियाम्।। पूर्वस्यापवादः।**

**सूत्रार्थः**- ''दीधिति'' शब्दः स्त्रीलिङ्गे प्रयुक्तो भवति।

**व्याख्या**- ''दीधितिः स्त्रियाम्'' सूत्रमिदं रश्मिदिवसाभिधानानि इति सूत्रस्यापवादो वर्तते। ''दीधितिः'' शब्दोऽयं ''रश्मिः'' इति शब्दस्य पर्यायो वर्तते तस्मात् पूर्वसूत्रेण पुंस्त्वे प्राप्ते तं प्रबाध्य स्त्रीत्वविधानार्थमिदं सूत्रम्। एतेन ''दीधितिः'' शब्दोऽयं स्त्रीलिङ्गे प्रयुक्तः स्यादित्याशयः। इयं दीधितिः= रश्मिः।

**उदाहरणम्**- इयं दीधितिः।

**१०२. दिनाहनी नपुंसके।। अयमप्यपवादः।**

**सूत्रार्थः**- दिन- अहन् इत्यैतो शब्दौ नपुंसकलिङ्गे प्रयुज्येते।

**व्याख्या**- दिनं च अहश्चेति दिनाहनी। इतरेतरद्वन्द्वः। इदं सूत्रं ''रश्मि दिवसाभिधानानि'' इति सूत्रस्यापवादः। तत्र हि दिवसः शब्दः तस्य पर्यायश्च पुंल्लिङ्गे विहितः। तदनुसारेण अत्रापि पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण नुपंसकत्वं विधीयते। अत एव इदं दिनम्, इदम् अहः, इत्यनयोः नपुंसकलिङ्गे प्रयोगो भवति।

**उदाहरणानि**- इदं दिनम्। इदम् अहः।

**१०३. मानाभिधानानि।। एतानि पुंसि स्युः। कुडवः। प्रस्थः।**

**सूत्रार्थः**- मानाभिधानानि पुंल्लिङ्गे प्रयुक्तानि भवन्ति।

**व्याख्या**– मानस्य अभिधानानीति मानाभिधानानि (षष्ठी तत्पुरुष समास:)। मान शब्दस्यार्थ: परिमाण:। परिमाणशब्दस्य वाचकौ कुडप्रस्थौ स्त:। ''कुडव:'' पदमिदं ''द्वादशाङ्गलय: परिमाणविशेष:'' इत्यर्थं बोधयति। ''प्रस्थ:'' इति द्वात्रिंशत् पलस्य वाचक:। यथा इमौ द्वावपि पुंल्लिङ्गे प्रयुक्तौ भवत: तथैव अन्यान्यपि मानाभिधानानि पुंल्लिङ्गानि भवन्ति इत्याशय:।

**उदाहरणानि**– अयं कुडव:। अयं प्रस्थ:।

**१०४. द्रोणाढकौ नपुंसके च। इदं द्रोणम्। अयं द्रोण:।**

**सूत्रार्थ:**– द्रोण आढक इमौ शब्दौ पुंसि नपुंसकलिङ्गे च प्रयुक्तौ भवत:।

**व्याख्या**– द्रोणश्च आढकश्चेति द्रोणाढकौ (इतरेतरद्वन्द्व:) नपुंसके- इति सप्तयन्तं पदम्। चकारग्रहणेन पुंस्त्वमपि गृह्यते। द्रोणम् = परिमाणविशेष:। आढकम्– द्रोणस्य चतुर्थांश:।

**अष्टमुष्टिर्भवेत् कुचि कुंचयोऽष्टौ तु पुष्कलम्।**
**पुष्कलानि च चत्वारि, आढक: परिकीर्तित:।।**

''द्रोणाढकौ नुपंसके च'' इदं सूत्रं ''मानाभिधानानि'' इति सूत्रस्य अपवादरूपेण प्रयुक्तमस्ति। अत्रहि ''मानाभिधानानि'' इति सूत्रेण परिमाणवाचका: शब्दा: यथा पुंस्त्वे प्रयुक्ता: सन्ति तथैव अत्रापि स्यु: तन्निषेधार्थमेवात्र सूत्रमिदमुपस्थाप्यते। अत एवं ''द्रोणाढकौ नपुंसके च'' इति सूत्रेण द्रोणशब्द: आढक शब्दश्च पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्तौ स्यातामित्यर्थो लभ्यते।

**उदाहरणानि्**– अयं द्रोण:, इदं द्रोणम्। अयं आढक:, इदं आढकम्।

**१०५. खारी मानिके स्त्रियाम्।। इयं खारी। इयं मानिका।**

**सूत्रार्थ:**– खारी मानिका इत्येतौ शब्दौ स्त्रियां प्रयुक्तौ भवत:।

**व्याख्या**– खारी च मानिका चेति खारीमानिके (इतरेतरद्वन्द्व:)। ''मानाभिधानानि'' इति सूत्रस्य अपवादसूत्रमिदम्। तत्र हि सूत्रेण परिमाणविशेषवाचकात् शब्दात् पुंस्त्वं विधीयते तदनुसारेण खारी मानिका आभ्यां शब्दाभ्यामपि पुंस्त्वं प्राप्यते तं प्रबाध्य प्रकृत सूत्रेण स्त्रीत्वं विधीयते। खारी= षोडश द्रोणपरिमाणात्मकं पात्रम्। मानिका = परिमाण विशेष:।

**उदाहरणानि**– इयं खारी। इयं मानिका।

**१०६. दाराक्षतलाजासूनां बहुत्वं च।। इमे दारा:।**

**सूत्रार्थ:**– दारा अक्षत लाजा असु इत्येते नित्यं बहुवचनान्ता: शब्दा: पुंसि प्रयुक्ता: स्यु:।

**व्याख्या**– दाराश्च अक्षताश्च लाजाश्च असवश्चेति दाराक्षतलाजासव: तेषां दाराक्षतलाजासूनाम्। (इतरेतरद्वन्द्वसमास:) चकारात् पुंस्त्वमत्र गृह्यते। एतेन दाराक्षतादय: सूत्रे पठिता: शब्दा: नित्यं बहुवचनान्ता: पुल्लिङ्गे च प्रयुज्यन्ते इत्याशय:।

**उदाहरणम्**– इमे दारा:। अक्षता:। लाजा:। असव:।

**१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि।। यथासंख्यं नाड्याद्युपपदानि ब्रणादीनि पुंसि स्यु:। अयं नाडीब्रण:। अपाङ्ग:। जनपद:। ब्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम्।**

**सूत्रार्थ:**– नाड्यपजयोपपदानि व्रणाङ्गपदानि पुंसि प्रयुज्यन्ते।

**व्याख्या**– नाडी च अप च जनश्चेति नाड्यपजना:, नाड्यपजना: उपपदानि सन्ति येषां तानि नाड्यपजनापदानि। (द्वन्द्वमूलक बहुव्रीहिसमास:)। अत्र ''यथासंख्यमनुदेश: समानाम्'' इति सूत्रेण यथासंख्याविधि: स्वीकरणीय:। अत: यथाक्रमेण अन्वयो भवति तदनुसारेण– नाड्यपजनोपपदानि व्रणाङ्गपदानि पुंसि प्रयुक्तानि भवन्ति इत्याशय:।

**उदाहरणानि**– अयं नाडीव्रण:। अपाङ्ग:। जनपद:।

**१०८. मरुद्गरुत्तरदृत्विज:। अयं मरुत्।**

**सूत्रार्थः**- मरूत्, गरूत्, उत्तरत्, ऋत्विक्, इत्येते शब्दाः पुंसि प्रयुज्यन्ते।

**व्याख्या**- मरुत् च गरूत च उत्तरत् च ऋत्विक् चेति मरूद्गरूदुत्तरदृत्विजः (इतरेतरद्वन्द्वः)। पुंस्त्वस्याधिकारो वर्तते अतएव सूत्रे पठिताः मरूत्गरूदादयः शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति। इत्याशयः।

**उदाहरणानि**- अयं मरुत्। गरुत्। उत्तरत्। ऋत्विक्।

**१०९. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः। एते पुंसि स्युः। अयमृषिः।**

**सूत्रार्थः**- ऋषि, राशि, दृति, ग्रन्थि, कृमि, ध्वनि, बलि, कौलि, मौलि, रवि, कवि, कपि इत्येते शब्दाः पुंल्लिङ्गा भवन्ति।

**व्याख्या**- ऋषिश्च राशिश्च दृतिश्च ग्रन्थिश्च कृमिश्च ध्वनिश्च बलिश्च कौलिश्च मौलिश्च रविश्च कविश्च कपिश्चेति ऋषि-राशि-दृति...........कपि मुनयः। इतरेतरद्वन्द्वसमासः। पुंस्त्वस्याधिकारो वर्तते।

**उदाहरणानि**- अयम् ऋषिः। राशिः दृतिः। ग्रन्थिः। कृमिः। ध्वनिः। बलिः। कौलिः। मौलिः। रविः। कविः। कपिः।

**११०. ध्वजगजमुञ्जपुञ्जाः।। एते पुंसि।**

**सूत्रार्थः**- ध्वज, गज, मुञ्ज, पुञ्ज इत्येते शब्दा पुंसि प्रयुज्यन्ते।

**व्याख्या**- ध्वजश्च गजश्च मुञ्जश्च पुञ्जश्चेति ध्वजगजमुञ्जपुञ्जाः। (इतरेतरद्वन्द्वसमासः) पुल्लिङ्गस्याधिकारो वर्तते। एतेन सूत्रे पठिताः सर्वे शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं ध्वजः। गजः। मुञ्जः। पुञ्जः।

**१११. हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः। एते पुंसि। अमरस्तु 'मुहूर्तोऽस्त्रियाम्' इत्याहः।**

**सूत्रार्थः**- हस्त, कुन्त, अन्त, व्रात, वात, दूत, धूर्त, सूत, चूत, मुहूर्त इत्येते शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्या**- हस्तश्च कुन्तश्च अन्तश्च व्रातश्च वातश्च दूतश्च धूर्तश्च सूतश्च चूतश्च मुहूर्तश्चेति हस्तकुन्त..........मुहूर्ताः (इतरेतरद्वन्द्वसमासः)। पुंस्त्वस्याधिकारो वर्तते। तथा हि सूत्रे वर्णिताः सर्वे शब्दाः पुंसि प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं हस्तः। कुन्तः। अन्तः। व्रातः। वातः। दूतः। धूर्तः। सूतः। चूतः। मुहूर्तः।

**११२. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः।। अयं षण्डः।**

**सूत्रार्थः**- षण्डमण्डकरण्डादयः सूत्रे पठिताः शब्दाः पुंसि प्रयुज्यन्ते।

**व्याख्या**- षण्डश्च मण्डश्च करण्डश्च भरण्डश्च वरण्डश्च तुण्डश्च गण्डश्च मुण्डश्च पाषण्डश्च शिखण्डश्चेति षण्डमण्ड...............शिखण्डाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। एतेन सूत्रोक्ताः सर्वे शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं षण्डः। मण्डः। करण्डः। भरण्डः। वरण्डः। तुण्डः। गण्डः। मुण्डः। पाषाण्डः। शिखण्डः।

**११३. वंशांशपुरोडाशः।। अयं वंशः। पुरोदाश्यतेपुरोडाशः। कर्मणि घञ्। भवव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्ठन्' इति विकार प्रकरणे 'व्रीहे पुरोडाशे' इति च निपातनात् प्रकृतसूत्र एव निपातनाद्वा दस्यडत्वम्। पुरोडाश भुजामिष्टमिति माघः।**

**सूत्रार्थः**- वंश, अंश, पुरोडाश इत्येते शब्दाः पुंसि प्रयुक्ताः स्युः।

**व्याख्या**- वंशश्च अशंश्च पुरोडाशश्चेति वंशांशपुरोडाशाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। तेन सूत्रोक्ताः वंशांशादयः शब्दाः पुंल्लिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि**- अयं वशः। अयं अंशः अयं पुरोडाशः।

**११४. ह्रदकन्दकुन्दबुद्बुदशब्दाः।। अयं ह्रदः।**

**सूत्रार्थः**- ह्रद, कन्द, कुन्द, बुदबुद, शब्द, इत्येते शब्दाः पुंल्लिङ्गे प्रयुक्ताः स्युः।

**व्याख्याः**- ह्रदश्च, कन्दश्च, कुन्दश्च, बुदबुदश्च शब्दश्चेति ह्रदकन्दकुन्दबुदबुदशब्दाः (इतरेतरद्वन्द्वः) पुंल्लिङ्गस्याधिकारो वर्तते। तथाहि अर्थोऽयं लभ्यते यत् सूत्रोक्ता शब्दाः पुंसि प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि**- अयं ह्रदः। कन्दः। कुन्दः। बुदबुदः। शब्दः।

**११५. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः।। अयमर्घः।**

**सूत्रार्थः**- सूत्रे पठिताः अर्ध, पथिन्, मथिन् ऋभिुक्षिन्, स्तम्ब, नितम्ब, पूग, इत्येते शब्दाः पुंल्लिङ्गा भवन्ति।

**व्याख्या**- अर्घश्च पन्थाश्च मन्थाश्च त्रभुक्षाश्च स्तम्बश्च नितम्बश्च पूगश्चेति ''अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः'' (इतरेतरद्वन्द्वः)। पुंल्लिङ्गस्याधिकारो वर्तत। तस्मात् सूत्रे पठिताः सर्वे शब्दाः पुल्लिङ्गे प्रयुक्ताः स्युरिति।

**उदाहरणानि**- अयं अर्घः। पन्थाः। मन्थाः। ऋभुक्षाः। स्तम्बः। नितम्बः। पूगः।

**११६. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्ग-समुद्गपुङ्खाः।। अयं पल्ल्व इत्यादि।**

**सूत्रार्थः**- पल्लव, पल्वल, कफ रेफ कटाह निर्व्यूह, मठ, मणि, तरङ्ग, तुरङ्ग, गन्ध, स्कन्ध, मृदङ्ग, सङ्ग, समुद्ग, पुङ्ख, इत्येते शब्दाः पुंल्लिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या**- पल्लवश्च पल्वलश्च कफश्च रेफश्च कटाहश्च निर्व्यूहश्च मठश्च मणिश्च तरङ्गश्च तुरङ्गश्च गन्धश्च स्कन्धश्च मृदङ्गश्च सङ्गश्च समुद्गश्च पुङ्खश्चेति पल्लवपल्वल..........समुद्गपुङ्खाः। (इतरेतरद्वन्द्वसमासः)। पुल्लिङ्गस्याधिकारा वर्तते। तदनुसारेण सूत्रे वर्णितानां सर्वेषां शब्दानां पुंल्लिङ्गे प्रयोगो भवति इत्याशयः।

**११७. सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः।। एते पुंसि। अयं सारथिः।**

**सूत्रार्थः**- सारथि, अतिथि, कुक्षि, वस्ति, पाणि, अञ्जलि इत्येते सूत्रपठिताः शब्दाः पुंल्लिङ्गा स्युः।

**व्याख्या**- सारथिश्च अतिथिश्च कुक्षिश्च वस्तिश्च पाणिश्च अञ्जलिश्चेति सारथ्यतिथि...........पाण्यञ्जलयः (इतरेतरद्वन्द्वः) प्रथमान्तबहुवचनान्तं पदमिदम्। पुंल्लिङ्गस्याधिकारो वर्तते। एवं सूत्रे पठिताः सर्वे शब्दाः पुंस्त्वे प्रयुक्ताः भवन्ति इत्याशयः।

**। इति पाणिनीय लिङ्गानुशासने पुंल्लिङ्गप्रकरणम्।**

## अथ नपुंसकाधिकारः

**११८. नपुंसकम्।। अधिकारोऽयम्।**

**सूत्रार्थः** - अधिकारसूत्रमिदम्। 'अक्षमिन्द्रिये' इति सूत्र पर्यन्तमस्याधिकारो वर्तते।

**व्याख्या** - अधिकारो नाम ''स्वदेशे वाक्यार्थशून्यत्वे सत्युत्तरोत्तरफलजनकत्वम्''। अर्थात् 'नपुंसकम्' इति सूत्रतः पश्चात् ''अक्षमिन्द्रिये'' इति सूत्रं यावत्। इत्स्याधिकारो वर्तते।

**११९. भावे ल्युडन्तः।। हसनम्। भावे किम्-पचनोऽग्निः। इध्मप्रव्रश्चनः कुठारः।**

**सूत्रार्थः** - भावे ल्युट् प्रत्ययान्तशब्दः नपुंसकलिङ्गे प्रयुक्तो भवति।

**व्याख्या** - ल्युट् अन्ते यस्य सः ल्युडन्तः (बहुव्रीहिः) ल्युट् इति प्रत्ययः। यथा 'हसनम्' इत्यत्र हस् धातोः 'नपुंसकत्वशिष्टे भावे' ''ल्युट् च'' इति सूत्रेण ल्युटि अनुबन्धलोपे च कृते हस्+यु 'युवोरनाकौ' इति अनादेशे कृते हसन इति जाते ''भावे ल्युडन्तः'' इति सूत्रेण ल्युडन्तः शब्दः नपुंसके प्रयुज्यते तदनुसारेण प्रातिपदिकत्वात् सु विभक्तौ अमादेशे पूर्वरूपे च कृते हसनम् इति भवति। भावे अर्थे एव ल्युट् प्रत्ययान्तो नपुंसकत्वेन प्रयुज्यते तदतिरिक्ते अर्थे ल्युट् प्रत्ययान्तस्य नपुंसकत्वं न भवति। अत एव मूले पठितम् - ''भावे किम्-पचनोऽग्निः''। पच्यते अनेन इति पचनः इत्यत्र ल्युट् प्रत्ययः करणे अर्थे प्रयुक्तोऽस्ति तस्मात् नपुंसकत्वं नास्ति। एवमेव इध्मप्रवश्चन इत्यादि।

**उदाहरणानि** - हसनम्। गमनम्, पठनम्, चलनम् धावनमित्यादीनि।

**१२०. निष्ठा च। भावे या निष्ठा तदन्तं क्लीवं स्यात्। हसितम्। गीतम्।**

**सूत्रार्थः**- भावे निष्ठासंज्ञकः क्तप्रत्ययान्तः शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** - अत्रैतस्मिन् सूत्रे पूर्वसूत्रात् भावे इत्यस्यानुवृत्तिरायाति। चकारात् नपुंसकत्वमर्थः गृह्यते। अत्र हि 'क्तक्तवतू निष्ठा' इति सूत्रेण क्त, क्तवतु इत्येतौ प्रत्ययौ निष्ठासंज्ञौ स्तः। पुनश्च 'निष्ठा' इति सूत्रेण अनयो द्वयोः प्रत्ययोः विधानं क्रियते, तत्रापि ''तयोरेवकृत्यक्तखलर्थाः'' इति नियम्यते यत् क्त प्रत्ययः भावकर्मणोरेव स्यात्, यदा भावे क्त प्रत्ययो भवति तदा प्रकृतसूत्रेण नपुंसकत्वस्य विधानं क्रियते। अत एव अर्थोऽयं लभ्यते यत् भावे निष्ठासंज्ञकस्य क्तप्रत्ययान्तशब्दस्य नपुंसकत्वं भवति।

**उदाहरणानि** - इदं हसितम्। इदं गीतम्

हसितम् - हस् धातोः क्त प्रत्ययेऽनुबन्धलोपे च कृते आर्धधातुकत्वात् इडागमे कृतेऽनुवधलोपे च नपुंसकलिङ्गे प्रथमायाः एकवचने हसितम् इति सिद्धम्।

**गीतम्** - गै धातोः ''आदेच उपदेशेऽशिति'' इति सूत्रेण आत्वे कृते 'घुमास्थागापाजहातिसां हलि'' इति ईत्वे कृते निष्ठायां क्त प्रत्ययेऽनुबन्धलोपे च नपुंसकत्वे प्रथमैकवचने गीतम् इति सिद्धम्।

**१२१. त्वष्यञौ तद्धितौ।। शुक्लत्वम्। शौक्ल्यम्। ष्यञः षित्व सामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्। चातुरी सामग्रयम्। सामग्री। औचित्यम्। औचिती।**

**सूत्रार्थः** - भावे त्वप्रत्ययान्तः ष्यञ् प्रत्ययान्तश्च तद्धितः शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** - त्वश्च ष्यञश्चेति त्वष्यञौ (इतरेतद्वन्द्वः)।'प्रत्ययग्रहणे तदन्तग्रहणम्' इत्यनेन त्वप्रत्ययान्तः ष्यञ् प्रत्ययान्तश्चेति गृह्यते। भावार्थे तस्य भावस्त्वत्तलौ इत्यनेन त्व प्रत्ययः, ''गुणवचनब्राह्मणादिभ्यः'' इत्यनेन ष्यञ् प्रत्ययश्च भवति। अतः त्वष्यञौ एतौ प्रत्ययौ यदा भावे भवतः तदा निष्पन्नः शब्दः नपुंसकलिङ्गको भवति इत्याशयः। एवं त्वप्रत्ययस्योदाहरणम् - इदं शुक्लत्वम्। ष्यञ् प्रत्ययस्योदाहरणम् - इदं शौकल्यम्। ष्यञ् प्रत्ययस्य षित्वात् ''षिद्गौरादिभ्यश्च'' इति सूत्रेण स्त्रीत्वपक्षे विकल्पेन ङीष् भवति अतः पक्षे चातुर्यमपि भवति। चातुरी इति जायते।

**उदाहरणानि** - इदं शुक्लत्वम्। इदं शौक्ल्यम्। इदं चातुर्यम्। इयं चातुरी।

**१२२. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः।। ब्राह्मणस्य कर्म ब्राह्मण्यम्।**

**सूत्रार्थः** - कर्मणि भावे चार्थे विहिताः 'त्व' प्रत्ययान्ताः ष्यञ् प्रत्ययान्ताश्च ब्राह्मणादिगुवचनशब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** - ब्राह्मणः आदिर्येषान्ते ब्राह्मणादयः ब्राह्मणादयश्च गुणवचनाश्चेति ते ब्राह्मणादिगुणवचनास्तेभ्यः, ब्राह्मणादिगुणवचनेभ्यः (बहुव्रीहिगर्भोद्वन्द्व समासः)। चकारादत्र भावे इत्यर्थस्यानुवृत्तिरायाति। एतेन कर्मणि भावे चार्थे ब्राह्मणादिभ्यः गुणवचनेभ्यश्च शब्देभ्य यौ त्वष्यञौ तद्धितप्रत्ययौ विहितौ तदन्ताः शब्दाः नपुंसकलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** - (१) ब्राह्मणस्य कर्म भावो वा ब्राह्मणत्वम्, ब्राह्मण्यम्। (२) जडस्य कर्मभावो जडत्वम्, जाड्यम्।

**१२३. यद्-य-ढग् यगञण्बुञ्छाश्च भाव कर्मणि। एतदन्तानि क्लीवानि। ''स्तेनाद्यान्नलोपश्च''। स्तेयम्। सख्युर्यः। सख्यम्। 'कपि ज्ञात्योर्ढक्'। कापेयम्। 'पत्यन्त पुरोहितादिभ्यो यक्' आधिपत्यम्। 'प्राण भृज्जाति वयोवचनोद्गात्रादिभ्योऽञ्।' औष्ट्रम्। 'हायनान्तयुवादिभ्योऽण'। द्वैहायनम्। 'द्वन्द्वमनोज्ञादिभ्यो वुञ्। पिता पुत्रकम्। 'होत्राभ्यश्छः' आच्छावकीयम्। अव्ययी भाव - अधिस्त्रि।**

**सूत्रार्थः** - भावे कर्मणि चार्थे विहिताः यत्, य, ठक्, यक्, अञ्, अण्, छ, इत्येते तद्धितप्रत्ययान्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** - यच्च यश्च ढक् च यक् च अञ् च अण् च वुञ् च छश्चेति ते यद-य-ढग्-यगञण्-बुञ् छाश्च। इतरेतरद्वन्द्वः। भावे कर्मणि चेत्यर्थः पूर्व सूत्रात् गृह्यते। अतएव भावे कर्मणि चार्थे उक्तप्रत्ययान्ताः शब्दाः क्लीबे प्रयुज्यन्ते।

**उदाहरणानि - स्तेयम्** - स्तेनस्य भावः कर्म वा इत्यर्थे स्तेन शब्दात् ''स्तेनाद्यन्नलोपश्च'' इत्यनेन यत् प्रत्ययो नलोपश्च क्रियते स्तेयम्।

**सख्यम्** - सख्यु भावः कर्म वा इत्यर्थे ''सख्युर्यः'' इति सूत्रेण य प्रत्यये कृते सख्यम् इति।

**कापेयम्** - कपि शब्दात् 'कपिज्ञात्योर्ढक्' इत्यनेन ढक् प्रत्ययेऽनुबन्धलोपे च कृते ढस्य एयादेशे इकारस्य भसंज्ञायां लोपे च कृते आदिवृद्धौ कापेयम् इति।

**आधिपत्यम्** - अधिपति शब्दात् 'पत्यन्तपुरोहितादिभ्यो यक्' इत्यनेन यक् प्रत्ययेऽनुबन्धलोपे च कृते आदिवृद्धौ, इकारस्य भसंज्ञायां लोपे च कृते आधिपत्यम्।

**औष्ट्रम्** - उष्ट्र शब्दात् ''प्राणभृज्जाति वयो वचनोदगात्रादिभ्योऽञ्' इति सूत्रेणाञ् प्रत्ययो विहितः आदिवृद्धौ च औष्ट्रम् इति।

**द्वैहायनम्** - द्विहायन शब्दात् ''हायनान्त युवादिभ्योऽण्'' इति सूत्रेण अण् प्रत्यये, आदिवृद्धौ द्वैहायनम्।

**पितापुत्रकम्** - वुञ् प्रत्यये ''द्वन्द्वमनोज्ञादिभ्यो वुञ्'' इति सूत्रेण वुञि प्रत्यये पितापुत्रकम् इति।

**आच्छावकीयम्** - 'होत्राभ्यश्छः' इत्यनेन छ प्रत्यये आच्छावकीयम् इति।

एतानि सर्वाणि ''यद्- य ढग् यगञणूबुञ्छाश्च'' इति सूत्रेण नपुंसकलिङ्गानि भवन्ति।

**अधिस्त्रि** -'अव्ययीभावः' इति सूत्रेण अव्ययीभाव समाससम्पन्नः शब्दः 'अधिस्त्रि' इतिवत् नपुंसकलिङ्गो भवति।

**१२४. द्वन्दैकत्वम्। पाणिपादम्।**

**सूत्रार्थः** - द्वन्द्वसामासिकः एकत्वविशिष्टः शब्दः नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** - द्वन्द्वानामेकत्वमिति द्वन्द्वैकत्वम् (षष्ठीतत्पुरुषसमासः) ''द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'' इत्यादि द्वन्द्वैकत्वप्रकरणे स्पष्टम्, तत्र येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वसमासघटिताः शब्दाः नपुंसकत्वविशिष्टाः भवन्ति इत्याशयः।

**उदाहरणानि** - इदं पाणिपादम्। इदं शिरोग्रीवम्।

**१२५. अभाषायां हेमन्तशिशिरावहोरात्रे च। स्पष्टम्।**

**सूत्रार्थः** - हेमन्तशिशिरयोरहोरात्रयोश्च द्वन्द्वः पूर्ववल्लिङ्गो भवत्यभाषायाम्।

**व्याख्या** - न भाषा इति अभाषा तस्याम् अभाषायाम् (नञ्तत्पुरुषसमासः)। हेमन्तश्च शिशिरश्चेति तौ हेमन्तशिशिरौ (इतरेतरद्वन्द्वः)। अहश्च रात्रिश्चेत्यहोरात्रे (इतरेतरद्वन्द्वः)। चकारस्य समुच्चयार्थकत्वात् भाषाभिन्नानामेतेषां द्वन्द्वानां पूर्वशब्दवल्लिङ्गं विधीयते। एतेन ''हेमन्त शिशिरौ' अहोरात्रे अनयोः पदयोः समासात् प्राक् यस्य लिङ्गस्य प्राप्तिरासीत्तदेव लिङ्गः द्वन्द्वसमासानन्तरमपि भवेदिति आशयः।

**उदाहरणानि** - (१) हेमन्तशिशिरौ-हेमन्तश्च शिशिरश्चेति (२) अहोरात्रे - अहश्च रात्रिश्चेति, अहोरात्रे।

**१२७. अनञ् कर्मधारयस्तत्पुरुषः।। अधिकारोऽयम्।**

**सूत्रार्थः**- अधिकारोऽयम्। नञ्भिन्नः कर्मधारयभिन्नश्च तत्पुरुषो नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** - नञ् च कर्मधारयश्चतौ नञ्कर्मधारयौ, न विद्यते नञ्कर्मधारयौ यस्मिन् सः अनञ्कर्मधारयः (द्वन्द्वमूलकबहुव्रीहिः)। इदं अधिकारसूत्रं वर्तते। अस्याधिकारः 'द्विगुः स्त्रियां च व्यवस्थया' इति सूत्रपर्यन्तं वर्तते। अधिकारस्य स्वभिन्नत्वे सति स्वेतरवाक्यार्थबोधकत्वात् नञ्भिन्नः कर्मधारयभिन्नश्च तत्पुरुषः क्लीबे प्रयुक्तो भवति इति आशयः।

**१२८. अनल्पेछाया।। शरच्छायम्।**

**सूत्रार्थः** – छायान्तः नञ्भिन्नः कर्मधारयभिन्नश्च तत्पुरुषः नपुंसकलिङ्गे प्रयुज्यते बाहुल्येऽर्थे।

**व्याख्या** – न अल्पम् अनल्पम् तस्मिन् अनल्पे अर्थात् बाहुल्ये अर्थे (नञ् तत्पुरुषः)। पूर्वसूत्रात् नञ्भिन्नस्य कर्मधारयभिन्नस्य चाधिकारो वर्तते। अतएव बाहुल्येऽर्थे छायान्तो नञ्कर्मधारयरहितः तत्पुरुषसमाससयुक्तः शब्दः प्रकृतसूत्रेण नपुंसकत्वेन प्रयुक्तो भवति इत्याशयः।

**उदाहरणानि** – शरच्छायम् – शरदः छाया इत्यर्थे ''छाया बाहुल्ये'' इति सूत्रेण छायान्ततत्पुरुषस्य नपुंसकत्वे शरच्छायम् इति भवति। इदं शरच्छायम्।

**१२९. राजाऽमनुष्यपूर्वासभा।। इनसभमित्यादि।**

**सूत्रार्थः** – राजपर्यायपूर्वो मनुष्यपूर्वश्च सभान्तः नञ्कर्मधारयरहितः तत्पुरुषः नपुंसकलिङ्गे प्रयुक्तो भवति।

**व्याख्या** – न मनुष्योऽमनुष्यः (नञ् समासः) राजा च अमनुष्यश्चेति राजामनुष्यौ इति (इतरेतरद्वन्द्वः) राजाऽमनुष्यौ पूर्वौ यस्याः सा राजाऽमनुष्यपूर्वा (नञ् द्वन्द्वगर्भो बहुव्रीहिः)। प्रकरणात् नपुंसकस्याधिकारो वर्तते। अत्र राजशब्दः स्वाम्यर्थपरः न तु राज शब्दः पूर्वा इत्यर्थः। अतः कदाचित् राजशब्द पूर्वा तु स्त्रीत्वस्यैव विधानं भवति यथा – राजसभा। स्वाम्यर्थवाचकत्वे तु इदं इनसभम् इति जायते। एवमेव अमनुष्यः शब्दोऽपि राक्षसपिशाचवाचकः न तु अमनुष्य शब्द पूर्वा इत्यर्थकः। अतः रक्षः सभम् इत्येव नपुंसकत्वे भवति न तु अमनुष्यसभम्।

**उदाहरणानि** – इदं इनसभम्। इदं रक्षः सभम्।

**१३०. सुरासेनाच्छायाशालानिशा स्त्रियां च।।**

**सूत्रार्थः**– सुरान्त, सेनान्त, छायान्त, शालान्त, निशान्त इत्येताः नञ् कर्मधारयभिन्नाः तत्पुरुषसमासान्ताः शब्दाः नपुंसके स्त्रियां च प्रयुक्ताः भवन्ति।

**व्याख्या** – सुरा च सेना च छाया च शाला च निशा चेति सुरासेनाच्छायाशालानिशाः (इतरेतरद्वन्द्वः)। स्त्रियामिति सप्तम्यन्तपदम्। चकारात् नपुंसकत्वमर्थो गृह्यते। एतेन स्पष्टोऽयं भवति यत् अनञ्कर्मधारयः तत्पुरुषः नपुंसकलिङ्गे स्त्रीलिङ्गे च प्रयुज्यते। प्रकृतसूत्रस्यायमर्थः ''विभाषा सेनासुराच्छाया शालानिशानाम्'' इत्यस्मिन् सूत्रे विभाषा पदोपादानेन ध्वनितो भवति।

**उदाहरणानि** – इदं यवसुरम्। इयं यवसुरा। ब्राह्मणसेनम्, ब्राह्मणसेना। वटच्छायम्, वटच्छाया। गोशालम्, गोशाला। श्वनिशम्, श्वनिशा।

**१३१. शिष्टं परवत्।। अन्यः तत्पुरुषः परवल्लिङ्गः स्यात्।**

**सूत्रार्थः** – अन्यः तत्पुरुषसमासान्तः शब्दः परवल्लिङ्गो भवति।

**व्याख्या** – उक्तात् अन्यत् शिष्टं वर्तते। अर्थात् तत्पुरुषसमासविषये उक्तादन्यतः तत्पुरुष परवल्लिङ्गो भवतीति सूत्रस्याशयः। यथा – मयूरी च कुक्कुटश्चेति मयूरीकुक्कुटौ इमौ। अर्धं पिपल्याः इति अर्धपिप्पली।

**उदाहरणम्** – इयम् अर्धपिप्पली।

**१३२. रात्राह्नाहाः पुंसि।।**

**सूत्रार्थः** – रात्रान्तः, अह्नान्तः, अहान्तश्च नञ्कर्मधारयरहितः तत्पुरुषः पुल्लिङ्गे प्रयुक्ता भवति।

**व्याख्या** – रात्रिश्च अह्नश्च, अहश्चेति रात्राह्नाहाः। (इतरेतरद्वन्द्वः) पुंसि इति सप्तम्यन्तं विधेयपदं वर्तते। एतेन रात्र, अह्न, अह इत्येवमन्तोऽनञ् कर्मधारयः तत्पुरुषशब्दः पुल्लिङ्गे स्यात्। एतेन सूत्रस्यास्य द्विरात्रेत्याद्युदाहरणेषु 'शिष्टं परवत्' इति सूत्रनियमेन प्राप्तपरवल्लिङ्गतायाः निषेधो भवति तसमात् नपुंसकत्वं न भवति अपितु प्रकृतसूत्रेण पुंस्त्वं विधीयते।

**उदाहरणानि** – अयं द्विरात्रः। पूर्वाह्नः। द्व्यहः।

**१३३. अपथपुण्याहे नपुंसके।।**

**सूत्रार्थः** – 'अपथ' 'पुण्याह' – शब्दाविमौ क्लीबे प्रयुक्तौ भवतः।

**व्याख्या** – अपथञ्च पुण्याहञ्चेति अपथपुण्याहे। इतरेतरद्वन्द्वः। नपुंसके इति सप्तम्यन्तं विधेयंपदं वर्तते। एतेन सूत्रोक्तौ शब्दौ नपुंसकलिङ्गे प्रयुज्येते इति सूत्रस्याशयः।

**उदाहरणानि** – इदम् अपथम्। इदं पुण्याहम्।

**१३४. संख्यापूर्वारात्रिः।। त्रिरात्रम्। संख्या पूर्वेति किम्-सर्वरात्रः।**

**सूत्रार्थः** – संख्यापूर्वो रात्रि शब्दोऽनञ्कर्मधारयस्तत्पुरुषसमासान्तः क्लीबे प्रयुक्तो भवति।

**व्याख्या** – संख्या पूर्वा यस्याः सा सङ्सख्यापूर्वा इति बहुव्रीहिः। प्रकरणानुसारं नपुंसकत्वमत्र गृह्यते। अनञ् कर्मधारयस्तत्पुरुष इत्यस्याधिकारो वर्तते। सूत्रस्य मूले पठितम् – संख्यापूर्वेति किम्? तर्हि अत्र प्रस्तूयते समाधानं यत् संख्या पूर्वेति हेतोरभावे अस्य सूत्रस्य रात्रि शब्दात् पूर्वं संख्यावाचकशब्दस्याभावेऽपि प्रवृत्तिः भवितुमर्हति, अतः सर्वरात्रः इत्यादावपि प्रकृतसूत्रस्य आपत्तिः, तत्रापि नपुंकत्वस्य प्राप्तिः भवति, मा भूत् एतदर्थमेव संख्यापूर्वेति परमावश्यकम्।

**१३५. द्विगुः स्त्रियां च व्यवस्थया।। पञ्चमूली। त्रिभुवनम्।**

**सूत्रार्थः** – द्विगुसमासान्तः शब्दः नपुंसके स्त्रियाञ्च प्रयुज्यते व्यवस्थया।

**व्याख्या** – सूत्रे 'स्त्रियाम्' इति विधेयं सप्तम्यन्तं पदम्। चकारात् नपुंसकत्वस्य ग्रहणमत्र भवति। व्यवस्थया इति पदेन यथाक्रमं, यथाप्रयोगं वा स्त्रीलिङ्गे नपुंसकलिङ्गे वेति तात्पर्यम्। एतेन द्विगुसामासिकः शब्दः नपुंसके स्त्रियाञ्च व्यवस्थया भवतीत्याशयः। 'व्यवस्था' इति पदस्य तात्पर्यं 'स नपुंसकम्' २/४/१७ इत्यादि सूत्रवार्तिकेषु द्रष्टव्यम्।

**उदाहरणानि** – इदं पञ्चगवम्। दन्तोष्ठम्। पञ्चखट्वम्। पञ्चतक्षम्। पञ्चपात्रम्। त्रिभुवनम्। चतुर्युगम्।
इयं पञ्चमूली। पञ्चखट्वी। पञ्चतक्षी। त्रिलोकी।

**१३६. इसुसन्तः। हविः। धनुः।**

**सूत्रार्थः**– इसन्तः उसन्तश्च शब्दः क्लीबे प्रयुज्यते।

**व्याख्या** – इस् च उस् चेति इसुसौ, इसुसौ अन्ते यस्य स इसुसन्तः (द्वन्द्वमूलकबहुव्रीहिः)। विधिसूत्रमिदम्। नपुंसकस्याधिकारो वर्तते। एतेन सूत्रोक्तः शब्दः नपुंसकलिङ्गे प्रयुक्तो भवति इत्याशयः।

**उदाहरणानि** – इदं हविः। इदं धनुः।

**१३७. अर्चिः स्त्रियां च।। इसन्तत्वेऽपि अर्चिः। स्त्रियां नपुंसके च स्यात्। इयमिदं वा अर्चिः।**

**सूत्रार्थः**– 'अर्चिः' शब्दोऽयं नपुंसकलिङ्गे स्त्रियाञ्च प्रयुक्तो भवति।

**व्याख्या** – पूर्वसूत्रस्यापवादसूत्रमिदं वर्तते। पूर्वसूत्रेण इसन्तः उसन्तश्च शब्दः नपुंसके प्रयुक्तः कृतः, तदनुसारेण अत्रापि नपुंसकत्वस्य प्राप्तिः भवति तं प्रबाध्य अनेन सूत्रेणात्र पक्षे स्त्रीत्वमपि विधीयते, तेन 'अर्चिः' शब्दोऽयं उभयोरेव लिङ्गयोः प्रयुक्तो भवति। 'अर्चिः' हि अर्च् धातोः 'अर्चिशुचि हु सृपि छर्दिभ्यः इसि' इति उणादिसूत्रेण इस् प्रत्ययान्तोऽस्ति।

**उदाहरणानि** – इदं अर्चिः। इयं अर्चिः।

**१३८. छदिः स्त्रियामेव।। इयं छदिः। छाद्यतेऽनेनेति छदेश्चुरादिण्यन्ताद् अर्चिशुचि. इत्यादिना इस्। इस्मन्. इत्यादिनाद ह्रस्वः। 'पटलं छदिः' इत्यमरः। तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः।**

**सूत्रार्थः** – 'छदिः' शब्दोऽयं स्त्रियामेव प्रयुक्तः स्यात्।

**व्याख्या** – सूत्रमिदं 'इसुसन्तः' इत्यस्यापवादत्वेन वर्तते। अत एव इसन्तत्वात् प्राप्तं नपुंसकत्वं प्रबाध्य अत्र स्त्रीत्वमत्रानेन सूत्रेण विधीयते। ''स्त्रियाम्'' इति सप्तम्यन्तं विधेयं पदमत्र। सूत्रे 'स्त्रियामेव' इत्यत्र एवकारस्य विषये उच्यते यत् 'स्त्रियाम्' इति विशेषोपादानेनैव नित्यं स्त्रीलिङ्गस्य प्राप्तिरासीत् पुनः एवकारस्तु व्यर्थ एव। तथापि 'पटलं छदिः'

इत्यत्र अमरकोषग्रन्थदर्शनेन साहचर्यात् नपुंसकत्वमपीति भ्रमात्मकं ज्ञानं न स्यात् एतदर्थं प्रकृत सूत्रे एवकारः परमावश्यकः। अतएव मूले लिखितम् –

'अमर व्याख्यातारः उपेक्ष्याः'। छदि धातोः ''अर्चिशुचीत्यादिना'' इस् प्रत्ययान्तः शब्दोऽयं छदिः।

**उदाहरणम्** – इयं छदिः।

**१३९. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि। एतेषामभिधायकानि क्लीबे स्युः। मुखमाननम्। नयनं लोचनम्। लोहं कालम्। वनं गहनम्। मांसमामिषम्। रुधिरं रक्तम्। कार्मुकं शरासनम्। विवरं बिलम्। जलं वारि। हलं लाङ्गलम्। धनं द्रविणम्। अन्नमशनम्। अस्यापवादानाह त्रिसूच्या।**

**सूत्रार्थः** – मुखनयनलोहेत्यादयः शब्दाः एतेषां पर्यायाश्च नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – मुखञ्च नयनञ्च लोहञ्च वनञ्च मांसञ्च रुधिरञ्च कार्मुकञ्च विवरञ्च जलञ्च हलञ्च धनञ्च अन्नञ्चेति मुख-नयन-लोह-मांस-रुधिर-कार्मुक-विवर-जल-हलं-धन्नान्नानि (इतरेतरद्वन्द्वः) तेषां अभिधानानि (द्वन्द्वगर्भतत्पुरुषः)। नपुंसकस्याधिकारो वर्तते। सूत्रे अभिधानानि इति पदस्य प्रयोगात् सूत्रोक्तशब्दानां पर्यायवाचिनोऽपि गृह्यन्ते। अत एव सूत्रोक्ताशब्दाः तेषां पर्यायाः नपुंसकलिङ्गाः भवन्ति इत्याशयः। सूत्रस्यास्य मूले लिखितम् – अस्यापवादानाह त्रिसूत्र्या। अर्थात् 'मुखनयन॰' इत्यादि सूत्रे वर्णितानां शब्दानामपवादस्वरूपाः शब्दाः अग्रे त्रिषु सूत्रेषु प्रकटिताः भविष्यन्ति।

**उदाहरणानि** – मुखम्। नयनम्। लोहम्। वनम्। मांसम्। रुधिरम्। कार्मुकम्। विवरम्। जलम्। हलम्। धनम्। अन्नम्

**१४०. सीरार्थौदना पुंसि।**

**सूत्रार्थः** – सीर, अर्थ, ओदन इत्येते शब्दाः पुल्लिङ्गाः भवन्ति।

**व्याख्या** – सीरश्च अर्थश्च ओदनश्चेति सीरार्थौदनाः (इतरेतरद्वन्द्वः)। सूत्रमिदं पूर्वसूत्रस्यपवादः। अत्र सीरः-हलम्, अर्थः=धनम्, ओदनः=अन्नम् इति क्रमेण पर्यायाः सन्ति तस्मात् 'सीरार्थोदनाः' त्रिषु शब्देषु मुखनयनलोह- इति सूत्रेण नपुंसकत्वस्य प्राप्तिर्भवति परं मा भूत् एतस्मात् अत्र प्रकृत सूत्रेण पुंसत्वस्य विधानं कृतम्। तदनुसारेण एते त्रयः शब्दाः पुल्लिङ्गाः भवन्ति इत्याशयः।

अयं सीरः। अर्थः। ओदनः।

**१४१. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च।। वक्त्रो वक्त्रम्। नेत्रो नेत्रम्। अरण्योऽरण्यम्। गाण्डीवो गाण्डीवम्।**

**सूत्रार्थः**- वक्त्र, नेत्र, अरण्य, गाण्डीव इत्येते शब्दाः नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुज्यन्ते।

**व्याख्या** – वक्त्रञ्च नेत्रञ्च अरण्यञ्च गाण्डीवञ्च इति वक्त्रनेत्रारण्यगाण्डीवानि प्रथमाबहुवचनान्तं पदम् (इतरेतरद्वन्द्वसमासः) चकारात् नपुंसकत्वमर्थोऽपि गृह्यते। इदं सूत्रं ''मुखनयनलोह-'' इति सूत्रस्यापवादः। तथाहि वक्त्र, नेत्र, अरण्य, गाण्डीव, इत्येते शब्दाः क्रमेण मुखनयनवनकार्मुकाभिधानत्वादत्र 'मुखनयनलोह' इति सूत्रेण नपुंसकत्वमत्र प्राप्यते तं प्रबाध्य प्रकृत सूत्रेणात्र पक्षे पुंसत्वस्य विधानं कृतं तस्मात्-सूत्रोक्ताः शब्दाः पुंनपुंसके प्रयुक्ताः भवन्ति।

यथा – अयं वत्र :। इदं वक्त्रम्। नेत्रः-नेत्रम्। अरण्यः-अरण्यम्। गाण्डीवः-गाण्डीवम्।

**१४२. अटवी स्त्रियाम्।।**

**सूत्रार्थः**- 'अटवी' शब्दोऽयं स्त्रियां प्रयुज्यते।

**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। सूत्रमिदं 'मुखनयनलोह-' इति सूत्रस्यापवादो वर्तते। 'अटवी' शब्दोऽयं वनाभिधानत्वादत्र नपुंसकत्वं 'मुखनयन-' इति सूत्रेण प्राप्यते तं प्रवाध्य 'अटवी स्त्रियाम्' इति सूत्रेण स्त्रीत्वं विहितम्।

**उदाहरणम्** – इयं अटवी।

**१४३. लोपधः।।**

**सूत्रार्थः**- लोपधः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – लकार: उपधायां यस्य स: लोपध: (बहुव्रीहि:)। उपधा इति विषये 'अलोऽन्त्यात् पूर्व उपधा' इति सूत्रे स्पष्टम्, तदनुसारेण अन्त्याल: अव्यवहितपूर्ववर्ण: उपधा भवति। एवं यदि उपधायां लकारो भवति तदा तादृश: शब्द: नपुंसकलिङ्ग: भवति इत्याशय:। प्रकरणत्वात् नपुंसकस्याधिकारो वर्तते।

**उदाहरणानि** – इदं कुलम्। कूलम्। स्थलम्।

**१४४. तूलोपलतालकुसूलतरलकम्बलदेवलवृषला: पुंसि।। अयं तूल:।**

**सूत्रार्थ:** – तूलोपलतालादय: सूत्रोक्ता: लोपधा: शब्दा: पुल्लिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – तूलश्च उपलश्च तालश्च कुसूलश्च कम्बलश्च देवलश्च वृषलश्चेति तूलोपलतालकुसूलकम्बलदेवल वृषला: (इतरेतरद्वन्द्व:)। पुंसि इति सप्तम्यन्तं विधेयं पदम्। पूर्वसूत्रस्यापवादो वर्तते। तथाहि 'लोपध:' इति सूत्रेण अत्रापि नपुंसकत्वं प्राप्यते तं प्रबाध्यानेन सूत्रेण पुंस्त्वं विधीयते। अत एव तूलोपलतालादय: शब्दा: पुल्लिङ्गा: भवन्ति इत्याशय:।

**उदाहरणानि** – अयं तूल:। उपल:। ताल:। कुसूल:। कम्बल:। देवल:। वृषल:।

**१४५. शीलमूलमङ्गलसालकमलतलमुसलकुण्डपललमृणालवालनिगलपलालविडालखिलशूला:।। पुंसि च। चात्क्लीबे। इदं शीलमित्यादि।**

**सूत्रार्थ:** – शीलमूलमङ्गलादय: सूत्रोक्ता: शब्दा: क्लीबे पुंसि च प्रयुक्ता: भवन्ति।

**व्याख्या** – शीलश्च मूलश्च मङ्गलश्च सालश्च कमलश्च तलश्च मुसलश्च कुण्डलश्च पललश्च मृणालश्च वालश्च निगलश्च पलालश्च विडालश्च खिलश्च शूलश्चेत्येतेषु शब्देषु इतरेतरद्वन्द्व:। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। इदं सूत्रं लोपध: इति सूत्रस्यापवादो वर्तते। अतएव 'लोपध:' इति सूत्रेण प्राप्त नपुंसकत्वं प्रबाध्य अनेन सूत्रेण पक्षे पुंस्त्वस्य विधानं विहितम्, तस्मादत्र अर्थोऽयं लभ्यते यत् सूत्रोक्ता: शब्दा: नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्ता: भवन्ति इति।

**उदाहरणानि** – इदं शीलम्। अयं शील:। मूलम्-मूल:। मङ्गलम्-मङ्गल:। सालम्-साल:। कमलम्-कमल:। तलम्-तल:। मुसलम्-मुसल:। कुण्डलम्-कुण्डल:। मृणालम्-मृणाल:। वालम्-वाल:। निगलम्-निगल:। पलालम्-पलाल:। विडालम्-विडाल:। खिलम्-खिल:। शूलम्-शूल:।

**१४६. शतादि: संख्या।। शतम्। सहस्रम्। शतादिरिति किम्? एको द्वौ बहव:। संख्येति किम्? शतशृङ्गो नाम पर्वत:।**

**सूत्रार्थ:** – संख्यावाचका: शतादिशब्दा: नपुंसकलिङ्गे प्रयुक्ता: भवन्ति।

**व्याख्या** – शतादिर्यस्य स: शतादि: (बहुव्रीहि: समास:) आदि पदेनात्र सहस्रादय शब्दा: गृह्यन्ते। नपुंसकस्याधिकारो वर्तते। सूत्रे शतादिरिति पदस्य ग्रहणं कथमिति चेत् उच्यते – एक:, द्वौ बहव: इत्यत्रापि प्रकृतसूत्रस्य प्राप्तिर्भवति, तन्निवारणार्थमेवात्र शतादिपदग्रहणमावश्यकम्। संख्येति किमिति चेदुच्यते – ''संख्या इति पदाभावे'' शतशृंगो नाम पर्वत: इत्यत्रापि अनेन सूत्रेण नपुंसकत्वस्य विधानं भविष्यति तन्मा भूत् एतदर्थं सूत्रे संख्यापदग्रहणमावश्यकम्।

**उदाहरणानि** – इदं शतम्। इदं सहस्रम्।

**१४७. शतायुत प्रयुता: पुंसि च।। अयं शत:, इदं शतमित्यादि।**

**सूत्रार्थ:**– शत, अयुत, प्रयुत इत्येते संख्यावाचका: शब्दा: नपुंसकलिङ्गे पुंल्लिङ्गे च प्रयुक्ता: भवन्ति।

**व्याख्या** – शतश्च अयुतश्च प्रयुतश्चेति शतायुतप्रयुता: (इतरेतरद्वन्द्व:) प्रथमाबहुवचननान्तं पदम्। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात नपुंसकत्वत्र गृह्यते। इदं सूत्रं 'शतादि संख्या' इति सूत्रस्यापवादो वर्तते। तेन अत्र प्राप्तनपुंसकत्वं प्रबाध्य प्रकृतसूत्रेण पक्षे पुंस्त्वमपि विधीयते। अतएव सूत्रार्थोऽयं लभ्यते यत् सूत्रोक्ता: शब्दा: नपुंसके पुंसि च प्रयुज्यन्ते इति।

**उदाहरणानि** – अयं शत:। इदं शतम्। अयं अयुत:। इदं अयुतम्। अयं प्रयुत:। इदं प्रयुतम्।

**१४८. लक्षा कोटिः स्त्रियाम्।। इयं लक्षा। इयं कोटिः। 'वा लक्षा नियुतं च तत्' इत्यमरात्क्लीबेऽपि लक्षम्।**

**सूत्रार्थः** – लक्षा कोटि इत्येतौ संख्यावाचकौ शब्दौ स्त्रीलिङ्गे प्रयुज्येते।

**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। पूर्वसूत्रेण ''शतादि संख्या'' इत्यनेन नपुंसकविधानात् अपवादस्वरूपेण सूत्रमिदम्। तेन सूत्रोक्तौ शब्दौ नपुंसके न प्रयुक्तौ भवतः अपितु प्रकृतसूत्रेण स्त्रीलिङ्गे प्रयुज्येते। ''लक्षा नियुतं च तदित्यमरात्'' इत्यनेन अमरकोशे लक्षाशब्दः नपुंसकेऽपि प्रयुक्तोऽस्ति। अत एव इदं लक्षमपि भवति। मूले लिखितम् – क्लीबेऽपि लक्षम्।

**उदाहरणानि** – इयं लक्षा। इयं कोटिः।

**१४९. शङ्कुः पुंसि।।**

**सूत्रार्थः** – संख्यावाचकः 'शङ्कुः' शब्दः पुल्लिङ्गे प्रयुक्तो भवति।

**व्याख्या** – ''शतादि संख्या'' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् 'शतादि संख्या' इति सूत्रेण प्राप्तनपुंसकत्वमत्र न भवति अपितु तं प्रबाध्य प्रकृतसूत्रेण पुंस्त्वं भवति।

**उदाहरणम्** – अयं शङ्कुः।

**१५०. सहस्रः क्वचित।। अयं सहस्रः। इदं सहस्रम्।**

**सूत्रार्थः** – क्वचिदर्थविशेषे संख्यावाचकः 'सहस्र' शब्दः पुंसि क्लीबे च प्रयुक्तो स्यात्।

**व्याख्या** – इदं सूत्रं 'शतादि संख्या इति सूत्रस्यापदरूपेण वर्तते। संख्यावाचकत्वादत्र शतादि संख्या इति सूत्रेण नपुंसकत्वस्य प्राप्तिर्भवति परमत्र प्रकृतसूत्रेण क्वचिदर्थविशेषे 'सहस्र' शब्दः पुल्लिङ्गेऽपि प्रयुज्यते। तेन उभयलिङ्गोऽयं शब्दः 'सहस्रः' ''सहस्रम्'' द्विधा प्राप्यते। यथा – ''सहस्रशीर्षापुरुषः'' इत्यत्र वेदमन्त्रे सहस्र शब्दः अनन्ततायाः वाचकः अत एवार्थविशेषवाचकत्वात् अयं पुल्लिङ्गे प्रयुक्तोऽस्ति।

**उदाहरणानि** – अयं सहस्रः। इदं सहस्रम्।

**१५१. मन्द्व्य्च्कोऽकर्तरि। मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यान्न तु कर्तरि। वर्म। चर्म। द्व्यच्कः किम्? अणिमा। महिमा। अकर्तरि किम्, ददाति इति दामा।**

**सूत्रार्थः** – अकर्तरि मनन्तो द्व्य्च्कः शब्दः नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** – द्वौ अचौ यस्मिन् सः द्व्य्च्कः (बहुव्रीहिः)। न कर्ता इति अकर्ता तस्मिन् अकर्तरि (नञ्तत्पुरुषः) अकर्तरि इत्यस्यार्थोऽस्ति कर्तृभिन्ने इति। नपुंसकस्य प्रकरणात् अधिकारो वर्तते। अत एव कर्तृभिन्ने मनन्तः द्व्य्च्कः चर्मन् शब्दो नपुंसकत्वेन विधीयते। एवमेव वर्मन् शब्दोऽपि।

**सूत्रे द्वयच्कः किम्** – अत्र उच्यते यत् 'अणिमा' महिमा इत्यादिषु प्रयोगेषु ''मन्द्वय्च्कोऽकर्तरि'' इति सूत्रस्य प्रवृत्तिः मा भूत् तस्मादत्र द्वयच्कः पदस्य ग्रहणमावश्यकम्। 'अणिमा, महिमा' उभौ द्वावपि शब्दौ मन् प्रत्ययान्तौ स्तः।

**अकर्तरि किम्** – अकर्तरि इति पदस्याभावे 'ददाति' इति दामा इत्यत्र प्रकृतसूत्रेण नपुंसकत्वस्य विधानं भवितुमर्हति तन्माभूत् एतदर्थमस्मिन्सूत्रेऽकर्तरीति पदस्य ग्रहणमावश्यकम्।

**१५२. ब्रह्मन् पुंसि च।। अयं ब्रह्मा, इदं ब्रह्म।**

**सूत्रार्थः** – मन्प्रत्ययान्तो 'ब्रह्मन्' शब्दः नपुंसके पुंसि च प्रयुज्यते।

**व्याख्या** – सूत्रेऽस्मिन् मन्प्रत्ययस्य पूर्वसूत्रादनुवृत्तिरायाति। पुंसि – इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। एतेन मन्प्रत्ययान्तोऽयं 'ब्रह्मन्' शब्दः पुन्नपुंसके प्रयुक्तो भवति। 'ब्रह्मन् पुंसि च' इति सूत्रं 'मन् द्वयच्कोऽकर्तरि' इति सूत्रस्यापवादो वर्तते।

**उदाहरणम्** – अयं ब्रह्मा। इदं बह्म।

**१५३. नामरोमणी नपुंसके।। मन्द्वयच्कः। इत्यस्यायं प्रपञ्चः।**

**सूत्रार्थः** – मन्नन्तौ 'नामन्' रोमन् इत्येतौ शब्दौ नपुंसकलिङ्गे प्रयुज्येते।

**व्याख्या** – नाम च रोम चेति नामरोमणी (इतरेतरद्वन्द्वः)। नपुंसके – इति सप्तम्यन्तं विधेयं पदम्। अत्र 'मन् द्वयच्कोऽकर्तरि' इति सूत्रस्य प्राप्तिरासीत् अतः मूले उक्तम् ''मन् द्वयच्कः इत्यस्यायं प्रपञ्चः'' अर्थात् विस्तारमात्रेण प्रयुक्तमिदं सूत्रम्। तथाहि नामरोमणी शब्दाभ्यां नपुंसकत्वमनेन सूत्रेण विधीयते।

**उदाहरणानि** – इदं नाम। इदं रोम।

**१५४. असन्तो द्वयच्कः।। यशः। मनः। तपः। द्वयच्कः किम्? चन्द्रमाः।**

**सूत्रार्थः** – असन्तः द्वयच्कः शब्दो नपुंसकलिङ्गे प्रयुज्यते।

**व्याख्या** – अस् अन्ते यस्य सः असन्तः (बहुव्रीहिः)। द्वौ अचौ यस्मिन् सः द्वयच्कः (बहुव्रीहिः)। नपुंसकस्याधिकारो वर्तते। एतेन असन्तो द्वयच्कः शब्दो नपुंसकलिङ्गो भवति इत्याशयः। द्वयच्कः इति किम्? – सूत्रे 'द्वयच्कः' इति पदस्याभावे 'चन्द्रमाः' इत्यादिप्रयोगेष्वपि अस्य सूत्रस्य प्रवृत्तिः भवितुमर्हति यतो हि शब्दोऽयं अस्प्रत्ययान्तो विद्यते। परं बह्वच्त्वात् प्रकृतसूत्रस्य प्रवृत्तिः न भवति।

**उदाहरणम्** – इदं यशः। मनः। तपः।

**१५५. अप्सराः स्त्रियाम्।। एता अप्सरसः। प्रायेणायं बहुवचनान्तः।**

**सूत्रार्थः** – 'अप्सराः' शब्दोऽयं स्त्रियां प्रयुक्तो भवति।

**व्याख्या** – 'स्त्रियाम्' इति सप्तम्यन्तं विधेयं पदम्। 'अप्सरस्' इति शब्देन सिद्धोऽयं 'अप्सराः' शब्दः बहुवचनान्तं विवक्षितमस्ति, अतएव मूलकाराह – प्रायेणायं बहुवचनान्तः इति। तद्यथा – अप्सराः, अप्सरसौ, अप्सरसः।

**उदाहरणम्** – एताः अप्सरसः।

**१५६. त्रान्तः। पत्रम्। छत्रम्।**

**सूत्रार्थः** – त्रान्तः शब्दः नपुंसके प्रयुज्यते।

**व्याख्या** – त्र अन्ते यस्य सः त्रान्तः (बहुव्रीहिः)। अत्र नपुंसकस्याधिकारो वर्तते। 'ष्ट्रन्' प्रत्ययान्तः शब्दः त्रान्त पदेन व्यवह्रियते। अत एव त्रान्तः शब्दः अनेन सूत्रेण नपुंसकलिङ्गो भवति इत्याशयः।

**उदाहरणानि** – इदं पत्रम्। इदं छत्रम्।

**१५७. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव।**

**सूत्रार्थः** – यात्रामात्राभस्त्रादयः त्रान्ताः सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे एव प्रयुक्ताः भवन्ति।

**व्याख्या** – यात्रा च मात्रा च भस्त्रा च दंष्ट्रा च वरत्रा चेति यात्रामात्राभस्त्रादंष्ट्रावरत्राः (इतरेतरद्वन्द्वः)। स्त्रियाम् इति सप्तम्यन्तं विधेयं पदम्। एव-इति अवधारणात्मकमव्ययपदम्। इदं सूत्रं 'त्रान्तः' इति सूत्रस्यापवादत्वेन वर्तते। अतएव त्रान्तशब्दस्य नपुंसके विधाने सति यात्रामात्राभ्रस्त्रादीनामपि नपुंसकत्वं प्राप्तं भवति तं प्रबाध्य प्रकृतसूत्रेण स्त्रीत्वं विधीयते। अत एव यात्रामात्राभस्त्रादयः शब्दाः स्त्रीलिङ्गाः एव भवन्ति इत्यर्थो लभ्यते।

**उदाहरणानि** – इयं यात्रा। मात्रा। भस्त्रा। दंष्ट्रा। वरत्रा।

**१५८. भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि।। अयं भृत्रः। न मित्रममित्र। 'तस्य मित्राण्यमित्रास्ते' इति माघः। 'स्यातामममित्रौ मित्रे च' इति च। यत्तु द्विषोऽमित्रे ( सू. ३१११ ) इति सूत्रे हरदत्तेनोक्तम्-'अमेर्द्विषदित्यौणादिक इत्रच्। अमेरमित्रम्। मित्रस्य व्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः। नञ्समासेऽप्येवम्। परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरम् इति। तत्प्रकृतसूत्रापर्यालोचनमूलकम्। स्वरदोषोद्भावनमपि नञो जरमरमित्रमृताः पुंसि च ( सू. ८५० ) इति षाष्ठसूत्रास्मरणमूलकमिति दिक्।**

**सूत्रार्थः** – भृत्रामित्रछात्रादयः सूत्रोक्ताः त्रान्ताः शब्दाः पुंसि प्रयुक्ताः भवन्ति।

**व्याख्या** – भृत्रश्च अमित्रश्च छात्रश्च पुत्रश्च मन्त्रश्च वृत्रश्च मेढ्रश्च उष्ट्रश्चेति "भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः" (इतरेतरद्वन्द्वः)। 'त्रान्तः' इति सूत्रस्यापवादसूत्रमिदम्। तस्मात् अत्रापि सर्वेभ्यः शब्देभ्यः नपुंसकत्वं प्राप्यते तं प्रबाध्यानेन सूत्रेण पुंस्त्वं विहितम्। पुंसि – इति सप्तम्यन्तं विधेयं पदम्। अत एव सूत्रे वर्णिताः शब्दाः पुल्लिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं भृत्रः। अमित्रः। छात्रः। पुत्रः। मन्त्रः। वृत्रः। मेढ्रः। उष्ट्रः।

**विशेषः** – लिङ्गविषयकपरम्परायां विशिष्टाः विचाराः प्राप्यन्ते, तथाहि – मित्रं सखा, मित्रश्च सूर्यः। इत्यत्र 'मित्र' शब्दः नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्तोऽस्ति। यदा मित्र शब्दे नञ् तत्पुरुषसमासः क्रियते तदा न मित्रमिति 'अमित्रः' इति सिद्धो भवति। एतच्च महाकविमाघेनापि स्वीकृतमुक्तं हि – तस्य मित्राण्यमित्रास्ते इति। एतेन द्विवचनेऽपि न मित्रे इति अमित्रौ, मित्रमिति शब्दस्य द्विवचनेऽपि न मित्रे इति अमित्रौ, मित्रमिति शब्दस्य द्विवचने मित्रे इत्यपि भवति। अयं भट्टोजिदीक्षितानुसृतो विचारः। हरदत्तेन यदुक्तं तस्य समीक्षणे दीक्षितेनोक्तम् – द्विषः शत्रुः (अमित्रः) भवति। द्विषोऽमित्रे इति सूत्रे हरदत्तेन यदुक्तं तत् सिद्धान्तरूपेण नाङ्गीकर्तुं शक्यते, तस्य वचनस्य चिन्त्यरूपत्वात्। यथा – 'अमेर्दिषत्' इति उणादिसूत्रेण 'अमि' धातोः इत्रच् प्रत्ययेन 'अमित्रम्' इति प्रयोगस्य सिद्धिः भवति। 'मित्रस्य व्यथयेत्' इत्यादौ स्वरस्तु चिन्त्यः वर्तते। "अमित्रः" इत्यत्र नञ्समासे कृतेऽपि कार्यसिद्धिर्भविष्यति, तत्र "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इत्यनेन यत् प्राप्नोति तत्तु तत्र दोषान्तरं भवति इति "द्विषोऽमित्रे" इति सूत्रस्य पर्यालोचनेन ज्ञायते। एवञ्च स्वरदोषोद्भावनमपि 'नञोजरयरमित्रमृता' इति सूत्रस्य अष्टाध्यायाः षष्ठाध्याये अस्मरणमूलकमिति।

**१५९. पत्रपात्रपवित्रसूत्रच्छत्राः।। पुंसि च।**

**सूत्रार्थः** – पत्रपात्रपवित्रादयः त्रान्ताः शब्दाः नपुंसके पुंसि च प्रयुज्यन्ते।

**व्याख्या** – पत्रश्च पात्रश्च पवित्रश्च सूत्रश्च छत्रश्चेति "पत्रपात्रपवित्रसूत्रच्छत्राः"। (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तघटितपदम्। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारात् नपुंसकत्वमत्र गृह्यते। सूत्रमिदं 'त्रान्तः' इति सूत्रस्यापवादत्वेन प्रयुक्तमस्ति। अत एव 'त्रान्तः' इति सूत्रेणात्र प्राप्तनपुंसकत्वं प्रबाध्य "पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च" इति सूत्रेण पक्षे पुंस्त्वं विधीयते। अत एव पत्रपात्रादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं पत्रः इदं पत्रम्। पात्रः, पात्रम्। पवित्रः, पवित्रम्। सूत्रः, सूत्रम्। छत्रः, छत्रम्।

**१६०. बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि।। बलं वीर्यम्।**

**सूत्रार्थः** –बलकुसुमशुल्वादयः सूत्रे पठिताः शब्दाः तेषां पर्यायवाचिनश्च नपुंसकलिङ्गाः भवन्ति।

**व्याख्या** – बलं च कुसुमञ्च शुल्वञ्च पत्तनं च रणं चेति बलकुसुमशुल्वपत्तनरणानि तेषामभिधानानि इति बलकुसुमशुल्वपत्तनरणाभिधानानि (द्वन्द्वमूलकतत्पुरुषसमासः)। इदं विधिसूत्रं वर्तते। एतेन बलकुसुमादयः सूत्रोक्ताः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इदं बलम्। कुसुमम्। शुल्वम्। पत्तनम्। रणम्।

**१६१. पद्मकमलोत्पलानि पुंसि च ।। पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः। अमरोऽप्याह – 'वा पुंसि पद्मं नलिनम्' इति। एवं च 'अर्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेव' इति वृत्तिग्रन्थो मतान्तरेण नेयः।**

**सूत्रार्थः** – पदम्, कमल, उत्पल इत्येते शब्दाः नपुंसकलिङ्गे, पुंल्लिङ्गे च प्रयुक्ताः भवन्ति।

**व्याख्या** – पद्मञ्च कमलञ्च उत्पलञ्चेति पद्मकमलोत्पलानि (इतरेतरद्वन्द्वः)। पुंसि इति सप्तम्यन्तं विधेयं पदम्। चकारादत्र नपुंसकत्वस्य ग्रहणं क्रियते। "बलकुसुमशुल्वपत्तनरणाभिधानानि" इति सूत्रस्य अपवादसूत्रमिदं वर्तते। तेन कुसुमशब्दस्य पर्यायत्वेनात्र प्राप्तनपुंसकत्वं प्रबाध्य प्रकृतसूत्रेण पक्षे पुंस्त्वस्य विधानं कृतम्। अत एव सूत्रोक्ताः पद्म, कमल, उत्पल, इत्येते शब्दाः क्लीबे पुंसि च प्रयुज्यन्ते इत्याशयः। 'पद्म' शब्दः पुन्नपुंसके प्रयुक्तो भवति इति

कथनस्य समर्थनं अमरकोषकारेणापि कृतम्– ''वा पुंसि पद्म नलिनमिति''। एवञ्चार्धर्चादि सूत्रे जलजे पद्मं नपुंसकमेवेति कथनं मतान्तरेणावगन्तव्यम्।

**उदाहरणानि** – इदं पद्मम्। इयं पद्मः। कमलम्–कमलः। उत्पलम्–उत्पलः।

**१६२. आहव संग्रामौ पुंसि।।**

**सूत्रार्थः** – 'आहव' 'संग्राम' इत्येतौ शब्दौ पुल्लिङ्गे प्रयुक्तौ भवतः।

**व्याख्या** – आहवश्च संग्रामश्चेति आहवसंग्रामौ (इतरेतरद्वन्द्वः) प्रथमाद्विवचनान्तपदम्। ''निरवकाशो हि विधिरपवादः'' इति नियमेन ''आहवसंग्रामौ पुंसि'' सूत्रमिदं 'बलकुसुमशुल्वपत्तनरणाभिधानि' इति सूत्रस्यापवादसूत्रं वर्तते। आहवसंग्रामौ द्वावपि इमौ शब्दौ रणाभिधानौ स्तः, अत एव ''बलकुसुम.'' इति सूत्रेणात्र नपुंसकत्वं प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण पुंस्त्वमत्र विहितम्।

**उदाहरणानि** – अयम् आवहः। अयम् संग्रामः।

**१६३. आजिः स्त्रियामेव।।**

**सूत्रार्थः** – 'आजिः' शब्दोऽयं स्त्रियामेव प्रयुक्तो भवति।

**व्याख्या** – 'आजि' शब्दोऽयं रणवाचको वर्तते। तस्मात् बलकुसुमेत्यादिसूत्रेणात्र नपुंसकत्वं प्राप्यते तं प्रबाध्य 'आजिः स्त्रियामेव' इति सूत्रेण स्त्रीत्वविधानं कृतम्। सूत्रे 'स्त्रियाम्–' इति सप्तम्यन्तं विधेयं पदम्। एवकारो निश्चयार्थको वर्तते। एतेन 'आजि' शब्दः स्त्रियामेव स्यादित्यर्थो प्राप्यते।

**उदाहरणम्** – इयमाजिः।

**१६४. फलजातिः।। फलजातिवाची शब्दो नपुंसकं स्यात्। आमलकम्। आम्रम्।**

**सूत्रार्थः** – फलजातिवाचकः शब्दः नपुंसके प्रयुक्तो भवति।

**व्याख्या** – फलानां जातिः फलजातिरित्यत्र षष्ठीतत्पुरुषः। विधिसूत्रमिदम्।

**उदाहरणानि** – इदम् आम्रम्। इदम् आमलकम्।

**१६५. वृक्षजातिः।। स्त्रियामेव, क्वचिदेवेदम्। हरीतकी।**

**सूत्रार्थः** – वृक्षजातिवाचकः शब्दः स्त्रियामेव प्रयुक्तो भवति।

**व्याख्या** – वृक्षाणां जातिः वृक्षजातिः (ष.त.स.)। वृक्षजातिवाचकाः शब्दाः स्त्रियामेव स्युः। इत्यर्थोत्पादनाय सूत्रे 'एव' पदस्य ग्रहणं वर्तते। एवकारो निश्चयार्थकः इति।

**उदाहरणम्** – इयं हरीतकी।

**१६६. वियज्जगत्सकृत्शकन्पृषच्छकृद्यकृदुदश्वितः।। एते क्लीबाः स्युः।**

**सूत्रार्थः** – वियत्, जगत्, सकृत्, शकन्, पृषत्, शकृत्, उदश्वित् इत्येते शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – वियच्च जगच्च सकृच्च शकञ्च पृषच्च शकृच्च यकृच्च उदश्विच्चेति वियज्जगत्.........उदश्वितः (इतरेतरद्वन्द्वः)। विधिसूत्रमिदं वर्तते। नपुंसकस्याधिकारो वर्तते। अत एव वियज्जगत्सकृतादयः शब्दाः नपुंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं वियत्। जगत्। सकृत्। शकन्। पृषत्। शकृत्। यकृत्। उदश्वित्।

**१६७. नवनीतावनतानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि।।**

**सूत्रार्थः** – नवनीतावनतानृतादयः सूत्रपठिताः शब्दाः नपुंसके प्रयुक्ताः स्युः।

**व्याख्या** – नवनीतञ्च अवनतञ्च अनृतञ्च अमृतञ्च निमित्तञ्च वित्तञ्च चित्तञ्च पित्तञ्च व्रत्तञ्च रजतं च वृतञ्च पलितञ्चेति (इतरेतरद्वन्द्वः)। विधिसूत्रमिदम्। नपुंकस्याधिकारो वर्तते। अत एव सूत्रे पठिताः नवनीतादयः शब्दाः नपुंसकलिङ्गाः भवन्ति।

**उदाहरणानि** – इदं नवनीतम्। अवनतम्। अनृतम्। अमृतम्। निमित्तम्। वित्तम्। चित्तम्। पित्तम्। व्रत्तम्। रजतम्।

वृत्तम्। पलितम्।

**१६८. श्राद्धकुलिशदैवपीठकुण्डभाण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि।।एतानि क्लीबे स्युः।**

**सूत्रार्थः** – श्राद्धकुलिशपीठादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः भवन्ति।

**व्याख्या** – श्राद्धञ्च कुलिशञ्च पीठञ्च कुण्डञ्च भाण्डञ्च अङ्कञ्च अङ्गञ्च दधि च सक्थि च अक्षि च आस्यञ्च आस्पदञ्च आकाशञ्च कण्वञ्च बीजञ्चेति ''श्राद्धकुलिश................कण्वबीजानि'' (इतरेतरद्वन्द्वः)। नपुंसकस्याधिकारो वर्तते। एवं सूत्रोक्ताः श्राद्धादयः शब्दाः नपंसके प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं श्राद्धम्। दैवम्। कुलिशम्। पीठम्। कुण्डम्। भाण्डम्। अङ्कम्। अङ्गम्। दधि। सक्थि। अक्षि। आस्यम्। आस्पदम्। आकाशम्। कण्वम्। बीजम्।

**१६९. दैवं पुंसि च।। देवम्, दैवः।**

**सूत्रार्थः** – 'दैव' शब्दो नपुंसकलिङ्गे पुल्लिङ्गे च प्रयुज्यते।

**व्याख्या** – सूत्रे 'पुंसि' इति सप्तम्यन्तं विधेयं पदमस्ति। चकारात् नपुंसकत्वमत्र गृह्यते। पूर्वसूत्रस्यापवादसूत्रमिदम्। तत्र दैव शब्दस्य नपुंसके विधानं विहितं तं प्रबाध्य पक्षे पुंस्त्वविधानार्थपिदं सूत्रम्। अत एव 'दैव' शब्दः उभयलिङ्गे (नपुंसके पुंसि च) प्रयुज्यते इत्याशयः।

**उदाहरणानि** – इदं दैवम्। अयं दैवः।

**१७०. धान्याज्यसस्य रूप्यपण्यवर्ण्यधृष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि।। इदं धान्यमित्यादि।**

**सूत्रार्थः** – धान्याज्सस्यादयः सूत्रे पठिताः शब्दाः नपुंसकलिङ्गे प्रयुज्यन्ते।

**व्याख्या** – धान्यञ्च आज्यञ्च सस्यञ्च रूप्यञ्च कुप्यञ्च पण्यञ्च वर्ण्यञ्च धिष्ण्यञ्च हव्यञ्च कव्यञ्च काव्यञ्च सत्यञ्च अपत्यञ्च अमूल्यञ्च शिक्यञ्च कुड्यञ्च मद्यञ्च हर्म्यञ्च तूर्यञ्च सैन्यञ्चेति धान्याज्यसस्य............तूर्यसैन्यानि (इतरेतरद्वन्द्वः)। विधिसूत्रमिदम्। नपुंसकस्याधिकारो वर्तते। अत एव सूत्रे वर्णिताः धान्यादयः शब्दाः नपुंसके प्रयुक्ताः भवन्ति इत्याशयः।

**उदाहरणानि** – इदं धान्यम्। आज्यम्। सस्यम्। रूप्यम्। कुप्यम्। पण्यम्। वर्ण्यम्। धिष्ण्यम्। हव्यम्। कव्यम्। काव्यम्। सत्यम्। अपत्यम्। अमूल्यम्। शिक्यम्। कुड्यम्। मद्यम्। हर्म्यम्। तूर्यम्। सैन्यम्।

**१७१. द्वन्द्वबर्हदःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि।।**

**सूत्रार्थः** – द्वन्द्ववर्हदुःखादयः सूत्रोक्ताः शब्दाः नपुंसकलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – द्वन्द्वञ्च बर्हञ्च दुःखञ्च वडिशञ्च पिच्छञ्च विम्बञ्च कुटुम्बञ्च कवचञ्च वरञ्च शरञ्च वृदारकञ्कचेति ''द्वन्द्वबर्ह...........वृन्दारकाणि'' (इतरेतरद्वन्द्वः)। नपुंसकस्याधिकारो वर्तते। अत एव सूत्रे पठिताः द्वन्द्ववर्हादयः शब्दाः नपुंसकलिङ्गाः स्युरिति।

**उदाहरणानि** – इदं द्वन्द्वम्। बर्हम्। दुःखम्। वडिशम्। पिच्छम्। बिम्बम्। कुटुम्बम्। कवचम्। वरम्। शरम्। वृन्दारकम्।

**१७२. अक्षमिन्द्रिये।। इन्द्रिये किम्? रथाङ्गादौ मा भूत्।**

**सूत्रार्थः** – 'अक्ष' शब्दो नपुंसके प्रयुज्यते इन्द्रियेऽर्थे।

**व्याख्या** – अक्षम् इति उद्देश्यवाचकं पदम्। इन्द्रियमिति निमित्तवाचकं सप्तम्यन्तं पदम्। नपुंसकस्याधिकारो वर्तते। अत एव अक्ष शब्दः इन्द्रिये अर्थे नपुंसकलिङ्गो भवति। इन्द्रिये किम् – सूत्रे ''इन्द्रिये'' इति पदस्य ग्रहणं न स्यात् तदा अक्ष शब्दस्य रथाङ्गस्य वाचकत्वे सति नपुंसकत्वस्यापत्तिः अत एव तत्र मा भूत् एतदर्थमस्मिन् सूत्रे इन्द्रिये इति

पदस्यावश्यकताऽस्ति। आदि पदेनात्र देवनाक्षस्यापि परिग्रहो भवति।

**उदाहरणानि** – इदम् अक्षम् (इन्द्रियम्)

### अथ स्त्रीपुंसाधिकारः

**१७३. स्त्रीपुंसयोः। अधिकारोऽयम्।**

**सूत्रार्थः** – अधिकारोऽयम्। इत ऊर्ध्वं "अपत्यार्थस्तद्धिते" इति सूत्रं यावत् अस्याधिकारः प्रचलिष्यति।

**व्याख्या** – स्त्री च पुमांसश्चेति स्त्रीपुमांसौ तयोरिति (इतरेतरद्वन्द्वः)। षष्ठ्या: द्विवचनान्तं पदम्। अधिकारसूत्रमिदम्। अधिकारञ्च – स्ववाक्यार्थबोधशून्यत्वे सति स्वेतरवाक्यार्थबोधकत्वम्। एतस्याधिकारान्तर्गताः पठिताः शब्दाः स्त्रीपुंसयोः प्रयुज्यन्ते इति।

**१७४. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः।। इयमयं वा गौः।**

**सूत्रार्थः** – गो मणियष्ट्यादयः सूत्रे पठिताः शब्दाः स्त्रीपुंसयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – गौश्च मणिश्च यष्टिश्च मुष्टिश्च पाटलिश्च वस्तिश्च शाल्मलिश्च मसिश्च मरीचिश्चेति "गोमणियष्टि..........मरीचयः" (इतरेतरद्वन्द्वः)। स्त्रीपुंसयोरधिकारो वर्तते। एतेन सूत्रे वर्णिता शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इयमयं वा गौः। मणिः। यष्टिः। मुष्टिः। पाटलिः। वस्तिः। शाल्मलिः। त्रुटिः। मसिः। मरीचिः।

**१७५. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः।। इयमयं वा मृत्युः।**

**सूत्रार्थः** – मृत्युसीधुकर्कन्ध्वादयः सूत्रे पठिताः शब्दाः स्त्रीपुंसयोः लिङ्गयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – मृत्युश्च सीधुश्च कर्कन्धुश्च किष्कुश्च कण्डुश्च रेणुश्चेति "मृत्युसीधु..........रेणवः" (इतरेतरद्वन्द्वः)। स्त्रीपुंसयोरित्यस्याधिकारो वर्तते। अत एव सूत्रे वर्णिताः शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

यथा – इयमयं वा मृत्युः। सीधुः। कर्कन्धुः। किष्कुः। कण्डुः। रेणुः।

**१७६. गुणवचनमुकरान्तं नपुंसकं च।। त्रिलिङ्गमित्यर्थः। पटु, पटुः, पट्वी।**

**सूत्रार्थः** – गुणवाचकः उकारान्तः शब्दः स्त्रियां पुंसि नपुंसके च प्रयुक्तो भवति।

**व्याख्या** – उकारोऽन्ते यस्य तदुकारान्तम्। बहुव्रीहिः समासः। नपुंसकमिति विधेयं पदम्। चकारात् स्त्रीपुंसयोः ग्रहणमत्र भवति। एतेन गुणवाचकः उकारान्तः त्रिषु लिङ्गेषु प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – इदं पटु। अयं पटुः। इयं पट्वी।

**१७७. अपत्यार्थस्तद्धिते।। औपगवः, औपगवी।**

**सूत्रार्थः** – तद्धिते अपत्यार्थक प्रत्ययान्ताः शब्दाः स्त्रीपुंसयोः प्रयुक्ताः भवन्ति।

**व्याख्या** – अपत्यस्य अर्थः इति अपत्यार्थः (षष्ठीतत्पुरुषः) 'तद्धिते' इति सप्तम्यन्तं पदम्। निमित्तार्थकमिदं पदम्। स्त्रीपुंसयोरधिकारोऽत्र प्राप्यते। एतेन अपत्यार्थकप्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे पुंल्लिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – औपगवः। औपगवी।

**इति पाणिनीयलिङ्गानुशासने स्त्रीपुंल्लिङ्ग प्रकरणम्।**

### ।। अथ पुं नपुंसकलिङ्गप्रकरणम्।।

**१७८. पुंनपुंसकयोः।। अधिकरोऽयम्।**

**सूत्रार्थः** – अधिकारोऽयम्। इत ऊर्ध्वं "गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च" इति सूत्रपर्यन्तम् अस्य सूत्रस्याधिकारः प्रचलिष्यति।

**व्याख्या** – पुमांश्च नपुंसकश्चेति पुंनपुसके तयोः "पुंनपुंसकयोः" (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते।

स्वदेशे वाक्यार्थशून्यत्वे सत्युत्तरोत्तरफल जनकत्वम्। एतेन अधिकारसूत्रान्तर्गते पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः भविष्यन्ति इत्याशयः।

**१७९. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः।। अयं घृतः, इदं घृतम्।**

**सूत्रार्थः** – घृतभूतमुस्तादयः सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुक्ताः स्युः।

**व्याख्या** – घृतश्च भूतश्च मुस्तश्च क्ष्वेलितश्च ऐरावतश्च पुस्तकश्च बुस्तश्च लोहितश्चेति ''घृतभूत........वुस्तलोहिताः'' (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। एतेन सूत्रे वर्णिताः शब्दाः प्रकृतसूत्रेणोभयलिङ्गाः भवन्ति इति।

**उदाहरणानि** – अयं घृतः–इदं घृतम्। भूतः–भूतम्। मुस्तः, मुस्तम्। क्ष्वेलितः, क्ष्वेलितम्। ऐरावतः, ऐरावतम्। पुस्तकः, पुस्तकम्। वुस्तः, वुस्तम्। लोहितः, लोहितम्।

**१८०. शृङ्गार्घनिदाघोद्यमशल्यदृढाः।। अयं शृङ्गः, इदं शृङ्गम्।**

**सूत्रार्थः** –शृङ्ग अर्घ, निदाघ, उद्यम, शल्य, दृढ़ इत्येते शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या** – शृङ्गश्च अर्घश्च निदाघश्च उद्यमश्च शल्यश्च दृढश्चेति ''शृङ्गार्ध...........दृढाः'' (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रे पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं शृङ्गः, इदं शृङ्गम्। अर्घः, अर्घम्। निदाघः, निदाघम्। उद्यमः, उद्यमम्। शल्यः, शल्यम्। दृढः, दृढम्।

**१८१. व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः।। अयं व्रजः, इदं व्रजम्।**

**सूत्रार्थः** – व्रजकुञ्जकुथादयः सूत्रोक्ताः शब्दाः पुंसि नपुंसके च प्रयुक्ताः भवन्ति।

**व्याख्या** – व्रजश्च कुञ्जश्च कुथश्च कूर्चश्च प्रस्थश्च दर्पश्च अर्भश्च अर्धर्चश्च दर्भश्च पुच्छश्चेति ''व्रजकुञ्ज.........दर्भपुच्छाः'' (इतरेतरद्वन्द्वसमासः)। पुंनपुंसकयोरत्र अधिकारो वर्तते। एतेन सूत्रे पठिताः शब्दाः पुंल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं व्रजः। इदं व्रजम्। कुञ्जः, कुञ्जम्। कुथः, कुथम्। कूर्चः, कूर्चम्। प्रस्थः, प्रस्थम्। दर्पः, दर्पम्। अर्भः, अर्भम्। अर्धर्चः, अर्धर्चम्। दर्भः, दर्भम्। पुच्छः, पुच्छम्।

**१८२. कबन्धौषधायुधान्ताः।। स्पष्टम्।**

**सूत्रार्थः** – कबन्ध, औषध, आयुध, अन्त इत्येते शब्दाः पुंसि नपुंसके च प्रयुक्ताः स्युः।

**व्याख्या** – कबन्धश्च औषधश्च आयुधश्च अन्तश्चेति ''कबन्धौषधायुधान्ताः'' (इतरेतरद्वन्द्वसमासः)। प्रथमाबहुवचनान्तं पदम्। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रोक्ताः शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – अयं औषधः, इदं औषधम्। कबन्धः, कबन्धम्। आयुधः, आयुधम्। अन्तः, अन्तम्।

**१८३. दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः।। एते पुंनपुंसकयोः स्युः। 'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः शलाकावाची तु स्त्रियाम्। तथा च 'जानपद-' ( सू. ५०० ) आदिसूत्रेणायोविकारे ङीषि कुशी। दारुणि तु टाप्। 'कुशा वानस्पत्याः स्थ ता मा तात' इति श्रुतिः। 'अतः कृकमि-' ( सू. १६० ) इति सूत्रे 'कुशाकर्णीषु' इति प्रयोगश्च व्याससूत्रे च- 'हानौ तूपायनशब्दे शेषत्वात् कुशाच्छन्दः' इति। तत्र शारीरकभाष्येऽप्येवम्। एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्याङ्प्रश्लेशादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः।**

**सूत्रार्थः** – दण्डमण्डादयः सूत्रे वर्णिताः शब्दाः पुंनपुंसकयोः प्रयुक्ताः स्युः।

**व्याख्या** – ''दण्डश्च मण्डश्च खण्डश्च सैन्धवश्च पार्श्वश्च आकाशश्च कुशश्च काशश्च अङ्कुशश्च कलिशश्चेति दण्डमण्ड......... कुलिशाः'' (इतरेतरद्वन्द्वः)। प्रथमाबहुवचनान्तं पदम्। पुंनपुंसकयोरत्र अधिकारो वर्तते। अत एव सूत्रे वर्णिताः शब्दाः उभयलिङ्गाः भवन्ति इत्याशयः।

**उदाहरणानि** – अयं दण्डः, इदं दण्डम्। मण्डः, मण्डम्। खण्डः, खण्डम्। शवः, शवम्। सैन्धवः, सैन्धवम्। पार्श्वः, पार्श्वम्। आकाशः, आकाशम्। कुशः, कुशम्। अङ्कुशः, अङ्कुशम्। कुलिशः, कुलिशम्। काशः, काशम्।

**विशेषः** – सूत्रे निर्देष्टेषु पदेषु पुंनपुंसकयोः प्रयोगो यद्यपि सम्यगेव प्रतीयते परं इतोऽपि केचन अपवादाः प्राप्यन्ते तथाहि – विश्वकोशकाराभिमते ''कुशः'' शब्दोऽयं रामपुत्रेऽर्थे दर्भेऽर्थे योक्त्रेऽर्थे द्वीपेऽर्थे च पुल्लिङ्गे प्रयुक्तो भवति। जलेऽर्थे ''कुश'' शब्दः नंपुसके प्रयुक्तो भवति यदा 'कुश' इति तृणविशेस्य बोधकः भवति तदा कुशं तृणमिति नपुंसकलिङ्गे प्रयुक्तो भवति। कुशारूपेण शलाकावाचि गृह्यते तदा स्त्रीलिङ्गे 'कुशा' इति पदस्य प्रयोगो भवति। कुश शब्दात् ''जानपदकुण्डगोणस्थल'' ४/१/४२ इत्यादि सूत्रेण अयो विकारेऽर्थे ङीषि प्रत्यये स्त्रीलिङ्गे कुशी भवति। काष्ठादिनिर्मिता यदा गृह्यते तदा टाबन्तः स्त्रीत्वे कुशा इति भवति। तेन च 'कुशा वानस्पत्याः स्त ता मा पातेति श्रुतिः' श्रुतेः प्रमाणमधिकृत्य वक्तुं शक्यते यत् कुशा इति पदं स्त्रीलिङ्गे प्रयुक्तो भवति। अतः कृकमिकंसकुम्भः ८/३/४६ इत्यस्मिन् सूत्रे कुशाकर्णीष्विति प्रयोगो दृश्यते। महर्षि व्यास सूत्रे 'कुशा' इति पदं प्रयुक्तम्। प्रमाणमत्रहानौ तूपायन शब्दे शेषत्वात् कुशाच्छन्दः इति ब्रह्म सूत्रे वर्तते। शारीरिकभाष्येऽपि एवमेव कुशा शब्दः टाबन्तः दृश्यते। एवं श्रुतिसूत्रभाष्याणामेकवाक्यतया आच्छन्द इति आङ् प्रश्लेषादिपरो टीकाकारेण यद् वर्णितं तत्तु प्रौढिवादमात्रमेव वर्तते।

**१८४. गृहमेहदेहपट्टपटहाष्टातदाम्बुदककुदाश्च।।**

**सूत्रार्थः** – गृहमेहदेहादयः शब्दाः पुंनपुंसके प्रयुक्ताः भवन्ति।

**व्याख्या** – गृहश्चमेहश्च देहश्च पट्टश्च पटहश्च अष्टापदश्च अम्बुदश्च काकुदश्चेति गृहमेव..........ककुदाः (इतरेतरद्वन्द्वः)। पुंनपुंसकयोरधिकारो वर्तते। अत एव सूत्रोक्ताः एते शब्दाः पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यन्ते।

**उदाहरणानि** – अयं गृहः, इदं गृहम्। मेहः, मेहम्। देहः, देहम्। पट्टः, पट्टम्। पटहः, पटहम्। अष्टापदः, अष्टापदम्। अम्बुदः, अम्बुदम्। काकुदः, काकुदम्।

**इति पाणिनीय लिङ्गानुशासने पुंनपुंसकलिङ्गप्रकणम्**

## ।। अथ अविशिष्टलिङ्गप्रकरणम् ।।

**१८५. अविशिष्ट लिङ्गम्।।**

**सूत्रार्थः** – अधिकारोऽम्। इत ऊर्ध्वं ''सर्वादीनि सर्वनामानि'' इति सूत्रपर्यन्तम् अस्याधिकारः प्रचलिष्यति।

**व्याख्या** – न विशिष्टम् अविशिष्टम्, अविशिष्टं चासौ लिङ्गमविशिष्टलिङ्गम् (नञ्गर्भकर्मधारयः)। अधिकारसूत्रमिदम्। एतेन अस्याधिकारे पठिताः शब्दाः त्रिषुलिङ्गेषु प्रयुक्ताः भवन्ति इत्याशयः।

**१८६. अव्ययं कति युष्मदस्मदः।।**

**सूत्रार्थः** – अव्ययसंज्ञकाः शब्दाः कति, युष्मद्, अस्मद्, इत्येते शब्दाश्च त्रिषु लिङ्गेषु प्रयुक्ताः भवन्ति।

**व्याख्या** – कति च युष्मद् च अस्मद् चेति कति युष्मदस्मदः (इतरेतरद्वन्द्वसमासः)। प्रकृतसूत्रानुसारेण अव्ययसंज्ञकाः शब्दाः, कति युष्मद् अस्मद् शब्दाश्च अविशिष्टलिङ्गाः भवन्ति।

**उदाहरणानि** – अव्ययम् – उच्चैः जनोऽयम्। उच्चैः नारी। उच्चैः कुलम्। कति छात्राः। कति-कति छात्र्यः। कति पुस्तकानि। युष्मद्-त्वं बालकः। त्वं बालिका। त्वं कुलम्।

**अस्मद्** – अहं अध्यापकः। अहं अध्यापिका। अहं कुलम्।

**१८७. ष्णान्ता संख्या।।**

**सूत्रार्थः** – संख्यावाचिनः षकारान्ताः, नाकरान्ताश्च शब्दाः अविशिष्टलिङ्गे प्रयुक्ताः स्युः।

**व्याख्या** – ष् च ण् च इति ष्णौ, ष्णौ अन्ते यस्याः सा ष्णान्ता (द्वन्द्वमूलक बहुव्रीहिः)। अविशिष्टस्याधिरोऽत्र वर्तते। एतेन षकारान्ताः – षट् नार्यः, षट् पुरुषाः, षट् कुलानि इत्यादयः भवन्ति। षडित्यत्र षकारान्तः षष् शब्दः। नकारान्तः – पञ्चन् शब्दः तद्यथा पञ्चनार्यः, पञ्च पुरुषाः, पञ्च फलानि इत्यादयः भवन्ति। एवं उभावपि संख्यावाचकौ शब्दौ

सूत्रनियमेन त्रिषुलिङ्गेषु प्रयुक्तौ भवतः।

**उदाहरणानि** – षट् सज्जनाः। षट् महिलाः। षट् फलानि। पञ्च गोपालकाः। पञ्च गोपालिकाः। पञ्च फलानि।

**१८८. शिष्टा परवत्। एकः पुरुषः। एका स्त्री। एकं कुलम्।**

**सूत्रार्थः** – पूर्वोक्तादविशिष्टाः शब्दाः परवल्लिङ्गाः भवन्ति।

**व्याख्या** – शिष्टात् पूर्वोक्तादन्यशब्दाः गृह्यन्ते। परवत् अर्थात् विशेष्यलिङ्गकाः भवन्ति विशेष्य विशेषणयोः समानलिङ्गकत्वात् इत्याशयः।

**उदाहरणानि** – एकः पुरुषः। एका स्त्री। एकं कुलम्।

**१८९. गुणवचनं च।। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रम्।**

**सूत्रार्थः** – गुणवाचिनः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – सूत्रेण चकारग्रहणेन परवत् इत्यनुवर्तते। एतेन गुणवाचिशब्दाश्चविशिष्टलिङ्गा परवत् भवन्ति इति सूत्रतात्पर्यम्। अर्थात् विशेष्यलिङ्गकाः इति।

**उदाहरणानि** – शुक्लः पटः। शुक्ला पटी। शुक्लं पटम्।

**१९०. कृत्याश्च।।**

**सूत्रार्थः** – कृत्यप्रत्ययान्ताः शब्दाः त्रिषु लिङ्गेषु प्रयुक्ताः भवन्ति।

**व्याख्या** – 'कृत्याश्च' इति सूत्रेण तत्यत्तव्यानीयरादयः कृत्यप्रत्ययान्ताः शब्दाः परवत् अर्थात् परवल्लिङ्गाः भवन्ति इति सूत्रतात्पर्यम्।

**उदाहरणानि** – अर्चनीया भारतमाता। अर्चनीयो भारतदेशः। अर्चनीयम् भारतराष्ट्रम्।

**१९१. करणाधिकरणयोर्ल्युट् च।।**

**सूत्रार्थः** – करणाधिकरणयोर्विहिताः ल्युट् प्रत्ययान्ताः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – करणाञ्चाधिकरणञ्चेति करणाधिकरणे, तयोः करणाधिकरणयोः (इतरेतरद्वन्द्वः)। चकारो समुच्चयार्थकोऽत्र प्रयुक्तः। एतेन करणाधिकरणयोः विहिताः शब्दाः ल्युट् प्रत्ययान्ताश्च त्रिषु लिङ्गेष्वेव प्रयुज्यन्ते इत्याशयः।

**उदाहरणानि** – करणे – इध्मप्रवश्चनः कुठारः। अधिकरणे – गोदोहनी स्थाली। प्रवृश्च्यन्तेऽनेनेति प्रव्रश्चनः। इध्मानां प्रवश्चनः – = इध्मप्रवश्चनः। शात्यन्तेऽनेनेति शातनः। पलाशानां शातनः– = पलाश शातनः। उपमीयतेऽनेनेत्युपमानम्। दृश्यतेऽनेनेति दर्शनम्। उह्यतेऽनेनेति वाहनम्। आवर्त्यते अस्याम् इति आवर्त्तनी। दुह्यतेऽस्यामिति दोहनी, गवां दोहनी–गोदोहनी धीयतेऽस्यामिति धानी, राज्ञोधानी–राजधानी।

**१९२. सर्वादीनि सर्वनामानि।। स्पष्टार्थेयं त्रिसूत्री।।**

**सूत्रार्थः** – सर्वादिगणपठिताः सर्वनामसंज्ञकाः शब्दाः अविशिष्टलिङ्गाः भवन्ति।

**व्याख्या** – सर्वः आदिर्येषान्तानि सर्वादीनि। (बहुव्रीहिः समासः) सर्वादिगण पठितानां शब्दानां त्रिषु लिङ्गेषु प्रयोगो भवति।

**उदाहरणानि** – सर्वाः बालिकाः। सर्वे बालकाः। सर्वाणि पुस्तकानि। अन्यः जनः। अन्या छात्रा। अन्यत् पुस्तकम्। सः बालकः। सा बालिका। तत् फलम्।

**इति पाणिनीय लिङ्गानुशासने स्त्रीलिङ्गप्रकरणम्**

**वस्तुनिष्ठप्रश्नाः**

१. ''ईकारान्तश्च'' इति सूत्रस्योदाहरणं किम्?

(अ) नर्तकी (ब) लक्ष्मीः (स) ब्राह्मणी (द) गौरी

२. 'संसद्' इति शब्दस्य प्रयोगः कस्मिन् लिङ्गे भवति?
(अ) पुंल्लिङ्गे (ब) स्त्रीलिङ्गे (स) नपुंसकलिङ्गे (द) पुंनपुंसके

३. याच्यामोघा वरमधिगुणे नाधमे लब्धकामा इत्यत्र याच्त्रा कस्मिन् लिङ्गे प्रयुक्तोऽस्ति।
(अ) स्त्रीलिङ्गे (ब) पुंल्लिङ्गे (स) नपुंसकलिङ्गे (द) स्त्रीपुल्लिङ्गे

४. 'रुत्वन्तः' इति सूत्रस्योदाहरणं किम्?
(अ) दारू (ब) कशेरू (स) सक्तुः (द) सेतुः

५. 'नोपधः' इति सूत्रस्योदाहरणं किम्?
(अ) भवनः (ब) यानः (स) मानः (द) इनः

६. अधोलिखितेषु उभयलिङ्गे प्रयुक्तो भवति?
(अ) दीपः (ब) पापम् (स) रूपम् (द) शूर्पः

७. 'षोपधः' इति सूत्रस्योदाहरणं किम्?
(अ) वर्षः (ब) विषः (स) वृषः (द) यूषः

८. अधोलिखितेषु पुंसि बहुत्वे न प्रयुज्यते।
(अ) दारा (ब) लाजा (स) अक्षत (द) वर्षा

९. अधोलिखितेषु स्त्रीयां बहुत्वे न प्रयुक्तो भवति।
(अ) अप् (ब) समा (स) सिकता (द) लाजा

१०. 'नाम' शब्दः कस्मिन् लिङ्गे प्रयुक्तो भवति?
(अ) पुंल्लिङ्गे (ब) स्त्रीलिङ्गे (स) नपुंसकलिङ्गे (द) पुंनपुंसके

**लघूत्तरात्मक प्रश्नाः -**

१. विंशतितः नवतिपर्यन्तं संख्याशब्दानां लिङ्गविधायकं सूत्रं किम्?
२. 'शष्कुलिः' अस्य किं लिङ्गं केन सूत्रेण च भवति?
३. ल्युट् प्रत्ययान्तस्य शब्दस्य कस्मिन् लिङ्गे प्रयोगो भवति? सूत्रञ्च किम्?
४. 'निष्ठा च' इत्यस्योदाहरणं लिखत।
५. 'त्रिरात्रम्' इत्यत्र लिङ्गनिर्धारकं सूत्रं विलिख्य लिङ्गनिर्णयः करोतु।
६. पद्मः - पद्मम् कमलः-कमलम्, उत्पलः-उत्पलम् इति कथम्? सूत्रदिशा प्रकाशयतु।
७. आम्रम्, वृक्षः इत्यत्र लिङ्गनिर्धारणं सूत्रदिशा विधीयताम्।
८. 'इदं यशः' इत्यत्र किं लिङ्गं केन सूत्रेण च भवति।
९. द्विगु समासान्तः शब्दः किस्मन् लिङ्गे प्रयुक्तो भवति, सोदाहरणं स्पष्टयतु।
१०. 'द्वन्द्वैकत्वम्' इति सूत्रस्य सोदाहरणमर्थो लेख्यः।

**निबन्धात्मक प्रश्नाः -**

१. अप्सुमनस्समासिकता वर्षाणां बहुत्वं च। सूत्रस्यास्य बहुत्वं प्रायिकं कथं?
२. 'शलाका स्त्रियां नित्यम्' सूत्रेऽस्मिन् 'नित्यम्' इति पदस्य किमौचित्यं प्रकाशयतु।
३. 'असन्तो द्वयच्कः' इत्यत्र द्वयच्कः किम्? स्पष्टयतु।
४. 'संख्यापूर्वारात्रिः' सूत्रेऽस्मिन् संख्यापूर्वेति किम्?
५. तिसृ, चतसृ अनयोः ऋकारान्तत्वेऽपि "ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः" अस्मिन् सूत्रे कथं न ग्रहणम्?

# व्याकरणशास्त्रम्

## (द्वितीयो भागः)

### वरिष्ठोपाध्यायः

माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः

# पाठ्य-पुस्तक-निर्माण-समितिः

## व्याकरणशास्त्रम् ( द्वितीयो भागः )

### वरिष्ठोपाध्याय-कक्षायै स्वीकृतं पाठ्यपुस्तकम्


संयोजकः व्याख्याकारश्च- डॉ. मोहन लाल शर्मा
प्रोफेसर-विभागाध्यश्च
राजकीय-महाराजा-आचार्य-संस्कृत-महाविद्यालयः,
गांधी नगरम्, जयपुरम्

व्याख्याकाराः - डॉ. हंसराज गुप्ता, व्याख्याता
राजकीय-विट्ठलनाथ-सदाशिवपाठक-आचार्य
संस्कृत-महाविद्यालयः, कोटा

श्री राम रतन कुमावतः, प्राध्यापकः
राजकीय-वरिष्ठ-उपाध्याय-संस्कृत-विद्यालयः
किशनगढ़-रेनवालनगरम्, जयपुरम्

श्री मुकेश कुमार शर्मा, प्राध्यापकः
राजकीय-वरिष्ठ-उपाध्याय-संस्कृत-विद्यलयः
मोरीजा, जयपुरम्

# पाठ्यक्रम–निर्माण–समितिः

## व्याकरणशास्त्रम् ( द्वितीयो भागः )

**वरिष्ठोपाध्याय–कक्षायै स्वीकृतं पाठ्यपुस्तकम्**

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–
1. श्री बहादुर सिंह गुर्जर
सहायक निदेशक, संस्कृत शिक्षा, राजस्थान, जयपुर

2. श्री नाथूलाल सुमन, संयुक्त सचिव
उच्च शिक्षा शासन सचिवालय, जयपुर

3. योगेन्द्र धामा, व्याख्याता
राजकीय महाविद्यालय, अलवर

4. डॉ. हरि सिंह राजपुरोहित, व्याख्याता,
राजकीय महाविद्यालय, ओसियां, जोधपुर

5. श्री हरिओम गौतम, व्याख्याता
राजकीय शास्त्री संस्कृत महाविद्यालय, भरतपुर

6. श्री रामावतार सिंह, प्रधानाध्यापक,
आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, धौलपुर

7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, डूंगरपुर

8. श्री महेश चन्द्र शर्मा, वरि. अध्यापक,
राजकीय वरि.उपाध्याय संस्कृत विद्यालय, सावर, अजमेर

# शब्दद्वयम्

पाठ्यपुस्तकमिदं विद्यार्थिनां कृते क्रमबद्धाध्ययन-पुष्टीकरण-समीक्षणादीनाम् आगाम्यध्ययनस्य च आधारः विद्यते। विषयवस्तुनः शिक्षणविधेश्च दृष्ट्या विद्यालयीय-पाठ्यपुस्तकानां स्तरः अत्यन्तं महत्त्वपूर्णः भवति। पाठ्यपुस्तकानि कदापि स्थावराणि वा असन्महिमामण्डनकराणि वा न भवेयुः। अद्यापि पाठ्यपुस्तकं शिक्षणाधिगम-प्रक्रियायाः एकम् अनिवार्यम् उपकरणं विद्यते, यस्य वयम् उपेक्षां कर्तुं नैव शक्नुमः।

विगतवर्षेषु माध्यमिक-शिक्षा-मण्डल-राजस्थानस्य पाठ्यक्रमे भाषागत-सांस्कृतिकस्थितीनां प्रतिनिधित्वस्य अभावः अनुभूयते स्म। एतत् दृष्टिगोचरं कृत्वा राज्यसर्वकारेण नवमी/प्रवेशिका-कक्षातः द्वादशी/वरिष्ठोपाध्याय-कक्षापर्यन्तम् अध्ययनरतानां विद्यार्थिनां कृते माध्यमिक-शिक्षा-मण्डल-राजस्थान-अजयमेरुद्वारा स्वकीयं पाठ्यक्रमं संचालयितुं निर्णयः कृतः।

तदनुसारं बोर्डद्वारा शिक्षणसत्र - २०१७-२०१८ तः दशमी/प्रवेशिका-द्वादशी/वरिष्ठोपाध्याय-कक्षाणां पाठ्यपुस्तकानि निर्धारित-पाठ्यक्रमानुसारं प्रस्तुतानि। आशासे यत् एतानि पुस्तकानि विद्यार्थिषु मौलिक-चिन्तन-मनन-स्वाध्यायाभिव्यक्तीनाम् अवसरान् समुत्पादयिष्यन्ति।

**प्रो. बी.एल. चौधरी**
**अध्यक्षः**
**माध्यमिक-शिक्षा-बोर्ड-राजस्थानम्, अजयमेरुः**

# प्रास्ताविकं किञ्चित्

**वृन्दावनकालानाथो, हृदयानन्दवर्द्धनौ।**
**सुखदो राधिकाकृष्णो, भजेऽहं कुञ्जगामिनो।।**

**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा** इति मूलमन्त्रमाधारीकृत्य संस्कृतस्याध्यापनमध्ययनञ्च भवतः। मुखं व्याकरणं स्मृतम् इति व्याकरणस्य वैशिष्ट्यं प्रतिपादयति। पुनश्च-**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सतम्। पवित्रं सर्वविद्यानामधिविधं प्रकाशते।।** इति वाक्यपदीयकर्त्रा निर्देशने संस्कृतविभागीयविद्यालयेषु वरिष्ठोपाध्यायक क्षायामध्ययनार्थं माध्यमिकशिक्षाबोर्डनिर्देशने व्याकरणशास्त्रं द्वितीयोभागः नाम पुस्तकमिदं लेखकैः प्रस्तुतम्। अत्र व्याकरणमवगन्तुं हलन्तपुंल्लिङ्ग-नुपंसकलिङ्ग-अव्यय-स्त्रीप्रत्यय-कारक-लिङ्गानुशासन-प्रकरणानि च लिखितानि सन्ति। व्याकरणस्य वैइशष्ट्यं सर्वैः जानन्त्येव प्रायशः-

**यद्यपि बहुनाधीषे पठ पुत्र व्याकरणम्। स्वजनः श्वजनो माभूत् सकलं सकृच्छकृत्।**

श्रीमान् भट्टोजिदीक्षितेन विरचित-वैयाकरण-सिद्धान्त-कौमुद्याः व्याख्या उपर्युक्तप्रकरणानामत्र रूपलेखनप्रकारसहिता लिखितास्ति। व्याख्येयं छात्राणामुपकाराय भविष्यति।

पुस्ततमिदं सुरुचिरं विधातुं सन्नद्धाः सुलेखकाः व्याख्याकाराः धन्यवादार्हाः। अस्मिन् कार्ये प्रत्यक्ष-परोक्षरूपेण यैः विद्वद्भिः मार्गदर्शनं प्रदत्तम्। वयं तेषां सर्वेषां महानुभावानां कृते हृदयतः कृतज्ञतां साधुवादान् च ज्ञापयामः।

**सम्पादकः लेखकगणश्च**

# पाठ्यक्रम

## कक्षा-वरिष्ठोपाध्यायः
## व्याकरणशास्त्रम्

समय : 3.15 होरा | पूर्णांकाः 80

| क्र.सं. | अधिगमक्षेत्रम् | अंकभारः |
|---|---|---|
| 1. | वैयाकरण-सिद्धान्तकौमुदी-(हलन्तपुंल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-अव्यय-स्त्रीप्रत्यय-कारकप्रकरणानि) | 70 |
| 2. | लिङ्गानुशासनम् | 10 |
| | | **80** |

| क्र.सं. | पाठ्यवस्तु | अंकभारः |
|---|---|---|
| 1. | (क) हलन्तपुंल्लिङ्गप्रकरणम् | 20 |
| | (ख) हलन्तस्त्रीलिङ्गप्रकरणम् | 10 |
| | (ग) हलन्तनपुंसकलिङ्गप्रकरणम् | 10 |
| | (घ) अव्ययप्रकरणम् | 05 |
| | (ङ) स्त्रीप्रत्ययप्रकरणम् | 10 |
| | (च) कारकप्रकरणम् | 15 |
| 2. | लिङ्गानुशासनम् | 10 |

# विषयानुक्रमणिका


| क्र.सं. | शीर्षकम् | पृष्ठ-संख्या |
|---|---|---|
| १. | अथ हलन्तपुँल्लिङ्गप्रकरणम् | १-६६ |
| २. | अथ हलन्तस्त्रीलिङ्गप्रकरणम् | ६७-७३ |
| ३. | अथ हलन्तनपुंसकलिङ्गप्रकरणम् | ७४-९८ |
| ४. | अथ अव्ययप्रकरणम् | ९९-१०७ |
| ५. | अथ स्त्रीप्रत्ययप्रकरणम् | १०८-१७० |
| ६. | अथ कारकप्रकरणम् | १७१-२५४ |
| ७. | अथ लिङ्गानुशासनम् | २५५-२९६ |